University of Mysore

Oriental Library Publications

GENERAL EDITOR

M. S. BASAVALINGAYYA, M.A., B.L.,
Curator, Govt. Oriental Library, Mysore.

SANSKRIT SERIES No. 78

अद्वैतसिद्धिः

गुरुचन्द्रिकाख्यव्याख्यासमलङ्कृता

द्वितीयसम्पुटम्

THE ADVAITASIDDHI

WITH THE

GURUCANDRIKA

Vol. II

EDITED BY

VIDVAN S. NARAYANASWAMI SASTRI

MYSORE
THE ASST. SUPDT., GOVT. B.
1937

SGDF
Sri Gurgesaswari Digital Foundation

Price: Rs. 3-4-0.

SGDF
Sri Gargeshwari Digital Foundation

University of Mysore

Oriental Library Publications

GENERAL EDITOR

M. S. BASAVALINGAYYA, M.A., B.L.,
Curator, Govt. Oriental Library, Mysore.

SANSKRIT SERIES No. 78

अद्वैतसिद्धिः

गुरुचन्द्रिकाख्यव्याख्यासमलङ्कृता

द्वितीयसम्पुटम्

THE ADVAITASIDDHI

WITH THE

GURUCANDRIKA

Vol. II

EDITED BY

VIDVAN S. NARAYANASWAMI SASTRI

MYSORE
PRINTED BY THE ASST. SUPDT., GOVT. BRANCH PRESS
1937

SGDF
Sri Gangeshwari Digital Foundation

7017-1D

Acc. No : 7
181.482
RL11 .91.1,2
.3
Acc 1239
SGDF
Sri Gangeshwari Digital Foundation

द्वितीयसंपुटगतानां विषयाणमनुक्रमाणिका.

SGDF
Sri Gargeshwari Digital Foundation

SGDF
Sri Gurgeshwari Digital Foundation

शुद्धाशुद्धपत्रिका.

पुटम्.	पाङ्क्तिः.	अशुद्धम्.	शुद्धम्.
4	24	पुस्तक	पुस्तके
6	15	वबोध	त्वबोध
13	2	व्यहारः	व्यवहारः
25	20	सद्रपस्य	सद्रूपस्य
44	3	विषंयित्व	विषयित्व
50	23	समवते	समवेत
60	10	तज्ज्ञन	तज्ज्ञान
65	11	शुद्ध	(शुद्ध
65	12	व्यवहार·	व्यवहारः)
76	22	न्याये—दृ. ढ.	न्याये दृढ
121	21	वास्विति	वास्त्विति
123	19	काल	काले
124	17	ऽहेतुकप्रतिसन्धानप्यङ्कर	हेतुकप्रतिसन्धानेऽप्यङ्कुर
137	12	धर्म 3	धर्म2
143	17	भाव	भावा
219	20	भागान्वय·	भागन्वयः
219	21	द्भवाः	द्भवः
220	7	ज्ञानाऽपूर्व	ज्ञानात्पूर्व
243	11	आपादेत	आपादिते
245	14	भेदाथर्कत्वं	भेदार्थकत्वं
266	11	द्वोधः	द्बोधः
,,	20	एको द्व	एको द्वा
270	18	द्विरुद्दाना	द्विरुङ्नाना
292	12	सतायोग	सत्तायोग
431	4	युष्माकामन्य	युष्माकमन्य
,,	23	त्यदि	त्यादि

SGDF
Sri Gangeshwari Digital Foundation

SGDF
Sri Gargeshwari Digital Foundation

सव्याख्या अद्वैतसिद्धिः

द्वितीयसम्पुटम्

अद्वैतसिद्धिः

अथासतः साधकत्वोपपत्तिः

ननु सत्त्वसाधकानां मिथ्यात्वसाधकानुमानेभ्यः प्राबल्यम्, मिथ्यात्वसाधकप्रतिज्ञाद्युपनीतपक्षादीनां मिथ्यात्वाबोधने सर्वमिथ्यात्वासिद्धिः । तद्बोधने परस्परव्याहति-

---

गुरुचन्द्रिका

अथासतः साधकत्वोपपत्तिः

परस्परेति । मिथ्यात्वसाधकानां न्यायवाक्यघटकप्रतिज्ञादीनामनुमितेश्च मिथो व्याघातः; प्रतिज्ञया मिथ्यात्वस्य हेतुवाक्यादिना हेतुत्वादेश्चाबाध्यत्वलाभः, प्रतिज्ञाद्यधीनानुमित्या च मिथ्यात्वादिरूपस्य दृश्यमात्रस्य मिथ्यात्वरूपबाध्यत्वलाभ इति व्याघातात् । एवं पक्षादौ तद्विशेषणीभूतधर्माणामभावस्य मिथ्यात्वानुमित्या विषयीकरणादाश्रयासिद्ध्यादिकम् । तथाचोक्तव्याघाताादिसत्त्वेन[1] मिथ्यात्वसाधकं दुर्बलमिति भावः । प्रतिज्ञादिना मिथ्यात्वादेरबाध्यत्वं कथं लभ्यते?

---

[1] समत्वेन ग.

SGDF
Sri Gangeshwari Digital Foundation

राश्रयासिद्ध्यादिकं चेति चेन्न; मिथ्यात्वसाधकप्रतिज्ञाद्युपनीतपक्षादीनां मिथ्यात्वबोधनेऽपि व्याहत्यभावात्, प्रतिज्ञादिभिस्तेषां त्रिकालाबाध्यत्वरूपसत्त्वाप्रतिपादनात्। ननु

तेन तस्य तथा बोधनात्, तस्य तत्प्रमेयत्वानुपपत्तेर्वा। नान्त्यः; व्यवहारकालबाध्यत्वेनैव तत्प्रमेयत्वोपपत्तेरित्याशयेनाह—**मिथ्यात्वेति**। आद्यं प्रत्याह—**प्रतिज्ञादिभिरिति**। **त्रिकालाबाध्यत्वेति**। तदर्थकपदस्य प्रतिज्ञादावभावान्न तस्य तद्बोधकत्वम्, धीमात्रस्य त्रिकालाबाध्यरूपसद्रूपविषयकत्वपक्षेऽपि सद्रूपतादात्म्येन स्वविषयं[1] धीमात्रमवगाहते, न तु त्रिकालाबाध्यत्वरूपसत्त्वेनेति भावः॥

नन्वेवमप्याश्रयासिद्ध्यादिकं स्थितमेव; न च मिथ्यात्वानुमितेः पूर्वमाश्रयासिद्ध्यादिनिश्चयाभावात्तस्या उत्पत्तिरविरुद्धेति वाच्यम्; कार्यकालेऽपि बाधबुद्ध्यभावस्यापेक्षणीयत्वेन मिथ्यात्वानुमितेर्दृश्यमात्रस्य स्वाधिकरणनिष्ठाभावप्रतियोगित्वावगाहिन्या उत्पत्त्यसम्भवात्, प्रतिज्ञादिजन्यमिथ्यात्वबोधेन तस्याः पूर्वमप्याश्रयासिद्ध्यादिविषयीकरणाच्चेति चेन्न; व्याहत्यभावादित्यनेनैवाश्रयासिद्ध्यादिकृतस्यानुमित्यादिव्याघातस्यापि निरसनात्। तथाहि—अनुमित्या प्रतिज्ञादिजन्यबोधेन वा पक्षतावच्छेदकविशिष्टे मिथ्यात्वं बोध्यते। न च तावता आश्रयासिद्धिधीः[2]; पक्षविशेषणतावच्छेदकरूपेण पक्षनिष्ठाभावप्रतियोगित्वानिश्चयस्याजातत्वात्। एवं न स्वरूपासिद्ध्यादिकमपि, हेतुतावच्छेदकादिविशिष्टे पक्षादिनिष्ठाभावप्रतियोगित्वनिश्चयाभावात्। विशेषानुमाने उक्तरूपविशिष्टे स्वाश्रयनिष्ठाभावप्रतियोगितात्वविशिष्टप्रकारकनिश्चयेऽपि नाश्रयासिद्ध्यादिशङ्कापि। किञ्चाश्रयासिद्ध्यादिलक्षणे प्रतियोगिव्यधिकरणाभावस्यावश्यं निवेश्यत्वान्मिथ्यात्वघटकाभावस्य चातथात्वान्न दोषः॥

---

[1] त्वविषयं क. [2] सिद्धिबाधधीः.

SGDF
Sri Gargeshwari Digital Foundation

साधकत्वान्यथानुपपत्त्या परमार्थसत्त्वमायाति; परमार्थसत एव साधकत्वात्, साधकतायाः प्राक्सत्त्वघटितत्वात्, न तु धीमात्रविषयत्वमपरोक्षधीविषयत्वं सत्त्वेन तादृशधीविषयत्वं वा साधकताप्रयोजकम्; तुच्छे नित्यातीन्द्रिये चाव्याप्त्यतिव्याप्तिभ्याम्। तत्त्वेन ज्ञानमपि न तत्र प्रयोजकम्; वह्नित्वेनाज्ञातेऽपि वह्नौ दाहकत्वदर्शनात्, वह्नित्वेन ज्ञातेऽपि गुञ्जापुञ्जे तददर्शनाच्च। नापि त्रिचतुरकक्ष्यास्वबाधिता सत्त्वप्रतीतिस्तन्त्रम्; आत्मनो गौर-

---

यत्तु प्रतिज्ञादिभिस्त्रिकालसत्त्वाग्रहणेऽपि कदाचित्सत्त्वेन स्वविषयग्रहणात् त्रिकालासत्त्वग्राहिण्या मिथ्यात्वानुमितेर्विरोध इति, तत्तुच्छम्; तैः कदाचित्सत्त्वेनापि स्वविष[1]याग्रहणात् तत्तद्बोधक[2]पदाभावादेरुक्तत्वात्। अथ धीमात्रस्य स्वकालाबाध्यविषयकत्वेन साक्षिणा ग्राह्यत्वनियमः, तथापि तस्यौत्सर्गिकत्वेन मिथ्यात्वग्राहकबुद्धौ तदपवादसम्भवान्न दोषः। न हि स्वतः प्रामाण्यवादे [3]प्रामाण्याभावग्राहकसामग्रीसत्त्वेपि स्वतःप्रामाण्यधीः। वस्तुतस्त्वज्ञातविषयकानिश्चयत्वरूपेण सर्वदृश्ये मिथ्यात्वनिश्चयात्पूर्वं मिथ्यात्वाज्ञानकाले वा मिथ्यात्वेनाज्ञातं यत्तद्विषयकनिश्चयत्वरूपेण मूलाज्ञानतत्प्रयुक्तान्यतरविषयकनिश्चयत्वरूपेण जातिविशेषरूपेण वा प्रमात्वेनैव धीमात्रस्य साक्षिग्राह्यत्वनियमो न तूक्तनियम इत्युक्तप्रायम्। तथाच तादृशप्रमात्वग्रहकालेपि मिथ्यात्वानुमितौ न विरोध इति ध्येयम्॥

साधकत्वेति। प्रतिज्ञादेः सिद्धिजनकत्वेत्यर्थः। ननु सत्यत्वरूपं सत्त्वं न साधकताघटकम्, किंतु धीविषयत्वादिरूपं, तत्राह— **न तु धीति**। धीमात्रं धीत्वविशिष्टं साधकता[4]घटकसत्त्वरूपम्।

---

[1] स्वविषयग्रहणात्. [2] तत्र तद्बोधक **ख.** [3] प्रामाण्यभाव ख. [4] धीत्वविशिष्टं साधकताप्रयोजकं साधकता इति–**ग.**

SGDF
Sri Gargeshwari Digital Foundation

त्वेनानित्यत्वस्य नभसो नैल्येन स्पर्शवत्त्वस्य चापत्तेः। 'गौरोऽहं' 'नीलं नभ' इत्यादिप्रतीतावपि त्रिचतुरकक्ष्यास्वबाधात्, यौक्तिकबाधस्य त्वन्मते प्रकृतेऽपि भावादिति—चेन्न; यादृश्या बुद्ध्या तव नभोनैल्यादिधीव्यावृत्तया घटादौ सत्त्वसिद्धिः, तादृग्बुद्धिविषयत्वस्यैव साधकत्वे तन्त्रत्वात्। अत एव 'लोकप्रसिद्धिस्तन्त्रं' इतीष्टसिद्ध्युक्तमप्युक्ताभिप्रायेण सम्यगेव। एवं त्रिचतुरकक्ष्यास्वबाधिता वादिप्रतिवादिप्राश्निकादीनां सत्त्वबुद्धिस्तन्त्रमित्युपपन्नमेव। गुञ्जापुञ्जस्य वह्नित्वे आत्मनो गौरत्वे नभसो नीलत्वे च तादृग्बुद्धिविषयत्वस्य तवाप्यसम्प्रतिपत्तेः। अन्यथा तेषामपि तत्र सत्त्वसिद्धिप्रसङ्गात्। अथ—यादृश्या शब्दे क्लृप्तदोषरहितया बुद्ध्या तव ब्रह्मणि सत्त्वसिद्धिः, तादृश्या प्रत्यक्षे क्लृप्तदोषरहितया मम जगति सत्त्वसिद्धिरस्तु, साधकतुल्यत्वादिति—चेन्न; ब्रह्मसत्त्वबुद्धिवज्जगत्सत्त्वबुद्धेरबाधितत्वाभावात्, त्रिकालाबाध्यत्वरूपस्य सत्त्वस्य प्रत्यक्षाविषयताया उक्तत्वाच्च। न च बुद्धिविषयत्वस्य तन्त्रत्वे वह्नित्वेनाज्ञातस्य वह्नेरदाहकत्वप्रसङ्गः, अमृतत्वेन ज्ञातस्य च विषस्य संजीव-

---

तादृग्बुद्धीति। व्यावहारिकसत्त्वेन धीरेव तादृशीति भावः। उक्तमेतत्खण्डने। कथं पुनरसतः कारणत्वमवसेयम्? प्राक्सत्त्वनियमानभ्युपगमादसत्वस्य सर्वासत्त्वविशेषादिति चेन्न; इदमस्मान्नियतप्राक्सदिति बुद्ध्या विशेषात्। न चातिप्रसङ्गः; यादृश्या त्रिचतुरकक्षा[1]बाधानवबोधविश्रान्तया वस्तुसत्तानिश्चयस्ते, तादृश्यैव कारणतानिश्चयो ममापीति। **आत्मनो गौरत्व इति**। पारलौकिकफलोद्देशेन वैदिककर्मानुष्ठानायापेक्षितेन देहात्मनोर्भेदनिश्चयेन आत्मगौरत्वादे[2]र्व्यवहार-

[1] कक्ष्या. [2] व्यवहारकाल इत्यारभ्य न तु तद्धीरित्यन्तो ग्रन्थः—क पुस्तके न दृश्यते.

SGDF
Sri Gargeshwari Digital Foundation

कत्वप्रसङ्ग इति वाच्यम्; वह्नौ तादृग्बुद्धिविषयत्वस्येश्वरादिसाधारणस्य सत्त्वात्। विषे सञ्जीवकत्वप्रसङ्गस्य नभोनैल्यादितुल्यत्वात्। वस्तुतस्तु—ज्ञाताज्ञातसाधारणं व्यावहारिकं सत्त्वमेव साधकत्वे तन्त्रम्; तच्च ब्रह्मज्ञानेतराबाध्यत्वमेव; तच्च न मिथ्यात्वघटितम्; अत्यन्ताबाध्ये ब्रह्मज्ञानबाध्ये च तुल्यत्वात्। अत एव नेदं परमार्थसत्त्वव्याप्यम्। एवं च परमार्थसत्त्वस्य साधकतायामतन्त्रत्वेन तदभावेऽपि न साधकतानुपपत्तिः। एतेन व्यावहारिकत्वं ब्रह्मज्ञानबाध्यत्वं वा, व्यावहारिकविषयत्वे सति सत्त्वं वा, सत्त्वेन व्यवहारमात्रं वा। नाद्यः मिथ्यात्वसिद्धेः प्राक् तदसिद्ध्या अन्योन्याश्रयात्। न द्वितीयः; तस्यास्माकं मिथ्यात्वाविरोधि[1]त्वेनेष्टत्वात्। न तृतीयः; सत्त्वाभावे साधकत्वानुपपत्तेरिति निरस्तम्; उक्तनिरुक्तेरदुष्टत्वात्। न च हेत्वादीनां व्यावहारिकसत्त्वे साध्यस्यापि व्यावहारिकसत्त्वमेव स्यात्, अनुमितिविषयसाध्यस्य परामर्शविषयहेतुना समानसत्ताकत्व-

---

काले बाधात् व्यवहारकालाबाध्यसत्त्वघीर्न तन्त्रेति भावः। **नैल्यादितुल्यत्वात्**। नैल्यादेस्साधकताप्रसङ्गतुल्यत्वात्। उक्तखण्डनवाक्ये व्यावहारिकसत्त्वमेव कारणताघटकमभिमतम्। मिथ्याभूतेऽपि तदङ्गीक्रियते, बुद्धिबलात् 'सत्यस्य सत्यम्' इत्यादि श्रुतिबलाच्चेत्याशयेन बुद्ध्या विशेषादित्युक्तम्, न तु तद्धीः कारणताघटिका, गौरवादित्यभिप्रेत्याह—**वस्तुतस्त्वित्यादि**। **व्यावहारिकसत्यमेवे**त्येवकारेण पारमार्थिकसत्त्वमेव प्रयोजकमिति नियमो व्यवच्छिद्यते। तेन प्रातीतिकसत्त्वस्यापि प्रयोजकतया वक्ष्यमाणत्वेऽपि न क्षतिः। तत्त्वावेदकत्वेत्यत्र तत्त्वं व्यवहारकालाबाध्यमबाध्यं वा, आद्ये आह—**सत्त्वेनेति**।

---

[1] त्वविरोधि

SGDF
Sri Gargeshwari Digital Foundation

नियमादिति वाच्यम् ; दृश्यत्ववन्मिथ्यात्वस्यापि व्यावहारिकत्वेन समानसत्ताकत्वस्येष्टत्वात्, समानसत्ताकत्वनियमासिद्धेश्च, धूलीपटले धूमभ्रमादपि वह्न्यनुमितिप्रमादर्शनात्, गन्धव्याप्यपृथिवीत्वप्रमातोऽपि गन्धप्रागभावावच्छिन्ने घटे पक्षे बाधास्फूर्तिदशायामनुमितिभ्रमदर्शनाच्च । मिथ्यात्वस्य मिथ्यात्वेऽपि तत्त्वावेदकश्रुतिवेद्यत्वोपपत्तिः ; सत्त्वेन सत इव मिथ्यात्वेन च मिथ्याभूतस्यापि प्रमाणगम्यत्वाविरोधात्, एकांशे तत्त्वावेदकत्वाभावेऽप्यपरांशे तत्त्वावेदकत्वोपपत्तेः । ननु व्यावहारि-

---

व्यावहारिकसत्त्वेनेत्यर्थः । **प्रमाणेति** । व्यावहारिकप्रमाणेत्यर्थः । द्वितीये आह--**एकांश इति** । मिथ्यात्वांश इत्यर्थः । अशान्तर इति । मिथ्यात्वघटकात्यन्ताभावस्य तात्त्विकत्वे तदंशे तत्त्वावेदकत्वम्, तस्य व्यावहारिकत्वे[1] तु परमतात्पर्यविषयाद्वैतब्रह्मांशे तदिति भावः ॥

यत्तु—'मिथ्यात्वेन मिथ्यात्वबोधकत्वं श्रुतेर्न युक्तम्, ब्रह्मण इव मिथ्यात्वस्यापि तात्त्विकस्यैव श्रुत्या बोधनस्य युक्तत्वात्, मिथ्यात्वबोधकवाक्ये मिथ्यात्वेन मिथ्यात्वबोधकपदाभावाच्च' इति, तन्मुखमस्तीत्युक्तम्; सत्यं ज्ञानमित्यादिश्रुतिगतसत्यादिपदेन बाधाभावेन च ब्रह्मणः सत्यत्वसिद्धावपि मिथ्यात्वस्य तदसम्भवात् । नेह नानेत्यादिश्रुत्या मिथ्यात्वादिसाधारणसर्वदृश्यमिथ्यात्वबोधनात् । यदपि ब्रह्मज्ञानान्याबाध्यत्वं न साधकत्वे प्रयोजकम्; किंत्वबाध्यत्वम्, लाघवात्, ब्रह्मणो वृत्त्यविषयत्वपक्षे जगतोऽपि ब्रह्मज्ञानेतरबाध्यत्वाच्च, शुक्तिज्ञानस्यापि सद्रूपब्रह्मविषयकत्वेन शुक्तिरूप्येऽपि ब्रह्मज्ञानान्या[2] बाध्यत्वसत्त्वाच्चेति, तदपि तथा; बाध्यत्वं हि ज्ञानजन्याविद्याध्वंसजन्यध्वंसप्रतियोगित्वादिरूपं 'सविलासाज्ञाननिवृत्तिर्बाध' इति विव-

---

[1] व्यावहारिकत्वं—ख, [2] ज्ञानान्य—ख.

SGDF
Sri Gargeshwari Digital Foundation

कत्वं साधकतायामतन्त्रम्, अज्ञानादिसाधके परमार्थसति साक्षिणि तदभावादिति चेन्न ; ब्रह्मज्ञानेतराबाध्यत्वस्यात्यन्ताबाध्येऽपि सत्त्वस्योक्तत्वात्। त्रैविध्यविभागे पारमार्थिकव्यावृत्तव्यावहारिकत्वनिरुक्तावपि जनकतायां तत्साधारण्येऽप्यदोषात्। वस्तुतस्तु साक्ष्यप्यज्ञानोपहित एवाज्ञानादिसाधकः ; स च

रणाद्युक्तेः। तथाच जन्यताया अवच्छेदकभेदेन भेदात् ब्रह्मज्ञानजन्यता ज्ञानान्तरजन्यता चान्यतरत्वेन त्वया निवेश्येति, ब्रह्मज्ञानाद्यजन्य[1]तात्वेन निवेशे लाघवमेव स्फुटम्, गौरवं तु दूरे। किञ्च ब्रह्मज्ञानान्य[2]बाध्यत्वं तद्योग्यतारूपं वाच्यम्, अन्यथा ब्रह्मज्ञानबाध्यप्रातीतिकासाधारण्यापत्तेः। तच्च मूलाज्ञानतत्प्रयुक्तान्यतरभिन्नदृश्यत्वम्, तदभावश्च ब्रह्मतद्धीबाध्यसाधारणः, उक्तान्यतरत्वं वा प्रयोजकम्। तथाच बाध्यतात्वावच्छिन्नप्रतियोगिताकत्वसम्बन्धेन [3]बाध्यत्वं विशिष्टाभावापेक्षया लाघवं तत्र स्फुटमेव। कालसम्बन्धित्वादेस्तुच्छव्यावृत्तस्य प्रयोजकत्वे तु सुतराम्। शुद्धब्रह्मणो वृत्त्यविषयत्वमतेऽपि न दोषः, येन रूपेण प्रपञ्चबाधकता, तेन रूपेण निवेशात्, जातिविशेषस्यैव तादृशरूपत्वात्, वृत्त्युपहितब्रह्मान्यविषयकज्ञानस्यान्यान्तेन विवक्षितत्वाद्वा। अतएव शुक्तिज्ञानस्य तद्रूपाभावान्नोक्त[4]दोषः। शुक्तिरूप्ये [5]तादृशाबाध्यत्वोक्तिस्तु शोभते ; ज्ञानमात्रस्य ब्रह्मज्ञानत्वे तदन्यबाध्यत्वाप्रसिद्धेः॥

अज्ञानादिसाधक इति—यद्यपि साक्षी अज्ञानादिसिद्धिरेव न तज्जनकः, नार्थज्ञानादौ[6] संशयाद्यभावप्रयोजकः ; अज्ञानस्यैव स्वसंशयाद्यभावप्रयोजकत्वात्। ज्ञानादेरिवाज्ञानस्यापि तार्किकादिरीत्या स्वाभावधीप्रतिबन्धकत्वात्। [7]तथाप्यज्ञाने साक्षिण एव स्वसंशयाद्यभाव-

[1] ज्ञानजन्य--ख. ब्रह्मज्ञानान्यज्ञान--ग. [2] ज्ञानान्या. [3] बाध्यत्वविशिष्टा--ग.
[4] तद्रूपान्ताभावेनोक्त. [5] तादृश. [6] नाप्यज्ञातांशे, नाप्यज्ञानादौ--क. ख. ग.
[7] तथाप्यज्ञानस्य साक्षिसम्बद्धस्यैव--क, सम्बद्धस्यैव--ग.

SGDF
Sri Gargeshwari Digital Foundation

व्यावहारिक एव, अनुपहितेन परमार्थसदाकारेण तस्यासाधकत्वात्। एवंच व्यावहारिकसत्त्वमेव सर्वत्र साधकतायां प्रयोजकमिति स्थितम्। यथा चाज्ञानोपहितस्य साक्षित्वेऽपि नात्माश्रयादिदोषः, तथोक्तं दृश्यत्वहेतूपपादने प्राक्, अग्रे च वक्ष्यते। यत्र च यत्साधकं व्यावहारिकं, तत्र तद्व्यावहारिकम्। यत्र तु साधकं प्रातीतिकं, तत्र फलमपि तथैव, न तु व्यावहारिकमिति सर्वविधिप्रतिषेधादिव्यवहारासङ्करः। अत एव लोकस्यापि

प्रयोजकत्वम्। मन्मते घटज्ञानादेरप्युक्तप्रतिबन्धकत्वाभावात्। घटज्ञानादेस्साक्षिभास्यत्वनियमेन साक्षिण एव तत्संशयादिप्रतिबन्धकत्वात्। अज्ञानज्ञानकार्ये चाज्ञानज्ञानत्वादिना कारणत्वं साक्षिण एवाज्ञानोपहितस्येति भावः। **परमार्थसदाकारेणेति**। शुद्ध [1]ब्रह्म न जगत्कारणमिति मतावलम्बनाच्च न दोष इति भावः। **व्यावहारिकसत्त्वमेवेति**। एवकारात्पारमार्थिकसत्त्वमप्रयोजकमित्यर्थः। तेन 'यत्र तु साधकं प्रातीतिक'मिति वक्ष्यमाणं न विरुद्धम्। नन्वेवं व्यावहारिकप्रातीतिकयोः कारणत्वे स्वाप्नेन यागादिना स्वर्गादिकं, ब्रह्महत्यादिना च नरकादिकं व्यावहारिकं स्यात्, तयोः प्रातीतिकमेव स्वर्गादि फलं, अनेन कर्मणा मम स्वर्गादिकं भविष्यतीति परोक्षतया स्वर्गादिप्रतीतेरिति स्वीकारे व्यावहारिकयागादिनापि प्रातीतिकमेव स्वर्गादि स्यात्, एवं व्यावहारिकदण्डादिना प्रातीतिकघटाद्यपि स्यात्तत्राह— **यत्र चेति**। **तद्व्यावहारिकमिति**। तद्व्यवहारसिद्धमित्यर्थः। **तथैव** व्यवहारसिद्धमेव। यादृशस्य यादृशफलं व्यवहारतः प्रमितं तादृशस्य तादृशमेवेति भावः। **न तु व्यावहारिकम्**। न तु व्यावहारिकसत्त्वाश्रय एव। **व्यवहारासङ्करः**। उक्तसङ्करस्याभावः। एतेन—

---

[1] ब्रह्म जग–ख.

SGDF
Sri Gangeshwari Digital Foundation

व्यतिक्रमे विचारस्य यादृच्छिकबाधात् भ्रान्तत्वापत्तिरित्युदयनोक्तमपि निरस्तम् ; व्यावहारिकसत्त्वेन लोकमर्यादानतिक्रमात् ।

व्यावहारिकयोरेव साध्यसाधकभावे प्रातीतिकसवितृसुषिरादिकमप्रातीतिकानिष्टसाधकं न स्यात्, शुभाशुभस्वप्नदर्शनादेर्व्यावहारिकराज्यादिसूचकत्वं न स्यादित्यादि प्रत्युक्तम् । यथामानसिद्धस्य साध्यसाधकभावस्यैव प्रकृतग्रन्थार्थत्वात् । अतएव धूलीपटले धूमभ्रमादित्याद्युक्तम् । स्वाप्नार्थस्य शुभाशुभसूचकत्वमित्यादि वक्ष्यते च । किञ्च मन्मते प्रपञ्चस्य मिथ्यात्वेऽपि त्वां प्रति साधकतया दृश्यत्वाद्युपन्यसितुं मया शक्यत एव ; त्वद्रीत्या त्वद्बोधनसम्भवात् ॥

योपि तावत्परासिद्धः स्वयं सिद्धोऽभिधीयते ।
भवेत्तत्र प्रतीकारः स्वतोऽसिद्धे तु का क्रिया ॥

इति बौद्धं प्रति भट्टोक्तेः[1] । परमतासिद्धः, स्वमतासिद्धः साधकत्वेनोपन्यासार्हः, तत्र साधकस्य पश्चाद्वक्तुं शक्यत्वात् । स्वमते परमते [2]वाऽसिद्धस्तु न तथेत्यर्थकत्वादविरोधात् । न हि शब्दप्रयोगे स्वमतासिद्धत्वमर्थस्यापेक्षितम् । अपिच पारमार्थिकसत्तासम्बन्धस्य प्रयोजकत्वेऽपि आरोपितेऽपि सोऽस्त्येवारोपितः । अनारोपितस्तु न मन्मते प्रसिद्धः ।

सत्यत्वं न च सामान्यं, मृषार्थ[3] परमार्थयोः ।
विरोधात् न हि सिम्नत्वं सामान्यं सिम्नवृक्षयोः ॥
तुल्यार्थत्वेऽपि तेनैष मिथ्यासंवृति[4] शब्दयोः ।
वचनार्थमुपन्यासो लालावक्रासवादिवत् ॥
नास्तिक्यपरिहारार्थं संवृतिः कल्पितेति[5] च ।
कल्पनापि च भिन्नस्य नैव निर्वस्तुके[6] भवेत् ॥

---

[1] भेदोक्तेः -क. [2] चासिद्ध इति पा ॥ ख. ग. [3] दृष्टार्थ. [4] संव्राप्ति-ख. ग. [5] कल्पनेति-क. ख.ग. [6] निर्वस्तुका.

SGDF
Sri Gargeshwari Digital Foundation

भट्टाचार्यवचनानि विरुद्धत्त्वेन भासमानानि सत्त्वत्रैविध्यनिरूप-

इति बौद्धं प्रति भट्टोक्तिस्तु युक्तैव। तेनाधिष्ठानस्याबाध्यस्वरूपस्यानङ्गीकारेण तत्सम्बन्धस्य कल्पितस्यापि वक्तुमशक्यत्वात्। अतएव कल्पनापीत्यादिना तदुक्तम्। अतएव च—

तस्माद्यन्नास्ति नास्त्येव यच्चास्ति परमार्थतः।
तत्सत्यमन्यन्मिथ्यैव न सत्यद्वयकल्पना॥

इति बौद्धं प्रति भट्टोक्तिरपि युक्तैव। अबाध्याधिष्ठानाङ्गीकारं विना प्रपञ्चे तद्बाध्य[1]त्वासम्भवात्, निस्साक्षिकस्य चरमबाधस्यासम्भवाच्च। आस्तिकमते त्रिकालाबाध्यं सत्यं यत्स्वीक्रियते तद्विलक्षणं व्यवहारकालाबाध्यरूपं व्यावहारिकसत्यं मया स्वीक्रियत इति स्वपरमतयोः सत्यद्वयकल्पनाया माध्यमकीयाया अयुक्तत्वात्। योगाचारस्यापि विज्ञानमेव परमार्थसत्यं, तत्र कल्पितो नीलाद्याकारो व्यावहारिकसत्यः, विशुद्धविज्ञाननिर्णयात्पूर्वमबाध्यत्वादिति कल्पनाया अयुक्तत्वात्, क्षणिकत्वेन मिथ्याविज्ञाननिष्ठस्य कल्पनाधिष्ठानत्वस्य तदभ्युपगतस्य पूर्वोक्तरीत्याऽसम्भवात्। अतएव तयोर्मतयोरेव—

तत्रार्थशून्यं विज्ञानं योगाचाराः समाश्रिता।
[2]तस्याप्यभावमिच्छन्ति ये माध्यमिकवादिनः॥

इत्याद्युत्तरवार्तिकेन निरासः। अस्मन्मते तु प्रपञ्चस्य खण्डनयुक्तिभिर्बाधात्, स्फुरणस्वरूपस्य ब्रह्मणस्त्वधिष्ठानत्वेन बाधानुपलम्भेन बाधसाक्षित्वेन चाबाधात्, 'सत्यस्य सत्यं प्राणा वै सत्यं तेषामेषसत्य' इति श्रुतिभिश्च सत्यद्वयकल्पना युक्ततमैव। विस्तरेण च सत्त्वत्रैविध्यमग्रे उपपादयिष्यत इत्यभिप्रेत्याह—**भट्टेति**। तथाच परमार्थसत एव साधकतेति नियमाभावात्सामान्यतः कालसम्बन्धित्वरूपेण तुच्छवैलक्षण्येन कार्यमात्रं प्रति कारणत्वम्। विशेषतस्तु यादृशयोः कार्यकारणता

[1] तद्बीबाध्य—ख. ग. [2] तस्याथ भा—क. ग

SGDF Sri Gangeshwari Digital Foundation

णायामविरोधेन व्याख्यास्यन्ते । तस्मात्पक्षादिसर्वमिथ्यात्वसाधनेऽपि न व्याहतिः ॥

इत्यद्वैतसिद्धौ असतः साधकत्वोपपत्तिः ॥

अथासतः साधकत्वाभावे बाधकनिरूपणम्

ननु सत्त्वापेक्षया तुच्छविलक्षणत्वादेर्गौरवकरत्वेन साधकत्वे कथं तन्त्रत्वमिति चेन्न; त्रिकालबाधविरहरूपस्य सत्त्वस्य लघुत्वाभावात्, जात्यादिरूपस्य तस्य मिथ्यात्वाविरोधित्वात्, उभयसिद्धे सद्विविक्ते साधकत्वदर्शनेन पारमार्थिकसत्त्वस्य साधकत्वाप्रयोजकत्वाच्च । तथाहि—प्रतिबिम्बे बिम्बसाधकत्वं तावदस्ति । तस्य बिम्बात्मना सत्त्वेऽपि प्रतिबिम्बाकारेणा-

---

मानसिद्धा, तादृशत्वेनैव सेति क्वचिद्व्यावहारिकादपि वैदिककर्मणः प्रातीतिकः स्वाप्नविषयः, तस्माच्च व्यावहारिकमित्याशयेनोपसंहरति—तस्मादिति ॥

तर्कैः सारस्वतै रत्नैश्चन्द्रिकाचन्द्रभूषणैः ।
दुरन्तध्वान्तखण्डानां साधकत्वमसत्यपि ॥

इत्यसतस्साधकत्वोपपत्तिः ॥

अथासतः साधकत्वाभावे बाधकनिरूपणम्

बिम्बसाधकत्वमिति । मुखप्रतिबिम्बम्, मुखसन्निधिपूर्वकम्, मुखप्रतिबिम्बत्वात्, यद्यस्य प्रतिबिम्बं तत्तथा, यथा सम्प्रतिपन्नमित्यादिरीतिः । प्रतिबिम्बस्वरूपस्य मिथ्याभूतस्योत्पत्तिमते स्पष्टमसतस्साधकत्वम् । मुखादिबिम्बमेव दर्पणाद्युपाधिसम्बन्धेन मिथ्याभूतेन विशिष्टं प्रतिबिम्बमिति मते स्वरूपतो मिथ्यात्वस्य तत्र परान्प्रति वक्तुमशक्यत्वेऽप्युक्तविशिष्टरूपेण मिथ्यात्वमित्याशयेनाह — तस्येति ।

SGDF
Sri Gargeshwari Digital Foundation

सत्त्वात्परमार्थसत्त्वं न साधकत्वे प्रयोजकम्। एवं स्वप्नार्थस्यासतोऽपि भाविशुभाशुभसूचकत्वम्। यद्यपि तत्रत्यदर्शनस्यैव सूचकत्वम्, 'पुरुषं कृष्णं कृष्णदन्तं पश्यति' इत्यादि श्रुतिबलात्; तथापि दर्शनमात्रस्यातिप्रसक्तत्वेन विषयोऽप्यवश्यमपेक्षणीय एव। एवं स्फटिकलौहित्यस्य उपाधिसन्निधान साधकत्वं च। न च लौहित्यं स्फटिके न मिथ्या, किंतु धर्ममात्रप्रतिबिम्ब इति न पृथगुदाहरणमिति वाच्यम्; धर्मिभूतमुखादिनैरपेक्ष्येण तद्धर्मभूतरूपादिप्रतिबिम्बादर्शनात्, प्रतिबिम्बस्याव्याप्यवृत्तित्वनियमेन लौहित्यस्य स्फटिके व्याप्यवृत्तिप्रतीत्ययोगाच्च। लौहित्ये स्फटिकस्थत्वारोपे तस्य प्रतिबिम्बत्वम्, स्फटिके लौहित्यारोपे तु तस्य मिथ्यात्वमिति विवेकः। 'स्फटिकमणेरिवोपधाननिमित्तो लोहितमे' ति लोहितिम्नो मिथ्यात्वं दर्शितं प्रतिबिम्बसत्यतावादिभिः पञ्चपादिकाकृद्भिः। एवं रेखातादात्म्येनारोपितानां वर्णानामर्थसाधकत्वम्। न च रेखास्मारिता वर्णा एवार्थसाधका इति वाच्यम्; आशैशवमयं ककारोऽयं गकार इत्यनुभवादभेदेनैव स्मरणात्, विवेके

श्रुतिबलादिति। 'आरुह्य नौकावृषकुञ्जरेषु भुक्त्वा रुदित्वा ध्रुवमर्थलाभः' इत्यादिस्मृत्युन्नीतश्रुतिबलात्[1]। स्वप्नकालीनभोजनादिज्ञानापेक्षयोक्तभोजनादेरेव लघुत्वात्, कृष्णदन्तादिविशेषणस्य सूचकत्वेन तद्विशिष्टदर्शनस्योक्तश्रुतौ सूचकत्वनिर्देशा[2]सम्भवाच्च, विषय एव सूचको न धीरित्याशयेन यद्यपि तथापीत्युक्तम्। लिङ्गस्या[3]कारणत्वमतेऽप्येवमपेक्षणीयता बोध्या। **पञ्चपादिकेति**। तथाच तन्मते तथोक्तेर्वाचस्पतिमते लौहित्यस्य प्रतिबिम्बत्वेऽपि न क्षतिरिति भावः। **विवेक इति**। कस्य

---

[1] इत्यादिस्मृतिबलात् ख. [2] निर्देशसम्भवाच्चेति क. ख. ग. [3] लिङ्गस्याकरण ग.

SGDF
Sri Gargeshwari Digital Foundation

सत्यपि दृढतरसंस्कारवशान्नारोपनिवृत्तिः। अतएव ककारं पठति लिखति चेति सार्वलौकिको व्यहारः। वर्णारोपितदीर्घत्वह्रस्वत्वादीनां च नगो नाग इत्यादावर्थविशेषप्रत्यायकत्वम्। नच वर्णेष्वनारोपितध्वनिसाहित्यं तदभिव्यक्तिरूपं वा दैर्घ्यं प्रत्यायकम्, एवं ह्रस्वत्वादिकमपीति वाच्यम्; ध्वनीनामस्फुरणेऽपि दीर्घो वर्ण इत्यादिप्रत्ययात्। नन्वारोपितेन वर्णदैर्घ्यादिना कथं तात्त्विकार्थसिद्धिः; न ह्यारोपितेन धूमेन तात्त्विकवह्निसिद्धिरिति चेन्न; साधकतावच्छेदकरूपवत्त्वमेव साधकतायाः प्रयोजकम्, न त्वारोपितत्वमनारोपितत्वं वा; धूमाभासस्य त्वसाधकत्वं साधकतावच्छेदकरूपव्याप्त्यभावात्, नासत्त्वात्, अनाभासत्वग्रहश्च तत्र बहुलोर्ध्वतादिग्रहणवद्व्याप्तिग्रहणार्थमेवापेक्षितः। तदुक्तं वाचस्पतिमिश्रैः—"यथा सत्यत्वाविशेषेऽपि चक्षुषा रूपमेव ज्ञाप्यते न रसः, तथैवासत्त्वाविशेषेऽपि वर्णदैर्घ्यादिना सत्यं ज्ञाप्यते, न तु धूमाभासादिना" इति। दृष्टं हि मायाकल्पितहस्त्यादे रज्जुसर्पादेश्च भयादिहेतुत्वं सवितृसुषिरस्य च मरणसूचकत्वं शङ्काविषस्य

चिदित्यादिः। **ध्वनिसाहित्यं**—दीर्घत्वाश्रयध्वनिसाहित्यम्। **व्याप्त्यभावात्**—व्याप्यत्वेनाग्रहात्। **नासत्त्वात्**—नारोपितत्वात्। **धूमाभासादिनेति**। व्याप्यत्वेनागृहीतेत्यादिः। मायाहस्त्यादिकं सत्यं शक्तिविशेषेण सृज्यत इति परेणोक्तं, [1](तन्नयुक्तम्;) घटोत्कचादिमायाकल्पितत्वेन हस्त्यादेर्भारतादावुक्तत्वात्। प्रतियोद्धा[2] निराकृतस्यावयवादिदर्शनस्य पश्चादभावेन मायारूपत्वस्य तत्र स्पष्टत्वादित्याशयेनाह—**मायाकल्पितेति**। **शङ्काविषेति**। भयविशेषप्रयोजकविषत्वभ्रमवि-

---

[1] कुण्डलितः पाठः क्वाचित्कः. [2] प्रतिबोध.

SGDF
Sri Gargeshwari Digital Foundation

च मरणहेतुत्वम् । ननु तत्र शङ्कैव भयमुत्पाद्य धातुव्याकुलतामुत्पादयतीति सैव मरणहेतुः, न तु शङ्कितं विषमपि ; एवं सवितृसुषिरमायाकल्पितगजादीनामपि ज्ञानमेव तत्तदर्थक्रियाकारि, न त्वर्थोऽपि, तथा च सर्वत्रोदाहृतस्थलेषु ज्ञानमेव हेतुः, तच्च स्वरूपतस्सत्यमेव, अन्वयव्यतिरेकावपि ज्ञानस्यैव कारणतां ग्राहयतः, न हि सन्निहितं सर्पमजानानो बिभेति । न चार्थानवच्छिन्नस्य ज्ञानस्य हेतुत्वेऽतिप्रसङ्गादर्थावच्छिन्नमेव ज्ञानं हेतुः, तथाचार्थोऽपि हेतुरेवेति वाच्यम् ; अर्थावच्छिन्नस्य ज्ञानस्य हेतुत्वेऽप्यवच्छेदकस्यार्थस्य ताटस्थ्येनाहेतुत्वोपपत्तेः, घटावच्छिन्नस्य तदत्यन्ताभावतद्ध्वंसादेर्घटदेशकालभिन्नदेशकालादित्वेऽप्यवच्छेदकस्य घटस्य तदभाववत्, घटेच्छाब्रह्मज्ञानयोर्घटज्ञानवेदान्तसाध्यत्वेऽपि घटब्रह्मणोस्तदभाववत्, घटप्रागभावस्य घटं प्रति जनकत्वेऽपि घटस्याजनकत्ववत्, विशेषादर्शनस्य भ्रमं प्रति जनकत्वेऽपि विशेषदर्शनस्य तदभाववत्, विहिताकरणस्य प्रत्यवायजनकत्वेऽपि विहितकरणस्य तदभाववत्, स्वर्गकामनाया यागजनकत्वेऽपि स्वर्गस्य तदजनकत्ववत्, अतीतादिस्मृत्यादेर्दुःखादिजनकत्वेऽप्यतीतादेस्तदजनकत्ववत्, असद्विषयकपरोक्षज्ञानस्य तद्व्यवहारहेतुत्वेऽप्यसतस्तदभाववत्, चिकीर्षितघटबुद्धेर्घटहेतुत्वेऽपि घटस्य तदहेतुत्ववत्, ब्रह्मज्ञानस्य तदज्ञाननिवर्तकत्वेऽप्युदासीनस्वभावस्य ब्रह्मणस्तदभाववत्, ब्रह्माज्ञानस्य जगत्परिणामिकारणत्वेऽपि ब्रह्मणस्तदभाववच्च । न च तथापि मिथ्यार्थे ज्ञानव्यावर्तकताऽस्तीत्यसतोऽपि हेतुत्वमिति वाच्यम् ; नहि व्यावृत्तधीहेतुत्वं व्यावर्तकत्वम्, किंतु

शेष्येत्यर्थः। अवच्छेदकस्येत्यादि। अवच्छेदकस्योपाधेः। अवच्छिन्नस्य

SGDF
Sri Gargeshwari Digital Foundation

व्यावृत्तिधीहेतुधीविषयत्वमेव; सत्यपि दण्डे तदज्ञाने व्यावृत्त्यज्ञानात्। अथावच्छेदकस्य मिथ्यात्वेऽवच्छिन्नस्यापि तन्नियमः, न; तुच्छज्ञाने तुच्छवैलक्षण्ये च तुच्छत्वस्य, प्रातिभासिकाद्वैलक्षण्ये प्रातिभासिकत्वस्य, पंचमप्रकारायामात्मस्वरूपभूतायां वाऽनिर्वचनीयाज्ञानस्य निवृत्तौ चतुर्थप्रकारानिर्वचनीयत्वस्य, पारमार्थिकात्मस्वरूपे तद्भिन्ने वानृतद्वैतस्याभावेऽनृतत्वस्य चादर्शनात् तत्रावच्छेदकानामसदादीनां ताटस्थ्येऽत्रापि तथास्त्विति

तदुपहितस्य। **तत्रावच्छेदकानामिति** ॥

वस्तुतस्तु तुच्छोपहितरूपेण तुच्छज्ञानादेस्तुच्छत्वमेव। अत एव तेन रूपेण तस्य न प्रामाणिकत्वम्। अतएव प्रातिभासिकवैलक्षण्यादेः स्वरूपतो व्यावहारिकत्वेऽपि प्रातिभासिकोपहितरूपेण प्रातिभासिकत्वमप्रामाणिकत्वं च[1]। एवं पञ्चमप्रकारस्यापि स्वरूपेणैव तत्वम्। अविद्याप्रतियोगिकत्वाद्युपहितरूपेण त्वविद्यादशायां चतुर्थप्रकारत्वमेव। द्वैताभावस्यापि स्वरूपेणैव सत्त्वम्। द्वैताभावत्वोपहितरूपेण त्वनृतत्वम्। अतएव मुक्तौ न तदुपहितमिति मोहमूलैवात्र परोक्तिः। अतो मिथ्योपीहतरूपेण ज्ञानस्य मिथ्यात्वमावश्यकमिति ध्येयम् ॥

'यत्तु प्रतिबिम्बस्य नानाविधत्वात् क्वचिद्व्याप्यवृत्तित्वसम्भवेन तदभावनियमोक्तिरयुक्ता; वर्णे दीर्घत्वादिप्रत्ययो ध्वनिद्वारा युक्त एव, ध्वनेरस्फुरणे तदप्रत्ययात्, वर्णग्रहकाले ध्वनेरपि योग्यत्वेन ग्रहानियमाच्च, वस्तुगत्या दीर्घध्वन्यभिव्यक्तं यद्वर्णस्वरूपं तस्यैव दीर्घत्वरूपत्वसम्भवाच्च। आरोपितस्य साधकताङ्गीकारे तु कारणतावच्छेदकदण्डत्वादेस्त्वन्मते दण्डाभासेऽपि सत्त्वेन ततोऽपि घटाद्यापत्तिः' इति,

---

[1] प्रातिभासिकत्वं तत्त्वं च.

SGDF
Sri Gargeshwari Digital Foundation

66

चेत्, अत्रोच्यते—यदुक्तं ताटस्थ्यलक्षणमुपलक्षणत्वमेव सर्वत्रावच्छेद(क)स्येति, तन्न, विशेषणत्वे सम्भवत्युपलक्षणत्वायोगात् ।

तन्न ; नानाविधत्वेऽपि हि प्रतिबिम्बं व्याप्यवृत्त्येव दृष्टम्। दीर्घत्वादिधीस्तु वर्णेषु न ध्वनिद्वारा, साक्षात्सम्बन्धेन वर्णे तत्प्रत्ययात् परम्परया तद्धीकारणत्वेन गौरवं च । किञ्च परोक्ष[1]वर्णज्ञानं ध्वनिविषयकत्वानियमात् साक्षाद्वर्णे दीर्घत्वप्रकारकम्, तत्र ध्वनिभासकसामग्रीकल्पने गौरवात् । वस्तुगत्या दीर्घध्वन्यभिव्यक्तस्य[2] दीर्घतारूपत्वे तादृशस्याकारादेर्ह्रस्वत्वमारोपितं वाच्यम्, तत्र च न विनिगमकम्; ह्रस्वध्वन्यभिव्यक्तस्वरूपं ह्रस्वतारूपं दीर्घत्वं त्वारोपितमित्यस्यापि वक्तुं शक्यत्वात् । न च ह्रस्वदीर्घध्वन्यभिव्यक्तमकारादिद्वयमिति वाच्यम्; एकैका एवाकारादिव्यक्तय इति मीमांसकमते तदसम्भवाद्गौरवाच्च । दण्डाभासादेश्च न घटादिहेतुत्वापत्तिः; घटादिहेतुता हि नाभाससाधारणेन दण्डत्वादिना, किंतु तद्व्यावृत्तदण्डत्वादिजात्यन्तरेण । अथवा व्यावहारिकदण्डादिमात्रवृत्तितादात्म्यानामखण्डान्यतमत्वविशेषरूपेण कारणतावच्छेदकताघटकसम्बन्धत्वात्, कपालसंयोगादिगतजातिविशेषस्य दण्डाभासादिस्थलीयकपालसंयोगादौ विरहाद्वा न दोषः । यदि हि जातिर्विवरणाद्युक्तरीत्या सत्सामान्यरूपा, यदि वा मूलाविद्यैव उभयथापि दण्डादिव्यक्तिविशेषमात्रे दण्डत्वादि[3]मत्त्वात्तद्व्यक्तिविशेषगततादात्म्यानामन्यतमत्वेनैव सम्बन्धत्वं वाच्यम् । तथा(च) प्रातीतिकव्यावृत्ततादात्म्यानामेवान्यतमत्वेन कारणतावच्छेदकघटकतासम्बन्धत्वान्न दोषः । वस्तुतो दण्डाभासादौ दण्डत्वादेस्सद्रूपाविद्याभ्यामन्यत्वेनाभ्युपगम्यमानस्य सत्त्वे मानाभावः; प्रातीतिके व्यावहारिकतादात्म्याध्यासस्य तत्त्वप्रदीपिकादावुक्तत्वात् दण्डाद्यर्थप्रवृत्तेरुपपन्नत्वात् ॥

[1] परोक्त. [2] व्यक्तत्वस्य. [3] मत्वं यद्व्यक्ति.

SGDF
Sri Gargeshwari Digital Foundation

विशेषणबाधपूर्वकत्वादुपलक्षणत्वकल्पनायाः, अन्यथा "दण्डी प्रैषानन्वाह" लोहितोष्णीषा ऋत्विजः प्रचरन्तीत्यादावपि वेदे दण्डलौहित्यादेरुपलक्षणत्वात्तदभावेप्यनुष्ठानप्रसङ्गः, 'सर्वादीनि सर्वनामानि' इत्यत्र सर्वशब्दस्य सर्वनामसंज्ञा न स्यात्, 'जन्माद्यस्य यत' इत्यत्र जन्मनो ब्रह्मलक्षणत्वं न स्यात्; विशेषणार्थत्वेन तद्गुणसंविज्ञानबहुव्रीहिसम्भवेऽपि उपलक्षणार्थत्वेनातद्गुणसंविज्ञानबहुव्रीहिस्वीकारप्रसङ्गात् । एवं 'असिपाणयः प्रवेश्यन्ता' मित्यादिलौकिकप्रयोगेऽपि । प्रतिबिम्बादिज्ञानानां जनकत्वे च विशेषणतया प्रतिबिम्बादीनामपि जनकत्वे बाधाभावान्नोपलक्षणत्वपक्षो युज्यते । उदाहृतस्थलेषु सर्वत्र बाधक-

---

अनुष्ठानप्रसङ्ग इति । यद्यप्युक्तवाक्ये दण्डादिकमेव प्रैषानुवचनाद्युद्देशेन विधीयते, तदाश्रयस्य मैत्रावरुणादेः 'मैत्रावरुणः प्रेष्यति चानु चाह' इत्यादिना प्राप्तत्वात्, तथाऽपि कादाचित्कसम्बन्धद्वारा साधनतया तद्विधिः स्यात् । न चानुवचनकाले दण्डस्यासम्बन्धेऽवलम्बन रूपदृष्टद्वारानुवचनसाधनत्वं तस्य न स्यादिति वाच्यम्; कादाचित्कावलम्बनाधीनश्रमापनयद्वारा तत्साधनत्वसम्भवात् । यत्तु—"ज्ञानकार्येऽपि विषयहेतुत्वे बाधकमस्ति, अतीतधूमादेः स्वज्ञानकार्यानुमित्यादौ हेतुत्वासम्भवात्; अतस्तत्राप्युपलक्षणत्वम् । दण्डीत्यादौ च 'तदस्यास्त्यस्मिन्' इति सूत्रेण विद्यमानसम्बन्धे मतुपो विधानाच्छ्रौतं विशेषणत्वम् । लोहिते[1]त्यादौ च बहुव्रीहेर्मतुप्समानार्थत्वात्, सर्वादीत्यादौ च तद्गुणसंविज्ञानस्यातादृशबहुव्रीह्यपेक्षया मुख्यत्वान्नोपलक्षणत्वम्" इति, तन्न; यथा हि धूमज्ञानं विना जायमानवह्न्यनुमितौ न तस्य व्यभिचार, [2]स्वाव्यवहितोत्तरत्वस्य कार्यतावच्छेदकत्वात्,

---

[1] लौहित्ये.　　[2] व्यवहितोत्तरत्वस्य.

SGDF
Sri Gargeshwari Digital Foundation

तथा धूमं विना जायमानानुमितौ न तस्य सः । यदि तु स्वज्ञानसम्बन्धेन विषयस्य कारणत्वं लाघवात्, न तु ज्ञानस्य, तदा सुतरां न दोषः ; अतीतस्यापि स्वजन्यापूर्वसम्बन्धेन यागादेरिव व्याप्त्यादिविषयतानिरूपितस्वविषयताकज्ञानसम्बधेन धूमादेरपि हेतुत्वसम्भवात् । न च—यत्र ज्ञाने व्याप्यत्वादिविशिष्टधूमत्वादिरूपेण धूमादिर्न भातः, किं त्वन्यः, तज्ज्ञानव्यक्तेर्धूमादिसम्बन्धत्वासम्भवादनुपपत्तिरिति—वाच्यम् ; स्वज्ञानाव्यवहितोत्तरानुमितौ धूमादेः कारणत्वेऽनुपपत्त्यभावात् स्ववृत्तिधूमत्वाद्यवच्छिन्नविषयताकज्ञानत्वेन रूपेण तज्ज्ञानस्यापि धूमादिसम्बन्धत्वसम्भवात् । ([1] एतेन—[2] न लिङ्गस्यानुमितौ कारणत्वं युक्तम् ; कार्याव्यवहितपूर्वक्षणे स्वस्वव्यापारान्यतरसत्तायामेव सर्वस्य कारणस्य कारणतायास्तान्त्रिकैः स्वीकारात्, अतीतादिधूमादेः कारणत्वासंभवा[3]दित्यपास्तम् ; उक्तक्षणे विद्यमानधूमादेरेवोक्तसंबन्धेन मया हेतुत्वस्योक्तत्वात् । न चैवमतीतव्यक्तेस्तद्व्यक्तित्वेन हेतुतास्थले कारणता न स्यादिति—वाच्यम् ; इष्टत्वात्, विशिष्टकारणताग्राहकमानस्य बाधकाभावे सत्येव विशेषणीभूतलिङ्गे कारणताग्राहकत्वात् ।) मतुबर्थस्तु न विद्यमानः सम्बन्धः ; किंतु विद्यमानस्यास्तीत्यस्य, तदित्यनेनैवान्वयात् । यदि च सम्बन्धविशिष्टेऽस्तित्वान्वयात्सम्बन्धेऽपि तदन्वय इत्युच्यते, तथापि तादृशोऽर्थो विशेषणत्वस्यौत्सर्गिकत्वादेव । अन्यथा सम्बन्धोपलक्षित एव तदन्वयसम्भवात् । किञ्चास्मिन्नस्तीत्यर्थे मतुपि का गतिः ? न ह्यस्मिन्निति तदित्यत्रान्वेति ; येन विशिष्टेऽस्तित्वान्वयात्त्वदिष्टसिद्धिः, किंतु कारकत्वादस्तिक्रियायाम्, तथाचाधाराधेयभावरूपमत्वर्थस्य कादाचित्कत्वेऽपि तत्पदार्थस्यास्तित्वमादाय मतुप्सम्भवत्येव ।

---

[1] कुण्डलितः पाठः–क पुस्तके न दृश्यते. [2] एतेन लिङ्ग–**ग.** [3] कारणत्वसंभवात्–**ग.**

SGDF
Sri Gargeshwari Digital Foundation

मस्त्येवेति विशेषः। तथाहि प्रथमे घटदेशकालौ गृहीत्वा तद्भिन्न-देशकालत्वं तदत्यन्ताभावादौ ग्राह्यम्; घटस्यापि तत्सम्बन्धे तद्देशकालभिन्नदेशकालत्वमेव व्याहतं स्यात्। द्वितीये त्विष्टापत्तिः; क्वचित् घटज्ञानस्य घटेच्छाजनकत्ववत् घटं प्रत्यपि

अतएव गावोऽस्यासन् भविष्यन्ति वेत्यादौ गवादीनामस्तित्वाभावस्थले गोमानित्यादि न भवतीति महाभाष्यादावुक्तम्॥

वस्तुतस्तु सम्बन्धमात्रे मतुप्। अतएव 'मतुबस्त्यर्थ' इति सूत्रेणासधात्वर्थसम्बन्धमात्रे स विहितः। अतएव च दण्ड्ययमासीदित्यादेः साधुत्वं महाभाष्यादावङ्गीकृतम्। तथा च दण्डी प्रैषानन्वाह, दण्डी गच्छति' इत्यादौ विशिष्टवैशिष्ट्यान्वयस्यौत्सर्गिकत्वादेव दण्ड-सम्बधानुवचनाद्योरेककालीनत्वलाभः। न च 'धातुसम्बन्धे प्रत्ययाः' इति सूत्रेण सूत्रान्तरानुक्तार्थेऽपि प्रत्ययविधानात् 'वसन्ददर्श' इत्यादौ शतृप्रत्यय इव दण्ड्यासीदित्यादौ मतुप्प्रत्ययस्याप्यतीतकालोऽर्थ इति वाच्यम्; तावतापि 'दण्डी भुङ्क्ते, भाविकृत्यमासीत्' इत्यादौ गत्यभावात्, आद्ये हि नोक्तसूत्रप्रवृत्तिः; आख्यातस्य विरुद्धार्थकत्व-स्थल एव तत्स्वीकारात्, द्वितीयेऽतीतकृत्यमासीदित्यन्वयासम्भवात्, प्रकारान्तरेण समाधानापेक्षया चोक्तरीतिरेव युक्ता। विद्यमानसम्बन्धार्थक एव बहुव्रीहिरित्युक्तिस्तु शोभते; नष्टधनोऽयमित्यादावतथात्वात्। अतएव 'मत्वर्थे बहुव्रीहिः' इति कात्यायनोक्तिरौत्सर्गिकपरा। तद्गुण-संविज्ञानमुख्यत्वं तु विशेषणत्वमुख्यत्वादेव॥

क्वचित् घटज्ञानस्येति। भाविघटज्ञानस्य घटं प्रत्यपि कारणत्वम्। न च—घटोद्देश्यकेच्छाधीनकृत्यान्यथा[1]सिद्धं ज्ञानमिति—वाच्यम्; कृतेरपि कपाल[2]संयोगेनान्यथासिद्धत्वापत्तेः। अन्वयव्यतिरेकौ

---

[1] कृत्यन्यथा–ख.   [2] काल–क.

SGDF
Sri Gangeshwari Digital Foundation

जनकत्वात्। ब्रह्मणो वेदान्तसाध्यत्वे तु नित्यत्वविरोधः। तृतीये प्रागभाववत् घटस्य स्वजनकत्वे प्रतियोगिप्रागभावयोः समानकालीनत्वापत्तिः, स्वावधिकपूर्वत्वघटितजनकत्वस्य स्वस्मिन्व्याहतत्वं च। चतुर्थे पञ्चमे च प्रतियोगितदभावयोः सहावृत्त्या भ्रमप्रत्यवाययोरनुत्पत्तिप्रसङ्गः। षष्ठे कामनावत् कामनाविषयस्य यागजनकत्वे तस्य प्राक्सत्तया तत्कामनैव व्याहन्येत; सिद्धे इच्छाविरहात्। सप्तमेऽतीतस्य जनकत्वे कार्याव्यवहितपूर्वकाले स्वस्वव्यापारान्यतरसत्त्वापत्तिः। अष्टमेऽसतो जनकत्वे निःस्वरूपत्वव्याघातः। नवमे चिकीर्षितघटज्ञानवत् स्वस्य जनकत्वे पूर्ववद्व्याघातः। दशमे उदासीनस्य ब्रह्मणो न निवर्तकत्वम्; स्वरूपतः उपहितस्यैव वृत्तिविषयत्वेन तस्याविषयत्वात्, उपहितस्य च निवर्तकत्वमस्त्येव। एकादशे ब्रह्माज्ञानस्य पारिणामिकारणत्वेऽपि न ब्रह्मणो जगत्कारणत्वम्; कार्ये जडत्वोपलम्भात्। एवंविधबाधकबलेन तत्रोपलक्षणत्वस्वीकारात्। न च प्रकृते बाधकमस्ति, अव्यवहितदेशकालादिवृत्तित्वस्य प्रातिभासिकसाधारणत्वात्। इदानीमत्र सर्प इत्यादिप्रतीत्यविशेषात्। न हि क्वचिद्बाधकबलेन मुख्यपरित्यागः कृत इति सर्वत्र तथैव भविष्यति; उत्कर्षाद्यनुविधानाच्च। तथा हि—स्वप्ने जागरे चोत्कृष्टकलधौतदर्शनादुत्कृष्टं सुखम्, उत्कृष्टसर्पादिदर्शनाच्चोत्कृष्टं भयादि दृश्यते; विषयस्याकारणत्वे तदुत्कर्षा-

---

च तुल्यौ ज्ञात्वैव हि घटः क्रियते। उपहितस्येति। ज्ञानकार्यं प्रति विषयहेतुताया उक्तत्वादिति भावः। **कारणत्वं**—परिणामित्वम्। **जडत्वेति**—जडत्वमात्रेत्यर्थः। चैतन्यपरिणामत्वे कार्यं[1] चैतन्यं

---

[1] कथं.

SGDF
Sri Gargeshwari Digital Foundation

नुविधानं कार्ये न स्यात्; न ह्यकारणोत्कर्षः कार्यमनुविधत्ते इति न्यायात्। न च ज्ञानप्रकर्षादेव तत्प्रकर्षः; ज्ञानेऽपि विषयगतप्रकर्षं विहायान्यस्य प्रकर्षस्याभावात्। अथ ज्ञानगता जातिरेव प्रकर्षः। न; चाक्षुषत्वादिना सङ्करप्रसङ्गात्, विषयप्रकर्षेणैवोपपत्तौ चाक्षुषत्वादिव्याप्यनानाजात्यङ्गीकारे गौरवान्मानाभावाच्च। किञ्च ज्ञानस्य भयादिजनकत्वे सर्पाद्यवच्छिन्नत्वमेव कारणतावच्छेदकमास्थेयम्; ज्ञानत्वेन जनकत्वेऽतिप्रसङ्गात्, तथा च मिथ्या(त्वा)वच्छिन्नत्वाकारेण ज्ञानस्य मिथ्यात्वात् भ्रमस्थले ज्ञानमात्रस्य जनकत्वेऽपि मिथ्याभूतस्य जनकत्वमागतमेव। जनकतावच्छेदकरूपेण च मिथ्यात्वे रूपान्तरेण सत्त्वमप्यसत्त्वान्नातिरिच्यते; अनुपयोगात्। तदुक्तं खण्डनकृद्भिः—'अन्यदा सत्त्वं तु पाटच्चरलुण्ठितवेश्मनि यामिक-

---

स्यादिति भावः। **ज्ञानेऽपि विषयगतप्रकर्षमिति**। न च दोषप्रकर्षादेव ज्ञाने प्रकर्ष इति वाच्यम्; दोषप्रकर्षेऽपि ज्ञानप्रकर्षस्य विषयान्यस्यानु[1]पलब्धेः। तुल्यदोषा[2]धीनत्वमपि भ्रमविषययोः प्रमाविषययोर्वा प्रकर्षाप्रकर्षाभ्यां सुखादिप्रकर्षाप्रकर्षदर्शनात्, विषयप्रकर्षेणानुभविकेनैवोपपत्तौ ज्ञानप्रकर्षे मानाभावस्य वक्ष्यमाणत्वाच्च। **सङ्करेति**। तस्य दोषत्वानभ्युपगमे तु ज्ञान इव विषयेऽपि प्रातीतिके विनिगमनाविरहेण जातिसिद्ध्या तस्यापि हेतुत्वसिद्धिः। किञ्च ज्ञानगतवैजात्यमननुभवान्न विषयातिरिक्तम्; अन्यथा साकारवादापत्तेः। अनुमितित्वादिकमपि[3] व्याप्त्यादिधीजन्यत्वादिरूपं विषयघटितमेव। व्याप्त्यग्रह[4]काले तद्धीरसिद्धैवेति भावः। **अन्यदा सत्त्वमिति**। कार्योपधानकालान्य[5]कालसत्त्वं

---

[1] न्यत्वस्या. [2] दोषाधीनभ्रम—क. ख. ग. [3] न व्याप्त्यादि. [4] व्याप्त्याद्यग्रह—ग. [5] कार्योपधानकाल—क.

SGDF
Sri Gargeshwari Digital Foundation

जागरणवृत्तान्तमनुसरति' इति । स्वरूपेणापि तु भ्रमज्ञानस्य मिथ्यात्वमस्त्येव, स्वरूपतो बाधाभावे विषयतोऽप्यबाधप्रसङ्गात्। न च गुणजन्यत्वमुपाधिः; तस्याप्यापाद्यत्वेन वह्न्यनुमाने वह्निसामग्र्या इव साधनव्यापकत्वेनानुपाधित्वात्, विषय इव मिथ्यात्वप्रयोजकदोषादिसमवहितसामग्र्या ज्ञानेऽप्यविशेषाच्च । तुच्छज्ञानतद्वैषम्यादौ च तुच्छत्वादर्शनमबाधकम्; अवच्छेद्या-वच्छेदकयोः सर्वत्र सारूप्यनियमानभ्युपगमात्, प्रकृते चाव-च्छेदक इवावच्छेद्येऽपि मिथ्यात्वप्रयोजकरूपतुल्यत्वेन सारूप्यो-

यथा कार्योपधाने व्यर्थमुक्तं खण्डने, तथा कारणतानवच्छेदकरूपेण सत्त्वमपि, असतः कारणताया अनपोदितत्वात् । उपाधिरिति । भ्रमो यद्यबाधितं ज्ञानं स्यात्तदा अबाधितविषयकं स्यादित्यत्रेति शेषः । दोषादीत्यादिपदेनाविद्या गृह्यते । प्रमात्वावच्छिन्नं प्रति मनस्त्वेनेव भ्रमत्वावच्छिन्नं प्रत्यविद्यात्वेन परिणामित्वम् । भ्रमत्वप्रमात्वे च पल्लवा-ज्ञानकार्यविषयकधीत्वतदन्यधीत्वादिरूपे जातिस्वरूपे वाऽनुगते। साक्षि-रूपं ज्ञानमपि [1]विषयोपहितरूपेण मिथ्येति न तत्र व्यभिचार इति भावः। न च लाघवाद्रजतत्वादिनैव दोषकार्यत्वाद्रजतादिभ्रमो न चाक-चक्यादिधीरूपदोषजन्य इति वाच्यम्; तादृशधीमात्रस्य भ्रमा[2]जनक-त्वेन तद्धीव्यक्तेस्तत्त्वेन[3] स्वविशिष्टं प्रति कारणत्वस्य वाच्यतया स्व-विशेष्याश्रयचैतन्यवृत्तित्व[4]सम्बन्धेन तत्तद्रजतादाविव तद्विषयकाविद्या-परिणामरूपे भ्रमेऽपि स्वविशिष्टत्वस्य सत्त्वेन भ्रमस्यापि दोषकार्यत्वा-नपायात् । ननु तुच्छज्ञानादेश्शब्दादिजन्यत्वेन स्वरूपतो न तुच्छत्वं यथा, तथा भ्रमस्य मिथ्याविषयोपहितरूपेण मिथ्यात्वं न स्वरूपत इति किं न स्यात्तत्राह—तुच्छेति । सारूप्येति । समानस्वरूपतेत्यर्थः ।

[1] साक्षितावच्छेदक—क. ग. [2] भ्रम. [3] स्तद्धीव्यक्तित्वेन. [4] श्रयवृत्तित्व.

SGDF
Sri Gargeshwari Digital Foundation

पपत्तेः । सर्वसाधारणं चैकं कारणत्वमभ्युपगम्यैतदवोचाम । वस्तुतस्तु दण्डतन्त्वादिसाधारणमेकं कारणत्वं नास्त्येव; यत्र तव सत्त्वमवच्छेदकं, (तत्र) [1]मम तुच्छविलक्षणत्वादिकम्; किंतु कार्यतावच्छेदकं घटत्वपटत्वादि कारणतावच्छेदकं च दण्डतन्तुत्वादि । तद्भेदाच्च कारणत्वं भिन्नम् । यथा गोगवयसादृश्यमन्यत् भ्रातृभगिन्यादिसादृश्यमन्यत्; तत्र नैकमवच्छेदकम्, किंतु गवयत्वभगिनीत्वादिकमेव; तद्वदत्रापि दण्डत्वादिकमेव सत्वासत्वोदासीनमवच्छेदकं वाच्यम् । तथाच जनकत्वा[2]नुसारिण न सत्त्वासत्त्वसिद्धिः । तदुक्तं खण्डनकृद्भिः—

"पूर्वसम्बन्धनियमे हेतुत्वे तुल्य एव नौ ।

नास्त्येवेति । मानाभावादिति शेषः । **तुच्छविलक्षणत्वादिकमिति** । कालसम्बन्धित्वं तुच्छविलक्षणत्वम् । आदिना अधिकरणसम्बन्धित्वादिकं गृह्यते । न चैवं—तुच्छमपि कारणं कार्यविशेषे स्यात्, तुच्छव्यावृत्तरूपेण सामान्यकारणत्वे तु सामान्यसामग्रीविरहादेव नापत्तिरिति वाच्यम्; बौद्धैरपि तस्य कारणताग्राहकमानाविषयत्वेनार्थक्रियाकारित्वानुक्तेः कार्यविशेषं प्रति तस्य कारणत्वाकल्पनात् । ननु नियतपूर्वसत्त्वरूपं कारणत्वं कथमसति[3] तत्राह—**पूर्वसम्बन्धनियम इति** । कार्याव्यवहितप्राक्कालावच्छेदेन कार्यव्यापकत्वे सत्यनन्यथासिद्धत्वरूप इत्यर्थः । व्यापकतायां प्रतियोग्यधिकरणव्यावृत्तविशेषणताविशेषाणामन्यतमसम्बन्धेन कार्यवन्निष्ठत्वं निवेश्यम्, तेनाभावस्य सिद्धान्ते सार्वत्रिकत्वेऽपि न क्षतिः । अथवा पूर्वसम्बन्धस्य नियमो यत्रेति व्युत्पत्त्या नियतान्वयव्यतिरेकशालिनि स्वीक्रियमाणं यद्धेतुत्वं तस्मिन्नतिरिक्तपदार्थरूपतया आवयोस्तुल्य इत्यर्थः ।

---

[1] न मम. [2] जनकत्वाजनकत्वा. [3] मसदिति.

SGDF
Sri Gargeshwari Digital Foundation

हेतुतत्त्वबहिर्भूतसत्त्वासत्त्वकथा वृथा" ॥ इति ।
"अन्तर्भावितसत्त्वं चेत्कारणं तदसत्ततः ।
नान्तर्भावितसत्त्वं चेत्कारणं तदसत्ततः" ॥ इति च

न चैवम्—
"अन्तर्भावितसत्त्वं चेदधिष्ठानमसत्ततः ।
नान्तर्भावितसत्त्वं चेदधिष्ठानमसत्ततः" ॥

हेतुतत्त्वं हेतुत्वं तस्मात् **बहिर्भूतं** तदघटकमित्यर्थः । तुच्छस्य व्यापकत्वासम्भवात् कारणताग्राहकदेशकालान्वयव्यतिरेकधीविषयत्वाभावाच्च सत्त्वं न कारणताशरीरे निवेश्यम् । तथाच सत्त्वस्येवासत्त्वस्य कथा वृथेति भावः[1] । अथवा हेतोस्तत्त्वमसाधारणधर्मः तद्बहिर्भूतं तद्भिन्नं सत्स्वरूपत्वमसत्स्वरूपत्वं चेत्यर्थः । तुच्छस्वरूपस्येवाखण्डसद्रूपस्यापि[2] कारणताग्राहकप्रमाणविषयत्वानङ्गीकारान्न कारणत्वमिति भावः । यदि कारणताश्रयस्य सत्तासम्बन्धोऽपेक्षते, तदा सोऽस्त्येव कल्पितः कल्पितेऽपि । परंतु स नापेक्षत[3] इति वस्तुगतिरित्याशयेन कथा वृथेत्युक्तम् । कारणस्य सत्तानियमे साधकाभावमुक्त्वा बाधकमाह—**अन्तर्भावितेत्यादि ।** यद्यन्तर्भावितसत्त्वं सत्ताविशिष्टं सत्ता तदाश्रयश्चोभयं यदि कारणताश्रयः, तदा ततस्तादृशाभ्युपगमादेव असत्सत्तानाश्रयोऽपि कारणमिति सिद्धम् । न हि सत्तायां सत्तान्तरमस्ति, न वा सैव सत्ता । तस्यां सत्तान्तराभ्युपगमे तस्यापि स्वप्रत्यक्षादिकारणत्वनिर्वाहाय सत्तान्तरं वाच्यमित्यनवस्था नानासत्ताभ्युपगमात् । सत्ताकारानुगतबुद्धिलङ्घने घटादिस्वरूपसत्तयैव निर्वाहो[4] जातिमात्राय जलाञ्जलिश्च तव

---

[1] न कारणशरीरे निवेश्यते सत्वमिवेति भावः–**क.** न कारणशरीरे निवेश्यमिति भावः–**ग.** [2] स्वरूपस्यापि. [3] नापेक्षित–**क. ग.** [4] निर्वाहे–**ग.**

SGDF
Sri Gargeshwari Digital Foundation

इति तवापि समानमिति—वाच्यम्; ममाधिष्ठाने स्वरूपत एव सत्ताङ्गीकारः, तव तु कारणे स्वरूपातिरिक्तसत्ताङ्गीकार इति विशेषात्। यत्तु अर्थो न ज्ञानस्य जनकतायामवच्छेदकोऽपि; मानाभावात्। न चातिप्रसङ्गः; विषयावच्छेदकमनपेक्ष्यैव सर्पज्ञानस्यासर्पज्ञानाद्व्यावृत्तिसिद्धेः। तथाहि सर्पज्ञानस्यासर्पज्ञानाद्व्यावृत्तिर्व्यावर्तकाधीना। न च विषयस्तत्सम्बन्धो वा व्यावर्तकः; स्वरूपातिरिक्तद्विष्ठसम्बन्धस्याभावात्, असम्बन्धस्य चाव्यावर्तकत्वात्। अथ सम्बन्धान्तरमन्तरेण विशिष्टव्यवहार-

---

स्यात् यदि च नान्तर्भावितसत्त्वं कारणताश्रयः सत्तोपलक्षिते कारणता, तदाऽपि ततस्तदभ्युपगमादेव सत्ताशून्यातीततादिदशायामपि दण्डादौ कारणता स्यादित्यसत्कारणत्वं सिद्धमेव। अथ कारणताश्रयकोटौ सत्ताया न विशेषणतयोपलक्षणतया वाऽन्तर्भावः, किंतूपाधितया, तदापि असत्सद्रूपान्यत्कारणमिति सिद्धम्। न हि दण्डादिनानास्वरूपाणि सद्रूपाणि; श्रुतियुक्तिबाध्यत्वादननुगतत्वात्; तुल्ययुक्त्या [1]ब्रह्मणोऽपि सद्रूपस्य त्वया वाच्यत्वेन तत्सम्बन्धादेव तदन्यत्र[2] सदाकार प्रत्ययोपपत्तेश्च। न चैवमित्यादिकारणत्वस्थलेऽधिष्ठानत्वमादाय पूर्वोक्तदोषस्स्यादिति पराभिमानः। **स्वरूपत एवेति**। सद्रूपमेवावच्छिन्नानवच्छिन्नरूपेण प्रातीतिकव्यावहारिकाध्यासमात्राधिष्ठानमित्यर्थः। **स्वरूपातिरिक्तेति**। दण्डादि[3]कारणस्वरूपातिरिक्तेत्यर्थः। उक्तयुक्तिभिरबाध्यत्वोपलक्षितरूपस्य सद्रपस्य कारणत्वासम्भवात्तत्सम्बधिन्येव कारणत्वं त्वया वाच्यम्; तथाच सद्रूपान्यदेव कारणं तव सिद्धमिति भावः। **द्विष्ठसम्बन्धेति**। विषयप्रतियोगिकज्ञानानुयोगिकसम्बन्धेत्यर्थः।

---

[1] ब्रह्मण्यपि. [2] तन्मात्र. [3] दण्डादिस्वरूपकारण.

SGDF
Sri Gargeshwari Digital Foundation

जननयोग्यं ज्ञानस्वरूपमेव वा ज्ञानमात्रनिष्ठः कश्चिद्धर्मो वा सम्बन्धः, तर्हि विषयमनन्तर्भाव्यैव ज्ञानात्तद्गतधर्माद्वा विशेषसिद्धिरित्यायातम्। किञ्च सर्पज्ञानमसर्पज्ञानाद्धर्म्यन्तरसम्बन्धमनपेक्ष्य विलक्षणम्, तज्जनकविलक्षणजन्यत्वात्, यवाङ्कुरात्कलमाङ्कुरवत्, तज्जन्यविलक्षणजनकत्वाद्वा, यवबीजात्कलमबीजवत्। न च विलक्षणविषयसम्बन्धेनैव हेत्वोरुपपत्तावप्रयोजकत्वम्; तथात्वे हि यवबीजतदङ्कुरविलक्षणजन्यजनके कलमाङ्कुरतद्बीजे अपि यवाङ्कुरतद्बीजा(ङ्कुरा)भ्यां कलमाङ्कुरतद्बीजत्वरूपस्वाभाविकवैलक्षण्यं विना कदाचिदुपलक्षणीभूतचैत्रादिसम्बन्धित्वमात्रेण विलक्षणे स्याताम्। साक्षात्कारोऽपि परोक्षज्ञाना-

---

कश्चिदिति। विषयिताविशेषरूप इत्यर्थः। **विशेषसिद्धिः**—व्यावृत्तिसिद्धिः। ननु—विषयाघटितरूपेण तत्तज्ज्ञानस्वरूपस्य सर्पत्वा[1]द्यवच्छिन्नविषयितविशेषस्य वा व्यावर्तकत्वं न सम्भवति; आद्यस्याननुगतत्वात्; द्वितीयस्य सर्पत्वेन सर्पज्ञानमात्रगतत्वे तत्तत्सर्पज्ञा[2]नाद्व्यावर्तकत्वासम्भवात्, विषयस्य तु तत्तत्सर्परूपस्य तस्माद्व्यावर्तकत्वं सम्भवत्येव। किञ्च प्रत्यक्षे व्यावर्तकज्ञाने ज्ञानस्य विषयिता[3]विशेषस्य वा न स्वरूपतो भानमिति विषयघटितरूपेणैव व्यावर्तकत्वं वाच्यमत आह—**किञ्चेति। धर्म्यन्तरसम्बन्धमनपेक्ष्य विलक्षणमिति।** स्वविषयसम्बन्धान्यवैलक्षण्ययुक्तमित्यर्थः। तेन विषयितामादाय न सिद्धसाधनादि (शक्त्यन्येत्यपि वैलक्षण्ये विशेषणं देयम्)[4] **तज्जनकेति**—असर्पज्ञानजनकेत्यर्थः। **विलक्षणेति**—भिन्नेत्यर्थः। असर्पज्ञानव्यावृत्तजन्यत्वाश्रयधीत्वादिति तु पर्यवसितम्। सर्पज्ञानत्वादेर्जन्यता-

---

[1] सत्वा. [2] तत्तत्संज्ञाना--क. [3] विषयता. [4] अयं कुण्डलितः पाठः क–पुस्तके न दृश्यते.

SGDF
Sri Gargeshwari Digital Foundation

दन्यसम्बन्धितामात्रेण विलक्षणः स्यात् । एवं च यथा प्रतियोगिनमनन्तर्भाव्यैव घटस्याभावोऽभावान्तरात्, यथाच विषयमनन्तर्भाव्यैव शिलोद्धरणकृतिर्माषोद्धरणकृतितः, यथा चातीतादिज्ञानमसद्विषयकपरोक्षज्ञानव्यवहारौ च ज्ञानान्तरादितः, अन्यथा तत्कार्यसङ्करः स्यात्; एवं सर्पज्ञानमपि रज्जौ सर्पज्ञानस्य भ्रमत्वेनाधिकजन्यत्वेऽपि सर्पज्ञानत्वेन तद्धेतुजन्यत्वात् स्वत एव वा असर्पज्ञानाद्विलणमिति न कोऽपि दोषः । न चाभावादावपि प्रतियोग्यादेरवच्छेदकत्वम्; ध्वंसादेः कृतेरतीतादिज्ञानस्य च सत्तासमये प्रतियोगिविषययोरसत्वादिति । तन्न; सर्पज्ञानत्वावच्छिन्नस्यासर्पज्ञानाद्व्यावृत्तौ प्रयोजकं न तत्तत्स्वरूपमेव; सर्वज्ञानसाधारण्याभावात्, किन्त्वनुगतो धर्मः कश्चित् । सोऽपि सर्पज्ञानमात्रे न जातिरूपः प्रत्यक्षत्वानुमानत्वादिना सङ्करप्रसङ्गात्, किं तूपाधिरूपः; । स च स्वरूपसम्बन्धेनाध्यासिकसम्बन्धेन वा सम्बन्धिभूतविषयादन्यो न भवति;

वच्छेदकत्वे गौरवादतिरिक्तमखण्डं वैलक्षण्यमवच्छेदकं विना जन्यता नोपपद्यत इत्यनुकूलस्तर्क इति भावः । **विलक्षणः स्यादिति** । चैत्रादिसम्बन्धित्वादेर्गुरुत्वेनावच्छेदकान्तरमखण्डं कलमबीजादिनिष्ठो यवबीजादिव्यावृत्तो जन्यजनकभावः कल्पयतीति चेत्, तर्हि सर्पज्ञानेऽपि तथा बोध्यमिति भावः । **सर्वज्ञानेति** । सर्वसर्प[1]ज्ञानेऽत्यर्थः । **विषयादन्यो नेति** ॥

अत्रेदं बोध्यम्---कलमबीजादौ तादृशवैलक्षण्यस्य प्रत्यक्षसिद्धत्वाल्लघुरूपान्तराभावाच्च तदेव जनकत्वावच्छेदकम् । सर्पज्ञानादौ तु तन्न प्रत्यक्षसिद्धम्, नाप्यवच्छेदकतया कल्प्यम्; विष-

---

[1] सर्पासर्प.

SGDF
Sri Gargeshwari Digital Foundation

यितासम्बन्धेन सर्पादेरेवावच्छेदकत्वसम्भवात् । न च सर्पत्वावच्छिन्न-विषयितात्वेन सम्बन्धत्वे गौरवम्, विषयितामात्रेण तु सर्पोऽतिप्रसक्तः, सर्पत्वाद्यन्यरूपेण सर्पविषयकज्ञानेपि[1] सत्त्वादिति वाच्यम्; सर्पत्व-विशिष्टं प्रति सर्पत्वावच्छिन्नविषयिताया एव सम्बन्धत्वेन विषयिता-मात्रेण सर्पस्यानतिप्रसक्तत्वात् । न च तथापि सर्पत्वावच्छिन्नत्वमव-च्छेदकतायां कल्प्यम्, कल्प्यजातौ त्वनवच्छिन्नमेवावच्छेदकत्वमिति वाच्यम्; मम सर्पत्वनिष्ठ[2]मवच्छेदकत्वमिव तव जात्यन्तरं कल्प्यमिति लाघवाभावेन तव कल्पनानुदयात्, अवच्छेदकताख्यविषयितासम्बन्धेन सर्पत्वस्यैव कारणताद्यवच्छेदकत्वसम्भवाच्च । विषयितासम्बन्धेन सर्प-स्यापि ज्ञानप्रत्यासन्नत्वात्, सर्पसम्बन्धेन सर्पत्वस्य कारणताद्यवच्छेदक-त्वसम्भवाच्च ॥

अपि च या यद्व्यावृत्तकार्यताशालिधीः, सा तदवृत्तेःस्वविषय-सम्बन्धान्यवैलक्षण्यस्याश्रय इति सामान्यतो व्याप्तिर्वाच्या । अन्यथा ज्ञानमात्रे विषयसम्बन्धान्यधर्मसिद्धिर्न स्यात् । तथाच स्वरूपतो घट-त्वादिविषयकज्ञाने कथं साध्यसिद्धिः? तन्निष्ठजन्यत्वादौ विषयिता-सम्बन्धेन घटत्वादेरेवावच्छेदकत्वसम्भवात् । न च—तत्तद्धीव्यक्ते-र्देशकालान्तरे उत्पत्तिवारणाय तत्तद्धीत्वेन तत्तत्कारणव्यक्तिजन्यत्वं वाच्यम्, तत्तद्धीत्वं च न तत्तद्धीस्वरूपम्, स्वरूपतो ज्ञानस्या-वच्छेदकत्वासम्भवाद्धर्मान्तरं चातिप्रसक्तम्, अतो धीनिष्ठाखण्डधर्म-विशेषरूपमिति साध्यसिद्धिरिति वाच्यम्; स्वरूपतस्तत्तद्धीव्यक्तीनामव-च्छेदकत्वे[3] बाधकाभावात, स्वरूपतस्तासां बुद्ध्यविषयत्वेऽपि ज्ञान-त्वाद्युपलक्षितरूपेणावच्छेदकताधीविषयत्वसम्भवात्, कारणताद्युपहिते स्वस्मिन् केवलस्य स्वस्य [4]भेदसम्भवेन मन्मतेऽपि तादात्म्यसम्भवाच्च ।

---

[1] असर्पज्ञानेपि. [2] सर्पत्वविषयनिष्ठ. [3] दकत्वेन–ग [4] भेदे–क. ग.

SGDF
Sri Gargeshwari Digital Foundation

मानाभावात् । अत एव धर्म्यन्तरसम्बन्धमनपेक्ष्य विलक्षणमित्युक्तानुमानं बाधितं द्रष्टव्यम् । व्यभिचारि च, तथाहि—घटसंयोगः, पटसंयोगान्न जात्या भिद्यते, तदवृत्तिजात्यनधिकरणत्वात् । किंतु घटरूपोपाधिनैवेति धर्म्यन्तरसम्बन्धमपेक्ष्यैव विलक्षणे घटसंयोगत्वावच्छिन्ने साध्याभाववति उक्तहेतुसत्वाद्व्यभिचारः, अप्रयोजकं च । न च—उपलक्षणीभूतचैत्रसम्बन्धेनापि कलमाङ्कुरादेर्व्यावृत्ततापत्तिः; विपक्षबाधायामिष्टापत्तेः । न हि जातेर्व्यावर्तकत्वे उपाधिरव्यावर्तको भवति । एवं शिलोद्धरणमाषोद्धरणकृत्योः परस्परं जात्या व्यावृत्तावपि विषयरूपोपाधिनापि व्यावृत्ति-

---

अतएव "दण्डत्वादिकमेव साध्यतावच्छेदकमि"त्यादिदीधितिटीकायां दण्डादेः स्वरूपत एव प्रतियोगितावच्छेदकत्वं तार्किकैरुक्तम् । यत्र तु क्वचिद्विषयादेः क्लृप्तस्यावच्छेदकत्वं न सम्भवति, तत्रातिरिक्तवैलक्षण्यसिद्धावपि नास्माकं क्षतिः, तदेतदाह—**मानाभावादिति** ॥

यत्तु सादृश्यविशेषोऽनुगतः सर्पज्ञानमात्रेऽस्तीति स एव व्यावर्तक इति, तत्तुच्छम्; सर्पादिविषयक[1]त्वान्ये सादृश्ये मानाभावात् । यदपि सङ्करप्रसङ्गा[2]दित्युक्तं उपाधित्व इव जातित्वेऽपि साङ्कर्यादोषत्वादिति, तदपि न; जातेरसङ्कीर्णत्वानियमे [3]सर्पज्ञानादिनिष्ठकार्यतादावच्छिन्नत्वा[4]नियमस्यापि वक्तुं शक्यत्वेन साध्यसिद्धौ तर्काभावात् । व्यावर्तकत्वेन तु न जातिः सिध्यति; उपाधिनापि तत्सम्भवात् ॥

न जात्या भिद्यत इति । पटसंयोगावृत्तिजातिशून्यः तादृशजातिग्राहकमानाविषयत्वादित्यर्थः । **घटरूपेति** । घटसमवेतत्वेत्यर्थः । **धर्म्यन्तरसम्बन्धमपेक्ष्येति** । यो यदवृत्तिजन्यतावान्, स स्वाधिकरणसम्बन्धान्यस्य तदवृत्तिधर्मस्याश्रय इति व्याप्तिः पूर्वमुक्तेत्यभि-

---

[1] त्वान्यसा—क. ग. [2] दित्युक्तम्—क. ग. [3] सर्व—क. ग. [4] वच्छिन्नत्व.

SGDF
Sri Gargeshwari Digital Foundation

रविरुद्धा। शिलोद्धरणे च जातिविशेषविशिष्टायाः कृतेर्जनकत्वेन तद्रहिताया माषोद्धरणकृतेस्तदनिष्पत्तिरविरुद्धा। व्यावृत्तेरन्यतोऽपि सिद्धिसम्भवे कार्यकारणभावादिनिर्वाहाय जातिविशेषस्यापि कल्पनात्, अतीतासद्विषयकज्ञानव्यवहारादौ चातीता-

प्रायेणेदम्। ज्ञाने [1]चोक्तसाध्यमस्ति, विषयस्य ज्ञानाधिकरणत्वात्। तेन स्वविषयसम्बन्धान्यधर्मत्वेन पूर्वोक्तरूपेण साध्यतायां साध्याप्रसिद्धिरेव न व्यभिचार इति[2] परास्तम्॥

यत्तु—'जातिविशेषावच्छिन्नकर्मप्रयोज्यजातेः पटसंयोगावृत्तेर्घटसंयोगे सत्त्वेन न व्यभिचार इति, तन्न; तत्तत्क्रियाव्यक्तित्वेन तत्तत्क्रियासमानाधिकरणत्वावच्छिन्नं प्रति हि कारणता, न तु विजातीयसंयोगत्वावच्छिन्नं प्रति; तत्तत्क्रियानधिकरणेऽपि विजातीयसंयोगोत्पत्त्या व्यभिचारापत्तेः। तत्तत्क्रियानधिकरणे संयोगोत्पत्तौ तादृशदेशानामेव नियामकत्वम्, तत्तद्देशव्यक्तिसमवेतत्वावच्छिन्नं प्रति तद्व्यक्तित्वेन हेतुत्वात्। तथाच येन रूपेण क्रियाहेतुस्तदवच्छिन्नविशिष्टत्वेन कार्यत्व[3]स्वीकारात्, वैजात्यस्य पटसंयोगावृत्तेर्घटसंयोगे मानाभावादसिद्धत्वेन कथं न व्यभिचारः॥

कार्यकारणभावादीति। आदिना जातिविशेषविशिष्टविषयकत्वेन ज्ञानस्यानुभवो ग्राह्यः, अत एवेत्यस्योत्तरमपि पर्योजनीयः। तेनाभावनिदर्शनमसिद्धम्। न हि घटाभावस्य पटाभावात्प्रतियोग्यविशेषितं वैलक्षण्यं केनाप्यङ्गीक्रियते युज्यते वा। न च—घटाभावादौ तन्मात्रगतकारणताद्यवच्छेदकतया तत्सिद्धिरिति—वाच्यम्; प्रतियोगितासम्बन्धेन घटादेरेवावच्छेदकत्वसम्भवात्, प्रतियोग्यविशेषितरूपेणान्यथासिद्ध्यावच्छेदकत्वा[4]सम्भवात्। अन्यथा तत्तदभावव्यक्तेरेवोक्त-

[1] नोक्त—ग. [2] न व्यभिचारः, धीत्वघटितहेतुश्च नोक्तं संयोग इति—क. ग.
[3] कार्यत्वेन कार्य—ख. [4] वच्छेदकत्व.

SGDF Sri Gargeshwari Digital Foundation

सतोरेव व्यावर्तकत्वम्। न हि व्यावृत्तिधीजनकत्वं तत्; येन सत्त्वाभावे प्राक्सत्त्वशरीरतया न स्यात्, किंतु व्यावृत्तिधीजनकधीविषयत्वमित्युक्तम्। तच्चातीतादौ सुलभमेव। अतएवाभावादिनिदर्शनमपि निरस्तम्; उक्तरूपव्यावर्तकत्वस्यात्यन्तासत्यपि सम्भवेन कदाचित्सति सम्भवस्य कैमुतिकन्यायसिद्धत्वात्। ननु—विषयस्य व्यावर्तकत्वेऽपि सर्वत्र विशेषणत्वासम्भवादुपलक्षणत्वमेव वाच्यम्; उपलक्षणेन चोपलक्ष्यगतस्वसम्बन्धव्यतिरिक्तः कश्चिद्धर्म एवोपस्थाप्यते, काकेनेव गृहसम्बन्धिना तद्गतसंस्थानविशेषः; तथाच स एव व्यावर्तक इति विषयसम्बन्धमनपेक्ष्य स्वगतेनैव धर्मेण ज्ञानस्य व्यावृत्तिरिति चेन्न; विषयस्य विशेषणत्ववदुपलक्षणत्वस्याप्यनभ्युपगमात्। येन हि स्वोपरागाद्विशेष्ये व्यावृत्तिबुद्धिर्जन्यते, तद्विशेषणं व्यावृत्तिबुद्धिकाले विशेष्योपरञ्जकमित्यर्थः; यथा गोत्वादि। येन च स्वोपराग-

---

रीत्या स्वरूपतोऽवच्छेदकत्वसम्भवेनातिरिक्तधर्मकल्पने मानाभावादिति समुच्चीयते। **अत्यन्तासतीति**। मिथ्याभूतेत्यर्थः। स्वसत्ताकालेऽपि स्वसमानाधिकरणात्यन्ताभाव[1]प्रतियोगिनीति यावत्। तेन तुच्छस्य मानाविषयत्वेनाव्यावर्तकत्वेऽपि न क्षतिः। **कदाचित्सतीति**। सर्व[2]-कालसम्बान्धिनीत्यर्थः। **स्वोपरागादिति**। स्वोपरागमादायेत्यर्थः। स्वोपरक्ता व्यावृत्तिबुद्धिर्यद्बुद्ध्या जन्यत इत्यर्थः। **काले इति**। तथाच स्वकालीनत्वे सति स्वविषयतानिरूपितविशेष्यताशालित्वमेव व्यावृत्तिबुद्धौ स्वोपराग इति भावः। स्वध्वंसादेरितरस्माद्व्यावर्तके प्रतियोग्यादावुपाधावतिव्याप्तिवारणाय सत्यन्तम्। उपलक्षणे तद्वारणाय विशेष्यम्। **यथा गोत्वादीति**। गोत्वं गोव्याव[3]र्तकमित्यादिप्रतीतौ व्यावृत्तिबुद्धौ

---

[1] णाभाव-क. ख. [2] सत्यत्वेन त्वदभ्युपगते सर्व-क ग. [3] योगाद्व्याव.

SGDF
Sri Gargeshwari Digital Foundation

मुदासीनं कुर्वता विशेष्यगतव्यावर्तकधर्मोपस्थापनेन व्यावृत्तिबुद्धिर्जन्यते तदुपलक्षणम्, यथा काकादि । यत्तु-विशेष्ये नोपरञ्जकम्, न वा धर्मान्तरोपस्थापकम्, अथ च व्यावर्तकं तदुपाधिः

स्वविशेष्यान्वितायामुक्तोपरागसम्बन्धेन गोत्वस्यान्वयसम्भवाद्व्यावृत्तिबुद्धौ तद्विशेषणं व्यवह्रियत इति भावः । **तदुपलक्षणमिति ।** तथाच व्यावृत्तिबुद्धावुपलक्षणत्वं तज्जनकधीविषयधर्मोपस्थापकधीविषयत्वमिति भावः । **नोपरञ्जकमिति ।** व्यावृत्तिबुद्धिकाल इत्यादिः । व्यावर्तकतायाः प्रमाणसिद्धत्वात्तृतीयमपि व्यावर्तकं वाच्यमित्याशयेनाह—**व्यावर्तकमिति ।** व्यावर्तकत्वेन प्रमितमित्यर्थः । **उपाधिरिति ।** तथाचोक्तोभयान्यत्वे सति व्यावृत्तिबुद्धेर्जनकधीविषयत्वमेव तस्यामुपाधित्वमिति भावः ॥

लक्ष्यस्वरूपमपि यद्यदमुष्य साक्षा-
दर्थान्तराद्भवति भेदकमेतदाहुः ।
अस्य स्वलक्षणतयैव तु लक्षणं खं[1]
छिद्रं जलं द्रवमितीदृशमेव लोके ॥
"स्वानुरक्तमतिजन्मकारणं यत्पुनर्भवति लक्ष्यवस्तुनि ।
तद्विशेषणतयाऽस्य लक्षणं केसरादिकमिवाश्ववस्तुनः" ॥
"स्वानुरक्तमतिजन्महेतुतां लक्ष्यवस्तुनि निरस्य लक्षणम् ।
अस्व[2]रूपमपि तस्य यद्भवेत् काकवत्तदुपलक्षणं विदुः" ॥

इति संक्षेपशारीरकोक्तौ तूपलक्षणमुपाधिश्च द्वयमपि स्वलक्षण[3]विशेषणभिन्नव्यावर्तकत्वेन सङ्गृहीतम् । तावता च न तयोरवान्तरविशेषोऽपलापार्हः । अत एव जगत्कारणत्वादिकमपीतरव्यावृत्त्युपलक्षितब्रह्मबुद्धावुपाधिरेव [4]विशेषणं स्वलक्षणान्यव्यावर्तकत्वेनैकीकृत्य उपलक्षणत्वेन शास्त्रे व्यवहारः । अत एवाकाशपदप्रयोगे शब्दाश्रयत्वमुपलक्षणमिति

[1] लक्षणं स्व. [2] अन स्व. [3] विशेष. [4] विशेषणस्वलक्षण—क. ख. ग.

SGDF
Sri Gangeshwari Digital Foundation

यथा पङ्कजशब्दप्रयोगे पद्मत्वम्, यथा वोद्भिदादिशब्द-प्रयोगे यागत्वावान्तरजातिविशेषः। अत्र हि पद्मत्वयागत्वा-वान्तरधर्मौ पङ्कजनिकर्तरि फलोद्भेदनकर्तरि च न धर्मान्तर-मुपस्थापयतः, अप्रतीतेः; न वा स्वोपरक्तां बुद्धिं जनयतः; समुदाये शक्तयन्तरानभ्युपगमात्। अथ च कुमुदज्योतिष्टोमा-दिभ्यो व्यावर्तकावित्युपाधी एव। इदं च प्राभाकराणां भाट्टानां

शब्दमण्युक्त[1]मप्यविरुद्धमिति भावः। **यथा पङ्कजशब्देति**। उक्तं हि शब्दमणौ—"यथा सर्वनाम[2]त्वमहंपदेषु बुद्धिस्थत्वसम्बोध्यत्वोच्चार-यितृत्वानि प्रयोगोपाधयः; तेन बुद्धिस्थादिकमेव तैर्बोध्यते, न तु बुद्धिस्थत्वादिकं शक्यम्;[3] तेन रूपेण ज्ञानाभावात्, तथा पद्मत्वमपि प्रयोगोपाधिः" इति। **उपस्थापयतः** उपस्थापकधीविषयौ। **जनयतः** जनकधीविषयौ। **समुदाये**। पङ्कजेति उद्भिदिति वर्ण-समुदाये। **शक्तयन्तरेति**। अवयवशक्तयन्यशक्तीत्यर्थः। **व्यावर्तका-विति**। विशेष्यतासम्बन्धेन पङ्कजेत्यवयवशक्ति[4]ज्ञानजन्यशाब्दबोधं प्रति तादात्म्येन [5]पद्मत्वादिना हेतुत्वकल्पनात्, कुमुदादिभ्य उक्तबोध-विषयस्य व्यावर्तकावित्यर्थः; तथाच प्रयोगजन्यबोधेऽनुपरक्तत्वे तद्वि-षयव्यावर्तकधर्मानुपस्थापकत्वे च सति तादृशबोधविषयव्यावर्तकत्वं प्रयोगोपाधित्वम्। तत्तत्पद्मव्यक्तित्वं तु तादृशबोधविषयसामान्यस्य न व्यावर्तकम्, अन्यतमत्वादिकमपि गुरु, पद्मत्वादेः प्रयोगनियामकत्व-ज्ञाने सत्येव व्यावर्तकत्वेन ज्ञेयं चेति पद्मत्वादिकमेव प्रयोगोपाधित्वेन व्यवह्रियत इति भावः॥

एतेन—पद्मत्वादिना नावयवशक्तयधीनं ज्ञानं कुमुदादौ

---

[1] मर्थावरु–**ग**. [2] तत्वम–**ग**. [3] स्थत्वाद्यशक्यम्. [4] शक्तिः–**ख**.
[5] पद्मत्वादिहेतुत्व.

SGDF
Sri Gangeshwari Digital Foundation

प्रतिबध्यते; शक्त्याकांक्षातात्पर्यादिधीसत्त्वे तत्राप्यन्वयबोधात्। नापि प्रयोगः प्रतिबध्यते; सामग्रीसत्त्वे तस्यावश्यकत्वात्। अहमादिपदे स्वात्ममात्रशक्ते शक्तिग्रहसहकारितयोच्चारयितृत्वादि स्वरूपसदेव धीनियामकम्—इति मण्युक्तदूषणमपास्तम्; यावदवयवशक्तिज्ञानविशिष्टशाब्दबोधे पङ्कत्वादिना हेतुत्वे बाधकाभावात्। कुमुदादौ बोधस्य लक्षणयैवोपपत्तेः। अतएव पङ्काद्यन्वयानुपपत्तिज्ञाने सत्येव कुमुदाद्यन्वयधीः॥

यदपि—"सर्वनाम्नां बुद्धिविषयत्वोपलक्षितप्रकारावच्छिन्ने शक्तिः, घटत्वादिना शक्यत्वे तु तदानन्त्यापत्तिः। न च तेषां मिथः पर्यायताऽऽपाद्या; उद्देश्यतावच्छेदकबुद्धिविषययावद्धर्मावच्छिन्ने सर्वपदस्य, प्रश्नोपक्रमबुद्धिविषयत्वावच्छिन्ने किंपदस्य, तत्पदोद्देश्यबुद्धि[1]-विषयत्वावच्छिन्ने यत्पदस्य, अवान्तरवाक्योद्देश्यबुद्धिविषयत्वावच्छिन्ने तत्पदस्य, प्रत्यक्षविषयत्वावच्छिन्ने इदमेतत्पदयोः, व्यवहितबुद्धिविषयत्वावच्छिन्ने अदः पदस्य[2] शक्तिस्वीकारात् एवं त्वमहंपदयोरप्यात्ममात्रशक्तत्वे पर्यायतापत्तेः, त्वमहं वेति विकल्पानुपपत्तेश्च; उच्चारयितृत्वावच्छेदकत्वप्रकारकविषयत्वोपलक्षितधर्मावच्छिन्नेऽहंपदस्य, सम्बोध्यतावच्छेदकत्वप्रकारकबुद्धिविषयत्वावच्छिन्ने त्वंपदस्य शक्तिः। स्वरूपसदित्युक्तमणिवाक्यस्थपदमुपलक्षणविधया शक्यतावच्छेदकानन्तर्गतपरम्। तथा च दृष्टान्ताभावात्पङ्कत्वादि न प्रयोगोपाधिः" इति पक्षधरैरुक्तम्, तदपि न युक्तम्; बुद्धिविषयत्वोपलक्षितरूपेण शक्तिस्वीकारेऽपि हि घटत्वादिरूपेण बोध्यं[3] प्रति बुद्धिविषयत्वेन घटत्वादिप्रकारकशक्तिज्ञानत्वेन कारणता [4]वाच्यैव; अन्यथा कदाचिद्घटत्वेन, कदाचिदन्येन रूपेण बोध इत्यत्र नियामकाभावात्। तथाच तत्पदजन्यशाब्दबोधे तत्तद्बुद्धिविषयत्वेन हेतुताकल्पनया प्रयोगोपाधित्वेनैव निर्वाहे शक्तिज्ञानकारणता-

---

[1] द्देश्यसहबुद्धि. [2] इदं पदस्य—ख. बोधं—क. ग. [4] वाच्येतान्यथा—क. ग.

SGDF
Sri Gangeshwari Digital Foundation

च संम्मतमुदाहरणयुगळम् । तार्किकाणां तु आकाशशब्दप्रयोगे

वच्छेदककोटौ तत्तद्बुद्धिविषयत्वानिवेशो न युक्तः, घटत्वादिप्रकारकशक्तिज्ञानीयानन्तहेतुतावच्छेदकेषु गौरवापत्तेः । पर्यायत्वं नानार्थत्वं च सर्वनाम्नस्तत्त्वाद्युक्त[1]मेव । अन्यथा पुनस्सर्वनामत्वमेव व्याहतं स्यात् । सर्ववाचकं हि सर्वनाम; न तु बुद्धिविशेषविषयरूपाकिञ्चिद्वाचकम् । अतएवेतरादिशब्दानां सर्वनामत्वासम्भवात्तद्ग्रहणाय, सकलादिशब्दानां तत्सम्भवात्तद्व्यावर्तनाय गणपाठः । स इदं वा त्वमहं वेत्यादिविकल्पास्तु तत्तत्पदबोध्यविषयकत्वेनोपपादनीयाः ॥

तार्किकाणामिति । यद्याकाशशब्दादाकाशनिष्ठानवच्छिन्नविषयताकशाब्द[2]बोधः, 'अस्तु वा पदादपि निर्विकल्पकम्' इति मणावुक्तत्वात्तदा **आकाशशब्दप्रयोगे** इत्यस्य आकाशपदजन्यशाब्दबोधे इत्यर्थः । शाब्दबोधे शब्दाश्रयत्वस्यानुपरागात् व्यावर्तकधर्मानुपस्थापकत्वाच्चोपाधित्वमिति भावः । यदि च शब्दाश्रयत्वादिना कदाचित् अष्टद्रव्यान्यद्रव्यत्वादिना च शाब्दबोधः, उक्तं हि मणौ 'शब्दाश्रयत्वादिना नियतोपस्थितिरेव नास्ति' इति; तदाकाशपदजन्यायां शब्दाश्रयत्वान्यरूपेण शाब्दबुद्धावित्यर्थः । अथवाऽऽकाशपदशक्यत्व इति तदर्थः । तादृशशक्यत्वेऽनुपरक्तत्वाद्व्यावर्तकधर्मानुपस्थापकत्वात्तदाश्रयव्यावर्तकत्वाच्चोपाधित्वमिति भावः । शब्दाश्रयत्वांशेऽपि यदि शक्तिः, 'अस्तु वा तदपि शक्यं यदि तेन रूपेण नियतोपस्थितिः' इति पक्षान्तरस्यापि मणावुक्तत्वात्तदा शब्दाश्रयत्वं विशेषणमेव, नोपाधिः । अथाशक्यस्य शब्दाश्रयत्वादेः कथं शाब्दानुभवः? स्वनिष्ठवृत्त्या शब्दोपस्थापितस्यैव[3] तत्स्वीकारादिति चेत्तदुक्तं मणौ—'यद्धर्मवत्त्वेन नियमत उपस्थिते यत्र शक्तिग्रहः, तत्स्मरणजनकसंस्कारस्य तद्धर्मविषयता-

---

[1] सर्वनामसु त्वदुक्त–ग. [2] ताकाशाब्द–ग. [3] शब्दोपस्थितस्यैव.

SGDF
Sri Gangeshwari Digital Foundation

शब्दाश्रयत्वमुदाहरणम् । अतएवाविद्यादिकं साक्षित्वादावुपाधिरिति सिद्धान्तो वेदान्तिनाम् । अतो यत्र विषयस्य विशेषणत्वं न सम्भवति, तत्कालासत्वात्, तत्रोपाधित्वाभ्युपगमान्नोप-

---

नियमेन तदुद्बोधकादेव तदंशेऽप्युद्बोध(क)नियमेनाशक्यस्यापि तस्य भानात्' इति ; तदंशे शक्तिं विनापि तदुपहिते शक्ति[1]ग्रहशक्यस्मृत्योस्तेन रूपेण शाब्दानुभवे कारणत्वं सम्भवतीति भावः । एषैव रीतिः पदमात्रस्येति तु नव्यतार्किकाः ॥

साक्षित्वेति । अनावृतविषयप्रकाशत्वरूपसाक्षित्वादावनुपरक्तं तदाश्रयव्यावर्तकानुपस्थापकमविद्यादिकमुपाधिरेवेति भावः । **तत्रोपाधित्वेति** । यद्यपि यदधिकरणकाले यदविद्यमानं तत्र तन्न विशेषणं, न वोपाधिः, तदधिकरणकाले विद्यमानस्यैव स्वाश्रयान्विते तत्रोपरागानुपरागौ विशेषणत्वोपाधित्वे इति कल्पतर्वादावुक्तत्वात् । तथापि तन्मते प्रतियोग्यादेर्ध्वंसादिव्यावृत्तिबुद्धावुपलक्षणत्वमेव स्वीक्रियते, उपलक्षणलक्षणे व्यावर्तकान्तरोपस्थापकत्वानुपादानात्, अविद्यमानत्वे सति व्यावर्तकत्वस्यैव तल्लक्षणत्वात् । सर्वथाऽपि[2] व्यावर्तकानुपस्थापकमविशेषणमपि व्यावर्तकं सर्वसम्मतम् ॥

वस्तुतो विशेष्यव्यावर्तकधर्मोपस्थापकमेवोपलक्षणमिति पराभ्युपगमेनेदमुक्तम् । न त्वत्रैवाचार्याणां श्रद्धा । स्वविशेष्यान्वितोपरक्तं व्यावर्तकं विशेषणम् । उक्तोपरक्तान्यद्विद्यमानं व्यावर्तकमुपाधिः । उक्तान्यदविद्यमानं व्यावर्तकमुपलक्षणम् । न तु व्यावर्तकान्तरोपस्थापकत्वघटितम् । यत्र धर्मान्तरस्यैव व्यावृत्तिव्याप्यत्वेन धीर्न तूपलक्षणस्यैव, तत्रैव तस्य तदुपस्थापकत्वमावश्यकम् ; यथा काकादेश्चैत्रगृहेतर[3]व्यावृत्तिव्याप्यत्वे[4]न न धीः ; वृक्षादिषु व्यभिचारज्ञानात्, कदापि

---

[1] तदुपहितशक्ति–**क. ग.** [2] सर्वस्यापि. [3] गृहे इतर. [4] त्वेन धीः.

SGDF
Sri Gargeshwari Digital Foundation

काकादेर्यत्र न सम्बन्धस्तादृशचैत्रगृहव्यक्तौ तदसत्त्वादपि 'काकवन्तश्चैत्रगृहाः' इत्यादौ न तस्य व्यावर्तकता। यत्र तूपलक्षणस्य व्यावृत्तिव्याप्यत्वेन धीः, व्यावर्त्यमात्रनिष्ठता च, यथा स्वध्वंसज्ञानादौ प्रतियोगिविषयादेः, तत्र न तदावश्यकम्; मानाभावात्। न ह्यनुमितिकालाविद्यमानो धूमादिः पर्वतादौ न वह्न्याद्यनुमापक इत्यद्वैतरत्नेऽक्षरतात्पर्याभ्यामुक्तत्वात् ॥

यत्तु—'दण्ड्ययमासीदित्यादौ व्यावृत्तिबुद्धिकालासतोऽपि दण्डादेर्विशेषणत्वव्यवहारो न स्यात्, दण्डिनं भोजयेत्यादौ दण्डादेर्विशेषणत्वव्यवहारश्च स्यात्, इति तन्नात्र मूले दूषणम्; आद्ये हि व्यावृत्तिबुद्धौ दण्डादेरविशेषणत्वमिष्टमेव। अतीतसत्तासम्ब[1]न्धांशे एव तस्य विशेषणत्वव्यवहारात्तदुपरागस्य च तत्र सत्त्वात्। द्वितीयेऽपि व्यावृत्तिबुद्धौ तस्य विशेषणत्वमिष्टम्, भोजनीयत्वांश एवाविशेषणत्वात्। अत एव प्रत्याय्यव्यावृत्त्यधि[2]करणतावच्छेदकत्वं स्वहेतुकानुमितिविषयीभूता या स्वाश्रयेतरव्यावृत्तिः तदधिकरणताकालसमानियतकालवृत्तित्वं तादृशकालव्यापककालवृत्तित्वादिपर्यवसितम्। स्वकालनियतस्य व्यावृत्तिबोधस्य जनकत्वं वा विशेषणत्वमिति लक्षणेषूक्तदूषणमुक्तमद्वैतरत्ने। तेषु सामान्यतो विशेषणत्वस्य लक्ष्यत्वाद्व्यावृत्तिबुद्ध्यंशे आद्ये, भोजनीयत्वांशे द्वितीये, दण्डादेर्विशेषणत्वापत्तेः। अत एव संक्षेपशारीरकीयोक्तवाक्ये विशेषणतयाऽस्य लक्षणमित्यनेन व्यावृत्तिबुद्ध्युपरक्तत्वघटितलक्षणे लक्षणत्वघटकव्यावृत्तिबुद्ध्यंशे विशेषणत्वमिति व्यवहारविशेष्यस्यैव लक्ष्यत्वं ज्ञापितम्। तस्मात्स्वविशेष्यान्विते यत्र तत्कालीनमुपरक्तं व्यावर्तकं यत्तत्र तद्विशेषणम्, तादृशे यत्रातादृशं व्यावर्तकोप-

---

[1] सत्तासु सम्ब. [2] अव्याप्यवृत्त्यधि.

SGDF
Sri Gargeshwari Digital Foundation

लक्षणत्वनिबन्धनदोषावकाशः, सन्देहे तु विशेषणत्वमेवाभ्य-र्हितत्वादुपेयते। तस्माद्विषय एव सर्वत्र ज्ञाने व्यावर्तकः। एकविषयकस्मृत्यनुभवयोः परोक्षापरोक्षयोश्च विषयमनपेक्ष्य जात्या परस्परव्यावृत्तिदर्शनात् सर्वत्र विषयनिरपेक्षा जातिरेव व्यावर्तिकेति न युक्तम्; भिन्नविषयके समानजातीये तदसम्भ-वात्। न च—तत्रापि जातिरस्ति क्षीरादिमाधुर्यवदिति वाच्यम्; चाक्षुषत्वादिना सङ्करस्योक्तत्वात्। न च तव मते तत्तद्वृत्तेस्त-त्तदाकारत्वेन चैतन्यस्य तत्प्रतिबिम्बितत्वेन (तदभिव्यक्तत्वेन)

स्थापकं, तत्र तदुपलक्षणम्, तादृशे [1] यत्र तादृशं व्यावर्तकोपस्थापनं विनापि व्यावर्तकम्, तत्र तदुपाधिरिति प्रकृतग्रन्थाभिप्रेतमपि युक्तमेव॥

परमार्थतस्त्वविद्यमानस्य धर्मान्तरोपस्थितिं विनापि व्यावर्तकस्यो पलक्षणत्वं कल्पतर्वाद्युक्तं यथाश्रुतं परिभाषामात्रे पर्यवसन्नं स्यात्। विशेषणत्वादिनिर्वचनं हि मुख्यामुख्यत्वविवेचनाय विशेषणत्वसम्भवे नोपाधित्वं, तत्सम्भवे च नोपलक्षणत्वं स्वीक्रियत इति फलकाय। तथा च यदि धर्मान्तरोपस्थापकमेवोपलक्षणम्, तदा तस्य स्वतो व्यावर्त-कत्वाभावेनोपाध्यपेक्षया जघन्यत्वमुपपद्यते। स्वतो व्यावर्तकत्वे तु [2] नाविद्यमानतामात्रेण जघन्यतोपपद्यते। अतएव विशिष्टवृत्तिज्ञानस्य विशेष्यान्वय्यंशे[3] विशेषणयोग्यताज्ञानसहकारेणैव शाब्दधीजनकत्वा-द्विशेषणस्योपाधित्वेनान्वयबोधो लक्षणयैवेत्याद्युक्तमित्युपाधेरपि विशेषणा-पेक्षया जघन्यतोपपद्यत इति प्रकृतग्रन्थार्थ एव साधीयान्। तत्रैव च कल्पतर्वादिग्रन्थस्यापि तात्पर्यं बोध्यम्॥

सङ्करस्येति पूर्वोक्तदोषगणस्योपलक्षणम्। **तत्तदाकारत्वे-नेत्यादि**तृतीयानामभेदोऽर्थस्तस्य वैलक्षण्यमित्यत्रान्वयः। **स्वत एव**

---

[1] यत्रा—ख. ग. [2] तु विद्य. [3] विशेष्यत्वांशे.

SGDF
Sri Gargeshwari Digital Foundation

वा मम तु तत्तज्ज्ञानस्य तत्तदीयस्वभावत्वेन तत्तद्व्यवहारजननशक्तत्वेन वा स्वत एव वैलक्षण्यमिति वाच्यम्; विषयस्यैवाकारसमर्पकत्वेन स्वभावव्यवहारयोः परिचायकत्वेन च तन्नैरपेक्ष्येण व्यावर्तकताया वक्तुमशक्यत्वात्। (अस्माभिश्च तुच्छे जनकत्वस्यानुक्तत्वात्) विशेषणत्वोपाधित्वयोः सम्भवे च नोपलक्षणत्वमित्युक्तम्। न च 'कथमसतः सज्जायेत' इति श्रुत्या 'नासतोऽदृष्टत्वात्' इति सूत्रेण शशविषाणादिभ्यः सदुत्पत्त्यदर्शनादित्यादिभाष्येण च विरोधः; तेषां तुच्छे जनकत्वनिषेधपरत्वात्, अस्माभिश्च तुच्छे जनकत्वस्यानुक्तत्वात्। तस्मात् सद्विविक्तत्वं साधनमिति सिद्धम्॥

इत्यद्वैतसिद्धौ असतस्साधकत्वाभावे बाधकम्.

विषयाघटितं तत्तदाकारत्वं तत्तद्विषयितारूपोऽतिरिक्तधर्मो यद्यपि; तथापि तस्य प्रत्यक्षज्ञाने व्यावर्तके विषयघटितरूपेणैव भानमिति विषयस्य व्यावर्तकत्वमावश्यकम्। विषयिताविशेषसम्बन्धेन विषयस्यापि व्यवहारादिकारणतादावच्छेदकत्वं[1] सम्भवतीति न विषयिताविशेष एव तदवच्छेदको न वा तत्त्वेनातिरिक्तशक्तेस्सिद्धिरित्याशयेनाह—**विषयस्यैवेति**। **आकारसमर्पकत्वेन** विषयिताविशेषरूपाकारापेक्षणीयत्वेन, तच्चोक्तरीत्या बोध्यम्। **व्यवहारेति**। व्यवहारजनकेत्यर्थः। **परिचायकत्वेन** इतरस्माद्व्यावर्तकत्वेन। ज्ञानस्वभावानामननुगतत्वाभावात् तेषामेव न तेषु व्यावर्तकत्वम्, न वा व्यवहारादिजनकताविशिष्टव्यावर्तकत्वम्। अतो विषयस्य व्यावर्तकत्वं जनकत्वादावच्छेदकत्वं चावश्यकमिति भावः॥

---

[1] कारणतावच्छेदकत्वं

SGDF
Sri Gangeshwar Digital Foundation

अथ दृक्दृश्यसम्बन्धभङ्गः

ननु—मिथ्यात्वानुमानमप्रयोजकं, सत्यत्वेऽपि दृश्यत्वोपपत्तेरिति—चेन्न; दृक्दृश्यसम्बन्धानुपपत्तेः। नहि ज्ञानं ज्ञेयासम्बद्धमेव प्रकाशकम्; अतिप्रसङ्गात्। नापि सम्बद्धम्; आत्मस्वरूपस्य तद्गुणस्य वा ज्ञानस्य ज्ञेयेन संयोगसमवाययोर-

---

तर्कैः सारस्वतै रत्नैश्चन्द्रिकाचन्द्रभूषणैः।
असतोऽसाधकत्वोक्तौ बाधकं ध्वान्तभञ्जनम् ॥

इत्यद्वैतसिद्धिव्याख्यायां गुरुचन्द्रिकायां असतः साधकत्वाभावे बाधकनिरूपणम्.

अथ दृग्दृश्यसम्बन्धभङ्गः.

संयोगसमवाययोरभावादिति। गुणादौ नात्मनस्संयोगस्सम्भवतीत्यविवादम्। द्रव्येऽपि तदतीतादशायां तदुत्पत्तिकाले च तदसम्भवः। न चोत्पत्तिकाले तदवयवसंयोगजन्यस्तत्संयोगः, अतीतादौ च तदीयसूक्ष्मावस्थासंयोगद्वारकः सम्बन्धः, एवं गुणादावपि द्रव्यद्वारेति—वाच्यम्; त्रुट्यादे[1]र्जन्यत्वेऽप्यवयवाभावस्योक्तत्वेन तत्र तद्गुणादौ च तदसम्भवात्; गुणगुणिनोर्युगपदुत्पत्तेः परैरस्वीकाराच्च। संयोगस्य सावयव[2] एव दृष्टत्वेन व्यापकविरुद्धोपलब्धेश्च। अस्मन्मते त्रुटेः संयोगानङ्गीकारात्, चतुरणुकत्वेन परोक्तद्रव्यस्य सावयवत्वे मानाभावात्। भावे वा त्रुटेः संयोगं विना[3] क्रिययैव तत्सम्भवात्, त्रुट्यादौ[4] गुणादौ चैकजातीयत्वेनानुभूयमानस्य ज्ञानसम्बन्धस्य तावता प्यनुपपत्तेश्च आत्मगुणत्वं[5] तु ज्ञानस्य न सम्भवत्येव; तत्र मनस एवोपादानत्वादन्यथा ज्ञानादौ मनसो निमित्तत्वमात्मन उपादानत्वमित्यत्र गौरवात्, कार्यत्वे-

---

[1] द्रव्यादे. [2] समवाय. [3] संयोगादिना. [5] द्रव्यादौ. [5] आत्मगुणत्वे.

SGDF
Sri Gargeshwari Digital Foundation

भावात्, अन्यस्य चानाध्यासिकस्य सम्बन्धस्याभावात्। नच विषयविषयिभावः सः; तस्य विषयित्वविषयत्वरूपस्यैकैकमात्रनिष्ठत्वेन द्विष्ठसम्बन्धात्मकत्वासम्भवात्, दुर्निरूपत्वाच्च। तथा हि (१) विषयत्वं किं ज्ञानजन्यफलाधारत्वम्, (२) किं वा ज्ञानजन्यहानादिबुद्धिगोचरत्वम्, (३) उत ज्ञानकर्मत्वं, (४) ज्ञानाकारार्पकत्वं वा, (५) दृश्यमानत्वे सति तत्वं वा, (६) ज्ञानजन्यव्यवहारयोग्यत्वं वा, (७) यत्सन्निकृष्टकरणेन यज्ज्ञानमुत्पाद्यते तत्वं वा, (८) यस्यां संविदि योऽर्थोऽवभासते स

नात्मोपादानकत्वादात्मसमवेतत्वेऽपि[1] मनःपरिणामरूपज्ञानादिर्नात्मगुणः, द्रव्यत्वात्। परेण तु आत्मगुणत्वेन स्वीकृतस्य ज्ञानस्य (न) संयोगस्संभवति; गुणत्वादेव। तत एव नानात्म[2]समवायः। आत्मनस्तु यद्यपि समवायः कार्यमात्रे सम्भवति; तथापि नातीतादौ न वा[3] तस्य सम्बन्धत्वसम्भवः। सम्बन्धान्तरस्य स्वीकारेऽनवस्थानात्। अस्वीकारे नासम्बद्धस्य सम्बन्धत्वमतिप्रसङ्गादिति भावः। **अन्यस्येति।** विषयविषयिभावादिसम्बन्धस्य वक्ष्यमाणरीत्या दुर्निरूपत्वेन शुक्तिरूप्याद्योःसम्बन्धस्येव[4] (मिथ्यात्वाद्वक्ष्यमाणरीत्या सम्बन्धि) मिथ्यात्वप्रयोजकत्वमित्यतादृश[5]रूपस्यानाध्यासिकस्य सम्बन्धस्याभाव इति भावः। **द्विष्ठसम्बन्धेति।** यो ययोस्सम्बन्धः स तयोर्वर्तते। अतएव तेन[6] सम्बन्धेन तयोर्मिथो विशिष्टधीनियमः। यथा संयोगसमवायौ। न हि ताभ्यां सम्बन्धाभ्यां यत्र यस्य विशिष्टप्रमा, तस्य तत्र न विशिष्टप्रमेति सम्भवति। यदि च चैत्राद्यवृत्त्यपि स्वत्वादि सम्बन्धः, तदा घटाद्यवृत्तिः पटादिरपि घटादिसम्बन्धः स्यात्, तदवृत्तित्वाविशेषात्।

---

[1] समवेतत्यपि. [2] नात्म. [3] नातीतादौ न वानादौ न—**वा. क. ग.**
[4] अयं कुण्डलितः पाठः—**ख.** पुस्तके न दृश्यते. [5] मिति तादृश. [6] एकेन.

SGDF
Sri Gargeshwari Digital Foundation

तस्या विषयः, तथाच संविदि भासमानत्वमिति वा, (९) सम्बन्धान्तरमन्तरा ज्ञानावच्छेदकत्वं वा । आद्ये फलं न ताव ज्ज्ञातता, अनङ्गीकारात्; अतीतादावभावाच्च। नापि हानादिः;

सत्त्वे[1] चैत्रादिनिष्ठस्वामित्वादिनिरूपितत्वं विशेष इति चेन्न; पटादेरपि घटादिसामानाधिकरण्यादिसत्त्वात्। चैत्रीयं धनमित्यादिर्धीरेव विशेष इति चेन्न; युक्तिविरोधे तस्या मिथ्याविषयकत्वात्। अन्यथा शुक्तिरूप्ययोरपि संम्बन्धं रोचयेत्। धीसत्त्वा[2]त्तत्र व्यवहारकाल एव बाधोऽस्ति प्रकृते तु तादृशविचारकाल इति चेत्; तावता प्रकृते सम्बन्धो व्यावहारिकोऽस्तु न तात्त्विकः। तस्मादेकैकमात्रनिष्ठो न सम्बन्ध इति विषयत्त्वं विषयित्वं वा न विषयविषयिणोः सम्बन्धः। तदुभयनिष्ठं तादात्म्यं तु विप्रकर्षादिना मिथ्यात्वेन स्थापयिष्यते। **अनङ्गीकारादिति**। ज्ञात इति व्यवहारस्य ज्ञानसम्बन्धेनैवोपपत्तेः। अज्ञानस्य भ्रमो[3]पादानत्वादानुभविकत्वाच्चावश्यकत्वेन तन्निवृत्तेरेव[4] फलत्वेन ज्ञातता नाङ्गीक्रियते। न चाज्ञाननिवृत्तिरेव फलं निवेश्यामिति—वाच्यम्; प्रातीतिकेष्वनुवाद्येषु चाव्याप्तेः। **अतीतादाविति**। अतीतादेरुपादानस्येदानीमभावात्तत्र ज्ञातता नोत्पद्यते। नापि तस्या[5]मात्मैवोपादानम्, विषये तु तादात्म्यान्यस्सम्बन्धः; विषयस्योपादानत्वेऽप्यात्मनि सम्बन्धान्तरस्यावश्यकत्वात्। अन्यथा पुरुषान्तरज्ञाननिमित्तकज्ञाततानुभवापत्तेरिति—वाच्यम्; तादात्म्यसम्बन्धस्य सामानाधिकरण्यप्रतीतिनियामकत्वात्, घटज्ञानेनात्मा ज्ञात इति व्यवहारापत्तेः। कुत्रचिद्विषये केनचिज्ज्ञानेन ज्ञाततेत्यत्र विषय-

[1] स्वत्वे–ग. [2] रोचयेथाः। असत्त्वात्. [3] अज्ञानभ्रमो–क. [4] निवृत्तेरेव–क. [5] तस्या–आ. ग.

SGDF
Sri Gargeshwari Digital Foundation

गगनादौ तदभावात्, कलधौतमलादेरपि तज्ज्ञानविषयत्वप्रसङ्गाच्च। नाप्यभिज्ञाभिलपने; तयोर्ज्ञेयावृत्तित्वात्। नच विषयविषयिभावेन ते तत्र स्त इति—वाच्यम्; तस्यैव विचार्यमाणत्वात्। अत एव न द्वितीयोऽपि। न तृतीयः; ईश्वरज्ञानस्यातीतादिज्ञानस्य च कर्मकारकाजन्यत्वेन निर्विषयत्वप्रसङ्गात्। न चतुर्थः; ज्ञानतदाकारयोरभेदेन सर्वेषां ज्ञानहेतूनां विषयत्वापातात्, अनुमित्यादिविषये तदभावा(पाता)च्च। न पञ्चमः; दृश्यमानत्वस्य विषयत्वघटितत्वेनात्माश्रयात्। न षष्ठः; योग्यतायां योग्यतान्तराभावात्। न च योग्यता योग्यतां विनैव योग्या, यथा दृश्यत्वं दृश्यत्वान्तरं विनैव दृश्यमिति—वाच्यम्; अवच्छेदकरूपापरिचये योग्यताया एव गृहीतुमशक्यत्वात्। न च ज्ञानविषयत्वं तदवच्छेदकम्; आत्माश्रयात्। न सप्तमः; नित्येश्वरज्ञानस्य निर्विषयत्वप्रसङ्गात्। नाष्टमः; संविदीति न

विषयिभावस्यैव नियामकत्वादात्माश्रयापत्तेश्च। **गगनादाविति**। सदा सम्बन्धापेक्षाभ्यां तत्र हानोपेक्षयोरसम्भवादुपादानस्य च पूर्वसिद्धत्वान्न तेषां फलत्वमित्यर्थः। **कलधौतेति**। कलधौतमात्रज्ञानेन तन्मलज्ञानद्वारा [1]तद्धानजननात्तस्य तद्विषयत्वापत्तिरिति भावः। **न द्वितीय इति**। हानाद्यभावबुद्धेस्सत्वात् ग्रहणादौ[2] हानादिबुद्धेरसम्भवादुपादानबुद्धेः पूर्वसिद्धत्वाद्धानादिधीर्न फलमित्यर्थः। **तदाकारेति**। तत्स्वरूपात्मकाकारपदार्थेत्यर्थः। **हेतूनामिति**। अर्थकत्वस्य हेतुत्वरूपस्यैव वाच्यत्वादिति शेषः। **यथा दृश्यत्वमिति**। यथा दृक्सम्बन्धः स्वरूपसम्बन्धेन स्वस्मिन्वर्तते तथा योग्यताऽपीत्यर्थः। **योग्यताया इति**। जन्यतापि गृहीतुमशक्या। तत्तद्विषयकत्वरूपं त्ववच्छेदकमात्माश्रय-

---

[1] तज्ज्ञान–क. ग. [2] गगनादौ.

SGDF
Sri Gargeshwari Digital Foundation

तावदधिकरणसप्तमी ; ज्ञानस्य ज्ञेयानधिकरणत्वात् । नापि विषयसप्तमी ; तस्यैव निरूप्यमाणत्वात्, संविदो विषयत्वे संवेद्यस्य च विषयित्वमिति वैपरीत्यापाताच्च । नापि सतिसप्तमी ; भासमानत्वस्य विषयताघटितत्वेनात्माश्रयात् । नापि नवमः ; मत्समवेतं रूपज्ञानमित्यत्र रूपज्ञानसमवायस्य सम्बन्धान्तरं विनैव रूपज्ञानावच्छेदकस्य 'इदं रूप'मिति ज्ञानेऽपि विषयत्वापातात् । ननु—ज्ञानविषय इत्यभियुक्तप्रयोग एव ज्ञानविषययोः सम्बन्धः ; यथा अभियुक्तस्य मन्त्र इति प्रयोगविषयत्वमेव मन्त्रलक्षणम्, न चान्योन्याश्रयः ; पूर्वपूर्वप्रयोगमपेक्ष्योत्तरोत्तरप्रयोगादिति—चेन्न । एतावता हि ज्ञेयत्वमात्रं सामान्यतः स्यात्

ग्रस्तमित्यपि बोध्यम् । **संविद इति** । घटे ज्ञानमित्यादौ विषयसप्तमीस्थले प्रकृत्यर्थस्य विषयता लभ्यत इति प्रकृतेऽपि तथा स्यादिति भावः । **विषयताघटितत्वेन** । विषयताश्रयत्वरूपत्वेन । **मत्समवेतं** मत्समवायवत् । **अन्योन्याश्रय इति** । प्रयोगे ज्ञाते तेन सम्बन्धेन विषये ज्ञानस्य विशिष्टप्रमया अयं ज्ञानविषय इत्यभियुक्तप्रयोगः, तस्मिन्सति च सेत्यन्योन्याश्रयः । अभियुक्तत्वस्य मन्त्रे एव मन्त्रशब्दप्रयोक्तृत्वस्य मन्त्रत्वघटितत्वादन्यादृशस्य दुर्वचत्वान्मन्त्रपदस्य शक्यतावच्छेदकधर्मवत्त्वमेव मन्त्रत्वम् । स च धर्म आनुपूर्वीविशेषरूपो नानाविधः[1] । विषयपदस्य तु शक्यतावच्छेदकवत्त्वं विषयत्वं यद्यपि शक्यते वक्तुम् ; शक्तेरखण्डातिरिक्तपदार्थत्वेन शक्याघटितत्वादनुगमसम्भवात् ; तथापि तादृशविषयत्वमत्रैवास्य ज्ञानस्येति व्यवहारानिर्वाहकत्वम् । अतएव समवायैक्यमत्रैवास्य रूपस्याधिकरणत्वमिति व्यवहारानिर्वाहाद्दुष्टमित्याशयेनाह । **एतावता हीति** । ननु—तत्तद्विषयनिष्ठपूर्वपूर्वप्रयोग एवोत्तरो-

---

[1] रूपेण नानादिः.

SGDF
Sri Gargeshwari Digital Foundation

न त्वेतज्ज्ञानाविषयत्वम् । न चास्मिन् सादौ पूर्वप्रयोगमपेक्ष्योत्तरोत्तरप्रयोगो वक्तुं शक्यते, तस्यानादिमात्रविश्रान्तत्वात् ।

त्तरज्ञानस्य विषयत्वं तत्राह । **न चास्मिन् सादाविति । तस्य** पूर्वप्रयोगस्य । प्रथम सादिपदार्थे ज्ञानविषयोऽयमिति प्रयोगो न स्यात्, पूर्वप्रयोगाभावात् । न च—ज्ञानस्येव प्रयोगस्यापि पूर्वोत्पन्नस्येदानीमुत्पन्नविषये सम्बन्धसत्वात्तद्ज्ञानादेरिदानीं प्रयोग इति—वाच्यम्; तद्विषयव्यक्तिमात्रप्रयोगस्य पूर्वं सत्त्वे मानाभावात् । न च—भाविप्रयोगमादाय सोऽस्त्विति वाच्यम्; यत्र सोऽपि न प्रामाणिकस्तत्र तदसम्भवात्, भूतभाव्यर्थे निश्चयासम्भवेन वाक्यार्थधीप्रमात्वनिश्चयाधीनोक्तप्रयोगासम्भवात् । अत एव तत्प्रयोगसम्बन्धेन तज्ज्ञानविषययोर्विशिष्टज्ञानं तत्प्रयोगहेतुरित्यपास्तम्; तज्ज्ञानोत्पत्तिकाले तज्ज्ञानविषयोऽयमिति व्यवहारानापत्तेश्च । विषयतासम्बन्धेन चाक्षुषाद्युत्पत्तौ सन्निकर्षादिहेतुत्वानुपपत्तेश्च । न हि भूतभाविसम्बन्धेनेदानीं कार्योत्पत्तिस्सम्भवति । यत्र विषये कस्यापि प्रयोगो न जातस्तत्राव्याप्तेश्च । प्रमेयं सर्वमित्यादिप्रयोगस्य तत्र सम्बन्धत्वे विषयान्तरेऽपि तत्तद्धीवि[1]षयत्वापत्तेः । एतेन—सादावपि पूर्वप्रयोगमपेक्ष्य प्रयोगो लिप्यादिसम्प्रदायवद्वैदिकप्रयोगवच्चेति प्रलापोऽपास्तः; लिप्यादौ वैदिकप्रयोगे चोपदेशरूपस्य पूर्वप्रयोगस्य सम्भवेऽपि प्रकृते तदभावात् । किं च तत्तत्प्रयोगस्य कुत्रचिद्विषये सम्बन्धता कुत्रचिन्नेत्यत्र विनिगमकाभावः । तत्र सर्वविषयसम्बन्धाभावस्याविशिष्टत्वात् । अथ प्रयोगान्तरं तत्र सम्बन्ध इति चेत्, न; तत्रापि विनिगमकाभावात् । अथ स्वयमेव स्वस्य सम्बन्धस्तत्तद्विषयस्वरूपं चेति[2] चेत्, न; आत्माश्रयात्स्वस्य

---

[1] तत्तद्वि–ग.　[2] वेति–क. ग.

SGDF
Sri Gargeshwari Digital Foundation

किञ्च प्रयोगोऽपि स्वविषये सम्बन्ध इत्यात्माश्रयोऽपि। ननु—यज्ज्ञानं यदभिलपनरूपव्यवहारकारणं स तस्य विषयः; करणपाटवाद्यभावेन व्यवहारानुदयेऽपि सहकारिविरहप्रयुक्तकार्याभाववत्त्वरूपं कारणत्वमस्त्येव। न च निर्विकल्पकविषये अव्याप्तिः; तस्या[1]ङ्गीकारात्। न च—यत्तद्भ्यामननुगमो दोषः; कस्य को विषय इत्यननुगतस्यैव प्रश्नविषयत्वेन तस्यादोषत्वात्। न च—घटज्ञानानन्तरं प्रमादाद्यत्र पट इति व्यवहारस्तत्र घटज्ञानस्य पटाभिलपनरूपव्यवहारजनकत्वेन पटविषयत्वापत्तिः; समानविषयाभिलापं प्रत्येव ज्ञानस्य जनकतया भिन्नविषयतया तत्राजनकत्वादिति-चेन्न; अभिलपनरूपव्यवहारजननयोग्यत्वं न प्रातिस्विकरूपेण निर्णेयम्; अवच्छेदकत्वस्य फलनिर्णेयत्वात्, प्रतिस्वं च फलादर्शनात्, अजनितफले प्रातिस्विकयोग्यतायां मानाभावात्, किंतु तत्र तत्रानुगततत्तद्वृत्तिविषयत्वेन। तथा चात्माश्रयः। अत एव ज्ञानकर्मत्वं विषयत्वम्, कर्मत्वं च न कारकविशेषः; येनातीतादौ तदभावो भवेत्, किं तु क्रियाधीनव्यवहारयोग्यत्वरूपातिशयवत्त्वम्। अन्यथा घटं करोतीत्यादावसिद्धं घटादि [2]जनकं सिद्धं च न कृतिकर्मेति द्वितीया-

---

स्वप्रतियोग्यनुयोगिकत्वासम्भवादित्याशयेनाह—किञ्चेति। यत्तु शब्दरूपस्य प्रयोगस्यासम्बन्धत्वात् प्रयुज्यत इति प्रयोग इति व्युत्पत्तेरर्थस्यैव सम्बन्धत्वात् सम्बन्धत्वेनाप्रवेशाच्च न दोष इति, तत्तुच्छम्; अर्थस्य सम्बन्धत्वेऽप्यात्माश्रयस्योक्तत्वात्। सम्बन्धत्वेनाप्रवेशस्तु नात्रोपयुक्तः। **तत्र तत्रेति।** घटादिव्यवहार इत्यर्थः। **तत्तद्वृत्तिविषयत्वेनेति।** घटादिनिष्ठं यद्वृत्तिविषयत्वं तद्घटितेन घटादिविषयकज्ञानत्वेनेत्यर्थः।

---

[1] नङ्गीकारात्. [2] न जनकं.

SGDF
Sri Gargeshwari Digital Foundation

विभक्तिरनार्थिका स्यादिति निरस्तम् । व्यवहारयोग्यत्वं न व्यवहाररूपफलोपहितत्वम् ; क्वचित्प्रतिरुद्धे व्यवहारेऽव्याप्तेः । नापि तत्स्वरूपयोग्यत्वम्; विषयत्वादन्यस्य तस्यासम्भवादिति पूर्वोक्तदोषात् । न चावच्छेदकाच्छिन्नं सहकारिविरहप्रयुक्तकार्याभाववत्त्वं तदिति वाच्यम् ; अनुगतावच्छेदकधर्मं विना तस्यापि गृहीतुमशक्यत्वात् । घटं करोतीत्यत्र सिद्धस्यैव कपालादेः कृतिकर्मता ; व्यापारकार्यतया[1] सिद्धस्यैव कृतिकर्मताङ्गीकारात् । अत एव निष्पादनवाचिधातुसमभिव्याहृतकर्मपदे शक्यावयवे

विषयत्वादिति । कारणतावच्छेदकरूपं स्वरूपयोग्यत्वं विषयताघटितमित्यर्थः । **तस्यापीति** । कारणतावच्छेदकोपहितस्य कार्याभाववत्त्वं सहकार्यभावप्रयुक्तं न त्वन्यस्य । न हि शिलायामङ्कुराभावो जलाद्यभावप्रयुक्तः, तत्त्वाप्रत्ययात्[2] । कारणतावच्छेदकवत्त्वेन निर्णीते वस्तुन्येव सहकार्यभावप्रयुक्तं कार्याभाववत्त्वं निर्णेयम् । तच्चावच्छेदकं विषयत्वघटितमित्यात्माश्रयस्तदवस्थ इति भावः । क्षणिकविशेषस्य तद्व्यक्तित्वेन कारणस्य सहकार्यभावप्रयुक्तं न कार्याभाववत्त्वम्[3], सहकारिकूटसम्पन्नत्वादत उक्तं **अनुगतेति** । कार्यानुपधायकवृत्तीत्यर्थः । तेन कार्योपधायकमात्रवृत्तिरूपेण कारणस्य सहकार्यभावप्रयुक्तकार्याभावाभावेऽपि न क्षतिः । **शक्यावयवे** स्वशक्यार्थसम्बन्धिविशेषे । तेन रूपं करोति सुखं करोतीत्यादौ रूपादिसमवायिनि, ध्वंसं करोतीत्यादौ ध्वंसादिप्रतियोगिनि लक्षणा लभ्यते[4] ॥

यत्तु—"ज्ञाने व्यवहारजनकतावच्छेदकं न घटादिविषयकत्वम् ; येनात्माश्रयः; किंतु संशयान्यज्ञानत्वम् । न चातिप्रसङ्गः; विशेषसामग्रीसहिताया एव सामान्यसामग्र्याः फलोपधायकत्वात् । शक्यावयवे

---

[1] व्यापारवत्तया.　[2] अप्रत्ययात्.　[3] भावत्वम्—क.　[4] लक्ष्यते—क. ग.

SGDF
Sri Gargeshwari Digital Foundation

निरूढलक्षणामाहुरसत्कार्यवादिनः। सत्कार्यवादिनां तु पूर्वसतोऽप्यभिव्यञ्जनीयतया न कारकत्वकृतिकर्मत्वयोरनुपपत्तिः। एतेन– ‘यस्यां संविदीत्यादिपूर्वोक्तेऽपि न दोषः, संविदीति सति सप्तमी, भासमानत्वं च व्यवहारयोग्यत्वम्, तच्च सति कारणान्तरे

लक्षणेत्यपि न युक्तम्; पटमित्यादाववयवव्यापार्यत्वान्यस्य पटादिकर्मत्वस्यानुभवात्। अतएव सिद्धवृत्त्यसिद्धविषय[1]कत्वस्य कृतौ नियम इति मणिकारादयः। अन्यथा यागेन स्वर्गं कुर्यादित्यत्र स्वर्गसाधनयागादिलक्षणायामनन्वयः स्यात्, क्रियाधीन[2]व्यवहारयोग्यत्वरूपातिशयेन[3] प्रयोगोपपत्तौ लक्षणायां मानाभावात्, इति तन्न; संशयत्वस्य तत्तद्विरुद्धविषयकत्वरूपत्वेनात्माश्रयानपायात्। अथ संशयत्वमखण्डम्, तर्हि निश्चयत्वमेवाखण्डम्, ज्ञानत्वं वावच्छेदकं कुतो नोक्तमिति व्यक्तं ते मौढ्यम्। किञ्चैवं ज्ञानव्यवहाराणां तत्तद्व्यक्तित्वेन कार्यकारणभावात विशेषतोऽङ्गीकृत्यापि नातिप्रसङ्गवारणं वक्तुं शक्यम्; तत्तद्व्यक्तीनां तत्तद्विषयीयत्वनियाम[4]काभावात्। न हि तत्तद्व्यवहाराणां तत्तद्विषयैर्विषयत्वान्यस्सम्बन्धोऽस्ति। तथा च तत्तद्विषयकतत्तद्व्यवहारव्यक्तित्वेन तत्तद्धीकार्यत्वमिति तद्घटितलक्षणे कथं नात्माश्रयः॥

अपिच ज्ञान[5]मभिलापे हेतुः, अर्थबोधादिरूपेष्टसाधनताज्ञानाद्यधीनप्रवृत्त्या तत्सम्भवात्। पटमित्यादौ पटादेरकारक(व)त्त्वेऽपि कर्मत्वं ब्रुवाणो देवानां प्रियःशोभतेतराम्। कर्मत्वस्येव कर्तृत्वादेरपि कारकविशेषान्यत्वं किमिति न रोचयेः। क्रियाजन्यफलशालित्वादिरूपं कर्मत्वादि क्रियानिर्वर्तकत्वरूपकारकत्वव्याप्यमिति वृद्धोक्त्या कारकत्वाभावे कर्मत्वाद्यसम्भवः। अथ गौणं कर्मत्वादि क्रियाजन्यव्यवहारयोग्यत्वादि न

[1] सिद्धविषयक–क. [2] क्रियार्थेन. [3] योग्यत्वानुशयेन. [4] नियामकाभात्–क. ग. [5] न ज्ञान–ग

SGDF Sri Gargeshwari Digital Foundation

व्यवहारावश्यम्भाव इत्येतदपि निरस्तम् । ननु—यः सम्बन्धान्तरमनपेक्ष्य यज्ज्ञानावच्छेदको यज्ज्ञानानवच्छिन्नस्वभावश्च स तस्य विषयः; यद्यप्यात्मा स्वविषयकज्ञानसमवायवान्; तथापि न तस्य ज्ञानावच्छेदे समवायापेक्षा, ज्ञानासमवायिनोऽपि घटादेस्तदवच्छेदकत्वदर्शनात्, यद्यपि च रूपज्ञानं मत्समवेतं ध्वस्तमिष्टमित्यादौ रूपज्ञानाविषया अप्यात्मसमवायेच्छाध्वंसादयस्सम्बन्धान्तरमनपेक्ष्य ज्ञानावच्छेदकाः; तथापि समवेतेष्यमाणप्रतियोग्यात्मकरूपज्ञानावच्छिन्नस्वभावा एव; सम्बन्धे-

---

कारकत्वव्याप्यमिति चेन्न; पटं करोतीत्यादौ प्रधानीभूतप्रत्यये गौण कर्मत्वे लक्षणाया अन्याय्यत्वेन प्रकृतावेव शक्यावयवे लक्षणाया युक्तत्वात् । अत एवेत्यादिकं तु मौढ्यमूलकम् । न हि वयमसिद्धक्रियां पटाद्यनुकूलां सिद्धतन्त्वादिवृत्तिं कृतिविषयं नाङ्गीकुर्मः । पटमुद्दिश्य तन्तुश्चाल्यत इत्यादौ तथा प्रतीतिस्वीकाराच्च, परं त्वसिद्धस्य कर्मत्वम् । यागेन स्वर्गमित्यादौ तु स्वर्गादिपदलक्षिते स्वर्गादिसाधने यागादेरभेदस्तृतीयया बोध्यत इति [1]नान्वयः ॥

यः सम्बन्धेत्यादि । स्वान्यसम्बन्धाघटितस्य [2] ज्ञानसम्बन्धित्वस्याश्रय इत्यवच्छेदकान्तार्थः । स्वविषयकज्ञानसमवायित्वादात्मन्यव्याप्तिमाशङ्क्य प्रत्याह—**यद्यप्यात्मेति** । **ज्ञानावच्छेदे** ज्ञातत्वे । **समवायापेक्षा** समवायघटितत्वम् । यद्ज्ञानानवच्छिन्नेत्यस्य कृत्यमाह—**यद्यपि चेति** । **समवेतेत्यादि** । आत्मसमवायस्य स्वभावः समवेतात्मकरूपज्ञानावच्छिन्नः, इच्छाया इष्यमाणात्मकेन ध्वंसस्य प्रतियोग्या-

---

[1] नानन्वयः—ग.　[2] स्वाश्रयसम्बन्धाद्यसहकारिकूटसंपन्नत्वादत उक्तमनुगतेति । कार्यानुपधायकवृत्तीत्यर्थः । तेन कार्योपधायकमात्रवृत्तिरूपेण घटितस्य इत्यधिकः पाठः.

SGDF
Sri Gangeshwari Digital Foundation

च्छादीनां सम्बन्धीष्यमाणाद्यवच्छिन्नस्वभावत्त्वादिति नाति-व्याप्तिः। ज्ञानविषयस्तु न ज्ञानावच्छिन्नस्वभावः; ज्ञानस्य घटाद्यवच्छिन्नस्वभावत्ववत् घटादेर्ज्ञानावच्छिन्नस्वभावत्वादर्श-नात्। यद्यपि स्वग्राहकज्ञानाविषयीभूतं ज्ञानविषयिकानुमित्यनु-व्यवसायादिकं ज्ञानं ज्ञानावच्छिन्नस्वभावम्; तथापि स्वयं यत् ज्ञानं प्रति विषयस्तदवच्छिन्नस्वभावं नेति नाव्याप्तिरिति चेन्न; मत्समवेतं रूपज्ञानमित्याकारकज्ञानस्यात्मसमवायविषय-कत्वाभावप्रसङ्गात्; आत्मसमवायस्य सम्बन्धत्वेन सम्बन्धि-भूतस्वज्ञानावच्छिन्नत्वात्, घटस्य ज्ञानमिति प्रतीत्या घटा-वच्छिन्नस्वभावत्वं यथा ज्ञानस्य, तथा ज्ञातो घट इति

त्मकेन रूपज्ञानेनावच्छिन्नः स्वभाव इत्यर्थः। **घटाद्यवच्छिन्नेति।** ज्ञानं स्वग्राहकेण साक्षिणा विषयावच्छिन्नरूपेणैव गृह्यत इति तदेव तत्स्वभावः। विषयस्तु न ज्ञानावच्छिन्नरूपेणैव गृह्यत इति स न तथेति भावः। यद्ज्ञानानवच्छिन्नेत्यत्र यत्पदकृत्यमाह—**यद्यपि स्वग्राह-केति।** सर्वं ज्ञानं वाच्यत्वेन जानामीत्यनुव्यवसायः स्वं प्रति[1] विषयः स्वेनावच्छिन्नस्वभावश्चेत्यव्याप्तिः, अथ येन रूपेण विषयता, तेन रूपेण तज्ज्ञानानवच्छिन्नस्वभावता वच्या; प्रकृते च येन सर्वज्ञान(त्वेन) विषयता, तेन स्वरूपेण न ज्ञानावच्छिन्नता;[2] किंतु ज्ञानत्वमात्रेणेति चेत्, तथापि ज्ञानं वाच्यत्वेन जानामीत्यनुव्यवसाये स्वविषयकेऽव्याप्ति-रित्यसङ्गतेयं परोक्तिरिति ध्येयम्। **सम्बन्धिभूतस्वज्ञानेति।** न च यज्ज्ञानं प्रति समवायो विषयः, तेनानवच्छिन्नत्वमक्षतं तत्रेति वाच्यम्; समवायस्यैकत्वेन रूपज्ञानसमवायस्य रूपज्ञानज्ञानीयत्वात्, रूपज्ञानं मत्समवेत[3]धीविषय इति ज्ञानावच्छिन्नत्वस्य समवाये सत्त्वाच्च।

---

[1] स्वाश्रित. [2] ज्ञानानवच्छिन्नता. [3] तत्समवेत.

SGDF
Sri Gargeshwari Digital Foundation

प्रतीत्या घटस्यापि ज्ञानावच्छिन्नस्वभावत्वेनासम्भवाच्च । अथ–यज्ज्ञानं यदीयस्वभावं स तस्य विषयः; मत्समवेतं रूपज्ञानमित्यत्र तु समवाय एव रूपज्ञानावच्छिन्नस्वभावो न तु रूपज्ञानं तदवच्छिन्नस्वभावम्; इदं च ज्ञानस्यैव विषयत्वमुक्तम्; न त्विच्छादिसाधारणमिति नाव्याप्तिरिति चेन्न; यदीयस्वभाव-

---

असम्भवादिति । न च यज्ज्ञानप्रत्यक्षत्वं यद्विषयसम्बन्धव्याप्यं स तद्विषय इति वाच्यम्; यज्ज्ञानप्रत्यक्षेत्यत्र यज्ज्ञानस्य विषयतानिवेशे आत्माश्रयात्, सम्बन्धसामान्यनिवेशे आत्मादेर्धीमात्रविषयत्वापत्तेः ॥

यत्तु—'आत्मसमवायस्य[1] स्वविषयकज्ञानं सम्बन्धित्वेनावच्छेदकम्, न तु ज्ञानत्वेनेति तथा निवेशान्न दोषः, विषयस्तु न केनापि रूपेण ज्ञानावच्छिन्नः; ज्ञानं विनापि घटोऽयमित्यादिना निरूप्यत्वात्' इति, तत्तुच्छम्; ज्ञानत्वेनावच्छेदकतानिवेशे तज्ज्ञानानवच्छिन्नत्वदळकृत्यस्यैवासम्भवात् । न हि ध्वंसेच्छादौ ज्ञानत्वेन ज्ञानमवच्छेदकम्; किंतु प्रतियोगित्वविषयत्वादिना । अथ—येन रूपेण सम्बन्धिताधीः, तेनावच्छेदकत्वं निवेश्यम्, तथा च ज्ञानं नष्टमित्यादौ ज्ञानत्वेन नाशादौ सम्बन्धित्वप्रत्ययात्त[2]द्वारणम्; तर्हि प्रकृतेऽपि ज्ञानत्वेन [3]सम्बन्धताप्रतीतिर्दोषः, विषयस्त्वित्यादिकं तूक्तव्याप्तिनिरासेन निरस्तम्, ज्ञानं गुण इत्यादौ विषयं विनापि ज्ञाननिरूपणाच्च ॥

न त्विच्छादीति । ज्ञानत्वघटितत्वादित्यादिः । ननु–यदीयत्वं यत्सम्बन्धस्तत्त्वेन निवेश्यते, न तु विषयितात्वेन; येनात्माश्रयः, न-च घटज्ञानस्यापि कालिकादिसम्बन्धेन पटीयतया पटविषयकत्वापात्तिरिति वाच्यम्; यज्ज्ञानं यत्सम्बन्धिरूपेणैव प्रत्यक्षविषयः, स तस्य विषय इत्यस्य वाच्यत्वात् । न चोपनयादिना पटादिसम्बन्धितया प्रत्यक्षविषयो

---

[1] यत्समवायस्य–**क**.　[2] द्वारेण–**ग.**　[3] सम्बन्धित.–**ग.**

SGDF
Sri Gargeshwari Digital Foundation

मिति तद्धितस्य यद्विषयकत्वार्थकत्वे आत्माश्रयात्, अर्थान्तरस्य निरूपयितुमशक्यत्वात्, रूपज्ञानाभावाभावस्य रूपज्ञानरूपत्वेन रूपज्ञानस्याप्यभावीयतया तद्विषयत्वापत्तेः। ननु—ज्ञानजनककरणसन्निकर्षाश्रयत्वं तद्विषयत्वम्, न च रूपज्ञानकरणमनस्सन्निकर्षाश्रयस्यात्मनस्तद्विषयत्वापत्तिः; करणपदेनासाधारणज्ञानकरणस्यैव विवक्षितत्वात्, न चासाधारणज्ञानकरणचक्षुस्सन्निकर्षाश्रयस्य मनसोऽपि रूपज्ञानविषयत्वापत्तिः; सन्निकर्षपदेनाप्यसाधारणज्ञानजनकसन्निकर्षस्यैवोक्तत्वादिति चेन्न;

घटादिज्ञानं[1] पटादि[2]विषयस्स्यादिति वाच्यम्; सम्बन्धान्तराघटितत्वेन[3] सम्बन्धिविशेषणात्। प्रत्यक्षविषयत्वं तु तद्विषय(क)ज्ञानविषयत्वा[4]दन्यदिति नात्माश्रय इत्यत आह—**रूपज्ञानाभावेति**। घटज्ञानं पटज्ञानत्वेन दोषाद्गृह्यमाणं पट[5]विषयकं स्यात्। प्रत्यक्षविषयताया अपि प्रत्यक्षान्तरविषयताघटितत्वेनानवस्था चेत्यपि बोध्यम्॥

यत्तु—"प्रकाशस्य सतस्तदीयतामात्रनिबन्धनः स्वभावविशेषो विषयतेत्युदयनवाक्यं बौद्धाधिकारस्थम्, तदीयता तत्सम्बन्धिता स्वभावः स्वरूपम्, तथाच ज्ञानरूपं[6] तस्यार्थेन सम्बन्धः, सम्बन्धसम्बन्धिनोश्चाभेदो न दोषाय, सर्वत्र स्वरूपसम्बन्धे तथैव कल्पनात्, सामान्यतो[7] विषयता ज्ञानमेव, घटादिविषयता तु घटादेसम्बन्धित्वे अनुगता ज्ञानविशेषाः,[8] सम्बन्धव्यवहारनिमित्तं च ज्ञाननिष्ठमर्थसम्बन्धित्वम्, न त्वर्थनिष्ठं ज्ञानसम्बन्धित्वम्,[9] अतीतानागतविषये तद्व्यवहारानुरोधात्" इति शिरोमणिना व्याख्यातम्; तत्तेनैव दूषितम्! तथाहि—यदि ज्ञानमेव विषयता, तदा घटपटाविति समूहालम्बनस्य घटत्वाद्यभाव-

[1] विषयघटादिज्ञाने-ग. [2] पटादिः-ग. [3] तत्वे-क. [4] तद्विषयत्वा-क. [5] घट. [6] स्वरूपं-ग. [7] कल्पना, तत्सामान्यतो-ख. [8] न्धित्वेनानुगतो ज्ञानविशेषः. [9] न त्वर्थनिबन्धनं ज्ञानमेव विषयितासम्बन्धित्वम्.

SGDF
Sri Gargeshwari Digital Foundation

चक्षुर्मनस्संयोगस्यापि चाक्षुषज्ञानासाधारणकारणत्वेन मनसोऽपि चाक्षुषज्ञानविषयत्वापत्तेः, परोक्षविषयेऽव्याप्तेश्च । न च—तत्र लिङ्गज्ञानं करणम्, तत्र च लिङ्गिनस्तद्व्याप्तत्वं

वति पटादौ घटत्वादिविषयकत्वाद्भ्रमत्वापत्तिः । यैव हि घटविषयता तज्ज्ञानस्वरूपा घटत्वविषयता[1]निरूपिता वाच्या, सैव पटविषयता । अपि च यदि ज्ञानं स्वरूपेण[2] घटादौ व्यवहारहेतुः, तदा स्वस्मिन् काले [3]भावादौ च तथा स्यात्; तैरपि सह तस्य स्वरूपेण सम्बन्धत्वात् । किञ्च विषयता तत्त्वं[4] वा यदि नातिरिच्यते, तदा तद्विषयकेच्छादिसामान्ये तद्विषयकज्ञानत्वादिना कथं हेतुत्वम्? अननुगतत्वात्, सम्बन्धत्वेनानुगमे तदविषयकात्तदीयसम्बन्धान्तरशालिज्ञानादपि तदापत्तिः । तस्मादतिरिक्तैव विषयता । तद्विशेषास्तु प्रकारत्वादयः । एवं विषयतात्वादिकमपि । एतेन प्रतियोगित्वाधिकरणत्वादयो व्याख्याताः । अथैवं सम्बन्धानन्त्येऽनवस्था स्यादिति—चेत्, स्यादेव; यदि क्वचिदपि स्वरूपसम्बन्धेन न प्रतीकारः, अन्यथानुपपत्तेर्दुर्वारत्वादित्यादि तेनोक्तम् । तत्रानवस्थाया अप्रामाणिकत्वम् । सम्बन्धिविप्रकर्षादेरतिरिक्तविषयतायाः सत्यसम्बन्धत्वे बाधकस्याऽऽचार्यैर्वक्ष्यमाणत्वादिति बोध्यम् ॥

चक्षुर्मन इति । प्रत्यक्षमात्रे इन्द्रियमनोयोगस्येव चाक्षुषमात्रे चक्षुर्मनोयोगहेतुत्वादित्यादिः । तत्पुरुषीयचाक्षुषवृत्तिवैजात्यविशेषावच्छिन्नं प्रति हि विजातीयत्वेन चक्षुस्संयोगस्य हेतुत्वेऽपि चाक्षुषत्वेन कार्यत्वमवश्यं वाच्यम्, जन्यमात्रवृत्तिजात्या कार्यत्वस्यावश्यकत्वात् । तत्र [5]चक्षुष्ट्वेन संयोगत्वेन वा कारणत्वमित्यस्याविनिगम्यत्वात् चक्षुर्मनोयोगोऽपि चाक्षुषमात्रे कारणमिति भावः । **लिङ्गज्ञानं** लिङ्गादिज्ञानम् । **तद्व्याप्तत्वं**[6] स्वविषयलिङ्गव्यापकत्वम् ।

---

[1] विषयिता. [2] स्वरूपेणासम्बन्धं–ग. [3] अभावादौ–ग. [4] विषयतात्वं –ग. [5] तत्र चक्षुर्मनस्संयोगत्वेन. [6] प्यत्वं.

SGDF
Sri Gargeshwari Digital Foundation

सम्बन्धोऽस्तीति—वाच्यम्; लिङ्गस्यापि स्वज्ञानसम्बन्धित्वेनानुमितिविषयत्वापत्तेः। न चानुमितौ तद्व्याप्ततारूपसम्बन्ध एव विषयतानियामकः; व्यापकतावच्छेदकव्यापकसम्बन्धादीनाम-

---

आपत्तेरिति ॥

ननु—व्याप्तिघटकसम्बन्धत्वरूपेणानुमितिस्थलीयसन्निकर्षो निवेश्यः, व्यापकतावच्छेदकधर्मसम्बन्धयोस्तद्घटकत्वान्न दोष इति—चेन्न; व्याप्तिघटकत्वं हि व्याप्तिविषयिताव्यापकविषयिताकत्वमित्यात्माश्रयादिः व्याप्ति[1]घटकवस्तुमात्रेऽतिव्याप्तिश्च ॥

अथ—तज्ज्ञानकरणस्य यादृशयादृशसम्बन्धाश्रये वस्तुगत्या विषयत्वव्यवहारः, तादृशसम्बन्धानामन्यतमवत्त्वं[2] तज्ज्ञानविषयत्वलक्षणम्। धूमाभासादिभ्रमजन्यानुमित्यादिविषयवन्ह्यादावपि धूमाभासादिव्यापकत्वादिसम्बन्धासत्त्वेऽपि तादृशसम्बन्धधीविषयत्वादिरस्ति। शुक्त्यादिविशेष्यकभ्रमविषये रूप्यादावपि करणसम्बन्धिदोषप्रयुक्तत्वादिरस्तीति[3] नाव्याप्तिरिति—चेन्न; तज्ज्ञानकारण[4]तावदन्यतमसम्बन्धवत्त्वस्य तज्ज्ञानविषयतारूपत्वे घटविषयकज्ञानत्वादेरननु[5]गमात्तेन रूपेण हेतुताद्यसम्भवात्। कारणसंयोगादेस्तज्ज्ञानोत्पत्त्यादिक्षणे विनाशेन तस्य तद्विषयतात्वासम्भवात्, सम्बन्धान्तरस्य चानतिप्रसक्तस्य तज्ज्ञानकालमात्रवृत्तेः सर्वत्राभावात्। तज्ज्ञानकारणसम्बन्धिदोषप्रयुक्तत्वादिरपि परमते न रूप्यादौ, किं तु तद्भ्रम इति तत्राव्याप्तितादवस्थ्याच्च। परमते तस्यासत्त्वेन तत्र करणसम्बन्धाभावाच्च ॥

यत्तु—‘शुक्तिरूप्यादिभ्रमसम्बन्धोपि[6] न भ्रमविषय इति न

---

[1] घटितपम्परासम्बन्धमादायवस्तु—ग. [2] तमत्वं. [3] क्तत्वादिना निरस्तेति. [4] करण—क. ग. [5] रनु. [6] सम्बन्धमपि—क. ख. ग.

SGDF
Sri Gargeshwari Digital Foundation

विषयत्वापत्तेः। न च ज्ञानकरणसन्निकर्षसमानाधिकरणो ज्ञानावच्छेदकत्वसाक्षाद्व्याप्यधर्मो विषयत्वम्, इदं च नित्यपरोक्षसाधा-

---

तत्राव्याप्तिः' इति, तत्तुच्छम्; ज्ञानविषययो[1]र्य इच्छादिप्रयोजकः सम्बन्धः स एव हि विषयतेत्युच्यते। स चेन्न भ्रमस्थले स्वीक्रियते, तर्हि कथं तत्रेच्छादिः। सम्बन्धान्तरस्य तत्रेच्छादिप्रयोजकस्य स्वीकारे गौरवम्। शुक्तौ रूप्यादिविषयकज्ञानवानहमिति व्यवहारानुपपत्तिश्च। अन्यथा भ्रम एव सविषयको न प्रमेति[2] किं न स्यात्। अतएव अग्रिमानन्तर[3]लक्षणेऽपि शुक्तिरूप्यादावव्याप्तिरिति ध्येयम्। यदपि 'लिङ्गाभासादिज्ञानजन्यानुमित्यादिविषये करणीभूतज्ञानविषयलिङ्गाभासादेरसत्त्वेन तदीयव्यापकत्वादिसम्बन्धाभावेऽपि तदीयव्यापकताविषयकधीविषयत्वं सम्बन्धः। यद्यपि तादृशधीविषयत्वं न वन्ह्याभासादिरूपसाध्यस्य सम्भवति, तस्यासत्त्वेन तादृशधीकरणसम्बन्धाभावात्; तथापि शुक्त्यादेरेव[4] रूप्यादिभ्रमविषयत्ववत्, सतः[5] पक्षादेरेव भ्रमानुमित्यादिविषयत्वम्' इति, तदपि तुच्छम्; वह्निविषयकानुमितिमानहमित्यादिसार्वजनीनप्रतीतिबाधात् पक्षादिकमनुमिनोमीत्यादिप्रतीत्यापत्तेश्च, तादृशानुमितेर्वह्न्यविषयकत्वे वह्निविषयकानुमितिसामग्र्यादिविलक्षणसामग्र्यादिमत्त्वापत्तेः, विषयता[6]घटितस्य करणसम्बन्धत्वेऽनवस्थाद्यापत्तेश्चेति दिक्॥

न च ज्ञानेत्यादि। आत्मादिकमपि घटादिधीविषयः स्यात्। ज्ञानं मदीयं घटं जानामीत्यादौ घटज्ञानावच्छेदकत्वादत आद्यं दलम्। मनआदिवारणाय द्वितीयम्। ज्ञानावच्छेदकत्वस्य परम्परासम्बन्धेन

---

[1] ज्ञानविषयोः [2] प्रमितिः. [3] अग्निमानान्तर–**क. ख. ग.** [4] रिव–**ग.**
[5] विषयत्वं वस्तुतः. [6] विषयिता–**क. ग.**

SGDF
Sri Gargeshwari Digital Foundation

रणमिति—वाच्यम्; वस्तुत्वादिकमेव विषयत्वमित्यापत्तेः, ज्ञानावच्छेदकत्वस्य रूपज्ञानाविषये समवायेऽपि सत्वेनातिव्याप्तेश्च। न च ज्ञानज्ञेययोस्स्वरूपसम्बन्ध एव विषयत्वमिति वाच्यम्; असिद्धेः। तथाहि स्वरूपसम्बन्ध इत्यस्य स्वरूपं सम्बन्ध इत्यर्थत्वे संयोगादावतिव्याप्तिः, न च तदुभयान्यत्वं विशेषणम्; हिमवद्विन्ध्ययोरपि स्वरूपसम्बन्धापत्तेः; सम्बन्धा-

---

व्याप्यधर्मो मनआदावपि, अतः साक्षात्सम्बन्धेन व्याप्यतालाभाय साक्षात्पदम्। **वस्तुत्वादीति।** सामान्यतो ज्ञानकारण[1]त्वादिनिवेशे वस्तुमात्र एवोक्तलक्षणसत्त्वे[2] वस्तुत्वादेरेव लाघवाल्लक्षणत्वमुचितम्। अथ—तज्ज्ञानकरणत्वादिघटितज्ञानविषयत्वं वाच्यम्, तथापि सन्निकर्षो न स्वविषयव्यापकत्वादिरूपः, व्यापकतावच्छेदकाद्यव्याप्तेः। सन्निकर्षपदेन सम्बन्धमात्रे निवेशे[3] च तत्परिहारेऽपि वस्तुमात्रे यत्किञ्चित्सम्बन्धस्य ज्ञानसम्बन्धित्वरूपज्ञानावच्छेदकत्वस्य च सत्त्वादतिव्याप्तिर्दुर्वारेति वस्तुत्वादिकमेव लक्षणं कुतो न कृतमिति भावः। **संयोगादाविति।** संयोगसमवाययोरित्यर्थः। ज्ञानज्ञेययोः स्वरूपं सामान्यतो विषयतेत्युक्तावुक्तातिव्याप्तिः। **तदुभयान्यत्वं** संयोगसमवायान्यत्वम्। **हिमवदिति** तत्तज्ज्ञानज्ञेययोः स्वरूपं तत्तज्ज्ञानज्ञेययोर्विषयतेत्युक्तावप्ययं दोषः। स्वस्यैव स्वस्मिन्[4] सम्बन्धत्वस्वीकारे हिमवद्विन्ध्ययोरपि मिथो विशिष्टधीः प्रमा स्यात्, स्वरूपसम्बन्धसम्भवात्। अथ—तत्र बाधात्स्वरूपं न सम्बन्धः, तर्हि ज्ञानं ज्ञेयाभाववदिति बाधः प्रकृतेऽपि। अथ सम्बन्धान्तरेण ज्ञेयस्याभावो बाधधीविषयः, तर्हि तत्रापि तथा किमिति न रोचयेः, तथा च भ्रममात्रोच्छेदः। संयो-

---

[1] करण—**क ग.** [2] सत्वेन—**ग.** [3] मात्रनिवेशे—**ग.** [4] स्यैव क्वचित्स्वं प्रति स्वस्मिन्—**ग.**

SGDF
Sri Gargeshwari Digital Foundation

न्तरमन्तरेण विशिष्टप्रतीतिजननयोग्यत्वं स्वरूपसम्बन्ध इति चेन्न ; आत्मानं जानामीत्यत्राव्याप्तेः ; तत्र सम्बन्धान्तरस्य समवायस्यैव सत्वात्, अतीन्द्रियाभावादावव्याप्तेश्च ; न हि तस्य विशिष्टप्रतीतिजननयोग्यत्वे मानमस्ति । अन्यथा तेन विशिष्टप्रत्ययजननापत्तेः । किञ्च विशिष्टप्रतीतिजननयोग्यत्वं धर्मो वा सम्बन्धः, तादृशस्वरूपद्वयमेव वा । आद्ये स्वरूपस्य सम्बन्धत्वव्याघातः, प्रतीतिघटितस्याप्य[1]चाक्षुषादिज्ञानागोचरत्वप्रसङ्गश्च । न द्वितीयः, अननुगमात् । किञ्चैवमभावभ्रमानुपपत्तिः ; तत्रापि विशिष्टप्रतीतिसम्भवे स्वरूपसम्बन्धस्य सत्वात् । न च प्रमात्वघटितं तल्लक्षणम् ; वास्तवसम्बन्धसत्त्वे प्रमात्वस्याप्यापाद्यत्वात् । अन्यथा तत्र तस्याप्रमात्वे सम्बन्धाभावः, तस्मिंश्च तस्य प्रमात्वमित्यन्योन्याश्रयात् । ननु—सम्बन्धान्तरमन्तरेण विशिष्टप्रतीतिजननयोग्यतावच्छेदकावच्छिन्नस्वरूपस्य सम्बन्धत्वं संयोगत्वावच्छिन्नस्य दण्डीत्यादौ सम्बन्धत्ववत्, विशिष्टबुद्धिश्चावच्छेदकाविषयिण्येवावच्छेद्यविषया, अतो न स्वरूपसम्ब-

---

गादेरपि गुणादौ स्वरूपसम्बन्धसम्भवेन गुणः संयोगेन क्रियावानित्यादेरपि प्रमात्वसम्भवात्, स्वस्य स्वं प्रति न सम्बन्धत्वम्, स्वप्रतियोगिकत्वस्वानुयोगिकत्वाभावात् । अत एव स्वं न स्वीयमित्यनुभवः, तद्व्यक्तिस्तद्व्यक्तिमतीति[2] चाननुभव इत्याद्युक्तम् । **सम्बन्धान्तरस्येति** । सम्बन्धान्तराविषयकधीनिवेशे त्वनवस्थादीति[3] भावः । **स्वरूपस्येति** । सम्बन्धिस्वरूपस्येत्यर्थः । **अभावभ्रमेति** । यस्य स्वरूपं सम्बन्धस्तद्भ्रमेत्यर्थः । **अवच्छेदकाविषयिणीति** । सम्बन्धतावच्छेदकं यत्संयोगत्वादि उक्तयोग्यतावच्छेदकं वा तदविषयिणीत्यर्थः । **अवच्छेद्यविषयेति** ।

---

[1] तस्यास्य–ग. [2] तद्व्यक्तिरिति प्रतीतिरिति. [3] स्था स्या दिति–ग.

SGDF
Sri Gargeshwari Digital Foundation

न्धगोचरविशिष्टबुद्धेश्चाक्षुषत्वाविरोधः ; न च—तर्ह्यभावप्रमाभ्रमयोस्स्वरूपद्वयमात्रविषयत्वाविशेषात् प्रमाभ्रमव्यवस्थानुपपत्तिरिति वाच्यम् ; घटाभाववति घटाभावज्ञानत्वेन तद्भिन्नज्ञानत्वेन च व्यवस्थोपपत्तेः । ननु—अतिरिक्ताविषयत्वे तस्यैवानुपपत्तिः ; न हि भवद्रीत्या तस्योभयात्मकत्वेन तदुभयसत्त्वेन व्यधिकरणप्रकारत्वरूपभ्रमत्वस्यैवाभावे भ्रमतदन्यत्वाभ्यां व्यवस्था सम्भवतीति चेन्न ; घटाभावाभावस्य घटत्वेन तद्वति घटाभावज्ञानस्य व्यधिकरणप्रकारकत्वसम्भवात् । किञ्च भ्रमस्य वस्तुगत्या यत् घटवत्स विषयः, न तु प्रमाया इत्यतिरिक्तविषयत्वमस्त्येव ; न चातीन्द्रियाभावे अव्याप्तिः ; अत्यन्ताभावे प्रतियोगिदेशान्यदेशत्वम्, प्रागभावादौ प्रतियोगिदेशत्वे सति प्रतियोगिकालान्यकालत्वम्, अनोन्याभावे प्रतियोगितावच्छेदकदेशान्यदेशत्वम्, विशिष्टप्रत्ययजननयोग्यतावच्छेदकम् । तदवच्छिन्नत्वं च विशिष्टप्रतीत्यजनकेऽप्यतीन्द्रियाभावे सुलभम्, न ह्यरण्यस्थो दण्डो न घटजननयोग्यतावच्छेदकावच्छिन्न इति—चेत्, मैवम्; नित्यस्यातीन्द्रियस्याकाशात्यन्ताभावादेर्विशिष्टप्रतीतिजननयोग्यतावच्छेदकावच्छिन्नत्वे अवश्यं विशिष्टप्रत्ययजनकत्वप्रसङ्गात्। नित्यस्य स्वरूपयोग्यस्य सहकारिसमवधाननियमात्।

संयोगादिस्वरूपमात्रनिष्ठसांसर्गिकविषयताकेत्यर्थः । तस्य घटाभाववतः । **उभयात्मकत्वेन** स्वरूपसम्बन्धेन घटाभावविशिष्टरूपतयोभयात्मकसम्बन्धघटितत्वेन । **घटत्वेनेति** । तथाच तद्भिन्नेत्यस्य घटवद्विशेष्यकरूपतद्विलक्षणेत्यर्थ इति भावः । तेन[1] तस्यैवानुपपत्तिरिति यदुक्तं, तत्तस्यैवोपपत्त्या समाहितं भवति । **समवधाननियमादिति** ।

---

[1] एतेन.

SGDF
Sri Gargeshwari Digital Foundation

किञ्च विशिष्टस्य प्रत्यय इत्यत्र स्वरूपसम्बन्धस्य षष्ठ्यर्थत्वे आत्माश्रयः, सम्बन्धमात्रस्य तदर्थत्वे आत्मत्वादिविशिष्टात्मसम्बन्धिसमूहालम्बनविषये घटपटादावतिव्याप्तिः; तयोरपि विशिष्टसम्बन्ध्यविशिष्टविषयज्ञानजनकत्वात् । ज्ञान-

---

एतादृश[1]नित्यस्य स्वरूपयोग्यत्वे सहकारिसमवधानमावश्यकम्, अन्यथा तत्साधारणरूपेण तदङ्गीकारे मानाभावः । अतीन्द्रियघटितधर्मावच्छिन्नाभावभेद[2]योग्यानुपलब्ध्यादेर्विशिष्य हेतुत्वावश्यकत्वेन तेनैव निर्वाहात्, अभावत्वादिनापि स्वरूपयोग्यत्वसम्भवेनोक्तगुरुरूपैर्नानास्वरूपयोग्यत्वोक्तेरुन्मत्तप्रलापत्वात् । न ह्युक्त[3]विशेषणेन कश्चनाभावो व्यावर्त्यते । संयोगाद्यभावस्य सङ्ग्रहाय एकावच्छेदेन प्रतियोगिसमानदेशत्वाभावस्य वाच्यतया तस्याप्यव्यावर्त्यत्वात् । किञ्च प्रतियोगिदेशान्यदेशवृत्तित्वादिविशिष्टतत्तदभावस्वरूपसम्बन्धस्य विशिष्टधीस्वरूपयोग्य(त्व)स्वीकारेऽपि प्रतियोग्यधिकरणदेशादौ जायमाना धीः प्रमा कुतो न स्यादिति यदापादितम्, तत्र मूढेन किं समाहितम्? तत्स्वरूपस्य तत्रापि सम्बन्धत्वसम्भवात् । न च—घटादिमति घटाद्यभावज्ञानं भ्रमः, तदन्यत्र तत्प्रमेत्युक्तं (युक्तम्); तद्वति तद्वदन्यत्वस्वरूपसम्बन्धस्यानिवारितत्वात् । एतेनोक्तरूपैर्विशिष्टधीस्वरूपयोग्यत्वाभावेऽप्युक्तरूपावच्छिन्नमभावादिस्वरूपमेव सम्बन्धः, प्रतियोग्यधिकरणसम्बन्धिरूपवारणायावच्छिन्नान्तमिति परास्तम् । अपि चोक्तरूपैः स्वरूपयोग्यता विषयतासम्बन्धेन विशिष्टबुद्धिं प्रति वाच्या । तथाच विषयता[4]घटितविशिष्टधीस्वरूपयोग्यतावच्छेदकरूपावच्छिन्नज्ञानज्ञेयादिस्वरूपस्य विषयतादिरूपत्वेऽनवस्थादि दुर्वारमिति भावः । **तयोः** घटपटाद्योः । **विशिष्टसम्बन्धी** आत्मसमवेतः । **अविशिष्टविषयेति** । स्वविषयकसमूहालम्बनेत्यर्थः । अवि-

---

[1] एतादृशमि–**क. ख.** [2] बोधे -**ग.** [3] न तद्युक्त. [4] विषयिता.

SGDF
Sri Gargeshwari Digital Foundation

स्याभावो ज्ञातोऽभाव इति प्रतीत्योर्वैलक्षण्यं न स्यात्; ज्ञानाभावयोरुभयोरेवोभयत्र स्वरूपसम्बन्धत्वे विषयकृतविशेषाभावात्। अत एव—विशिष्टप्रतीतिजननयोग्यत्वं ज्ञानज्ञेयादिस्थले अतिरिक्तमेव सम्बन्ध इति—निरस्तम्; अतीन्द्रिये नित्याभावेऽव्याप्तेः। न हि तत्र विशिष्टप्रतीतिजननयोग्यता; फलोपधाना-

---

शिष्टेत्यनेन घटपटाद्योर्वैशिष्ट्यसामान्यशून्ययोः स्वरूपसम्बन्धस्वीकारानौ[1]चित्यं ज्ञापितम्। यदुभयं मिथो विशिष्टस्य स्वस्य [2]तदुभयं स्वस्य स्वरूपसम्बन्ध इत्युक्तावपि, आत्ममनो[3]रूपोभयस्मिन्नतिव्याप्तिः,[4] तस्यापि संयोगसम्बन्धेन मिथो विशिष्टस्य स्वसम्बन्धिघटादिप्रत्ययजनकत्वात्। सम्बन्धान्तरं विना मिथो विशिष्टत्वोक्तावपि आत्मतज्ज्ञनयोः स्वरूपसम्बन्धाव्याप्तिः। विषयतासम्बन्धेन तादृशप्रत्ययं प्रति तादात्म्येन जनकत्वादिकमप्यनवस्थादिषु [5]दृष्टम्, स्वरूपसम्बन्धविशेषरूपविषयताघटितत्वादित्यादि बोध्यम्। **विषयकृतेति**। न च ज्ञानस्याभाव इत्यत्र या ज्ञानव्यक्तिर्विषयः, ज्ञातोऽभाव इत्यत्र न सेति विषयभेद इति वाच्यम्; विषयतावच्छेदकरूपस्य विशिष्टविषयस्य भेदो हि प्रकृतेऽवश्यं[6] वाच्यः, अन्यथा [7]स्वाभावविषयकज्ञानविषयकयोरुक्ताकारज्ञानयोर्विषयव्यक्तिभेदस्य वक्तुमशक्यत्वात्। न च ज्ञानस्याभाव इत्यत्र ज्ञानविरोधित्वविशिष्टभाव[8]स्वरूपं सम्बन्धः; ज्ञातोऽभाव इत्यत्र तु केवलं तत्स्वरूपमिति वाच्यम्; तथा कल्पने मानाभावात्, अन्यथा घटीयत्वादिविशिष्टतदविशिष्टतत्स्वरू[9]पाभ्यां भेदः किमिति न कल्प्यत इति भावः। **अतिरिक्तेति**। ज्ञानज्ञेयादिस्वरूपान्यो धर्मविशेष इत्यर्थः। **फलोपधानेति**।

---

[1] स्वीकारादिनौ–**ख.** [2] स्वस्य प्रतीतिजननं तदु–**ग.** [3] आत्मनो–**क. ग.** [4] इति व्याप्तिः–**क. ख.** [5] दुष्टम्–**क.** [6] प्रकृतेरवश्य–**क. ग.** [7] कारणभेदानुपपत्या स्वा–**ग.** [8] मभाव –**ग.** [9] घटीयत्वादिविशिष्ट तत्स्वरूपा–**ख.**

SGDF Sri Gangeshwari Digital Foundation

पत्तेः; प्रतीतिघटितस्य चाक्षुषादिप्रतीतावविषयत्वप्रसङ्गाच्च। तस्मात्सत्यत्वे सम्बन्धानुपपत्तेराध्यासिक एव दृग्दृश्ययोः सम्बन्ध इति॥

इत्यद्वैतसिद्धौ प्रपञ्चसत्यत्वे दृग्दृश्यसम्बन्धभङ्गः॥

अथानुकूलतर्कनिरूपणम्

स्यादेतत्—सर्वस्यापि दृश्यस्य ब्रह्मात्मकदृगध्यस्तत्वेऽपि कस्यचित् कदाचित् किञ्चित् प्रति प्रकाशाय त्वयापि तत्तत्सन्निकृष्टेन्द्रियजन्यतत्तदाकारवृत्तिद्वारक एवानावृतदृक्सम्बन्धः स्वीकृतः, तथाच सत्यत्वेऽपि तद्वारक एव सम्बन्धोऽस्तु, किमा-

---

यत्तु—'ईश्वरेच्छायाः प्रभावेन स्वरूपयोग्यस्यापि नोपधायकत्वम्, अनुपधायकस्यापि स्वरूपयोग्यत्वे ईशस्येशत्वमेव मानम्' इति, तदहो पाण्डित्यं दर्शितम्। शिलादावप्यङ्कुरादिस्वरूपयोग्यत्वे तन्मानं किमिति नावोचः॥

तर्कैः सारस्वतै रत्नैश्चन्द्रिकाचन्द्रभूषणैः।
दुरन्तध्वान्तभङ्गाय दृग्दृश्ययोगभञ्जनम्॥

इति दृग्दृश्यसंबन्धभङ्गः॥

अथानुकूलतर्कनिरूपणम्

वृत्तिद्वारक इति। वृत्तिसापेक्ष इत्यर्थः। **तद्वारक एवेति।** स्वावच्छेदकतादृशवृत्तिविषयत्वमेवेत्यर्थः। ननु न वृत्तिद्वारकः सम्बन्धो नियामकः, किंतु तत्तत्पुरुषीयज्ञाने तत्तज्ज्ञेयानामाध्यासिकः सम्बन्ध

SGDF
Sri Gargeshwari Digital Foundation

ध्यासिकसम्बन्धदुर्व्यसनेन, न हि भवतां विज्ञानवादिनामिव तत्तज्ज्ञाने तत्तदर्थाध्यासस्वीकारः, शुद्धदृशः स्वतो भेदाभावात्, उपाधिविशिष्टाया भेदेऽपि घटादिवत्तस्या अपि मिथ्यात्वेनाधिष्ठानत्वायोगादिति—चेन्न; प्रकाशस्य साक्षात् स्वसंसृष्टप्रकाशकत्वनियमेन चैतन्यस्य परम्परासम्बन्धेन विषयप्रकाशकत्वायोगात्। न हि प्रदीपः परम्परासम्बद्धं प्रकाशयति;

इत्याशङ्क्य जन्येषु तत्तत्पुरुषविज्ञानेषु तत्तद्विषयरूपाकाराध्यासवादिनां योगाचाराणामिदं सम्भवति, न त्वौपनिषदानां भवताम्। सर्वपुरुषसाधारणचैतन्यरूपज्ञानस्यैकत्वात्। वृत्त्यनपेक्षायां सर्वपुरुषं प्रति सर्वस्य सर्वदा भानापत्तेरित्याह—**न हीत्यादि। अधिष्ठानत्वायोगादिति।** अधिष्ठानत्वेऽपि वृत्तिद्वारकः सम्बन्ध आवश्यकः। अन्यथा वृत्तेः पूर्वमपि विषयभानं स्यादित्यपि बोध्यम्। दृष्टिसृष्टिमते अन्तःकरणोपहिते यस्मिंश्चैतन्ये यो विषयोऽध्यस्तः, स तेन भास्यत इति न वृत्त्यपेक्षा। किञ्चोपहितस्याधिष्ठानत्वेऽपि न क्षतिः, यदभिन्नमुपहितं तस्य शुद्धचैतन्यस्य सत्यत्वात्। अज्ञानविषयरूपाधिष्ठानकोटावनिवेशेऽप्युपाधेरधिष्ठानोपाधित्वसम्भवाच्च। अन्यथा शुक्त्याद्यवच्छिन्नं चैतन्यं रूपाद्यधिष्ठानं न स्यादिति[1] नायं दोष इत्यपि बोध्यम्। **प्रकाशस्य**—आलोकचैतन्यान्यतरस्य। **साक्षात् स्वसंसृष्टप्रकाशकत्वेति।** स्वकीयसाक्षात्सम्बन्धाश्रये कार्यविशेषप्रयोजकत्वेत्यर्थः। **परम्परेति।** वृत्तिविशेषद्वारकेत्यर्थः। **प्रकाशयति** स्वप्रयोज्यकार्यविशेषभाजं करोति। तथाच चैतन्यं, साक्षात्सम्बन्धे[2] कार्यविशेषप्रयोजकम्, प्रकाशत्वात्, दीपवत्, इत्यनुमानाल्लाघवतर्कसचिवात् चैतन्यस्य विषये साक्षादेव सम्बन्धः। यथा हि दीपः संयोगरूपसाक्षात्सम्बन्धेन घटादौ विद्यमानो

---

[1] रूपाद्यधिष्ठानं स्यादिति—क. [2] सम्बन्धेन—ग.

SGDF
Sri Gangeshwari Digital Foundation

अतो विषयाधिष्ठानचैतन्यमनावृतमेव प्रकाशकम्, आवरणभङ्गश्च वृत्त्या; अतो वृत्तेः पूर्वमाध्यासिकसम्बन्धे विद्यमानेऽपि दृश्याऽ-

---

दीपेन घटः प्रकाशत इत्यादिव्यवहारे विषयतया प्रयोजकोऽन्धकार-निवृत्त्यादिकार्यं जनयति च, न तु स्वक्रियाजन्यसंयोगादिरूपपरम्परा-सम्बन्धेन, गौरवात्; तथा चैतन्यं तादात्म्यरूपसाक्षात्सम्बन्धेन घटो भातीत्यादिव्यवहारे विषयतया प्रयोजकम्, प्रवृत्त्यादिकार्यं जनयति च, न तु वृत्तिविशेषद्वारकसम्बन्धेन, गौरवादिति भावः। ननु— चैत-न्यस्य तादात्म्यं वृत्तेः पूर्वमप्यस्तीति तदाप्युक्तकार्यापत्तिः। अथ आवरणनाशविशिष्टं तादात्म्यं प्रयोजकं वाच्यम्, तर्हि वृत्तिरेवावरण-नाशस्तद्धेतुर्वेति सैव प्रयोजिकोच्यतां किं तादात्म्येनेत्यत आह— **अतो विषयेति। प्रकाशम्** उक्तकार्यप्रयोजकम्। **आवरणभङ्ग इति।** क्वचिद्विषय इत्यादिः। तथाच भातीति व्यवहारप्रवृत्त्यादि-कार्येषु वृत्तिमात्रं न प्रयोजकम्, अनुमित्यादेस्तत्त्वासम्भवात्। नापी-न्द्रियजन्या वृत्तिरभानापादकावरणनाशादिरूपा तथा; तस्या अनै-न्द्रियकाविद्यामनस्सुखादावभावात्। न ह्यविद्यादौ संस्काराद्यर्थं स्वी-क्रियमाणापि वृत्तिरिन्द्रियजन्या; चक्षुराद्ययोग्ये साक्षिमात्रभास्यत्व-सम्भवेन मनसोऽप्यप्रवृत्तेः, किंत्वविद्यापरिणामरूपा॥

न च चाक्षुषादिवृत्ताविव तस्यामपि साक्षात्कारत्वमङ्गीकृत्य साक्षात्कारवृत्तिः प्रयोजिकोच्यताम्, अविद्यादौ वृत्त्यनङ्गीकारपक्षे साक्षिण्यपि साक्षात्कारत्वमङ्गीकृत्य तदाश्रय एव तथोच्यतामिति— वाच्यम्; साक्षात्कारत्वजातावेव मानाभावात्। आद्यपक्षे कार्यमात्र-वृत्तितादृशजात्यवाच्छिन्नेऽनुगतकारणासम्भवात्। नानाकारणकल्पने गौर-वात्। द्वितीये पक्षे तु साक्षिणो विषये तादात्म्यं सम्बन्धः, चाक्षुषादि-वृत्तेस्तु सम्बन्धान्तरमिति, नैकेन सम्बन्धेन प्रयोजकत्वसम्भवः। न हि

SGDF
Sri Gargeshwari Digital Foundation

भातीत्यनुगतव्यवहारो भानस्यैकत्र तादात्म्येनान्यत्रान्यसम्बन्धेनेति युक्तम्। न वाऽविद्यादौ तस्य तादात्म्यमन्यत्रान्यसम्बन्धः प्रवृत्त्यादिप्रयोजक इत्यपि युक्तम् ॥

अतो लाघवाद्विषयनिष्ठं[1] स्फुरणमेवोक्तकार्ये प्रयोजकम् । विषयतासम्बन्धेन तत्पुरुषीयप्रवृत्त्यादिकं प्रति तादात्म्येन तत्पुरुषीयस्फुरणस्य हेतुत्वसम्भवात् । उक्तस्फुरणं च वृत्तेरावरणनाशार्थत्वपक्षे तत्पुरुषीयाज्ञानस्य विषयतावच्छेदकत्वाभाववद्विषयतादात्म्यवच्चैतन्यम् । यदि चैकमेवाज्ञानमिति वृत्त्या न तन्नाशः किंतु तस्य स्वकार्याक्षमत्वम्, तदा तत्पुरुषीयवृत्त्यविषयनिष्ठं यदज्ञानविषयतावच्छेदकत्वं तदभाववद्विषयतादात्म्यवच्चैतन्यं तत् । यदि च वृत्तेर्जीवोपरागार्थत्वं जीवाभेदाभिव्यक्त्यर्थत्वं वा, तदा तन्मनोऽवच्छिन्नचिदभिन्नं सत्तन्मनोऽवच्छिन्नजीवोपरक्तविषयतादात्म्यवच्चैतन्यं तन्मनोऽवच्छिन्नजीवस्य स्फुरणम् । उपरक्तत्वं च सुखादिविषये प्रतिबिम्बवत्त्वम्, घटादिविषये [2] प्रतिबिम्बवद्वृत्तिविषयत्वम्, अन्यतरत्वेनाखण्डेन तयोर्निवेशान्नाननुगमगौरवे । परोक्षवृत्तिमात्रेण रूपादेः स्फुरणवारणायाभिन्नमित्यन्तम् । रूपादिमात्रविषयकापरोक्षवृत्त्या रसादिचैतन्यस्यापि तन्मनोऽवच्छिन्नचिदभेदसम्पादनात्तदानीं रसादेरपि स्फुरणं स्यात्, अतोऽन्त्यदळम् । सर्वत्राभावस्य स्वरूपतो निवेशान्न गौरवम् । उक्तस्फुरणं च भात्यादेरर्थः, तत्प्रयोजकं चैतन्यं साक्षात्कारार्थः, तत्पुरुषीयस्यासत्त्वापादकाज्ञानस्य विषयतानवच्छेदकत्वप्रयोजकं चैतन्यं जानात्यर्थः । तच्च वृत्त्याद्यवच्छिन्नं चैतन्यमुक्तप्रयोज्यरूपं फलमादाय विषयस्य तत्कर्मता बोध्या । विस्तरेण चेदमेतत्प्रकरणसमाप्तिस्थले वक्ष्यतेऽस्माभिः ॥

यदि चैकमेवाज्ञानमतस्तस्य न वृत्त्या नाशः, सुखादावस्य[3]

---

[1] निष्ठस्फुरणमेव—ग. [2] स्वप्रतिबिम्ब. [3] सुखादावप्य—ग.

SGDF
Sri Gargeshwari Digital Foundation

प्रतीतिरुपपन्ना । अत एव—वृत्तिप्रतिबिम्बितचैतन्यस्य घटप्रकाशकत्वे आध्यासिकसम्बन्धस्यातन्त्रतापातः, घटाभिव्यक्तचैत-

---

विद्यावृत्तिश्च, तदा तत्पुरुषीयवृत्त्यवच्छेदकविषयतादात्म्यवच्चैतन्यं तत्पुरुषीयस्फुरणम्, तत्पुरुषीयवृत्तिविषयतादात्म्यवच्चैतन्यप्रयोजकं चैतन्यं तत्पुरुषीयज्ञानम्, चक्षुरादिसन्निकर्षजन्यवृत्तेर्विद्यमानसुखादिविषयिकाया अविद्यावृत्तेश्च स्वविषयावच्छिन्नत्वं स्वकारणाधीनम्; विनिगमकाभावेन विषयतासम्बन्धेनेवावच्छेदकतासम्बन्धेनापि वृत्तेः सन्निकर्षकार्यत्वात्, सुखादिविषयकवृत्तित्वेनेव सुखाद्यवच्छिन्नत्वेनाप्यविद्यावृत्तेः कार्यत्वाच्च । अज्ञानविषयतावच्छेदकत्वाभावोऽज्ञानविषयतातदवच्छेदकत्वान्यतराभावो निवेश्यः, तेन वृत्त्यभावकाले ब्रह्माणि जानामीति न व्यवहारः । शुद्धचिदवच्छिन्नवृत्तित्वेनापि शाब्दवृत्तेः कार्यत्वस्य विनिगमनाविरहेण स्वीकाराच्चरममते ब्रह्म भातीत्यादिव्यवहारः[1] । संशयरूपाविद्यावृत्तिविषये भातीतिव्यवहाराभावेन निश्चयवृत्तिनिवेशावश्यकत्वात् । भ्रमत्वेन गृह्यमाणवृत्तेश्चानिश्चयत्वान्निदिध्यासनात्पूर्वं ब्रह्म मे भातीत्यस्य नापत्तिः । एवं च भातीत्यादिव्यवहारसामान्येऽनुगतविषयकत्वोपपत्तिः, भान[2]ज्ञानस्वरूपस्यैकत्वात् । वृत्तिभान[3]त्वादिस्वीकारे तु सा न, न ह्येकविषयकत्वे सम्भवति एकजातीयकत्वमुचितम् । "यत्साक्षादपरोक्षाद्ब्रह्म" —"विज्ञानमानन्दं ब्रह्म" "अयमात्मा ब्रह्म सर्वानुभूः इत्यादिश्रुतिश्चोपपद्यते । शाखा चलतीत्यादाविव शाखाऽस्ति भातीत्यादावपि चैतन्यरूपयोस्सत्ताभानयोस्तादात्म्यमाख्यातार्थः । वृत्तिविषयत्वस्य तत्वकल्पने[4] तु गौरवमिति भावः । **अत एवेति ।** अनावृताधिष्ठानचितः प्रकाशकत्वादेवेत्यर्थः । **अतन्त्रतापात इति ।** प्रति-

---

[1] अयं कोष्ठान्तर्गतः पाठः. क. पुस्तके नास्ति. [2] भ्रान्त—ग. [3] वृत्तेर्भान—ग. [4] तत्कल्पने—ग.

SGDF Sri Gargeshwari Digital Foundation

न्यस्य घटप्रकाशकत्वे आवश्यकेन वृत्तिप्रतिबिम्बितचैतन्येनैव घटप्रकाशकत्वोपपत्तौ तदधिष्ठानचिदभिव्यक्तिकल्पनायोग इति निरस्तम्; परोक्षविलक्षणस्फुटतरव्यवहारार्थं विषयाधिष्ठानचैतन्याभिव्यक्तिकल्पनाया युक्तत्वात्। नच—शुद्धचैतन्यस्य चरमसाक्षात्कारात्पूर्वं नाभिव्यक्तिः; अभिव्यक्तस्य च घटाद्यवच्छिन्नचैतन्यस्य न तदधिष्ठानत्वम्, आत्माश्रयादिति—वाच्यम्; चरमसाक्षात्कारात्पूर्वमपि शुद्धचैतन्यस्याविद्यावशादधिष्ठानभूतस्य मूलाज्ञाननिवृत्तिलक्षणाभिव्यक्त्यभावेऽपि तदवस्थाविशेषादिनिवृत्तिलक्षणाभिव्यक्त्या विषयप्रकाशकत्वोपपत्तेः। न च—घटप्रकाशिकाया दृशो मिथ्यात्वे नाधिष्ठानत्वम्, सत्यत्वे दोषा-

---

बिम्बितस्यानधिष्ठानत्वादिति शेषः। **घटाभिव्यक्तेति**। घटावच्छेदेनाभिव्यक्तेत्यर्थः। **आवश्यकेनेति**। वृत्तेः स्वच्छतया तत्र चित्प्रतिबिम्ब आवश्यकः। तस्य च स्वावच्छेदकवृत्तिविषयत्वसम्बन्धेन[1] प्रकाशकत्वमिति[2] भावः। नन्वभिव्यक्तिं विनापि परोक्षज्ञानस्य प्रकाशकत्वात्तत्र न तस्या उपयोगस्तत्राह—**परोक्षेति**। स्फुटतरो भातीत्यादिरूपः। **युक्तत्वादिति**। अन्यथा चित्प्रतिबिम्बस्योक्तसम्बन्धेन परोक्षस्थलेऽपि सत्वादुक्तव्यवहारापत्तेरिति शेषः। **तदधिष्ठानत्वं** तदुपादानत्वम्। तथा च स्वोपहितचैतन्यस्य घटादावधिष्ठानत्वे स्वस्य स्वस्मिन् प्रयोजकत्वादात्माश्रय इति भावः। **शुद्धेति**। घटाद्यनुपहितेत्यर्थः। **अविद्यावशादधिष्ठानेति**। ब्रह्मण उपादानत्वपक्षेऽविद्यासहिततयोपादानेत्यर्थः। सहितत्वं चाविद्याया अप्युपादानत्वादविद्योपहितस्य ब्रह्मण एवोपादानत्वादविद्योपहितजीवचैतन्यस्योपादानत्वाद्वेति पक्षत्रयस्यापि सङ्ग्रहः। **विशेषादीत्यादिना**—मनोऽनवच्छेद[3]प्रयुक्तस्य चिन्निष्ठभेदस्य ग्रहणम्। तथाच मूलाज्ञानसत्वेऽपि घटादिविषये तद-

---

[1] सम्बन्धे–**क.** [2] प्रकाशत्वमिति–**क. ख.** [3] मनोवच्छेद–**ग.**

SGDF Sri Gargeshwari Digital Foundation

जन्यत्वेन प्रमात्वात् सत्यं स्वविषयं प्रति नाधिष्ठानत्वमित्युभयत स्पाशा रज्जुरिति—वाच्यम्; यतो दोषाजन्यत्वं न प्रमात्वप्रयोजकम्, चैतन्यस्य सर्वत्र दोषाजन्यत्वात्; किंतु दोषाजन्यवृत्त्यवच्छिन्नत्वम्; प्रकृते च तदभावान्न विषयस्य सत्यत्वम्। अतो मिथ्याभूतविषयं प्रत्यधिष्ठानत्वं सत्याया दृशो युक्तम्। ननु तात्विकसम्बन्धासम्भवे आध्यासिकसम्बन्धकल्पनम्; स एव तु कुतः? क्लृप्तसंयोगबाधे गुणगुणिनोः समवायवत्तदुभयबाधे तृतीयस्य सम्भवात्, नच तत्र मानाभावः; समवायवदनुमाध्यक्षयोः

वच्छेदकत्वाभावादुक्तरीत्या चित्प्रकाशिकेति भावः। **प्रमात्वादिति**। प्रमाविषयत्वेनेति शेषः। **प्रकृते चेति**। घटादिप्रकाशकदृशि चेत्यर्थः। **तदभावादिति**। अविद्याया घटादिप्रयोजकत्वात्तदाकारवृत्तावपि दोषविधया निमित्तकारणत्वम्। अत एव ब्रह्मणो दोषाप्रयुक्तत्वेन तदाकारवृत्तिर्नाविद्यादोषनिमित्तिका। दोषाप्रयुक्तविषयकत्वमबाधितविषयकत्वपर्यवसन्नं वा प्रकृते वृत्तेर्दोषाजन्यत्वमिति भावः॥

यत्त्वधिष्ठानस्य प्रकाशकत्वेऽपि वृत्तिप्रतिबिम्बचैतन्यस्य तदभिव्यञ्जकत्वं वाच्यम्, तथाच तदेव प्रकाशकमस्तु, तेनैव च स्फुटतरत्वव्यवहारोऽस्त्विति, तन्न; वृत्तेरेवावरणं प्रति नाशकत्वान्नाशत्वाद्वा। यथाच तस्याः प्रकाशकत्वाद्यसम्भवस्तथा विवृतत्वात्। यदपि मूलाज्ञानं चैतन्यमावृणोति न वा, अन्त्ये न तत्सिद्धिः; आवरणार्थमेव तत्स्वीकारात्। आद्ये अवस्थाज्ञानस्य वृत्त्या निवृत्तावपि मूलाज्ञानसत्वे कथं घटादेः प्रकाश इति, तदपि समाहितम्। मूलाज्ञानस्य घटादाववच्छेदकत्वाभावात्। शुद्धचित्यनवच्छिन्नविषयतायाःसत्वेऽप्युक्तरीत्या घटादिप्रकाशसम्भवात्। यदपि दोषाजन्यत्वं घटादिवृत्तेरपि, अविद्याया दोषत्वे विवादात्, सम्भावितदोषान्तराणां च तदजनकत्वा-

SGDF
Sri Gargeshwari Digital Foundation

सत्त्वात् । तथाहि परस्परासंयुक्तासमवेतविशेषणविशेष्यकाविशिष्टधीः, विशेषणविशेष्यसम्बन्ध(विशिष्ट)विषया, विशिष्टधीत्वात्, दण्डीति विशिष्टधीवत्; उक्ता जन्यप्रमा, विशेषणविशेष्यसम्बन्धनिमित्तिका, अबाधितजन्यविशिष्टधीत्वात्, सम्मतवत्; विमता धीः, अबाधितविशेषणविशेष्यसम्बन्धविषया, अबाधि-

---

दिति, तदपि तुच्छम्; यत्र हि मिथ्यात्वं सम्भावितं तदाकारवृत्तेरपि जनको दोषः सम्भावित एवेति मिथ्यात्वेन विप्रतिपन्ने घटादौ वृत्तिर्दोषजन्येति[1] कथं त्वया निरणायि । तदनिर्णये च तादृशप्रमाविषयत्वेन कथं सत्यत्वमनुमीयते । दोषाजन्यत्वं च तद्योग्यतारूपं दोषाप्रयुक्तविषयकत्वादीत्युक्तम् ॥

विशिष्टधीरिति । ज्ञातो घट इत्याद्याकारिका धीरित्यर्थः । **विशेषणविशेष्यसम्बन्धविशिष्टविषयेति** । ज्ञानघटाद्योर्विषयताभ्यां निरूपिता या किञ्चिन्निष्ठविषयता तद्वतीत्यर्थः । तेन ज्ञानघटादिसम्बन्धस्यानुमानात्पूर्वमसिद्धत्वेऽपि न क्षतिः । न वा ज्ञानज्ञानत्वादिसम्बन्धविषयकत्वमादाय सिद्धसाधनम् । संयोगसमवायविषयकत्वमादायार्थान्तरवारणाय विशेष्यकान्तम् । परस्परमसंयुक्तमसमवेतं[2] च यद्विशेषणविशेष्यं तद्विषयकेत्यर्थः । संयोगसमवायनिष्ठा या ज्ञाननिष्ठविषयतानिरूपितसांसर्गिकविषयता तच्छून्येति पर्यवसितम् । तादृशसांसर्गिकविषयता च संयोगादिना ज्ञानभ्रमे प्रसिद्धा । एवं च परस्परासंयुक्तत्वादिनिर्णयस्य संयोगादिविषयकत्वसिद्ध्यनिवारकत्वेऽपि न क्षतिः । न चैवं—ज्ञानघटादिस्वरूपस्य पक्षीभूतबुद्ध्यविषयस्य कस्यचिद्वा संसर्गतामादायार्थान्तरमिति वाच्यम्; स्वस्य स्वप्रतियोगिकत्वासम्भवेन[3] तत्तद्बुद्ध्यविषयस्य च तत्त्वेनैव तन्निष्ठसांसर्गिकविषयत्वस्य

---

[1] दोषाजन्येति–क. ख. ग. [2] मसंयुक्तसमवेतं–ग. [3] त्वसम्भवेन–ग.

SGDF
Sri Gargeshwari Digital Foundation

तविशिष्टधीत्वात्, दण्डीति विशिष्टधीवत्; गोमांश्चैत्र इत्यादेरपि पक्षकुक्षिनिवेश[1] एवेति न तत्र व्यभिचाराशङ्का। तथाच संयोगसमवायातिरिक्तसम्बन्धसिद्धिरिति—चेन्न; प्रथमे द्वितीये चार्थान्तरम्; आभ्यासिकसम्बन्धस्यैव विषयत्वेन निमित्तत्वेन चोपपत्तेः। द्वितीये परोक्षधीषु व्यभिचारश्च। तृतीये ब्रह्मज्ञानपर्यन्ताबाधितत्वेन सिद्धसाधनमेव। सर्वथा अबाधितधीविषयत्वे

बाधात्। **विशिष्टधीत्वात्** सप्रकारकत्वात्, निर्विकल्पानङ्गीकारे धीत्वात्। **दण्डीति**। दण्डज्ञानयोर्विशिष्टधीपक्षतायां संयोगेन दण्डविशिष्टज्ञानमिति भ्रमो दृष्टान्तः। यत्वतत्त्वयोरनुगतत्वे तु यदुभयविशेष्यविषेणकं यत् तत्तदुभयविषयताभ्यां निरूपितकिञ्चिन्निष्ठसांसर्गिकविषयताकमिति सामान्यतो व्याप्तौ, दण्डी पुरुष इति प्रमापि दृष्टान्तः सम्भवति। **विशेषणविशेष्यसम्बन्धनिमित्तिका** स्वीयविशेष्यविशेषणताश्रयनिरूपितसम्बन्धेन विषयविधया जन्या। तेन संयोगज्ञानयोर्विशिष्टबुद्धौ संयोगादिजन्यत्वान्न सिद्धसाधनम्, न वा कालोपाधिविषया[2] जन्यत्वमादायार्थान्तरम। अत्र स्वत्वाननुगमात्साध्याप्रसिद्धिः। न च–संयोगसमवायस्वरूपसम्बन्धानिमित्तकत्वेन[3] पक्षविशेषणेऽपि सामान्यतः स्वविशेष्यविशेषणसम्बन्धनिमित्तकत्वेन पक्ष एव सन्देहरूपा प्रसिद्धिरिति वाच्यम्; तत्सन्देहहेतौ तत्सामानाधिकरण्यसन्देहस्याप्यौचित्यावर्जितत्वेन व्याप्त्यनिश्चयात्तावतापि दृष्टान्ते साध्यवैकल्याच्चेति दूषणं स्फुटत्वादुपेक्ष्य दूषणान्तरमाह—**प्रथमे द्वितीये चेति। व्यभिचारश्चेति।** न च–लौकिकापरोक्षत्वस्य हेतौ निवेश्यत्वान्न व्यभिचार इति वाच्यम्; सम्बन्धांशे तन्निवेशे ज्ञातो घट इति चाक्षुषादिप्रमायां स्वरूपासिद्धिबाधयोरापत्तेः। किञ्चिदंशे तन्नि-

---

[1] निक्षेप.　[2] विधया–ग.　[3] त्वे–क.

SGDF
Sri Gargeshwari Digital Foundation

साध्ये साध्यवैकल्यम् । न च—तात्विकसम्बन्धबाधे आध्यासिकसम्बन्धसिद्धिः, तथाच संयोगसमवायातिरिक्ततात्विकसम्बन्धबाधपर्यन्तं नाध्यासिकसम्बन्धसम्भावना, तथाच कथमर्थान्तरासिद्धसाधनसाध्यवैकल्यानीति—वाच्यम्; तात्विकसम्बन्ध-

---

वेशे च सम्बन्धांशे परोक्षे व्यभिचारस्तदवस्थः, पक्षतावच्छेदके लौकिकमानसापरोक्षत्वनिवेशे च चाक्षुषादिप्रमायां साध्यासिद्धिः, [1]अस्मन्मते आश्रयासिद्धिश्चेति बोध्यम् । **कथं तात्विक इति ।** ननु—स्वसम्बन्धिसमसत्ताकसम्बन्धविषयत्वं[2] साध्यम्, अतो बाधितसम्बन्धमादाय नार्थान्तरादीति चेन्न; यत्किञ्चित्स्वसम्बन्धिसमसत्ताकत्व[3]निवेशे अर्थान्तरादितादवस्थ्यात् । ज्ञेयस्य व्यावहारिकप्रातीतिकान्यतरत्वात् । अथ–यावत्स्वसम्बन्धि[4]समसत्ताकत्वं निवेश्यम्, ज्ञानस्य सम्बन्धिनः सत्यत्वेन सत्यः सम्बन्धः सिध्यतीति–चेन्न; ज्ञानज्ञेयोभयसमसत्ताकाप्रसिद्धेः, उपहितचैतन्यस्य ज्ञानत्वेनासत्यत्वादर्थान्तराद्यनुद्धाराच्च । स्वपदार्थस्याननुगतत्वेन दृष्टान्तीयसम्बन्धरूपत्वे बाधात्, पक्षीयसम्बन्धरूपत्वे साध्यवैकल्यात् ॥

यत्तु अविप्रकर्षस्य सम्बन्धव्यापकत्वे निश्चिते तन्निवृत्त्या पक्षे साध्याभावसिद्धिः, तस्यां च सत्यां व्यभिचारशङ्काविरहसिद्ध्या तस्य तद्व्यापकत्वानिश्चय इत्यन्योन्याश्रयादविप्रकृष्टानामपि सपत्नीनां सम्बन्धाभावाद्विप्रकृष्टानामपि गोगोमदादीनां सम्बन्धसत्वाच्च, तर्काभावात्तस्य तद्व्यापकत्वं न निश्चेतुं शक्यत इति–तन्न; सम्बन्धो यदि विप्रकृष्टयोः स्यात्, तदा हिमवद्विन्ध्ययोरपि स्यात् । तथाच भ्रममात्रोच्छेद इत्याद्यनुकूलतर्केण पूर्वोक्तेनाविप्रकर्षस्य सम्बन्धव्यापकतानिश्चयेन व्यभिचारसंश्रयस्या[5]प्रयोजकत्वेनान्योन्याश्रयानवकाशात् ।

---

[1] अस्मिन्मते-**ख.** [2] विषयकत्वं-**ग.** [3] सम्बान्धिसत्ताक-**क.ख.**
[4] ससम्बन्दि-**ख.** [5] संशयस्य-**क.ग.**

SGDF
Sri Gargeshwari Digital Foundation

अन्यथा जलादौ गन्धादिसंशये तद्व्यापकतया पृथिवीत्वादेरनिश्चयेन तदभावेन तत्र गन्धाद्यभावसिद्धिर्न स्यात् । सपत्नीनां सम्बन्धस्य संयोगस्य सत्वे विप्रकर्षाभावोऽस्त्येव[1] । गोगोमदादीनां च सम्बन्धो नास्त्येव । अत एव ध्वंसादेः प्रतियोग्यादिना न सम्बन्ध इत्यादि वक्ष्यते । न चाविप्रकर्षसत्वेऽपि सम्बन्धाभावात् सम्बन्धवि[2]प्रकर्षयोर्वक्ष्यमाणं समव्यापकत्वं व्याहतमिति—वाच्यम् ; अविप्रकर्षे सति सम्बन्धस्यावश्यकत्वात् । न हि समानदेशत्वादिकमविप्रकर्षः ; एकद्वीपवर्तिनां भिन्नकालीनानां मिथः सम्बन्धापत्तेः ॥

नन्वेवं—सम्बन्धसामान्यं नाऽविप्रकर्षः ; परम्परासम्बन्धस्य निश्चयात्, साक्षात्सम्बन्धस्य सन्दिग्धत्वात्तदभावेनानिश्चितेन सम्बन्धाभावसिद्ध्यसम्भवात् ; अत एव साक्षात्सम्बन्धोऽपि न सः । तथाच तदभावेनासम्बन्धसिद्ध्युक्तिरयुक्तेति—चेन्न ; तदीयायां कालिकसम्बन्धेनाधिकरणतायामवच्छेदकत्वं हि तदविप्रकर्षस्तदीयसाक्षात्सम्बन्धव्यापकः, तदभावश्च ज्ञानज्ञेयादिस्थले निश्चितः । तथाहि—यदवच्छेदेन कालिकसम्बन्धेन यद्वृत्ताऽनुभूयते तत्रैव तस्य दैशिकसाक्षात्सम्बन्धोऽप्यनुभूयते । अत एव भूतलकपालाद्यवच्छेदेन घटादिकालिकाधिकरणत्वानुभवात्तत्रैव संयोगादिस्तादृशः सम्बन्धोऽङ्गीक्रियते, न तु मेरुविन्ध्ययोः । अन्यथा ज्ञानातीतादिविषययोरिव तयोरपि तादृशसम्बन्धं किं न रोचयेः । यथा च तयोरेकावच्छेदेनापरस्य न कालिकाधिकरणत्वम्, तथा अतीतादिविषयावच्छेदेन ज्ञानस्य प्रतियोग्यवच्छेदेन ध्वंसस्य स्वाम्याद्यवच्छेदेन गवादेरपीत्यतीतादौ तादृशावच्छेदकत्वाभावनिश्चयेन तादृशसम्बन्धाभावसिद्धिः । किञ्च यथा अतीतादिकं न ज्ञानादिमत्वे कालिकेऽवच्छेदकम्, ज्ञानाद्यधिकरणकालासम्बन्धात्, तथा अतीतादिनिष्ठस्य ज्ञानादिसम्बन्धस्य ज्ञानादिमत्कालो नावच्छेदकः,

[1] प्यस्त्येव–ग.　　[2] सम्बन्धाविप्र–क.ग.

SGDF
Sri Gargeshwari Digital Foundation

स्य व्यापकानुपलब्ध्या बाधात् । तथा हि--तात्विकसम्बन्धस्य व्यापको देशकालविप्रकर्षाभावः । स चातीतादिविषयकज्ञानादीनां नास्त्येवेति कथं तात्विकस्तेषां सम्बन्धः । न च--समवायवत् सम्बन्ध्यभावविप्रकर्षाद्यविरुद्धत्वेनैव तत्सिद्धि-

---

अतीताद्यसम्बन्धात् । न ह्यवच्छेद्याधिकरणासम्बद्धमप्यवच्छेदकम्, न वा घटत्वादिसम्बन्ध इव स कालान[1]वच्छिन्नः; इदानीमेव तज्ज्ञानमिति प्रतीतेः । ज्ञानत्वाज्ञानत्व[2]योर्विरुद्धयोः कालभेदावच्छेदेनैवोपपाद्यत्वाच्च । तथाच ज्ञानादिमत्कालावच्छिन्नसम्बन्धसामान्याभावेन ज्ञानादिसम्बन्धाभावः सिध्यति । यो हि यत्सम्बन्धवान् स तद्वत्कालावच्छिन्नसम्बन्धवान्, यथा भूतलादिकं घटादिसंयुक्तं घटादिकालावच्छिन्नघटादिसम्बन्धकम् । भिन्नकालीनयोर्ज्ञानज्ञेयादिभिन्नयोरपि सम्बन्धापत्तिर्विपक्षे बाधिका । न च—विषयताद्यन्यसम्बन्धमन्तर्भाव्यैवोक्तनियमः, अन्यथा व्यभिचारापत्तिरिति-—वाच्यम्; विषयतादिसम्बन्धस्य विप्रतिपन्नत्वेन व्यभिचारसंशयस्य सम्भवेप्युक्तव्यापकताग्राहकतर्केण तदुच्छेदात् । न चातीतादेः सूक्ष्मरूपेण सत्वात्तत्र ज्ञानादिसम्बन्धसम्भव इति—वाच्यम्; सूक्ष्मावस्थाया अतीतादिव्यक्त्यत्यन्ताभेदे ज्ञानादिसमकालीनत्वासम्भवात्तद्भेदस्यापि वाच्यत्वेन अतीतादेर्ज्ञानभिन्नकालीनत्वं तदवस्थमेव, ज्ञानज्ञेययोरापि सम्बन्धासम्भवात् । न च—विषयीभूतसूक्ष्मरूपतादात्म्यादतीतस्यापि विषयत्वकार्यमिति—-वाच्यम् । विद्यमानघटादिज्ञानान्न[3] ध्वंसप्रागवस्थासु विषयत्वकार्यापत्तेः । सूक्ष्मस्थूलावस्थयोरापि भिन्नकालीनत्वेन मिथ्यातादात्म्यस्यैव वाच्यत्वेन ज्ञाना तीतादिज्ञेययोरेव साक्षात्तस्य वरत्वादिति दिक् ॥

समवायवदिति । यथा समवायस्यैकत्वपक्षे श्यामत्वाद्यभाव-

---

[1] सकलान-**ख.ग.** [2] ज्ञातत्वाज्ञातत्वयोः—**क.ख.ग.** [3] ज्ञानात्तद्ध्वंस-**ग.**

SGDF
Sri Gargeshwari Digital Foundation

रिति— वाच्यम्; समवायस्यापि देशकालविप्रकृष्टयोः सम्बन्धव्यवहाराप्रयोजकत्वात्। नहि सम्बन्ध्यभावेऽपि सन् समवायोऽद्य नष्टं घटं श्वस्तनेन रूपेण विशिनष्टि। न चाध्यासिकत्वे सम्बन्धस्य साध्ये धर्मिग्राहकमानबाधः। विशिष्टबुद्धित्वेन प्रथमं तात्विकातात्विकसाधारणसम्बन्धत्वस्यैव सिद्धेः। किं च सम्ब-

---

कालेऽपि श्यामत्वादितो[1] विप्रकृष्टेऽपि घटादौ तदीयः समवायः तथा ज्ञाने तदीया विषयतेत्यर्थः। अपिसन्नित्यनेन नानासमवायपक्ष एव श्रेयानिति सूचितम्। अन्यथा नष्टस्यापि वर्तमानकाले सम्बन्धसत्वेन विशिष्टप्रमा स्यात्, वाय्वादौ च रूपादिप्रमा स्यात्, तत्र तत्प्रतियोगिकसम्बन्धानुयोगित्वस्यैव तन्नियामकत्वात्। अथ— यत्र समवायीयया रूपनिष्ठप्रतियोगितया निरूपिताऽनुयोगिता तत्र रूपप्रमा, सा चानुयोगिता न वाय्वादाविति, न तत्र तत्प्रमा; अत एव रूपे रूपसमवाये सत्यपि न सेति चेन्न; उक्तप्रतियोगितानुयोगितयोः प्रतियोग्यनुयोगिरूपत्वे वायौ तदापत्तेरवारणात्कालिकसम्बन्धीयरूपात्मकप्रतियोगिताया एव समवायीयत्वात्, तन्निरूपितानुयोगितायां[3] वायुस्वरूपत्वादतिरिक्तत्वे समवायस्यैव नानात्वौचित्यात्, रूपस्य तु स्वस्मिन्न प्रमापत्तिः, स्वभेदसामानाधिकरण्यसम्बन्धस्यैव प्रमानियामकत्वादिति भेदानुमान[2]विवेचने प्रपञ्चितमस्माभिः पूर्वम्। **विशिनष्टीति।** विशिष्टव्यवहारभाजं करोतीत्यर्थः। तथाच समवायस्यैकत्वपक्षेऽपि यदा यस्य यत्र सम्बन्धस्तादृशस्तदा तयोरविप्रकर्ष इति नियमो न व्याहत इति भावः। ननु—सम्बन्धमात्रसिद्ध्युत्तरं स्वव्यापकाभावेन सत्यसम्बन्धस्याभावसाधने अतीतादावेव ज्ञानस्यासत्यसम्बन्धः स्यात्, न तु विद्यमाने, तत्र तस्याविप्रकर्षरूपव्यापकसत्वात्तत्राह—**किञ्चेति।**

---

[1] श्यामत्वादिनो—**ग**　[2] तायां—**ग.**　[3] भेदाभेदानुमान—**क.ग.**

SGDF
Sri Gargeshwari Digital Foundation

न्धग्राहक एव तात्विकसम्बन्धव्यापकानुपलब्धिरूपबाधसहकृतः आध्यासिकसम्बन्धे पर्यवस्यति। अतो न धर्मिग्राहकबाधशङ्कापि। न चैवं—युतसिद्धयोरेव संयोगरूपसम्बन्धदर्शनादयुतसिद्धिरपि [1]संयोगस्य बाधिका स्यादिति—वाच्यम् ; (अ)युतसिद्धयोरपि क्वचित्सम्बन्धादर्शनेन युतसिद्धत्वस्य सम्बन्धाप्रयोजकत्वात्, यस्मिन् सत्यवश्यं सम्बन्धः स एव सम्बन्धस्य प्रयोजक इति समव्याप्तत्वाभावेन युतसिद्ध्यनुपलब्धेरबाधकत्वात्, यत्र सम्बन्धस्तत्रावश्यं युतसिद्धिरिति विषमव्याप्तिकल्पनेऽपि मानाभावात्, अनुकूलतर्कादर्शनात्, देशकालविप्रकर्षाभाववतां तु सर्वेषां सम्बन्धदर्शनेन विप्रकर्षे तददर्शनेन च समव्याप्ततया प्रयोजकस्य देशकालविप्रकर्षाभावस्यानुपलब्धेः सम्बन्धबाधकत्वस्यावश्यमङ्गीकरणीयत्वात्। नहि प्रयोजकाभावे प्रयोज्यसम्भवः। नन्वेवं—ध्वंसादेरतीतादिना, मिथ्यात्वलक्षणान्तर्गतस्यात्यन्ताभावस्य प्रतियोगिना, शक्तेः शक्येन, अज्ञानस्याज्ञेयेन, इच्छाया इष्यमाणेन, व्यवहारस्य व्यवहर्तव्येन, वाक्यस्यार्थेन, वृत्तिरूप-

---

विशिष्टबुद्धित्वाद्युक्तहेतुरिति शेषः। व्यापकानुपलब्धिरूपबाधेति। व्यापकस्याविप्रकर्षानुपलब्धिप्रमाणगम्याभावज्ञानाद्यो बाधः सत्यसम्बन्धाभावनिश्चयः स इत्यर्थः। ज्ञातो घट इत्यादिविशिष्टबुद्धिनिष्ठोक्तपक्षतावच्छेदकावच्छेदेन सम्बन्धव्याप्यवत्तानिश्चयादुक्ताभाव[2]-निश्चयसहकृतादुक्तपक्षतावच्छेदकावच्छेदेन सत्तान्यसम्बन्धसिद्धिः। अतो विद्यमानेऽपि ज्ञानस्यासत्यसम्बन्धसिद्धिः। न च—यद्धर्मावच्छेदेन साध्यसिद्धिस्तद्धर्मावच्छेदेनोक्ताभावनिश्चयापेक्षेति—वाच्यम्। नीलपर्वतो वह्न्यभाववानिति निश्चयान्नीलान्यपर्वतो वह्निमानित्य-

---

[1] समवायस्य. [2] युक्ताभाव-ख.

SGDF
Sri Gargeshwari Digital Foundation

ज्ञानस्य ज्ञेयेन, सम्बन्धो नेति त्वद्वाक्योक्तसम्बन्धाभावस्य ज्ञानेनासम्बन्धात् स्वन्यायस्वक्रियास्ववचनविरोधाः स्युः। न हि ज्ञाने ज्ञेयमित्र प्रतियोग्यादिकमभावादावध्यस्तमिति—चेन्न; यद्यप्युक्तन्यायसाम्येन ध्वंसादीनां स्वप्रतियोग्यादिभिस्तात्विकः सम्बन्धो नास्त्येव, अध्यासोऽपि न ज्ञानज्ञेयन्यायेन, उभयोरपि मिथ्यात्वात्; तथापि प्रतीयमानं प्रतियोग्यनुयोगिभावादिकं सर्वथा न निराकुर्मः, किंतु तात्विकाध्यासाभ्यां भिन्नमेव ज्ञेयकुक्षिनिक्षिप्तत्वात् मिथ्याभूतमङ्गीकुर्मः। स च संयोगादिवदतिरिक्तो वा स्वरूपं वा पराङ्गीकृतपदार्थान्तर्गतो वा तदतिरिक्तो वेत्यस्यां काकदन्तपरीक्षायां न नो निर्बन्धः। न च—मिथ्यात्वसिद्धेः प्राक् तदसिद्ध्या अन्योन्याश्रयः; दृक्दृश्यसम्बन्धानुपपत्त्या ज्ञेयमात्रस्याध्यासिकत्वे सिद्धे तन्मध्यपतितस्य प्रतियोग्यभावादिसम्बन्धस्यापि मिथ्यात्वम्, न तु प्रतियोग्यभावादिसम्बन्धमिथ्यात्वसिद्ध्यनन्तरं दृश्यमिथ्यात्व-

---

नुमितिवदुपपत्तेः, दृश्यत्वस्यापि दृश्यत्वादनवस्थेति वक्ष्यमाणतर्केण दृश्यमात्रस्य मिथ्यात्वसिद्धेश्चेति भावः। **अध्यासोऽपीति**। अधिष्ठानारोप्ययोस्तादात्म्यमपीत्यर्थः। **अतिरिक्तो वेति**। सम्बन्धिभ्यां भिन्नो वेत्यर्थः। **पदार्थान्तर्गत इति**। स्व[1]कारणसम्बन्धाश्रयत्वादिति[1] शेषः। विप्रकर्षस्य बाधकस्य सत्वेन सर्वेषु पक्षेषु सम्बन्धो न सत्य इति स्थिते नोक्तपक्षेष्वाग्रहः। एकस्यामिवानेकस्यामप्यनुपपत्तौ मिथ्यात्वस्य समाधायकत्वादित्याशयेनाह—**इत्यस्यामिति न तु प्रतियोगीति**। न च प्रतियोग्यनुयोगिभावादिसम्बन्धे मिथ्यात्वसंशये तत्रैव व्याभिचारसंशयेन सत्यसम्बन्धव्यापकत्वमविप्रकर्षे निश्चेतुं

---

[1] स्वस्वकारण–क. ग.　त्वादिरूपत्वादिति–क. ग.

SGDF
Sri Gargeshwari Digital Foundation

सिद्धिरिति व्यवहारोपयुक्तसम्बन्धसामान्यस्याप्रतिक्षेपान्न स्ववचनादिविरोधः। तदुक्तं खण्डनकृद्भिः—

बाधेऽदृढेऽन्यसाम्यात् किं
दृढे तदपि बाध्यताम्।
क्व ममत्वं मुमुक्षूणा-
मनिर्वचनवादिनाम् ॥ इति।

न चादृढत्वं बाधस्य; व्यापकानुपलब्धिरूपतर्कस्योक्तत्वात्, स्वक्रियादिविरोधरूपप्रतिकूलतर्कस्य परिहृतत्वाच्च। अत एव न

शक्यत[1] इति—वाच्यम्; उक्तानुकूलतर्केण व्यापकतानिश्चयात्। अन्यथा पक्षावृत्त्युपाधौ साध्यव्यापकता न निश्चीयेतेति भावः। **बाधे इति।** विप्रकर्षहेतुकतात्त्विकसम्बन्धाभावानुमितेः सामग्र्यामित्यर्थः। **अदृढे इति।** अविप्रकर्षे तात्त्विकसम्बन्धव्यापकतानिश्चायकतर्कानवतारेणासम्पन्नायामित्यर्थः। **अन्यसाम्यात्किमिति।** ज्ञानज्ञेये, तात्त्विसम्बन्धयुक्ते, विशिष्टधीविषयत्वात्, प्रतियोग्यभावादिवदिति, सत्प्रतिपक्षपर्यवसन्नादन्यसाम्यघटितप्रतिप्रयोगात्परेषां किं फलं, न किमपीत्यर्थः। सम्पन्नायां ह्यनुमानसामग्र्यां प्रत्यनुमानसामग्री सत्प्रतिपक्षरूपा सफला। **दृढे**—उक्ततर्कावतारेण तस्यां सम्पन्नायां। **तदपि** साम्यप्रतियोग्यपि। **बाध्यतां**—प्रतियोग्यभावादावपि सत्यसम्बन्धाभावस्तयैव[2] सामग्र्या अनुमीयताम्। तर्कयुक्तायां तस्यां निस्तर्कोक्तसामग्र्या न्यूनबलवत्त्वेन सत्प्रतिपक्षत्वासम्भवादिति भावः। बाधे दृढ-इत्यत्र न्यायेऽदृढ[3] इति पाठकल्पनमहेतुकं,[4] खण्डनग्रन्थे तत्पाठाभावात्।

---

[1] न शक्यत **ग.** [2] तथैव–**क.** [3] न्याये–**दृ. ढ ख. ग.** [4] नं तु हेयं **ग.**

SGDF
Sri Gargeshwari Digital Foundation

जातिवादिसाम्यम्; तेन हि नियमसापेक्षानित्यत्वसाधककृतकत्वादौ नियमानपेक्ष्येण दर्शनमात्रेण रूपवत्त्वादिकमापाद्यते। न त्वस्माभिस्तथानियमनिरपेक्षेण साहचर्यमात्रेण किंचिदापाद्यते। न चैवं—ज्ञानज्ञेययोरपि प्रतियोग्यभावादिसमकक्ष्य एव सम्ब-

---

नियमेति नियमग्राहकतर्केत्यर्थः। **दर्शनेति**। सहचारदर्शनेत्यर्थः। **रूपवत्वादिकं**—रूपादिसाधकत्वम्। **समकक्ष्य इति**। अधिष्ठानारोप्ययोर्यः सम्बन्धस्तदन्य इत्यर्थः। विशेष्यविशेषणजातीययोर्विप्रकर्षाभावो विशिष्टधीप्रमात्वव्यापकः स्वाभावेन तस्यां प्रमात्वाभावं साधयति, स च विनिगमकाभावाद्यद्यपि विशेषणविशेष्यसम्बन्धानां मिथ्यात्वमादाय पर्यवस्यति, तथापि ज्ञानज्ञेययोर्विशिष्टबुद्धौ ज्ञानस्य स्वरूपेणानुवृत्तत्वसत्यत्वादिग्राहकमानवत्वे[1]नाधिष्ठानत्वात्संसृष्टतयैव मिथ्यात्वम्, सन् घटः घटः सन्, ज्ञातो घटः घटस्य ज्ञानम्, घटः स्फुरति घटस्य स्फुरणमिति द्व्याकारानुभवैः परस्परावच्छेदेन ज्ञानज्ञेयविषयीकरणात् परस्परावच्छेदेनाध्यासश्च। घटो नश्यति गोमांश्चैत्र इत्यादौ तूक्तहेत्वभावात् घटतन्नाशाद्योः स्वरूपेणापि मिथ्यात्वम्, परस्परावच्छेदेनाध्यासाभावश्च। न हि घटादिकं नाशाद्यनुवृत्तत्वादिमदित्यत्र मानमस्ति। न वा परस्परावच्छेदेन घटतन्नाशादिकं गोतत्स्वाम्यादिकं वानुभूयते। अपि तु प्रतियोग्युपलक्षिते चैतन्ये नाशादिकम्, गवाद्यवच्छेदेन चैत्रादिस्वत्वम्। अथावच्छेदकीभूतस्य चिच्चैत्यसम्बन्धस्य विशेष्यत्वस्याभावात् कथं घटादेर्विशेष्यत्वेन व्यवहार इति—चेत्, चैतन्यविशेष्यत्वस्य तादृशस्य तत्राभावेऽपि वृत्तिविशेष्यत्वभावात्, उपलक्षणीभूतचिच्चैत्यसम्बन्धस्यापि विशेष्यतारूपत्वाद्वा, घटाद्यवच्छेदेन ध्वंसादेरनध्यासेऽपि प्रतियोगितादिरूपसम्बन्धाध्यासाद्वा। अत एव घटोत्यन्ता-

---

[1] मानबलेना–ग.

SGDF
Sri Gargeshwari Digital Foundation

न्धोऽस्त्विति वाच्यम्; परस्पराध्यासात्मकसम्बन्धासम्भवेनैव सम्बन्धान्तरकल्पनात्, तत्सम्भवे तस्यैव सम्बन्धत्वात्। न चाज्ञानविषयस्य ब्रह्मणो विषयिण्यज्ञानेऽनध्यासेन विषयस्य विषयिण्यध्यासनियमो न सिद्ध इति वाच्यम्; एवं नियमानभ्युपगमात्, किंतु ज्ञानाज्ञानयोरध्यास एव विषयेण सम्बन्धः। स च ज्ञाने ज्ञेयस्य अज्ञेये चाज्ञानस्याध्यासादुपपद्यते। अत एवाध्यासिकसम्बन्धव्यतिरेकप्रदर्शने अज्ञानस्याज्ञेयेनेत्यनुदाहरणम्। ननु श्रवणादीनां चरमसाक्षात्कारान्तानां स्वविषयेण ब्रह्मणा सम्बन्धानुपपत्तिः, न हि श्रवणादौ साक्षात्कारे वा ब्रह्माऽध्यस्तमिति—चेन्न; साक्षात्कारो हि वृत्तिर्वा, तदभिव्यक्तचैतन्यं वा।

भावीयः, चैत्रो गोमान्, इत्यादावपि घटचैत्रादेर्विशेष्यत्वम्, तदवच्छेदेन प्रतियोगितास्वामित्वाद्यध्यासादित्याभिप्रेत्याह—**परस्पराध्यासात्मकेति**। विशेष्यविशेषणयोः परस्परावच्छिन्नमिथ्यातादात्म्यात्मकेत्यर्थः॥

ज्ञानाज्ञानयोरिति। इच्छादेर्विषयेऽध्यासो न सम्बन्ध इति विषये विषयिणोऽध्यासः सम्बन्ध इति नोक्तम्। **अध्यास इति**। अधिष्ठानारोप्यगतः सम्बन्ध इत्यर्थः, स च तादात्म्यं घटो ज्ञातो घटः स्फुरतीत्यादिसामानाधिकरण्यानुभवात् ज्ञानाज्ञानयोर्विषयं प्रत्याधिष्ठानारोप्यान्यतरत्वमिति पर्यवसितार्थः। अज्ञानतद्विषयशुद्धचितोर्न परस्परावच्छेदेनाध्यासोऽननुभवात्। कार्याध्यासस्थल एव तथा स्वीकारात्। अन्यथा अवच्छेदकीभूतचित्सम्बन्धरूपविशेष्यताशालित्वेनाज्ञानाध्यासस्य सविकल्पकतापत्त्या सुषुप्तानुभवत्वहान्यापत्तेः, अतो ज्ञानाज्ञानयोः परस्पराध्यासो[1] नोक्तमिति ध्येयम्। स्वप्रकाशचैतन्ये आवरकाज्ञानस्यानुपपन्नत्वात् ज्ञेयान्तर इवाज्ञानेऽपि दृश्यत्वे तत्रापि दृश्यत्वमित्येवमनवस्था। [2]अतश्चाज्ञाने दृश्यत्वानुपपत्तेरज्ञानचित्सम्बन्धोऽ-

---

[1] विषयेणेति –ग. [2] ततश्चा–ग.

SGDF
Sri Gargeshwari Digital Foundation

आद्ये तस्याः ब्रह्मण्यध्यस्तत्वेनाज्ञानाज्ञेययोरिव सम्बन्धोपपत्तेः। अत एव श्रवणादिनापि मानसक्रियारूपेण न सम्बन्धानुपपत्तिः। द्वितीये तु अभेदेन सम्बन्धानुपयोगात्तत्सम्बन्धानुपपत्तिर्न दोषाय। अत एव—चरमसाक्षात्कारस्य ब्रह्मण्यध्यस्तत्वात् यदि तद्विषयत्वम्, तदा घटसाक्षात्कारस्यापि ब्रह्मण्यध्यस्तत्वात् तद्विषयत्वापत्तिरिति—निरस्तम्; घटसाक्षात्कारस्य घटाभिव्यक्तचैतन्यरूपत्वे ब्रह्मण्यनध्यासात्, वृत्तिरूपत्वे तस्याः ब्रह्मण्यध्यासेऽपि नाधिष्ठानभूतब्रह्मणो विषयत्वम्; ब्रह्मविषयताप्रयोजकस्याध्यासविशेषस्य तत्राभावात्, तस्य च फलबलकल्प्यत्वात्। न हि चरमवृत्तौ ब्रह्माकारतावदत्राऽपि साऽनुभूयते। इच्छेष्यमाणयोस्तु ज्ञानद्वारक एव सम्बन्ध इति न पृथक्सम्ब-

---

प्यध्यास इति भावः। **तस्या इति**। तयोपहितचैतन्यस्यापि शुद्धचित्यध्यस्तत्वाद्ब्रह्म जानामीत्यादिव्यवहार इत्यपि बोध्यम्। अभिव्यक्त्युपलक्षिताखण्डचिता ब्रह्मणोऽत्यन्ताभेदाज्जानामीत्यादिव्यवहाराविषयत्वाच्चासम्बन्धो न दोषायेत्याह—**द्वितीय इति**। **अध्यासविशेषस्य**—अहं ब्रह्मेत्यादिवाक्यघटितशाब्दधीसामग्रीजन्यवृत्तिनिष्ठस्य ब्रह्मतादात्म्यस्य। तथा च तादृशसामग्र्येव शुद्धब्रह्माकारतायां वृत्तिनिष्ठायां नियामिकेति भावः। **फलबलेति**—यादृशसामग्रीजन्यवृत्तेरज्ञाननिवृत्त्यादिफलं दृश्यते तस्या एव तत्वं कल्प्यत इति भावः। अनुभवबलमप्याह—**न हीत्यादि**। ब्रह्म साक्षात्करोमीत्यनुभवो घटादिवृत्तौ नेत्यर्थः। अविप्रकर्षस्य सम्बन्धव्यापकत्वे इच्छायाः स्वविषयेण सम्बन्धो न स्यात्ततो विप्रकृष्टेऽपि विषये इच्छाया इव ज्ञानस्यापि सम्बन्ध इति परस्परपूर्वमाशङ्कितं प्रतियोगिध्वंसादिन्यायेन परिहृतमपि प्रकारान्तरेण परिहरति—**इच्छेष्यमाणयोरिति**। **ज्ञानद्वारक इति**। स्वोपधायकज्ञान-

SGDF
Sri Gargeshwari Digital Foundation

न्धापेक्षा । न च—ज्ञाने सन्निकर्षाधीनस्येव स्मृतावनुभवाधीनस्येवेच्छायां ज्ञानाधीनस्य विषयसम्बन्धस्यानुभवात् सन्निकर्षादिभ्यो भिन्न इव ज्ञानाद्भिन्न एव सम्बन्धो वक्तव्य इति—वाच्यम्; सम्बन्धानुभवस्य ज्ञानद्वारकसम्बन्धेनाप्युपपत्तेरतिरिक्तसम्बन्धकल्पने मानाभावात्, ज्ञानाधीनसम्बन्धान्तरस्याननुभवात् । ज्ञाने त्विन्द्रियसन्निकर्षादिना न सम्बन्धानुभवोपपत्तिः; इन्द्रियसन्निकर्षादीनामतीन्द्रियत्वेन तेषामनुमित्यादिना उपस्थितिं विनैव घटज्ञानमित्यादिसम्बन्धानुभवात् । स्मृतौ तु अनुभवाधीनसम्बन्धस्य शङ्कैव नास्ति; अनुभवस्य तदानीम-

---

विषयत्वरूप इत्यर्थः । तथा च नेच्छासम्बन्धो दृष्टान्तो ज्ञानसम्बन्धस्यैव तत्वादिति भावः । **ज्ञानाद्भिन्नो** ज्ञानाघटित । नन्वेवं—ज्ञानस्याप्युपधायकसन्निकर्षादिद्वारकः सम्बन्धोऽस्तु, नाध्यासिकतादात्म्यं तत्राह—**ज्ञाने त्वित्यादि ।** ज्ञानेन्द्रिय[1]सन्निकर्षादिघटितस्य विषयसम्बन्धस्यानुभवो न सम्भवतीत्यर्थः । इन्द्रियसन्निकर्षादिघटितस्य सम्बन्धस्य केवलस्य[2] साक्षियोग्यत्वात् ज्ञातत्वाज्ञातत्वाभ्यां[3] साक्षिभास्यता सम्भवति, न तु घटसम्बन्धिज्ञानवानहमित्येवं रूपेण ताभ्यां विनेत्याशयेनाह—**इन्द्रियसन्निकर्षादीनामिति । अनुमित्यादिनेति ।** आदिना प्रत्यक्षादिसङ्ग्रहः । प्रत्यक्षेणोपस्थित्यभावे हेतुः[4] **अतीन्द्रियत्वेनेति ।** व्याप्तिज्ञानाद्यभावस्याप्युपलक्षणम् । **उपस्थितिमिति ।** ज्ञाततामित्यर्थः । अज्ञाततां विनेत्युपलक्ष्यते । **सम्बन्धेति ।** घटादिसम्बन्धिज्ञानेत्यर्थः । **अनुभवाधीनसम्बन्धस्य** अनुभवद्वारकसम्बन्धस्य स्वोपधायकानुभवविषयत्वस्येति यावत् । **असत्वादिति ।**

---

[1] ज्ञाने इन्द्रिय-**ग.** [2] केवलसाक्षि-**ग.** [3] त्वाज्ञातत्वाभ्यां-**ग.** [4] भावो हेतुः-**क. ख.**

SGDF
Sri Gargeshwari Digital Foundation

सत्त्वात्; उभयोरपि ज्ञानत्वेन तुल्यवदेव सम्बन्धसंभवाच्च। न च—समूहालम्बनजन्यैकविषयेच्छायामुभयविषयत्वापत्तिः; जनकज्ञानस्योभयविषयत्वादिति— वाच्यम्; अतिरिक्तसम्बन्धपक्षेऽपि तुल्यत्वात्। अथैकविषयावच्छेदेनैव ज्ञानस्य जनकत्वात् नोभयविषयत्वं, समं ममाऽपि; जनकज्ञाने जनकतावच्छेदकविषयत्व-

---

तथा चानुभवस्य स्वोपधायकत्वमेव नास्तीत्यर्थः। स्वोपधायकसंस्कारोपधायकानुभवविषयं तु सन्निकर्षघटितसम्बन्धन्यायेन दुष्टमिति भावः। ननु स्वोपधायकज्ञानघटितरूपेण न सम्बन्धता; उपधायकत्वस्य तत्तद्व्यक्तिविश्रान्तत्वेनाननुगतत्वात्, किं तु स्वसमानाधिकरणीयं यद्घटत्वाद्यवच्छिन्नविषयत्वं तत्वेन; तथा चोपधायकतावच्छेदकस्य तत्तदाकारज्ञानरूपवृत्त्यवच्छिन्नत्वादेरभावेऽपि इच्छोत्पत्त्यादिक्षणे समानाधिकरणं साक्षिचैतन्यं यथेच्छायाः सम्बन्धघटकं तथा स्मृतेरप्यस्तु तत्राह—**उभयोरिति**। **समूहालम्बनेति**। घट इष्टसाधनं पटः प्रमेय इत्यादिज्ञानेत्यर्थः। **एकविषयकेति**। घटादिविषयकेत्यर्थः। **उभयेति**। घटपटाद्युभयेत्यर्थः। **तुल्यत्वादिति**। ज्ञानविषयतामात्रस्येच्छाविषयताप्रयोजकत्वाङ्गीकारे तवापि तुल्यत्वादित्यर्थः। इष्टसाधनत्वप्रकारतानिरूपितविशेष्यतया तज्ज्ञानमिच्छाविषयत्वे मम प्रयोजकमतो न दोष इति शङ्कते—**अथेति**। **जनकतावच्छेदकेति**। इष्टसाधनत्वप्रकारतानिरूपिता तज्ज्ञानविशेष्यतयैव[1] तदिच्छाया जनकतावच्छेदक[2]सम्बन्ध इति तदाश्रयमादायैव तस्यां सविषयकत्वव्यवहारः, इच्छान्तरेऽप्यवच्छिन्नमनोऽवच्छिन्नं[3] वा यादृशं विषयत्वं जनकतावच्छेदकं तादृशमेव

---

[1] ष्यतैव. [2] दिका—क. ख. ग. [3] प्यबच्छिन्नं वा यादृशं--क. प्यवच्छिन्नमनवाच्छिन्नं वा यादृशं—ग.

SGDF
Sri Gurgeshwari Digital Foundation

तस्य सम्बन्ध इति, स्वप्रयोजकविषयतात्वेन सर्वस्या इच्छायाः ज्ञानीयं विषयत्वं स्वविषयत्व[1]व्यवहारनियामकम् ॥

न च तत्सम्बन्धेनेच्छां प्रति ज्ञानकारणता न सम्भवति[2], आत्माश्रयादिति वाच्यम्; प्रयोजकतायाः कारणतावच्छेदकसाधारण्येन कारणतान्यत्वात्, तद्विषयकज्ञानस्य स्वसामानाधिकरण्यादिविशिष्टेच्छां प्रति समवायेन कारणत्वे दोषाभावाच्च । सर्वविषयेष्विच्छाविरहेण विषयान्तर्भावापेक्षया पुरुषनिवेशे लाघवाभावात् । न चोक्तरूपेणेच्छायाः कार्यत्वे स्वप्रयोजकविषयतात्वेनेच्छायां सविषयकत्वव्यवहारनियामकत्वे च गौरवमिति—वाच्यम्; तदपेक्षयापि तव तत्तद्विषयकत्वादिविशिष्टज्ञानत्वेन ज्ञानस्य स्वकार्यानुमितीच्छादिहेतुतायां महागौरवात्, कारणतावच्छेदके ज्ञानत्वसमानाधिकरणं यावन्निविष्टं तावद्भिर्ज्ञानत्वस्य विशेष्यविशेषणभावे विनिगमकाभावात् । मम तु सविषयकत्वादिकमेव ज्ञानत्वाविशेषितं तत्र हेतुतावच्छेदकमिति तद्भावात्[3] । न च—तवापि विशेषणतावच्छेदकप्रकारकत्वेनेच्छादीनां हेतुत्वासम्भवाद्विषयोपहितेच्छादिप्रत्यक्षे पृथक् हेतुत्वे गौरवमिति—वाच्यम्; विशिष्टवैशिष्ट्यप्रत्यक्षे सन्निकर्षादीनामेव हेतुत्वेनोक्तरूपेण हेतुत्वस्यैवानङ्गीकारात्, विशेषणतावच्छेदकप्रकारताप्रयोज्यत्वेनेच्छादिसाधारण्येन मम हेतुत्वान्तरकल्पनेऽपि तदपेक्षया तवोक्तगौरवस्याधिकत्वात् । एवं ज्ञानत्वजातौ[4] सविषयकत्वमात्रस्य व्यञ्जकत्वादिसम्भवादपि मे लाघवात् । न चेष्टसाधनत्वेऽपि स्वप्रयोजकविषयतासत्वादिच्छाविषयतापत्तिः, इष्टसाधनताव्यावृत्तविषयतानिवेशे यत्रेष्टसाधनत्वविशेषितघटादाविष्टसाधनत्वज्ञानादिच्छा तत्रेष्टसाधनत्वे तद्विषयता न स्यादिति—वाच्यम्; यादृशविषयत्वस्याश्रये

---

[1] स्वविषयकत्व—ग. [2] कारणता सम्भति—ग. [3] तदभावात्—क. ग.
[4] ज्ञानजातौ—क. ख.

SGDF
Sri Gargeshwari Digital Foundation

स्यैव सम्बन्धत्वात् । न च—नित्येश्वरेच्छाया विषयत्वसम्बन्धा-

यदिच्छाविषयत्वव्यवहारः स्वप्रयोजकतादृशविषयत्वस्येच्छासम्बन्धत्वात् । एवं च जनकज्ञानं तद्विषयत्वं वा नेच्छाया विषयत्वम् ; समूहालम्बनादिनातिप्रसङ्गात् ॥

अथ यद्विषयकत्वेन ज्ञानस्येच्छोत्पादकत्वं तद्विषयकज्ञानं तद्विषयत्वम् ; तर्हीच्छायाः सर्वविषयकत्वं न स्यात् , सर्वविषयकत्वेनेच्छानुत्पादकत्वात्स्याच्च सुखादीच्छाया अपि दुःखाभावादिविषयकत्वम् । अथ—यद्विषयकज्ञानस्य स्वसमानाधिकरणयद्विषयकत्वव्यवहारविषयेच्छासमयाव्यवहितपूर्वसमये तादृशेच्छासमये वा नियमतः सत्वं तद्विषयकं ज्ञानमेव[1] तादृशेच्छाविषयत्वम् , सुवचश्च महाप्रलयाव्यवहितपूर्वक्षण एवेश्वरेच्छाधिकरणसमयाव्यवहितः पूर्वः समय इति चेत् , तर्हि पाकादीच्छाया इष्टसाधनत्वविषयत्वं[2] स्यात् , न स्याच्च कृतेः पाकादिविषयकत्वम् , तदव्यवहितपूर्वक्षणे पाकादिज्ञानान्तरे मानाभावात् , कृत्यादिविषयत्वस्य तथैव निर्वाच्यत्वात् ; स्याच्चेच्छायाः कृत्युत्पादसमये निर्विषयत्वम् । अथ—इच्छानन्तरं तादृशं ज्ञानं[3] कृतिस्तदनन्तरं तादृशं ज्ञानान्तरम् । अथवा युगपदात्मगुणद्वयमुत्पाद्यत इत्युपेत्य कृत्युत्पत्तिसमये नियमतस्तादृशं ज्ञानान्तरं कल्प्यमिति—चेत् ; तर्हि स्वतः सविषयकत्वमेवेच्छादावुचितम् , लाघवात् , बाधकाभावात् , संस्कारे गत्यन्तराभावाच्चेति, बौद्धाधिकारशिरोमण्युक्तम् , तन्मूलकमन्य[4]प्रलपितं चानवकाशम् । मन्मते हि वृत्त्यनवच्छिन्नादि[5]-चिद्रूपं यज्ज्ञानं तदीयतादात्म्यरूपस्य विषयत्वस्य वृत्त्युपरमेऽपि सत्त्वेन यद्विषयकज्ञानस्येत्यादिरीत्याऽपीच्छासंस्कारादिविषयतारूपत्वं सम्भवत्येव।

[1] तादृशेत्यादिज्ञानमेवेत्यन्तः पाठः क पुस्तके नास्ति. [2] विषयकत्वं–ग.
[3] तादृशज्ञानं–ग. [4] मन्यत्र–ग. [5] वृत्त्यवच्छिन्न–ग.

SGDF
Sri Gargeshwari Digital Foundation

नुपपत्तिः ; तस्या अस्माभिरनङ्गीकारात् । तार्किकाणामपि तत्साधकमानबलेन विलक्षणसम्बन्धकल्पनेऽपि जन्यज्ञानजन्येच्छयोरुक्तप्रकारेणैव विषयताभ्युपगमात् । न च—पुत्रादिधीजन्यसुखादेः पुत्रादिविषयत्वापत्तिः, इच्छान्यायादिति—वाच्यम् ;

लाघवबाधकाभावौ चोक्तगौरवेण परिहृतावेव । **अनङ्गीकारादिति** । 'सोऽकामयत' इत्यादिश्रुतेच्छाङ्गीकारेऽपि वीक्षणवत्तस्या मायापरिणामत्वादिति शेषः । **विलक्षणेति** । जन्येच्छाविषयतातो विलक्षणेत्यर्थः । तस्या इत्यनुषज्यते । **सम्बन्धेति** । विषयसम्बन्धेत्यर्थः । अन्यमात्रे[1] ज्ञानेच्छाकृतिमत्त्वरूपकर्तृताया अनुमानादिबलेन सिद्धौ लाघवाज्ज्ञानादीनां नित्यत्वस्यापि सिद्धिस्वीकारात् । ज्ञानीयविषयत्वस्येच्छादिप्रयोजकत्वासम्भवात्, स्वसमानाधिकरणज्ञानीयं घटत्वावच्छिन्नत्वादिविषयत्वमिच्छाया विषयसम्बन्धोऽङ्गीक्रियते । अत एव क्षितिः, सकर्तृका, कार्यत्वात्, घटवत्, इत्यनुमाने स्वविषयकज्ञानं तत्सामानाधिकरण्यसम्बन्धेन स्वविशिष्टेच्छाकृतिमत्त्वं चेति त्रयविशिष्टजन्यत्वमेव साध्यम् । न च—घटज्ञानघटेच्छादिमत्यप्युक्तविषयत्वसत्वा[2]त्तादृशस्यापि कुलालादेर्घटादिहेतुत्वापत्तिरिति—वाच्यम् ; जन्यजनकभावापन्नज्ञानादिमत्त्वेन हेतुत्वेऽपि साध्ये तद्रूपेणाविनिवेशेऽपि क्षत्यभावात्, जन्यजनकभावापन्नं यज्जन्यं तदन्यज्ञानादेः साध्ये[3] निवेशादीश्वरसाधारण्याय तद्वत्त्वेनैव हेतुत्वाद्वा । **उक्तप्रकारेणैवेति** । प्रकाशस्य सतस्तदीयतामात्रनिबन्धनः स्वभावविशेषो विषयतेति विषयतालक्षणे बौद्धाधिकारीये हि स्वत इच्छादीनां विषयतानिरासाय प्रकाशस्येत्युक्तमिति वर्धमानादयः । उक्तं चान्यत्रापि तार्किकैः 'याचितमण्डनन्यायेन विषयत्वमिच्छादे' रिति ॥

---

[1] जन्यमात्रे—ग. [2] प्युक्तसत्वा—क.ख. [3] साध्यनिवेशात्—ग.

SGDF
Sri Gargeshwari Digital Foundation

वैषम्यात् । ज्ञानस्य समानत्वेऽपि इच्छादावेव सविषयत्वप्रतीति-र्न तु सुखादौ वस्तुस्वाभाव्यात्, त्वयाप्यस्यैवार्थस्य वक्तव्य-त्वात् । अन्यथा स्फटिके जपाकुसुमसन्निधानाल्लौहित्यवल्लोष्टेऽ-प्यापद्येत । अथ धर्मे तात्पर्यस्यानध्यासात्तात्पर्यसम्बन्धो न स्यात्, न; तात्पर्यं हि तत्प्रतीत्युद्देश्यकत्वम्, प्रतीतेश्च ज्ञेया-न्तरेणेव धर्मेणापि सम्बन्धोऽध्यास एव, प्रतीतिद्वारा च धर्म-तात्पर्ययोः सम्बन्ध इत्यनुपपत्त्यभावात् । न च—ज्ञानस्य

वस्तुतस्तु प्रयोजकत्वमनिवेश्य स्वसम्बन्धिघटत्वावच्छिन्नादि-विषयत्वं नित्येच्छादिसाधारणं सम्भवतीच्छादेर्विषयेण सम्बन्धः । यथा हि संयोगत्वादिना रूपेण संयोगादिः स्वसमवेत एव द्रव्यादेः सम्बन्धो न तु कालिकादिना स्वप्रत्यासन्नोऽपि स्वासमवेतः[1], न वा समवायेन प्रत्यासन्नोऽपि विभागादिः, तथा स्वसंम्बन्धिघटा[2]द्यवच्छि-न्नादिविषयत्वं तच्छालिज्ञानजन्येच्छादेरेव सम्बन्ध इति नातिप्रसङ्गः, न वा प्रयोजकत्वादिनिवेशप्रयुक्तोक्तदोषः । स्वसम्बन्धित्वं च स्वसमान-कालीनत्वं विषयत्वे स्वप्रत्यासन्नतालाभाय वाच्यमेव । अतएव ‘किञ्चि-देव विषयत्वं कस्यचिदिच्छादेः सम्बन्धः किं सर्वेच्छादिसाधारणानु-गतसम्बन्धतावच्छेदकानिरूपणेने’त्युक्तशिरोमणिवाक्योत्तरमाशङ्कितमिति ध्येयम् ॥

आपद्येतेति । अनुभूयेतेत्यर्थः । लौहित्यमित्यादिः । लोष्टे लौहित्याननुभवात्तन्निष्ठः स्वाश्रयसंयोगो न लौहित्यस्य सम्बन्ध इति त्वया वाच्यं चेत्, तर्हि मन्मतेऽपीच्छादेरेवोक्तः सम्बन्धो न सुखादे-रननुभवात् । यन्मते स्फटिके लौहित्यभ्रमस्तन्मतेऽपि लोष्टे तदननु-भवाद्यथा न तत्सामग्री कल्प्यते तथा सुखादौ सविषयकत्वव्यवहारा-

---

[1] समवेतः—ग.　　[2] घटत्वा.

SGDF
Sri Gangeshwari Digital Foundation

प्रकाशत्वेन प्रदीपसाम्येऽप्यान्तरत्वेन तद्वैलक्षण्यमङ्गीकर्तव्यम्, अत इच्छादिवद्विप्रकृष्टेनापि सम्बन्धः स्यात्, अन्यथा प्रदीपवदेवाध्यासिकसम्बन्धोऽपि न स्यात्, परोक्षवृत्तौ विप्रकृष्टसम्बन्धदर्शनाच्चेति—वाच्यम्; देशकालविप्रकर्षाभावस्य सम्बन्धसामान्यप्रयोजकत्वे सम्भवत्यान्तरप्रतियोगिकसम्बन्धभिन्नसम्बन्ध एवास्य प्रयोजकत्वमिति कल्पनाबीजाभावात्। इच्छायास्तु नेष्यमाणेन साक्षात्सम्बन्धः, किंतु ज्ञानद्वारकः परम्परासम्बन्ध एवेत्युक्तम्। परोक्षस्थले तु यद्यप्यधिष्ठानचैतन्येन साक्षादेव सम्बन्धः; तथापि विषयाकारवृत्त्या साक्षात्सम्बन्धाभावात् वृत्त्यवच्छिन्नचैतन्येन विषयस्य परम्परासम्बन्ध एव। ननु—

भावात्तादृशव्यवहारसामग्री न कल्प्यते। तथाच सुखादौ तादृशज्ञानजन्यतासत्त्वेऽपि न तस्याः सविषयकत्वपदार्थता कल्प्यते। तादृशजन्यताश्रयः सुखमिति व्यवहारस्त्विष्ट इति भावः। यदि च ज्ञानस्येवेच्छादेरपि स्वत एव विषयत्वमिति परस्याग्रहः, तथापि न नः क्षतिः; ध्वंसादेरिव तस्यापि तादृशसम्बन्धस्य सत्यत्वाभावात्तद्दृष्टान्तेन ज्ञानसम्बन्धसत्यत्वस्य वक्तुमशक्यत्वादिति ध्येयम्। **साक्षादेवेति**। एतेन—यत्र चैतन्ये विषयोऽध्यस्तस्तदेव वृत्त्यवच्छिन्नं सत् ज्ञानमिति ज्ञानस्य विषयेऽध्यास एव सम्बन्ध इति नियमो न व्याहत इति वक्ष्यमाणं सूचितम्। **वृत्त्या साक्षादित्यादि**। प्रत्यक्षवृत्त्या विषयस्यावच्छेदकतारूपसाक्षात्सम्बन्धात् तदवच्छिन्नचैतन्यस्यापि साक्षात्सम्बन्धः। परोक्षवृत्त्या तदभावात्तदवच्छिन्नचैतन्यस्यापि न स इति स्वावच्छेदकवृत्त्याकाररूपपरम्परासम्बन्ध एव वाच्य इति भावः॥

न च वृत्तिविषयतादात्म्यापन्नचैतन्यमेव ज्ञानमस्तु, तथा च तस्याधिष्ठानत्वाद्विषये साक्षात्सम्बन्ध एव लभ्यत इति—वाच्यम्;

SGDF
Sri Gargeshwari Digital Foundation

तवापि मते ज्ञेयस्य न स्वज्ञानेऽध्यस्तत्वनियमः; अनध्यस्तस्य तुच्छस्य पञ्चमप्रकारत्वपक्षे अविद्यानिवृत्तेः भावाद्वैतपक्षे अभावस्य दृग्रूपत्वेऽपि स्वज्ञानेऽनध्यासात्, अपरोक्षैकरसे ब्रह्मण्यध्यस्तस्य व्यावहारिकस्यातीतादेर्नित्यातीन्द्रियस्य च परोक्षानुभवरूपे स्वज्ञानेऽनध्यासात्, स्मर्यमाणस्य च स्मृतिरूपे स्वज्ञानेऽनध्यासात्, प्रातिभासिकस्य च प्रातिभासिके स्वज्ञानेऽनध्यासात्, त्वन्मते भ्रमरूपज्ञानस्यापि कल्पितत्वादिति—चेत्, मैवम्; तुच्छस्याज्ञेयत्वेन ज्ञाने अध्यासाभावात्, ज्ञेयस्य हि

तथा सति पुरुषान्तरीयवृत्तिमादायापि घटे निर्वृत्तिकपुरुषस्य अहं घटं जानामीति व्यवहारापत्तेः । स्वतादात्म्याश्रयविषयकवृत्तिसम्बन्धेन ज्ञानस्योक्तव्यवहारविषयत्वे परम्परासम्बन्धद्वयनिवेशे गौरवात् । चैतन्येनाविशेषिता विशेषिता वा[1] वृत्तिस्तु न ज्ञानमननुगतत्वादित्युक्तम् । ज्ञानविषययोरध्याससम्बन्धानुरोधादुक्तव्यवहारे परम्परासम्बन्धद्वयभानमपि युक्तम् । इच्छादिकारणतादिकं तु घटाद्याकारवृत्तेर्घटाद्यवच्छिन्नस्याज्ञानाभावस्य वेति नोक्तसम्बन्धद्वयप्रवेशे गौरवमिति तु विभावनीयम् । न चैवम्—कालिकसम्बन्धेन वृत्तिनिष्ठचैतन्यमेव ज्ञाधातुवाच्यमस्तु लाघवादिति वाच्यम्, येन हि घटाद्याकारवृत्तिर्न ज्ञायते तेन घटो ज्ञात इति पुरुषानन्तर्भावेनापि न व्यवह्रियते । यदि त्वसत्त्वापादकाज्ञानविषयतानवच्छेदकतादात्म्यापन्नं चैतन्यं ज्ञानं, यस्य प्रमातुर्घटादिवृत्तिर्न जाता तत्प्रमातरि[2] तादृशविशिष्टचैतन्यं नास्ति, उक्तानवच्छेदकत्वरूपविशेषणाभावादित्युच्यते; तदा प्रत्यक्षस्येव परोक्षस्याध्यासरूपः साक्षादेव ज्ञानस्य सम्बन्ध इति ध्येयम् ॥

ज्ञेयस्य हीति । ज्ञेयत्वं चैतन्यरूपज्ञानतादात्म्ययोग्यत्वं सद-

---

[1] चैतन्येनाविशेषिता वा.—क. ग. [2] प्रमातुरेतादृश—ग.

SGDF Sri Gurgeshwari Digital Foundation

ज्ञानेऽध्यासः, तुच्छस्य तु न ज्ञेयतेत्यग्रे वक्ष्यते। पञ्चमप्रकाराविद्यानिवृत्तेरपि प्रतियोग्यधिकरणे ध्वंसस्यापि[1] तत्र वृत्तेरवश्यम्भावादध्यास एव सम्बन्धः। वस्तुतस्तु अविद्यानिवृत्तेः पञ्चमप्रकारत्वं च भावाद्वैतं चानभ्युपगमपराहतम्। यथा चाविद्यानिवृत्तेर्ब्रह्मरूपत्वं सर्वाद्वैतं च तथोपरिष्टाद्वक्ष्यते। अपरोक्षैकरसे ब्रह्मण्यध्यस्तस्यातीतादेरनुमित्यादिरूपज्ञाने अनध्यासेऽपि यस्मिंश्चैतन्ये तदध्यस्तं तदेव चैतन्यमनुमित्यादिरूपवृत्त्यवच्छिन्नमिति

सद्विलक्षणत्वम्। **प्रतियोग्यधिकरण इति**। सतीति शेषः। तत्र—प्रतियोग्यधिकरणे। कपालनाशजन्यघटादिनाशे व्यभिचारात्सत्यन्तम्। **अध्यास एवेति**। न च विशेषणताख्यसम्बन्धेन ध्वंसश्चैतन्ये वर्तते न तादात्म्येनेति—वाच्यम्; भट्टमते ह्यभावस्य तादात्म्यमेवाधिकरणे सम्बन्ध इति कुसुमाञ्जलिवाक्ये ज्ञापितं मिथ्यात्वानुमान इत्यस्मन्मतेऽपि तथा स्वीकारात्, दृक्तादात्म्यं विना स्फुरत्यविद्यावृत्तिरिति[2] व्यवहारासम्भवाच्च। अविद्याध्वंसस्य तादात्म्यरूपाध्यास एव चैतन्ये सम्बन्ध इति भावः। वस्तुतस्तु अविद्याध्वंसः स्वरूपेण पञ्चमप्रकारोऽनध्यस्तोऽपि ज्ञानाविषयत्वान्न ज्ञेयः, तथा भावाद्वैतमते प्रपञ्चाभावोऽपि स्वरूपेण चैतन्येऽनध्यस्तोऽपि न ज्ञेयः, कार्यत्वाद्देशसम्बन्धाच्च तुच्छविलक्षणः। अविद्यानिवृत्तित्वप्रपञ्चाभावात्वादिमिथ्याघटितरूपेण त्वविद्यादशायामविद्याध्वंसादयो ज्ञेया अध्यस्ताश्च। अथ स्वरूपेण ज्ञेयत्वं विना व्यवहार्यं न स्यादिति—चेन्न; चैतन्यसम्बन्धरूपज्ञेयत्वं विनापि तदाकारवृत्तिमात्रेण तुच्छवद्व्यवहारोपपत्तेः॥

तदेवेति। ब्रह्मणि घटादिविषयाणां वृत्तेश्चाध्यासाद्घटाद्यधिष्ठानस्य वृत्त्यवच्छिन्नत्वं, जीवचैतन्यस्य जगदुपादानत्वपक्षेऽप्येवम्।

---

[1] ध्वंसस्येव. [2] निवृत्तिरिति—क. ख. ग.

SGDF Sri Gargeshwari Digital Foundation

नाध्यासानुपपत्तिः । अतिप्रसङ्गपरिहारार्थं चैतन्यस्य विषयसम्बन्धे वृत्त्युपरागापेक्षायामपि नाधिष्ठानत्वेन तदपेक्षा । एवमेव नित्यपरोक्षस्थले स्मृतिस्थलेऽपि प्रातिभासिकस्य प्रातिभासिक्यां वृत्तावनध्यासेऽप्यधिष्ठानविषयकवृत्त्यभिव्यक्तचैतन्य एवाध्यास इति न काप्यनुपपत्तिः । न च-रूप्यादिकमिदमंशावच्छिन्नचैतन्येऽध्यस्तम्, भास्यते च अविद्यावृत्तिप्रतिबिम्बितचैतन्येनेति विषयिणि ज्ञाने विषयस्याध्यासः कथमिति-वाच्यम्; एकात्र-

---

तथाच यत्र विषयोऽध्यस्तस्तस्य ज्ञानत्वनियमो न तु ज्ञानत्वोपहितस्य विषयाधिष्ठानत्वनियमः; प्रत्यक्षस्थले(ऽपि) तदभावात् । यद्यपि जीवस्यैवान्तःकरणतद्धर्मोपादानत्वं ब्रह्मणस्तु घटाद्युपादानत्वमिति पक्षे बह्मणो ([1]वृत्तितादात्म्यरूपावच्छिन्नत्वाभावात् । परोक्षभ्रमविषयीभूतरजताद्युपादानशुक्त्याद्यवच्छिन्नचैतन्ये तादृशरजतादिविषयकाविद्या)वृत्तितादात्म्यरूपावच्छिन्नत्वस्याभावात् । तद्भावे साक्षिसम्बन्धेन तादृशरजतादेरपरोक्षत्वापातान्नोक्तोऽपि नियमः, तथापि यत्र विषयोऽध्यस्तस्तस्य वृत्त्यवच्छिन्नचैतन्याभेदानियमो न व्याहतः, ब्रह्मणो वृत्तितादात्म्यवज्जीवाभिन्नत्वात् । ([2]शुक्त्यवच्छिन्नादिरूपचैतन्यस्याप्यविद्यापरिणामवृत्तितादात्म्यवज्जीवाभिन्नत्वात्) । वृत्तिविषयतादात्म्यवच्चैतन्यस्यासत्वापादकाज्ञानानवच्छेदकविषयतादात्म्यवच्चैतन्यस्य वा ज्ञानरूपत्वे त्वधिष्ठानस्य ज्ञानत्वनियमे नानुपपत्तिः । प्रमातरि तत्सम्बन्धस्तु यथासम्भवं वाच्य इति दिक् ॥

अतिप्रसङ्गेति । वृत्त्यभावकालेऽपि घटं जानामीति व्यवहाराद्यापत्तीत्यर्थः । **चैतन्यस्य** वृत्तीत्यत्र सम्बन्धः । **विषयसम्बन्ध**

---

[1] [2]अयं कुण्डलितः पाठः ख पुस्तके न दृश्यते.

SGDF
Sri Gargeshwari Digital Foundation

च्छिन्न एवापरावच्छेदेन निरपेक्षोपाधेरिवात्र भेदकत्वाभावात्। अतएवाभियुक्तैः फलैक्यादैक्यं ज्ञानस्योच्यते। नच—रूप्यादेः स्वज्ञानेऽध्यस्तत्वे रूप्यज्ञानस्याज्ञाने भ्रमोत्पत्तिः तज्ज्ञानेन तन्निवृत्तिरिति च स्यात्, अधिष्ठानाज्ञानज्ञानाभ्यामध्यासस्य जन्मनिवृत्त्योर्नियतत्वात्, ज्ञानं रजतमिति प्रतीतिप्रसङ्गाच्चेति—

इति। ज्ञानविषयसम्बन्धव्यवहारादावित्यर्थः। **निरपेक्षोपाधेरिवेति**। तावेवोपाधी स्वोपहितभिन्नौ यावन्योन्यनैरपेक्ष्येण स्वोपहितमुपधत्त इति वृद्धोक्तेर्मिलितोपाध्योर्नात्यन्तभेदकत्वम्, मठावच्छिन्नं नभस्तद्वृत्तिघटाद्यवच्छिन्नमित्यभेदस्यापि प्रतीतेः। न चैवमत्यन्ताभेदः स्यादिति—वाच्यम्; औपाधिकभेदस्य दुर्वारत्वात्। अतएव—

अविरुद्धविशेषणद्वयप्रभवत्वेऽपि विशिष्टरूपयोः।
घटते न यदैकता तदा सुतरां तद्विपरीतरूपयोः॥

इति संक्षेपशारीरकम्। किंच मिळितयो[1]र्घटावच्छिन्नं नभः पटावच्छिन्नमित्यभेदाप्रतीतेः। तथा चाधिष्ठानस्य ज्ञानात्यन्तभेदाभावनियमो न व्याहत इति भावः। **अभियुक्तैः**—पञ्चपादीविवरणकारादिभिः। **फलैक्यादिति**। अभियुक्तरू[2]पफलत्वाश्रयस्य चैतन्यस्यैकत्वादेकतापन्नाभ्यां शुक्त्यादिरजतादिभ्यामवच्छिन्नत्वादित्यर्थः। **ज्ञानस्येति**। शुक्तीदमंशरजताद्याकारवृत्त्यवच्छिन्नचैतन्ययोरित्यर्थः। **उच्यत इति**। उपचर्यत इत्यर्थः। तथाच विषययोरेकचैतन्यावच्छेदकत्वरूपान्मिलना[3]त्प्रत्यक्षतज्ज्ञानयोरपि मिळितं[4] वृत्त्युपाधिकत्वेनात्यन्तभेदाभावादैक्यमत्यन्ताभिन्नत्वमुपचर्यत इति भावः। उक्तं हि पञ्चपाद्यां "एकमेव[5] ज्ञानमेकमेव फल[6]मि" ति तद्व्याख्यातं च विवरणे "विषयावच्छिन्नं फलं

---

[1] किंत्वमिलितयोः—**क.ख.ग.** [2] अभिव्यक्तत्व—**क.ग.** अभिव्यक्त—**ख.**
[3] मेलनात्—**ग.** [4] मिलित—**ग.** [5] एकवेदज्ञान—**ग.** [6] एकफल—**क.ग.**

SGDF Sri Gargeshwari Digital Foundation

वाच्यम्; रजताकारवृत्त्यवच्छिन्नचैतन्यस्य रजतभ्रमाधिष्ठानत्वानभ्युपगमात्, इदमंशावच्छिन्नचैतन्यमेव तु रजतभ्रमाधिष्ठानम्, तच्च दैवाद्रजताकारवृत्त्यवच्छिन्नचैतन्यमपि, नैतावता भ्रमाधिष्ठानत्वे तदपेक्षा। तस्य च भ्रमविरोधिशुक्तित्वाद्याकारेणाज्ञानं भ्रमकारणम्। तेनाकारेण ज्ञानं भ्रमनिवर्तकम्। अतएव न ज्ञानं रजतमिति भ्रमाकारापत्तिः; वृत्त्यवच्छिन्नस्यैव ज्ञानत्वात्तस्य चाधिष्ठानत्वाभावात्। अधिष्ठानतादात्म्येन चारोप्यप्रतीतिरितीदं रजतमित्येव भ्रमाकारः। ननु—घटादेः स्वसन्निकृष्टेन्द्रियजन्यस्वज्ञानात्पूर्वं सत्वेन तत्राध्यासो न युक्तः। न च—या घटेन्द्रियसन्निकर्षजा वृत्तिस्तया घटो न प्रकाश्यः। येन च प्रकाश्यो घटाधिष्ठानचैतन्येन न तत्सन्निकर्षजमिति—वाच्यम्; वृत्त्यतिरिक्तज्ञाने मानाभावात्। अज्ञाननिवृत्तेरपि तत एव भावादिति—चेन्न; वृत्त्युदयात्प्रागज्ञातार्थसिद्ध्यर्थं वृत्त्यतिरिक्तज्ञानस्यावश्यमभ्युपेयत्वात्। अन्यथा तस्य साधकाभावेन शशशृङ्गतुल्यतया सन्निकर्षतज्जन्यज्ञानहेतुत्वेन प्राक् सत्त्वकल्पना

विषयश्च सत्यमिथ्यावस्तुनोरन्योन्यात्मकतयैकतामापन्नः, तेनैकविषयावच्छिन्नफलैकत्वोपाधौ सत्यमिथ्याज्ञानद्वयमप्येकमित्युपचर्यते इति। तथाच सापेक्षोपाध्योरत्यन्तभेदकत्वे नेदं युज्यत इति भावः। **इदमंशेति**। इदमंशो विशेषः शुक्तित्वादीत्यर्थः। **अधिष्ठानतादात्म्येनेति**। आधारतादात्म्येनेत्यर्थः। भ्रमे[1] भासमानोऽधिष्ठानस्य सामान्यांश आधारो विशेषांशोऽधिष्ठानमिति स्थितेर्वक्ष्यमाणत्वात्। **कारणाप्रवृत्तेरिति**। अज्ञातो घट इत्याकारा न प्रमाणवृत्तिः सम्भवति, प्रमाणवृत्तेरज्ञानविरोधित्वात्तद्ग्रहणासम्भवात्। स्वभिन्नकालीनाज्ञाततया घटादिविषयिण्या

---

[1] भासमानमधि–क. ग.

SGDF
Sri Gargeshwari Digital Foundation

निष्प्रामाणिकी स्यात् । तस्माद्यादृशस्य घटादेरिन्द्रियसन्निकर्षाश्रयत्वेन ज्ञानकारणत्वं तादृशस्य साधकं किञ्चिन्मानमवश्यमभ्युपेयम् । अन्यथाऽन्वयव्यतिरेकयोरग्रहेण कार्यकारणभावाग्रहात् सर्वमानमेयादिव्यवस्थोच्छिद्येत । तच्च मानं न वृत्तिरूपम्; तदानीं वृत्तिकारणाप्रवृत्तेरिति तद्विलक्षणं नित्यं स्वप्रकाशमेकमेव लाघवात्, वृत्तिगतोत्पत्तिविनाशजडत्वादिभिस्तदसंस्पर्शात् । तदेव च नानाविधोपाधिसम्बन्धान्नानाविधव्यव-

---

स्तस्याः संम्भवेऽपि स्वसमानकालीनाज्ञाततया घटादिप्रत्यक्षमिदानीं घटं न जानामीत्याकारकम्, तदुत्तरं तादृशघटादिकारणताज्ञानादिरूपं तत्फलं च नापलपितुं शक्यमानुभविकत्वात् । किञ्चाज्ञान[1] कालीनघटज्ञानं विना तादृशघटेन्द्रियसंयोगानुकूलेन्द्रियव्यापारादौ तत्कालीनप्रवृत्त्यसम्भवः । नच—स्मरणसंशयाद्यप्रमाणवृत्त्या तत्सम्भव इति—वाच्यम्, अज्ञातत्वांशे तदसम्भवेनाज्ञातघटसंयोगानुकूलव्यापारे प्रवृत्त्यसम्भवात् । पूर्वाननुभूते स्मरणासम्भवात्संशयवृत्त्या संशयस्यैवौचित्यावर्जितत्वेनोक्तसंयोगरूपेष्टसाधनत्वे निश्चयासम्भवात् । **नित्यं स्वप्रकाशमेकमिति ।** तस्य तादृशज्ञानरूपत्वाभावे जानामीति व्यवहारस्यैकविषयकत्वं न स्यात् । सम्भवत्येकविषयत्वे[2] चैकजातीयविषयकत्वं न युक्तमित्याद्युक्तम् । घटादिवृत्तेश्च जडत्वेन ज्ञानान्तरे तत्प्रकाशके वाच्ये तस्यात्मान्यत्वे मानाभावः । आत्मस्वरूपत्वे चैकव्यक्तिरेव सर्वपुरुषसाधारणी नित्या, तस्याः ज्ञानान्तरविषयत्वे च कदाचिद्देहादि स्फुरति न वेत्यादिसंशयः स्यात्, अतः स्वप्रकाशा । अन्यथा कैवल्यस्य भासमानता न स्यादिति भावः । **नानाविधेति ।** ब्रह्मणो ज्ञानादिगुणकत्वं परेणाप्युच्यते । तत्र ज्ञानादेर्मिथो भिन्नत्वे ब्रह्मभिन्नत्वे जीवभिन्नत्वे च मानाभावादुपाधिभेदादेव

---

[1] अज्ञात—ग. [2] विषयकत्वे—ग.

SGDF
Sri Gargeshwari Digital Foundation

हारभाक् भवति नभ इव घटमणिमल्लिकाद्युपाधि-भेदेन; तच्चाज्ञानसाधकत्वात् स्वरूपतो नाज्ञाननिवर्तकम् 'वृत्त्युपरक्तं त्वज्ञाननिवर्तकमिति न वृत्तेरनुपयोगः। तथाच

नानाविधजीवेश्वरत्वादिव्यवहारसम्भवाद्वृत्त्यन्यज्ञानं दुर्वारमिति भावः। **वृत्त्युपरक्तमिति।** निवर्तकवृत्त्युपरक्तत्वान्निवर्तकत्वेन व्यवह्रियते, न तु वृत्त्युपरक्तेन निवर्तकता, स्पष्टं चेदमावरणभङ्गश्च वृत्त्येति पूर्वग्रन्थे। **न वृत्तेरनुपयोग इति।** तथा चाज्ञाननिवृत्त्याद्यर्थमेव वृत्त्यङ्गीकारात्सुखादौ वृत्त्यनङ्गीकारेणासत्वापादकाज्ञानाभावविशिष्टचैतन्यमेव तत्र ज्ञानमिति, घटादावपि तदेव ज्ञानम्। न च—सुखादौ वृत्त्यभावे वृत्ति-सूक्ष्मपरिणामरूपसंस्कारो न स्यादिति—वाच्यम्; सुखाद्युपहितचैतन्यस्यैव नाशस्य संस्कारत्वसम्भवात्, संस्काररूपमनःपरिणामविशेषस्यावश्यकत्वेऽपि वृत्तिज्ञानानावश्यकत्वाच्च। पल्लवाज्ञानानङ्गीकारपक्षे तूक्ताज्ञान-विषयतावच्छेदकत्वस्य वृत्त्यभावविशिष्टस्याभावविशिष्टं चैतन्यमेव ज्ञानम् प्रतियोग्यनधिकरणकालोऽत्यन्ताभाव इव घटादिरेव मूलाज्ञानविषयत्वे[1] कादाचित्कोऽप्यवच्छेदकोऽङ्गीक्रियते, घटं न जानामीति प्रतीतेर्न सुखादिरिति वृत्तिविषयघटादौ विशेषणस्य सुखादौ विशेष्यस्याभावा-दुक्ताभाव इति न तत्पक्षेऽपि वृत्त्यपेक्षा सुखादिज्ञानार्थमिति भावः। न च—घटो जानातीत्यादिप्रयोगापत्तिरिति—वाच्यम्; जीवेश्वराद्यन्य[2]तर-त्वस्य जानातीत्यादिप्रयोगोपाधित्वात्॥

वस्तुतस्तु यदवच्छिन्नविषयकत्वयद्विषयकत्वान्यतरवतोऽसत्वा-पादकाज्ञानस्यानवच्छेदकं यन्मनोऽविद्यान्यतरत्तदवच्छिन्नचैतन्यं तदीयं ज्ञानम्। ब्रह्मावच्छिन्नविषयकस्य ब्रह्मान्यविषयकस्य चाज्ञानस्याप्रसिद्ध-त्वात्तयोरेकैकमनिवेश्यान्यतरन्निवेशितम्। मनोमात्रे निवेशिते ईशो

---

[1] विषये—ग. [2] जीवेश्वरान्य.

SGDF
Sri Gargeshwari Digital Foundation

जानातीति न स्यात्, अविद्यामात्रे च निवेशिते जीवो जानातीति न स्यात्, अतस्तदन्यतरन्निवेशितम्। यदवच्छिन्नविषयकत्वयद्विषयकत्वान्यतरवतोऽज्ञानस्यानिरूपकं यन्मनोऽविद्यान्यतरत्तदवच्छिन्नं चैतन्यं तत्साक्षात्कारः। लक्षणद्वयेऽपि प्रथमयत्पदाभ्यां चरमतत्पदार्थस्य विषयस्य ग्रहणम्। घटादौ वृत्त्यभावकाले तदवच्छिन्नचिद्विषयकमसत्त्वापादकमज्ञानं मनोऽवच्छिन्नचिदाश्रितमिति तदा न तस्य ज्ञानम्। तत्र प्रत्यक्षवृत्त्यभावकाले तदवच्छिन्नविषयकमभानापादकमज्ञानं मनोनिरूपितमिति तदा न तस्य साक्षात्कारः। पल्लवाज्ञानास्वीकारे स्वपरिणामवृत्तिज्ञानाविषयत्वसमानाधिकरणस्य स्वतादात्म्यवदज्ञानावच्छेदकत्वस्याभाववत् यत्तत्सम्बन्धिनावच्छिन्नं चैतन्यं तस्य ज्ञानम्। सम्बन्धिशब्देन यद्ग्राह्यं तदेव स्वपदाभ्यां ग्राह्यम्। तच्च जीवज्ञानस्थले मनः, ईशज्ञानस्थले त्वविद्या। वृत्तिज्ञान[1]विषयत्वस्थले वृत्त्यनवच्छेदकत्वं निवेश्य साक्षात्कारो निर्वाच्यः। इन्द्रियकरणकवृत्तिरेव विषयावच्छिन्नेति परोक्षवृत्तिमादाय न लक्षणसमन्वयः। अज्ञानावच्छेदकत्वं चाज्ञानविषयत्वतदवच्छेदकत्वान्यतरवत्त्वम्। तेन ब्रह्मण्यज्ञानावच्छेदकत्वाभावेऽपि वृत्यभावकाले ब्रह्म जानामीत्यादिर्न व्यवहारः। शब्देनैव ब्रह्मणोऽपरोक्षत्वमतेऽपि शाब्दवृत्त्यवच्छेदकत्वस्यापि ब्रह्मणि पूर्वमुक्तत्वात्तदनङ्गीकारेऽप्युक्तान्यतररूपविशेष्याभावसत्वाच्च ब्रह्म साक्षात्करोमीत्यादौ नानुपपत्तिः। एकमनोवृत्त्यविषयस्यापि मनोन्तरवृत्तिविषयत्वेन वृत्त्यविषयत्वाभावात्स्वपरिणामेति। पुरुषान्तरीयाज्ञानविषयेऽपि ब्रह्मणि साक्षात्कारसम्पत्त्यै स्वतादात्म्यवदिति। न च—यदवच्छिन्नचितो ज्ञानत्वं साक्षात्कारत्वं चोक्तम्, तस्यैव तदुच्यतामिति—वाच्यम्; यथाहि आकाशं मेयं, घटाकाशं मेयं, पटाकाशं मेयं, इत्यादावनुगताकाशव्यक्तिविषयक-

[1] ज्ञाना—ग.

SGDF
Sri Gargeshwari Digital Foundation

सर्वाज्ञानसाधके साक्षिचैतन्ये तस्मिन्घटादेरध्यास इति काऽनुपपत्तिः? तदुक्तं सुरेश्वराचार्यैः—

सर्वतीर्थदृशां सिद्धिः स्वाभिप्रेतस्य वस्तुनः ।
यदभ्युपगमादेव, तत्सिद्धिर्वार्यते कुतः ॥
सर्वतीर्थदृशां तावत्सामान्यं मानलक्षणम् ।
अज्ञातार्थावगमनं त्वदुक्ते तन्न युज्यते ॥
स्वतस्सिद्धोऽथवासिद्धो देहादिस्ते भवन् भवेत् ।
प्रमाणानां प्रमाणत्वं नोभयत्रापि लभ्यते ॥
प्रमाणान्यन्तरेणापि देहादिश्चेत्प्रसिध्यति ।
वद प्रमाणैः को न्वर्थो न हि सिद्धस्य साधनम् ॥
स्वतोऽसिद्धे प्रमेये तु नासतो व्यञ्जिका प्रमा ।
नाभिव्यनक्ति सविता शशशृङ्गं स्फुरन्नपि ॥ इति ॥

त्वम्, तथा स्फुरणं ज्ञानं, घटस्य स्फुरणं ज्ञानं, पटस्फुरणं ज्ञानमित्यादावप्येकस्या एव स्फुरणज्ञानव्यक्तेर्विषयत्वमित्यादेरुक्तत्वादिति दिक् ॥

सर्वाज्ञानसाधक इति । यद्यप्यज्ञानाकाराविद्यावृत्तिरभ्युपगम्यते, तथापि सा न ज्ञानमपि तूक्तरीत्या चैतन्यमिति भावः । ननु—प्रमोत्पत्तेः पूर्वमप्रतीतमप्यज्ञातघटादिकं पश्चादनुमानादिना प्रतीयमानत्वान्नासत्, अन्यथा कदाचित्केनचिदप्रतीतस्यासत्वे सर्वमसत्स्यात्; नच—सन्निकर्षतज्जन्यज्ञानादौ हेतुताग्राहकान्वयव्यतिरेकज्ञानमज्ञातताकालीनघटान्वयज्ञानं विना न सम्भवतीति वाच्यम्; तादृशज्ञानस्यानुमित्यादिरूपस्याभानापादकाज्ञानकाले सम्भवादत आह—**नाभिव्यनक्तीति** । शशशृङ्गाभिव्यक्तिमुद्दिश्य न यतत इत्यर्थः । तथाच[1] जगदभिव्यक्तिमुद्दिश्य प्रवृत्तौ सवितुर्जगत्तमोज्ञानमिव प्रमेयाभिव्यक्तिमुद्दिश्य

---

[1] तथा—क.

SGDF
Sri Gargeshwari Digital Foundation

प्रवृत्तौ प्रमातुः प्रमेयाज्ञानज्ञानमावश्यकम्। अन्यथा तन्निवृत्तीच्छाया असम्भवादिति भावः ॥

यत्तु—परोक्षज्ञानस्थले यत्र विषयोऽध्यस्तः तदेव चैतन्यमनुमित्यादिवृत्त्यवच्छिन्नमतो ज्ञान एवाध्यास इति न युक्तम्; तावता स्वज्ञानेऽध्यासालाभादिति; तत्समाहितमेव। न हि प्रत्यक्षस्थलेऽपि ज्ञानत्वेनोपहितेऽध्यासः; तस्यानधिष्ठानत्वात्, किंतु ज्ञानत्वोपलक्षिते। तथाच स्वज्ञानाभिन्न[1] एवाध्यास इति नियमो न व्याहतः। यदपि घटादेरज्ञाततया साक्षिभास्यत्वे सदा सर्वस्य सर्वं भायात्। किञ्चाज्ञातताकालेऽपि घटादिकं योगिना प्रमीयत इति न तदा तस्य भानासिद्धत्वेनासत्त्वमिति साक्षिज्ञानत्वं व्यर्थमिति, तदपि न; अज्ञाततया सर्वस्याज्ञात[2]भानस्येष्टत्वात्। उक्तं हि विवरणे—'ज्ञाततया अज्ञाततया च सर्वं साक्षिभास्य' मिति। न चैवं—घटो भाति, अज्ञातघटो भातीत्यादिव्यवहारः स्यादिति—वाच्यम्; यथा ह्यज्ञातेऽपि घटादावनुमितत्वादिना भातीति व्यवहारस्तथा अज्ञातत्वेन भातीति व्यवहार इष्ट एव। अथानुमितत्वादिना भातीत्यपलप्यते अपलप्यतां तर्हि सः। तथापि यथा तार्किकादिमते मानसज्ञानस्य ज्ञानादौ लौकिकविषयत्वस्य तद्विषये घटादौ तदन्यविषयत्वस्य च स्वीकारः, तथा मन्मतेऽप्यज्ञानज्ञानयोरनावृतस्याज्ञातपरोक्षज्ञानविषययोरावृतस्य साक्षितादात्म्यस्य स्वीकारः। तन्मते तादृशविषयताया इव मन्मते तादृशतादात्म्यस्य कार्यकारणभावादिग्रहप्रयोजकत्वस्य सम्भवः। घटो भातीति व्यवहारस्य तु नापत्तिः; शुद्धघटस्य तादृशतादात्म्यानङ्गीकारात्, घटं न जानामीत्याकारकानुभवकालोत्तरं तार्किकादिभिरपि घटज्ञानकार्यमङ्गीक्रियत एव अभावः परं तत्र विषय उच्यते। न च—त्वन्मते घटाज्ञान-

---

[1] स्वज्ञानमात्र. [3] स्याज्ञातस्य—ग.

SGDF Sri Gargeshwari Digital Foundation

न च—

'घटोऽयमित्यसौ वृत्तिराभासस्य प्रसादतः।
विज्ञातो घट इत्युक्तिर्ब्रह्मानुभवतो भवेत्'॥

इति वदता वृत्तिप्रतिबिम्बितस्य घटानधिष्ठानचैतन्यस्य घटानुभवत्वोक्तिविरोध इति—वाच्यम्; वृत्तिप्रतिबिम्बितचैतन्यस्य घटाधिष्ठानचैतन्येन सह भेदाभावात्, चैतन्यस्यैकत्वात्। यथा चैकस्यैव चैतन्यस्य सर्वभासकत्वं तथा विस्तरेणोपपादितं 'नाभाव उपलब्धे' रित्यस्मिन्नधिकरणे भाष्यकृद्भिः। ननु—

कालसामान्ये तथानुभवसत्वात् घटज्ञानकार्यं स्यात्, तन्मते तु न तत्सामान्ये स इति न् तदापत्तिरिति—वाच्यम्; मन्मतेऽपि सर्वमज्ञानं सर्वदा नावृणोतीति स्वीकारेणाज्ञानसम्बन्धस्य तन्निवर्तकप्रमित्यव्यवहितपूर्वमेव स्वीकारात्। [1]योगिनां [2]कारणत्वादिग्रहादावुपयुज्यत इत्ययोगिनं प्रत्यसत्वं ते न दुर्वारम्। किंच योगिनामज्ञातकारणत्वादिग्रहेऽज्ञाताभिव्यक्त्यर्थं प्रवृत्तौ वा साक्ष्येव शरणमिति दिक्॥

आभासस्येति। वृत्तिप्रतिबिम्बितचैतन्यस्येत्यर्थः। **ब्रह्मानुभवतः** ब्रह्माभिन्नसाक्षिणः। अज्ञातत्वेनेव ज्ञातत्वेनापि सर्वस्य साक्षिभास्यत्वात् ज्ञातत्वेन व्यवहारः साक्षिणेत्यर्थः। उक्तं हि विद्यारण्यैः—

'घटैकाकारधीस्था चिद्धटमेवावभासयेत्।
घटस्य ज्ञातता ब्रह्मचैतन्येनावभास्यते'॥ इति।

भेदाभावादिति। अत्यन्तभेदाभावादित्यर्थः। **चैतन्यस्य** शुद्धचिदुपहितचितोः। **एकत्वात्** तादात्म्यात्। तथाच घटादिभासने मनोवृत्तिरपेक्ष्यते न तु तद्भासन इत्याशयेनाभासब्रह्मशब्दाभ्यां पृथङ्निर्देश इति भावः। **नाभाव उपलब्धेरित्यस्मिन्निति।** विज्ञानस्य

---

[1] योगिनां तु नायोगिनां—**ख.ग.** [2] कारणत्वग्र—**ग.**

SGDF
Sri Gargeshwari Digital Foundation

स्वभिन्नार्थग्राहकत्वे प्रत्यक्षीकृतं तदर्थग्राहकं वाच्यम् । नहि तच्चक्षुरादिकमिवार्थे कञ्चनातिशयं प्रत्यक्षतारूपमाधत्ते, अपितु तत्प्रत्यक्षतैवार्थप्रत्यक्षता । तदुक्तम् 'अप्रत्यक्षोपलम्भस्य नार्थदृष्टिः प्रसिध्यती' ति । उपलम्भो यदि प्रत्यक्षो न स्यात्तदा चक्षुरिवान्यामर्थदृष्टिं जनयेत्, सा च न सम्भवत्यनवस्थानात् । किञ्च ज्ञानस्य प्रत्यक्षत्वनियमाभावे ज्ञानस्य विद्यमानस्याभावभ्रमः संशयो वा कदाचित्स्यात् ॥

अथ— ज्ञानान्तरेण प्रत्यक्षीकृतं ज्ञानमर्थप्रकाश इति वाच्यम् ; तथापि तस्य ज्ञानान्तरस्य ज्ञानान्तरेण प्रत्यक्षता, तस्यापि ज्ञानान्तरेणेत्येवमनवस्था । [1]तस्मात् स्वेनैव विषयीकृतत्वेन प्रत्यक्षीकृतं ज्ञानमर्थग्राहकमिति बौद्धशङ्कायां, मैवम्; यथा हि पक्ता पाक्य[2] पाकेन व्याप्नोति, न तु पाकं पाकान्तरेण, किंतु स्वयमेव पक्ता पाकं प्राप्नोति, न वा पाक एव पक्यः[3] एवं साक्षी प्रमेयं प्रमया व्याप्नोति, न तु प्रमां प्रमान्तरेण, किंतु स्वयमेव साक्षी प्रमां व्याप्नोति, नवा प्रमैव प्रमात्री । मनःपरिणामस्य हि ज्ञानसुखादेः स्वच्छत्वेन साक्षिप्रतिबिम्बवत्तया[4] मनःपरिणामान्तररूपज्ञाननैरपेक्ष्येणैवापरोक्षता । अन्यथा विद्यमानोऽपि स दैवात्स्वा[5]कारमनोवृत्त्यनुत्पादे कदाचिन्न प्रकाशेत सन्दिह्येत वा, तद्वति तदभावभ्रमो वा स्यात् । नियमेन तदाकारवृत्तिकल्पनमप्यनवस्थादुष्टम् । व्यर्थं च, साक्षिणैव तत्प्रत्यक्षतासम्भवात् । तस्मात्स्वतः साक्ष्यभिव्यक्तावक्षमस्य घटादेः स्वाकारवृत्त्यपेक्षप्रत्यक्षताकत्वेऽपि स्वतः साक्षिव्यञ्जकस्य मनोवृत्त्यादेर्न तथेति साक्षिणैव प्रत्यक्षता । साक्षी तु नानुभवान्तरविषयो येनानवस्था स्यात्; अपितु स्वप्रकाशः । तत्वं चाज्ञेयत्वे सति ज्ञानत्वोपलक्षितस्वरूपत्वं, तच्च नित्यापरोक्षत्वोपलक्षित-

---

[1] तत्स्वेनैव–ख. [2] पक्तयं–क. पच्यं–ग- [3] पक्ता–ग. [4] साक्षिप्रतिबिम्बतया–क. [5] सदैव स्वा–ग.

SGDF
Sri Gargeshwari Digital Foundation

दृश्यत्वान्यथानुपपत्त्या मिथ्यात्वमित्यर्थापत्तिर्विवक्षिता, किं वा सत्यत्वे दृश्यत्वं न स्यादित्यनुकूलतर्कमात्रम्। नाद्यः; तत्सामग्र्यभावात्। तथा हि आक्षेप्यस्योपपादकत्वम्, प्रमाणाविरुद्धत्वम्, आक्षेपकस्यानुपपद्यमानत्वम्, प्रमितत्वम्, चेत्यर्थापत्तिसामग्री। प्रकृते [1]चाक्षेप्यसम्बन्धिनो मिथ्यात्वं नाक्षेपकस्य

स्वरूपत्वात्, तदपि नित्यमसन्दिग्धत्वात्, व्यतिरेकेण घटादिर्दृष्टान्तः। साक्षी ह्यन्यं सन्दिहानोऽपि न सन्दिह्यते, विपर्यस्यन्नपि न विपर्यस्यते, परोक्षतया जानानोऽपि स्फुरतीति सर्वानुभविकम्। न चैतदन्याधीनवेदनत्वे साक्षिणो घटत इति 'नाभाव उपलब्धे'रित्यधिकरणीयभाष्यादितात्पर्यसिद्धं समाधानम्॥

आक्षेप्यस्येति। अर्थापत्तिकल्प्यस्येत्यर्थः। **उपपादकत्वं** यद्विनाऽऽक्षेपकमनुपपन्नं तत्वम्। **आक्षेपकस्येति**। यत्रानुपपन्नत्वधीः करणं तस्येत्यर्थः। **अर्थापत्तीति**। अनुपपत्तिधीकरणकार्थापत्तीत्यर्थः। अथवा यः संशयः[2] कारणं सोऽप्याक्षेपकः। तथाच संशयकारणिकाऽप्यर्थापत्तिः प्रकृते ग्राह्या। यथा हि जीविनो देवदत्तस्य गृहासत्वं बहिःसत्वं विनानुपपन्नमिति धीरुपपादकस्य बहिस्सत्वस्य देवदत्तेऽर्थापत्तौ करणम्, तथा जीविनो देवदत्तस्य गृहासत्वज्ञानं पूर्वनिश्चितजीवनगृहसत्वनियमयोः संशयाहितजीवनसंशयद्वारा करणम्, उक्तनियमसंशयो वा जीवनसंशयद्वारा करणम्, करणस्य सव्यापारत्वानियमात्। जीवनसंशय एव वा करणम्, देवदत्तो बहिरस्तीत्यर्थापत्त्यन्वयव्यतिरेकानुविधानस्याविशेषात् तद्विनानुपपन्नत्वं तु तदभावव्यापकाभावप्रतियोगित्वमित्याद्याकरे विवेचितम्। प्रकृते तु दृग्दृश्ययोरन्यतरमिथ्यात्वं विना सम्बन्धोऽनुपपन्न इति धीः पूर्वनिश्चितयोर्दृग्दृश्ये सम्बद्धे एव, तयोः

---

[1] चाक्षेप्यं संब.　[2] यत्संशयः—क. ग.

SGDF
Sri Gargeshwari Digital Foundation

सम्बन्धस्योपपादकम्, प्रत्युत प्रतिकूलमेव। न चाध्यस्तत्वरूपसम्बन्धस्य न तत्प्रतिकूलम्; तस्याद्याप्यसिद्धेरनाक्षेपकत्वात्। प्रत्यक्षादिविरुद्धं चेदमाक्षेप्यम्। नाप्येकस्य दृश्यत्वस्योपपत्तये प्रमितानेकस्य त्यागो युक्तः। आक्षेपकं च न दृगध्यस्तत्वम्; तस्यैव फलत आक्षेप्यत्वात्। नापि दृग्विषयत्वरूपो दृक्सम्बन्धः; तत्रासिद्धेः। न दृगधीनसिद्धिकत्वम्; दृग्विषयत्वातिरिक्तस्य तस्यासिद्धेः। नान्त्यः; सत्वेऽप्युक्तरीत्या सम्बन्धान्तरेणैव दृश्यत्वस्योपपन्नतया अनुपपत्तेरेवाभावादिति—चेन्न; अनुकूलतर्कस्यैव प्रक्रान्तत्वेनार्थापत्तिर्वेत्यादिविकल्पानवकाशात्;

सम्बन्धः सत्य एवेति नियमयोः संशयाहितं दृग्दृश्ये सम्बद्धे न वेति संशयं द्वारीकृत्य विप्रकर्षहेतुकस्तयोः सत्यसम्बन्धाभावनिश्चयः तादृशसंशयो वा करणमुक्तान्यतरान्मिथ्येत्यर्थापत्ताविति द्रष्टव्यम् ॥

प्रतिकूलमिति। सम्बन्धिमिथ्यात्वे सम्बन्धस्य मिथ्यात्वनियमात्, मिथ्यात्वस्य च तुच्छत्वरूपत्वात्सम्बन्धस्वरूपस्य कालादिसम्बन्धिनः [1]प्रतिकूलसम्बन्धित्वमिति पराभिमानः। परमते च शुक्तिरूप्ये मिथ्यात्वसम्बन्धस्य शुक्तिरूप्याभावस्य च सत्यस्याङ्गीकारात्तत्र मिथ्यानुयोगिकत्वस्य मिथ्याप्रतियोगिकत्वस्य च मिथ्यात्वासाधकत्ववद्दृहात्मसम्बन्धे मिथ्यात्वेन परेणाप्यङ्गीकृते सत्यप्रतियोगिकत्वस्य सत्यत्वासाधकत्ववच्च मिथ्यासम्बन्धिप्रतियोगिकत्वस्य सम्बन्धे मिथ्यात्वसाधकत्वं नेति तु बोध्यम्। मन्मतेऽपि तन्न तथा, ब्रह्मस्वरूपाभावे व्यभिचारादिति ध्येयम्। **उक्तरीत्या**—इच्छादाविव ज्ञानेऽपि विषयस्य सत्यः सम्बन्ध इति रीत्या। **सम्बन्धान्तरेण**—[2]अध्यासान्यसम्बन्धेन। आक्षेप्यं

---

[1] प्रतिकूलं–ख. [2] सामान्यसम्बन्धेन–क.

SGDF
Sri Gargeshwari Digital Foundation

उभयथाप्यदोषाच्च । तथाहि—सत्यत्वे दृग्दृश्यसम्बन्धानुपपत्तिः । मिथ्यात्वं च तदुपपादकम्, न तत्सम्बन्धप्रतिकूलम्; मिथ्यात्वेऽपि शुक्तिरूप्यस्येदमंशेऽध्यस्तत्वरूपसम्बन्धदर्शनेन सम्बन्धसामान्ये प्रतिकूलत्वाभावात् । आक्षेपकोऽपि दृग्विषयत्वरूपो दृक्सम्बन्ध एव, अध्यासरूपस्य दृग्विषयत्वस्य ममापि संप्रतिपत्तेः, तात्विकस्यैव तस्य निषेधात् । न चाध्यस्तत्वस्याव्याप्यसिद्धिः; दृक्सम्बन्धसामान्यस्याक्षेपकस्य प्रसक्तविशेषनिषेधेऽप्यध्यस्तत्वरूपविशेषपर्यवसानेनासिद्ध्यभावात् । न हि अध्यस्तसम्बन्धत्वेनाक्षेपकता, किं तु सम्बन्धत्वेन । स चाध्य-

विना आक्षेपकस्यानुपपत्तिमाह—**सत्यत्व इति** । दृग्दृश्यसत्यत्वे इत्यर्थः । न च—यथा सम्बन्धिसत्यत्वेऽपि मुखादौ दर्पणादिसम्बन्धमात्रं मिथ्या तथा दृग्दृश्ययोः सत्यत्वेऽपि तत्सम्बन्धमिथ्यात्वमस्त्विति—वाच्यम्; विप्रकर्षादिना तत्सम्बन्धसंसर्गकप्रतीतेर्भ्रमत्वसिद्धौ सम्बन्धस्येव दृश्यस्यापि मिथ्यात्वं सिध्यतीति विनिगमकाभावादित्यादेरुक्तत्वादनध्यस्तसम्बन्धस्य त्वयानङ्गीकारादध्यस्तरूपविशेषपर्यवसन्नः सम्बन्ध आक्षेपकः । तत्पर्यवसन्नता च नाक्षेपात्पूर्वं सम्भवति; आक्षेपकस्यैव[1] सर्वदृश्यमिथ्यात्वसाधकत्वादित्याशङ्क्य निषेधति—**न चाध्यस्तत्वस्येति । सामान्यस्येति ।** आक्षेपकत्वावच्छेदकेन विप्रकृष्टयोः सम्बन्धत्वेनाक्षेपकं निश्चितत्वाद्धर्मिणि नासिद्धम्, आक्षेपात्पूर्वमुक्तविशेषानिश्चयेऽपि तत्सम्भावनासत्वान्न तदभावनिश्चयो येन सत्यत्वविशेषाभाव[2]स्यापि निश्चयेन यावद्विशेषाभावनिश्चयात्सम्बन्धसामान्याभावनिश्चयं ब्रूया इति समाधानाभिप्रायः । **प्रसक्तेति** सत्यत्वरूपेत्यर्थः । **सम्बन्धत्वेन** विप्रकृष्टयोः सम्बन्धत्वेन । यत्तु—मिथ्याभूतस्य सम्बन्धस्यानुप-

[1] आक्षेपस्यैव—**क. ख. ग.**　　[2] निवेशाभाव—**ग.**

SGDF
Sri Gargeshwari Digital Foundation

स्तत्वसम्बन्धसंभावनयाप्यबाधित एवेति। न च—घटस्य ज्ञानमिति धीसिद्धसम्बन्धसामान्यस्याध्यस्तत्वं न विशेषः, न हि रूप्यस्य शुक्तिरिति प्रतीतिरस्तीति—वाच्यम्; रूप्यस्य शुक्तिरिति प्रतीत्यभावेऽपि रूप्यस्य शुक्तिरधिष्ठानमिति प्रतीत्या अध्यस्तत्वस्य सम्बन्धविशेषत्वसिद्धेः, चैत्रस्य मैत्र इति प्रतीत्यभावेऽपि चैत्रस्य पिता मैत्र इति प्रतीतिवत्। आक्षेप्यमत्र प्रमाणा-

पत्त्या दृश्यमिथ्यात्वसिद्धिः, तस्यां च सत्यां मिथ्याप्रतियोगिकत्वेन सम्बन्धस्य मिथ्यात्वसिद्धिरित्यन्योन्याश्रय इति, तन्न; विप्रकृष्टसम्बन्धस्यानुपपत्त्यैव दृश्यतत्सम्बन्धयोर्मिथ्यात्वसिद्धेरुक्तत्वात्। **प्रतीत्यभावेऽपीति।** अपिनाऽध्यासकाले शुक्तित्वस्यावृतत्वान्न तथा [1]प्रतीतिर्ज्ञानत्वोपहितं तु न दृश्याधिष्ठानमित्यध्यासकालेऽपि ज्ञानं घटस्येति धीर्बाधकाले तु रूप्यस्य शुक्तिरिति धीर्भवत्येव। अतएव इदं रूप्यस्य स्वरूपमिदमो रूप्यं स्वरूपमित्यध्यासकाले रूप्यस्य स्वरूपं शुक्तिरिति बाधकाले प्रतीयत इति सूचितम्। किञ्चेदं रूप्यस्याधिष्ठानं [2]शुक्तिरूप्यस्याधिष्ठानमिति सार्वजनीनानुभवेन रूप्यादेर्भ्रमविशेष्यत्वरूपाधिष्ठानत्वस्य शुक्त्यादौ सिद्धत्वान्मन्मते विशेष्यावच्छिन्नस्य चैतन्यस्य भ्रमविषयाध्याससम्बन्धस्वीकारादधिष्ठानारोप्ययोरध्यासः सर्वत्र सम्बन्ध इत्याशयेनाह–**रूप्यस्येत्यादि।** एतेन–घटस्य सम्बन्धो घटस्य संयोग इति सामान्यविशेषरूपाभ्यां पदान्तरं विनैव यथा व्यवहारो न तथा प्रकृते। न वा चैत्रस्य पिता मैत्र इत्यादौ चैत्रमैत्रयोः सम्बन्धः षष्ठ्यर्थोऽपि तु जनकत्वरूपपितृपदार्थैकदेशे चैत्रस्य निरूपितत्वम्। तथा च रूप्याधिष्ठान[3]मित्यत्रापि भ्रमेऽधिष्ठानत्वघटके रूप्यसम्बन्धो भाति न

[1] प्रतीतिज्ञानत्वो–**ग.** [2] एवमेव सर्वत्र दृश्यते शुक्तीरूप्यस्येति तु भवितुमुचितं. [3] रूप्यस्याधिष्ठान–**क. ग.**

SGDF
Sri Gargeshwari Digital Foundation

विरुद्धमेव; अध्यक्षादिविरोधस्य प्रागेव परिहृतत्वात्। आक्षेपके च प्रमितत्वमनपेक्षितमेव; अप्रमितेनापि प्रतिबिम्बेन बिम्बाक्षेपदर्शनात्। तर्कपरतायामपि नाप्रयोजकता; सत्यत्वे संबन्धानुपपत्तेर्भवदुक्तन्यायखण्डनेन प्रथमत एवोपपादितत्वात्। दृश्यत्वाभावस्यापादकमत्र सत्वमनिर्वाच्यत्वाभावो वा त्रिकालाबाध्यत्वं वा। उभयथापि न दोषः। न चानिर्वाच्यत्वाभावस्य तुच्छे परोक्षधीवेद्यतया दृश्येऽपि सत्वेन व्यभिचारः; कारणसामर्थ्येन तत्र तदाकारवृत्तिसमुल्लासेऽपि दृक्सम्बन्धरूपस्य दृश्यत्वस्य तुच्छविरोधिनस्तत्राभावात्। तुच्छाकारताया वृत्ति-

---

त्वधिष्ठान इत्यादि—प्रत्युक्तम्; पदार्थैकदेशान्वयास्वीकर्तृमते पितरीवाधिष्ठानेऽपि सम्बन्धस्य भानात्, यथाश्रुतस्यापि चैत्रस्येत्यादेरदो[1]षत्वाच्च, पदान्तरसत्वेऽप्यधिष्ठानारोप्ययोः सम्बन्धभानाविघाताच्च। **अप्रमितेनापीति।** येन रूपेणाक्षेपकता तेन रूपेणाप्रमितेनापीत्यर्थः। तेन बिम्बप्रतिबिम्बयोर्भिन्नमते ऐक्याद्बिम्ब[2]त्वरूपेण प्रमितत्वेऽपि न क्षतिः। यत्तु—प्रतिबिम्बं नाक्षेपकम्, किंतु तद्धीः, सा च प्रमितेति रोदनम्, तद्भ्रममात्रस्य मिथ्यात्वादिना प्रयुक्त[3]मेव, अर्थापत्तिजनकज्ञानविषयस्यैव शास्त्रे आक्षेपकत्वव्यवहाराच्च। **तुच्छ[4]विरोधिन इति।** सत्वेन धीयोग्यत्वरूपस्य दृक्तादात्म्यतत्वान्यतरस्याभावरूपं तुच्छत्वं दृक्तादात्म्यविरोधीति भावः। **वृत्तिगतत्वेपीति।** अपिना तुच्छाकारतापि न वृत्तिगता मानाभावात्। नहि तया तुच्छे कश्चन व्यवहारो जन्यते, तुच्छस्याव्यवहार्यत्वात्। अहृदयवाचामहृदयमुत्तरमिति न्यायेन तुच्छशब्दप्रयोगस्यास्माभिस्तुच्छवादिनं प्रति क्रियमाणत्वात्, व्यवहारविशेषं प्रति तादृशवृत्तेः सामग्रीविशेषजन्यवृत्तित्वेन हेतुत्वसम्भवात्। अतएव

---

[1] चैत्रस्येत्यादेरदो—क. ख. [2] बिम्बवत्व—ख. [3] प्रत्युक्त—क. ग. [4] तुच्छत्व.

SGDF Sri Gargeshwari Digital Foundation

गतत्वेऽपि वृत्तिसम्बन्धस्य तुच्छगतत्वाभावोपपत्तेः। नापि— यथा सतो ब्रह्मणः स्वव्यवहृत्या सम्बन्धः, तथा घटादेरपि सत एव स्वज्ञानेन सम्बन्धोऽस्त्विति वाच्यम्; दृष्टान्ते ब्रह्मण्यध्या-सस्यैव व्यवहृतिसम्बन्धत्वात्। तथा च उभयसम्बन्धिसत्वे विषयविषयिभावानुपपत्तिर्नाप्रयोजकत्वादिना परिभूयते। एतेन आध्यासिकः सम्बन्धो नाम अध्यस्तसम्बन्धो[1] वा, अध्यस्तत्व-मेव वा, आद्ये सम्बन्धस्य मिथ्यात्वेऽपि सम्बन्धिनो दृश्यस्य दृश इव मिथ्यात्वानुपपत्तिः। द्वितीये ज्ञानस्याप्यध्यस्तत्वेन तत्र अध्यासानुपपत्तिः स्वस्वज्ञानपरम्परायामध्यासस्वीकारेऽनव-स्था चेति—निरस्तम्; ज्ञानं हि वृत्त्यवच्छिन्नं चैतन्यम्, तत्रा-वच्छेदिकाया वृत्तेर्जडाया अध्यस्तत्वेऽप्यवच्छेद्यस्य चैतन्यस्य प्रकाशरूपस्य अनध्यस्तत्वेन तत्र दृश्यस्याध्यासात् दृश्यमिथ्या-

---

सदसतोर्न सम्बन्ध इति वृद्धाः। विस्तरेण च वृत्तेस्तुच्छविषयकत्वं बौद्धाधिकारादौ प्रत्युक्तमुदयनाचार्याद्यैरिति सूचितम्। अथापि तादृश-वृत्तेः कालसम्बन्धात्कालविशेषावच्छेदेन तुच्छाकारता वक्तुं शक्या, तुच्छस्य तु कालासम्बन्धात्तदवच्छेदेन तत्र वृत्तिसम्बन्धो न तथा। न ह्यधिकरणासम्बन्धमप्यवच्छेदकम्। अतएव ध्वंसादीनां प्रतियोग्यादिषु न सम्बन्धः, किं तु ध्वंसादौ प्रतियोग्यादिसम्बन्ध इति परेऽप्याचक्षते। नच—तुच्छनिष्ठा वृत्तिविषयता न तत्तत्कालावच्छिन्नेति—वाच्यम्; तस्याः सार्वदिकत्वापातादित्याशयेनाह—वृत्तिसम्बन्धस्येति। एतेन—तुच्छाकारताया वृत्तावङ्गीकारे तुच्छे वृत्तिसम्बन्धोऽप्यवर्जनीय इत्य-पास्तम्। नच—वृत्तिनिष्ठाकारतानिरू[2]पकत्वं कालविशेषावच्छिन्नं विना तादृशाकारतापि वृत्तौ न सम्भवतीति—वाच्यम्; न हि निरूपकत्वं

---

[1] अध्यस्तः सम्बन्धो. [2] निष्ठाकारनिरू—क. ख.

SGDF
Sri Gargeshwari Digital Foundation

त्वेऽप्यनवस्थाविरहस्योपपत्तेः । अत एव शाब्दवृत्तिविषयो ब्रह्म न वृत्तौ कल्पितमविद्याविषयो ब्रह्माविद्यायां न कल्पितं यथा, तथा दृश्यं न दृशि कल्पितम्; तथा च दृग्दृश्यादेस्तात्विक एव सम्बन्धः, सामान्यसम्बन्धेनैवातिप्रसङ्गे निरस्ते विशेषजिज्ञासा विशेषोक्तिश्च विशेषजिज्ञासादिवदनर्थिकैवेति निरस्तम्; वृत्त्यविद्ययोर्ब्रह्मणोऽनध्यासेऽपि तयोरेव ब्रह्मण्यध्यासात्सम्बन्धोपपत्तेः । अतस्तत्र तात्विसम्बन्धाभावात् कथं तद्दृष्टान्तेन दृग्दृश्ययोरपि तात्विकसम्बन्ध इत्युच्यते? तथा च प्रसिद्धविशेषे बाधिते सामान्यस्यैव बाधशङ्कया अतिप्रसङ्गे प्राप्ते विशेषजिज्ञासाया विशेषोक्तेश्च साफल्यान्न ते निरर्थिके । एतेन-सम्बन्धस्य

नाम वस्त्वन्तरं तादृशमङ्गीक्रियते; अननुभवेन सम्बन्धमात्रस्य सम्बन्धानङ्गीकारात्, अपित्वाकारमात्रं वृत्तौ तुच्छीयताप्रयोजकमनिर्वाच्यम् । अन्यथा ध्वंसादौ प्रतियोग्यादिसम्बन्धे त्वयापि स्वीकृतेऽनुपपत्त्यापातादिति भावः ॥

सामान्यसम्बन्धेनेति । सम्बन्धसामान्येनेत्यर्थः । इति सत्येनेत्यादिः । **प्रसिद्धविशेषे**—सत्यसम्बन्धे । **सामान्यस्य**—सम्बन्धसामान्यस्य । **बाधशङ्कयेत्यादि** । यदि सत्यसम्बन्ध एव विशेषस्तदाविप्रकृष्टयोः सम्बन्धिनोस्तदसम्भवात्सम्बन्धसामान्यं न स्यात् । न चान्ययोः सम्बन्धो विप्रकृष्टयोर्विशिष्टबुद्धौ भाति; अन्यथाख्यात्यनङ्गीकारात्, दृग्दृश्यादिविशिष्टबुद्धेः प्रमात्वेनान्यथाख्यात्यसम्भवाच्च । सम्बन्धविषयक[1] एव विप्रकृष्टयोर्विशिष्टबोध इति स्वीकारे च सन्निकृष्टयोरपि स तथा स्यादित्यतिप्रसङ्गः । अथवा विशेषस्य बाधेऽपि[2] यदि सम्बन्धसामान्यं स्यात्तदा घटादिसामान्यान्तरमपि तथा स्यादित्यति-

---

[1] सम्बन्धविषयक-**क. ग.** [2] विशेषस्याबाधेऽपि-**ख. ग.**

SGDF
Sri Gargeshwari Digital Foundation

प्रामाणिकत्वे यथाकथंचन लक्षणं भविष्यति । तथाहि–संयोगसमवायान्तर्भावे तल्लक्षणमेव लक्षणं भविष्यति, तदनन्तर्भावे तु तदुभयभिन्नसम्बन्धत्वमेव लक्षणमस्त्विति–निरस्तम्; उक्तयुक्त्या प्रामाणिकसम्बन्धस्य संयोगसमवायान्तर्भावस्य च दूषितत्वात् । तदुभयबहिर्भूतसम्बन्धत्वं तु वयमपि न निराकुर्मः, किंतु तस्य प्रामाणिकत्वम् । किञ्च दृग्दृश्ययोर्न तात्विकसम्बन्धः; सम्बान्धिभिन्नत्वेऽनवस्थानात् । न च–दृश्यत्वान्तरहीनस्य दृश्यत्वादेरिव सम्बन्धस्यापि स्वनिर्वाहकत्वं क्वचित् भविष्यतीति–वाच्यम्; दृश्यत्वमपि दृक्सम्बन्ध एव । तस्य च स्वनिर्वाहकत्वं न मायिकत्वं विनेति नास्माकं प्रतिकूलमभ्यधायि देवानांप्रियेण; अभिन्नत्वे सम्बन्धत्वायोगात् । न चैवमाध्यासिकसम्बन्धत्वेऽप्येतद्दोषप्रसङ्गः; तस्य मायिकत्वेन मायायाश्चाघटि-

---

प्रसङ्गः । तस्माद्विशेषान्तरं मिथ्यासम्बन्धरूपं वाच्यम् । तच्च कथमुपपद्यत इति जिज्ञासा तदुपपादनं च न व्यर्थम् । सम्बन्धसामान्यस्थापनद्वारा उक्तातिप्रसङ्गनिरासस्य फलत्वादित्यर्थः । **सम्बान्धिभिन्नत्वे इति ।** दृग्दृश्ययोः सम्बन्धमात्रस्य स्वसम्बन्धिभिन्नत्वे इत्यर्थः । **अनवस्थानादिति ।** घटतद्दृशोः स्वभिन्नसम्बन्धे दृक्सम्बन्धान्तरं तत्रापि तदन्तरमित्येवमनवस्थानादित्यर्थः **स्वनिर्वाहकत्वं** स्वप्रति[1]सम्बन्धत्वम् । दृश्यत्वेऽनुपपत्तिपरिहाराय तदेव दृष्टान्तीकुर्वन् पशुरस्तीत्याह–**देवानामिति ।** नन्वन्यत्र दृक्सम्बन्धः संबन्धिभ्यां भिन्नोऽपि स्वस्मिन् सम्बन्धितायां न तथात्वमपेक्षत इति स्वाभाव्यान्न मायिकत्वमित्याशङ्क्याह—**अभिन्नत्वे इति । सम्बन्धायोगात्** सम्बन्धत्वायोगात् । स्वं न[2] स्वस्य न वा स्वस्मिन्[3] प्रतीतेः स्वप्रतियोगिकत्वस्वानु-

---

[1] स्वं प्रति–ख. ग. [2] स्वेन स्वस्य–ग. [3] स्वस्मिन्निति क. ग.

SGDF Sri Gangeshwari Digital Foundation

तघटनापटीयस्त्वेन सर्वानुपपत्तेर्भूषणत्वात् । न चातिप्रसङ्ग-निराकरणार्थं दृग्दृश्ययोः सम्बन्धनिर्वचनं प्रकृतम्, न तु विषयत्वनिर्वचनम्, अतो विषयत्वखण्डनमनुक्तोपालम्भनमिति—वाच्यम्; विषयत्वखण्डनेन निरुच्यमानप्रकृतसम्बन्धस्यैव खण्डनात् । न च—विषयित्वानिरुक्तावपि विषयिणः सत्यत्ववत् विषयत्वानिरुक्तावपि विषयः सत्यः स्यादिति—वाच्यम्; विषयित्वानिरुक्तावपि विषयाध्यासेनैव तदुपपत्त्या विषयिणः सत्यत्वं युक्तम्; विषयत्वानिरुक्तौ तु विषयस्य सत्यत्वं न युक्तम्; विषयिणोऽनध्यस्तत्वेन विषयाध्यासमन्तरेणान्यस्योपपादकस्याभावात् । यत्र तु विषयिण एवाध्यासः, तत्र विषयः सत्य एव, यथा ज्ञान[1]विषयो ब्रह्म । न चोभयाध्यासः; शून्य-

---

योगिकत्वयोः स्वस्मिन्नभावान्न स्व[2]सम्बन्धत्वम् । अन्यथा घटादावपि स्वस्यैव दृक्सम्बन्धत्वापत्तेरथापि घटादावनुभूयमानत्वाद्युक्तिबाधितत्वाच्च, सदसद्विलक्षणो मायिकः सम्बन्धो दृशः स्वीक्रियते, न तु तत्र तदन्तरमननुभवादिति भावः । **भूषणत्वादिति** । उक्तं हि खण्डने—

अनवस्थादयो दोषाः सत्तां निघ्नन्ति वस्तुनः ।
अद्वैतिनां ते सुहृदः प्रपञ्चे तत्प्रसञ्जकाः ॥ इति ॥

यत्तु—ईश्वरशक्तेः सत्याया महिम्ना दृग्दृश्यतत्सम्बन्धादीनामनुपपन्नत्वेऽपि सत्यत्वं, मायायां शक्तिं विहाय तस्यामेव भक्तेरुचितत्वादिति, तत्तुच्छम्; अनुपपन्नस्यापीश्वरशक्त्यादेः सत्यनामकरणे हि शुक्तिरूप्यादेरपि तत्कथं न कुर्याः । **न चेति** । भिन्नत्वेऽनवस्थानादिनेति शेषः । **तदुपपत्त्येति** । अधिष्ठानान्यमिथ्यात्वमेवोपपादकमिति भावः । **अन्तरेणेति** । विनिगमकाभावाद्विषयतत्सम्बन्धयोर्मिथ्यात्वमुप-

---

[1] अज्ञान. [2] स्वं प्रति—क. ग.

SGDF Sri Gargeshwari Digital Foundation

वादप्रसङ्गात् । अन्यतराध्यासे च विनिगमकमनुवृत्तत्वव्यावृत्तत्वप्रकाशत्वजडत्वादिकमेव । तस्माद्विषयिणो नित्यदृशोऽनध्यासाद्विषयस्यैवात्राध्यासः । न च—"प्रमाणजातं[1] स्वविषयावरणे" त्यादियुक्त्या दृग्विषयत्वरूपदृश्यत्वस्य हेतूकरणेन च त्वयापि विषयत्वं निर्वाच्यमेवेति—वाच्यम्; तत्वतोऽनिर्वाच्यत्वेऽप्यध्यस्तत्वेन घटादिसमकक्षनिर्वाच्यत्वस्य सम्भवात् । ननु—कथं प्रमाणज्ञानविषयोऽध्यस्त इति—चेन्न; प्रपञ्चविषयकज्ञाने तत्वावेदकत्वलक्षणप्रामाण्याभावादिति गृहाण । अत एव—

'यादृशं विषयत्वं ते वृत्तिं प्रति चिदात्मनः ।

पादकं न तु तत्सम्बन्धमात्रस्येत्यर्थः । **अन्यतराध्यासे** । विषयविषयिणोरन्यतराध्यासे आवश्यके । **अनुवृत्तत्वे इत्यादि** । यद्यपि यद्भ्रमान्तरानुवृत्तं तदवश्यं तदेतद्भ्रमाधिष्ठानमेतद्भ्रमेऽनारोपितमिति वा न व्याप्तिः; शुक्तिरूप्याद्यवच्छिन्ने चैतन्ये भ्रमान्तरोदयेन शुक्तिरूप्यादेः स्वभ्रमानधिष्ठानत्वादिना व्यभिचारात् । नापि सर्वभ्रमानुवृत्तत्वमनारोपितत्वे व्यतिरेकी हेतुः; तावतापि शुक्त्याद्यवच्छिन्नचैतन्यस्याधिष्ठानत्वासिद्ध्यादितादवस्थ्यात् । तथापि यद्यद्भ्रमबाधानुवृत्तं तत्तद्भ्रमाधिष्ठानमित्यादिर्व्याप्तिर्बोध्या । ज्ञानस्वरूपं च सर्वभ्रमबाधे विषयतयानुवृत्तं शुक्तिरूप्यादिभ्रमं प्रत्यपि शुक्त्यवच्छिन्नसद्रूपेण तत्तथा । शुद्धब्रह्मरूपेणापि तद्बाधनस्वरूपयोग्ये अखण्डाकारज्ञाने तत्तथा । यत्स्वप्रकाशं तन्न मिथ्या; तद्बाधस्य तेन भास्यत्वासम्भवात्तत्र भासकान्तरकल्पने च गौरवात् । आदिना विनाशित्वाविनाशित्वसङ्ग्रहः । यद्विनाशि तन्न सर्वभ्रमाधिष्ठानं; तद्विनाशे तस्याधिष्ठानत्वासम्भवादित्यादि बोध्यम् । **तत्वेति**—त्रिकालाबाध्येत्यर्थः । **सत्ता**—त्रिकालाबाध्यता ।

---

[1] प्रमाणज्ञानं.

SGDF
Sri Gargeshwari Digital Foundation

तादृशं विषयत्वं मे दृश्यस्यापि दृशं प्रति' ॥ इति
निरस्तम्; चिदात्मनोऽनध्यासेपि वृत्तेस्तत्राध्यस्तत्वेन तद्दृष्टान्तेन प्रकृतेऽप्यनध्यासस्य वक्तुमशक्यत्वात्। स्यादेतत्—मिथ्यात्वनिर्वचनात्तत्साधनं दृश्यत्वादिकं निर्वक्तव्यमेव, न हि घटाद्यसङ्कीर्णाकारज्ञानं विना तद्विलक्षणव्यवहारः। [1]अथ निरुक्तासङ्कीर्णाकारज्ञानमात्रेण तदुपपत्तिः, तर्हि तुल्यं ममापि। इयांस्तु विशेषः; यत्तव स आकारः सद्विलक्षणः, मम तु त्वन्मतसिद्धप्रातिभासिकवैलक्षण्यसाधकमानासिद्धसत्ताकः। न हि लक्षणोक्त्यनुक्तिभ्यां सदसद्वैलक्षण्यरूपानिर्वचनीयत्वहानिलाभौ; ब्रह्मण्यपि श्रौतस्यपि जगत्कारणत्वादिलक्षणस्य खण्डनरीत्या असम्भवात्, त्वयैव—

कीदृक्तत्प्रत्यगिति चेत्तादृगीदृगिति द्वयम्।
यत्र न प्रसरत्येतत्प्रत्यगित्यवधारय ॥ इति

ब्रह्मणोऽपि दुर्निरूपत्वोक्तेश्च, प्रपञ्चेऽपि त्वदुक्तानिर्वाच्यत्वसमकक्षलक्षणसम्भवाच्च, 'यत्कठिनं सा पृथिवी' त्यादिश्रुत्या पृथिव्यादीनामपि लक्षणत्वोक्तेश्च। तस्मादनिर्वाच्यत्वं न सत्वविरोधि। सत्वेऽप्यनुद्भूतत्वादेवानिर्वाच्यत्वोपपत्तेः। न च निर्वाच्यत्वमपि सत्वप्रयोजकम्; न हि शुक्तिरूप्यस्यापीतरभेदसाधकं रूप्यत्वं प्रातीतिकजातिरूपतया सुवचमपि सत्यम्। किञ्च

तादृक्—परोक्षम्। ईदृक् अपरोक्षम्। यत्र न प्रसरति। यस्य प्रतीचो न समसत्ताकलक्षणम्, यथाश्रुते मूलाज्ञानविषयत्वादेर्लक्षणत्वसम्भवादसङ्गतेः। दुर्निरूपत्वोक्तेः—अनिर्वाच्यस्यैव लक्षणस्योक्तेः। अनिर्वा-

---

[1] अथनिरुक्ता.

SGDF
Sri Gargeshwari Digital Foundation

ब्रह्मण आनन्दत्वज्ञानत्वसत्यत्वस्वप्रकाशत्वादि खण्डनोक्तरीत्या दुर्वचमिति ब्रह्म तत्वतोऽनानन्दाद्यात्मकं स्यात्। तस्मादिक्षुक्षीरादिमाधुर्यवदनिर्वाच्यमपि विषयत्वं सदेवेति, अत्रोच्यते—दृश्यत्वादेरनिर्वचनीयत्वं किं सत्वेन, उत स्वरूपेण। नाद्यः, सत्वेनानिर्वचनीयत्वेऽपि तत्तदाभासलक्षणानालिङ्गितत्वमात्रेण हेतुत्वोपपत्तेस्तन्निर्वचनानपेक्षणात्। न द्वितीयः, तात्त्विकातात्त्विकसाधारणेन दृक्सम्बन्धित्वादिना रूपेण दृग्विषयत्वस्य [1]निर्वक्तुमशक्यत्वात्। लक्षणोक्त्यनुक्त्योर्न सदसद्वैलक्षण्यरूपानिर्वाच्यत्वहानिलाभकरत्वमिति यदवोचः, तदपि न; पूर्वोक्तव्यापकानुपलब्धिसहिताया लक्षणानिरुक्तेरुक्तरूपानिर्वचनीयत्वप्रयोजकत्वात्। यत्त्वानन्दत्वादिना धर्मेण कीदृगित्यादिना स्वरूपेण च दुर्निरूपत्वाद्ब्रह्मणोऽप्यनिर्वचनीयत्वप्रसङ्ग इति, तन्न; आनन्दत्वादिधर्मवत्तया दुर्निरूपत्वेऽपि दुःखप्रत्यनीकत्वाद्युपलक्षितस्वरूपस्य सत्वेन निर्वक्तुं शक्यत्वात्। न चैवं

च्यत्वं सत्यस्य लक्षणादेर्निर्वचनाभावः। **खण्डनोक्तरीत्येति** ॥

अभीष्टसिद्धावपि खण्डनानामखण्डि राज्ञामिव नैवमाज्ञा।
तत्तानि कस्मान्नु[2] यथावदेव सैद्धान्तिकेऽप्यध्वनि योजयध्वम् ॥

इति ॥ **स्वरूपेण**—सत्वान्यरूपेण। **तन्निर्वचनानपेक्षणात्**—सत्वेन निर्वचनानपेक्षणात्। **व्यापकानुपलब्धीति**। सत्यत्वव्यापकाविप्रकर्षाद्यनुपलब्धिरूपविप्रकर्षादिग्राहकमानेत्यर्थः। मिथ्यात्वसाधकमानेति यावत्। **लक्षणानिरुक्तेः**—सत्यलक्षणानुक्तेः कीदृगित्यादिना समसत्ताकलक्षणात्मकेन। **सत्वेन निर्वक्तुं शक्यत्वात्**। तत्सदित्यस्यानन्दत्वसत्यत्वाद्युपलक्षितस्वरूपप्रमापकशब्दस्य प्रयोक्तुं शक्यत्वात्।

---

[1] निर्वक्तुं शक्यत्वात्. [2] कस्मान्न—ग.

SGDF
Sri Gargeshwari Digital Foundation

प्रपञ्चे सत्वं शक्यनिर्वचनम्; बाधकसद्भावात्। अतएव— कठिनस्पर्शवत्त्वादिना [1] पृथिवीत्वादीनां निर्वचनमस्त्येव, [2] सत्वेऽप्युद्भूतत्वादिना [3] निर्वाच्यत्वोपपत्तिरिति—निरस्तम्; न हि निरुक्तिविरहमात्रेणानिर्वाच्यत्वं ब्रूमः, किंतु सत्वादिना निरुक्तिविरहेण। स च प्रपञ्चे बाधकादस्त्येव। नच—ज्ञाने विषयस्याध्यस्तत्वे तदज्ञानजन्यं तज्ज्ञाननिवर्त्यं चाध्यासं प्रति विषयत्वं तदनुविद्धतया प्रतीत्यभावश्च न सम्भवतीति—वाच्यम्; चैतन्यमात्राज्ञानजन्यत्वात्, तज्ज्ञाननिवर्त्यत्वाच्च घटादिप्रपञ्चस्येत्युक्तत्वात्। सदिति प्रतीयमानाधिष्ठानचैतन्यानुविद्धतया प्रतीयमानत्वमप्यस्त्येव। तस्मात्सत्यत्वे दृग्दृश्यसम्बन्धानुपपत्तिर्दृढैव ॥

इत्यद्वैतसिद्धौ प्रपञ्चमिथ्यात्वानुकूलतर्कनिरूपणम् ॥

प्रतीत्यभावश्चेति त्रयं विषयस्य वाच्यं, तच्चेति शेषः, तदज्ञानकार्याध्यासविषयत्वं तज्ज्ञाननिवर्त्याऽध्यासविषयत्वं **तदनुविद्धतया** प्रतीत्यभावश्चेति त्रयं न सम्भवतीत्यर्थः। ज्ञानस्य स्फुरणकाले विषयाध्याससत्वादाद्यद्वितीययोरसम्भवः। अधिष्ठानस्यावृतत्वेन तदनुविद्धतयाऽऽरोप्याऽप्रतीतिर्वाच्या, सापि न सम्भवति; घटं जानामीति ज्ञानानुविद्धतयैव विषयप्रतीतेरिति तृतीयासम्भव इति भावः। **अस्त्येवेति।** तथाच सद्रूप इव ज्ञानरूपेऽनुविद्धतया विषयप्रतीतेरधिष्ठानं न तद्रूपं अपि तु शुद्धचिन्मात्रं, तदनुविद्धतया चाप्रतीतिः सम्भवत्येवेति भावः ॥

ननु प्रपञ्चमिथ्यात्वसिद्ध्यनुकूलतर्का मादृशैः प्रत्याख्यातुमशक्यत्वेऽपि कुशलैरन्यैः प्रत्याख्यास्यन्त इति चेत्, नूनं बलवता

---

[1] पृथिव्यादीनां. [2] सत्त्वेऽप्यनुद्भूत. [3] अनिर्वाच्य.

SGDF
Sri Gargeshwari Digital Foundation

ताडितानां मत्कुले जनिष्यमाणा बलवन्तस्तांस्ताडकां[1] स्ताडयिष्यन्तीति वदतां वङ्गजानां भ्रातरो भवन्तः। नहि प्रत्याख्यानासामर्थ्यं भवतामेवेति ब्रूमः; किंतु सर्वेषामतो विषयस्यानिर्वाच्यत्वस्वाभाव्यम्। उक्तं हि खण्डने "न हि प्रमातॄणामसामर्थ्यादनिर्वचनमपि तु विषयस्वाभाव्या"दिति। यत्तु निर्वचनाभावेन विषयस्यानिर्वाच्यत्वकथनं न युक्तम्; नहि स एव तत्, किंतु सदसद्विलक्षणत्वादिरूपं, अन्यथा मुखादिसंस्थानस्यानिर्वचनमात्रादनिर्वाच्यता स्यादिति, तत्तुच्छम्। युक्तं वि[2]रुद्धत्वज्ञापनद्वारा केन रूपेण निर्वचनाभावेन सद्विलक्षणत्वज्ञापनात् मुखादिसंस्थानेऽपि तस्य तथात्वमिष्टमेव। तदेवं रोदने न वो निस्तारः,[3] किंतु चिरसञ्चितपातकैः पात एवाधः। श्रूयते हि—

'असुर्या नाम ते लोका अन्धेन तमसा वृताः।
तांस्ते प्रेत्याभिगच्छन्ति ये के चात्महनो जनाः'॥

स्मर्यते च—

योऽन्यथा सन्तमात्मानमन्यथा प्रतिपद्यते[4]।
किं तेन न कृतं पापं चोरेणात्मापहारिणा॥ इति॥

तर्कैः सारस्वतै रत्नैश्चन्द्रिकाचन्द्रभूषणैः।
दुरन्तध्वान्तभङ्गोऽयं मिथ्यात्वे तर्कनिर्णयः॥

इत्यनुकूलतर्कनिरूपणम्॥

---

[1] स्वां ताडकं–क. ग. [2] युक्तिविरु–क. ग. [3] रोदनेन न वो न निस्तारः–ग. [4] पाद्यते–ग.

SGDF
Sri Gargeshwari Digital Foundation

अथ प्रतिकर्मव्यवस्थोपपत्तिः.

ननु—विश्वस्याध्यासिकत्वे प्रातिभासिकस्थल इव विषयेन्द्रियसन्निकर्षाधीनायाः प्रतिकर्मव्यवस्थाया अनुपपत्तिरिति-चेन्न; वृत्तेः पूर्वमेव घटादीनां चैतन्येऽध्यासेन प्रातिभासिकस्थलापेक्षया वैलक्षण्यात् । तथा हि—अन्तःकरणं चक्षुर्वत्तेजोवयवि । तच्चेन्द्रियद्वारेण तत्संयुक्तं विषयं व्याप्य तदाकारं भवति । यथा नद्याद्युदकं प्रणाड्या निस्सृत्य केदाराद्याकारं भवति, सैव वृत्तिरित्युच्यते । तत्र जीवचैतन्यमविद्योपाधिकं सत्सर्वगतमन्तःकरणोपाधिकं सत्परिच्छिन्नमिति मतद्वयम् । तत्राद्ये विषयप्रकाशकं जीवचैतन्यम् । द्वितीये ब्रह्मचैतन्यम् । आद्ये पक्षेऽपि जीवचैतन्यमविद्यानावृतमावृतं

अथ प्रतिकर्मव्यवस्थोपपत्तिः.

प्रतिकर्मव्यवस्थाया इति । कस्यचित्पुरुषस्यैव कश्चिदेव विषयो ज्ञानकर्मेति प्रतिनियतज्ञानकर्मव्यवस्थाया इत्यर्थः । चक्षुर्वदिति । तथाच यथा चक्षुस्तेजस्त्वात्प्रभाव[1]च्छीघ्रं सूर्यमण्डलादिसंयुक्तरूपेण परिणमते, तथा मनोऽपीति भावः । देहान्तस्तिष्ठदेव विषयेण संयुज्यते, न तु देहाद्विभक्तम्; यथा नद्यां तिष्ठत्तदुदकमन्येनापि संयुज्यत इत्याशयेनाह—यथा नदीति । सर्वगतमिति । यथा गोत्वादिजातेरुदयनाद्युक्तं सर्वगतत्वं स्वरूपसम्बन्धेन, तथा जीवस्यापि सर्वसम्बन्ध्यविद्याप्रतिबिम्बत्वरूपं (वा) तस्य सर्वगतत्वं अविद्याकार्यगत[2]परिच्छेदाभावो वेति भावः । अनावृतमावृतं चेति । जीवस्य जगदुपादानत्वपक्षे घटादिना तादात्म्यान्मनआदेरिव घटादेरपि सर्वदा भातीति

---

[1] सूर्यादिप्रभाव—ग. [2] कृत—क. ख. ग.

SGDF
Sri Gargeshwari Digital Foundation

च । तत्राद्ये वृत्तिर्जीवचैतन्यस्य विषयोपरागार्था ।

व्यवहार्यता स्यात्, अतो मनआद्यवच्छेदेनानावृतमपि घटाद्यवच्छेदेनावृतं जीवचैतन्यमुच्यते । तस्य जगदनुपादानत्वपक्षे तु घटादिना तादात्म्याभावात्सर्वसम्बन्ध्यविद्याप्रतिबिम्बत्वस्य[1] भासकतानियामकत्वे सर्वदा तद्भानापत्तेर्वक्ष्यमाणस्य भासकतानियामकसम्बन्धस्य कादाचित्कत्वादेव कादाचित्कभानसम्भवादनावृतमेव तदिति भावः । **उपरागार्थेति** । स्वप्रतिबिम्बाधारवृत्तेः संश्लेषो विषयत्वं[2] चेत्युभयरूपोपरागार्थेत्यर्थः । रूपाद्याकारवृत्तिमात्रेण रसादेरपि भानं स्यात्, रसादावपि रूपाद्याकारवृत्तिसंश्लेषसत्त्वादतो विषयत्वेति । परोक्षवृत्तिमात्रेण रूपादेर्भानं स्यादतः संश्लेषेति । अविद्यामनस्तत्परिणामानां सर्वदा भानात्सार्वदिकं स्वप्रतिबिम्बाधारत्वमेवोपरागस्तन्नियामकः । घटादौ स्वच्छत्वाभावेन तदसम्भवात्तद्धटितोक्तोपरा[3]गकाल एव तद्भानाच्च स एव तन्नियामक इति भावः ॥

ननु—मनस्त्वसुखत्वादौ न प्रतिबिम्बाधारत्वं न वा तद्वद्वृत्तिसंश्लेष इति तद्भानं न स्यात्, न हि जातिगुणादेः प्रतिबिम्बोपाधितास्ति । अथ स्वप्रतिबिम्बवत्तादात्म्यतद्वत्तादात्म्यतद्वत्तादात्म्यादेरपि[4] भासकतानियामकोपरागत्वं वाच्यम्; तथापि धर्मादेर्ब्रह्मणश्च भानं स्यात्, स्वप्रतिबिम्बाश्रय[5]मनस्तादात्म्यसत्वादिति—चेन्न; मनस्त्वादावपि वक्ष्यमाणेन[6] स्वच्छत्वस्य प्रतिबिम्बवत्वस्य च कल्पनासम्भवात्, तस्याप्यविद्यापरिणामत्वप्रयुक्तसत्वगुणान्वयान्मनआदेरिव सर्वदा भानाच्च, चित्प्रतिबिम्बयोग्यतारूपस्वच्छताकल्पनौचित्यात्, प्रतिबिम्बवत्तादात्म्या-

---

[1] प्रतिबिम्बवत्वस्य—क. ग. [2] संश्लेषविषयत्वं—ग. [3] तोपरागकाल—ग. [4] स्वप्रतिबिम्बवत्तादात्म्यादेरपि-ग. [5] बिम्बक्षयम—क. स्वप्रतिबिम्बमन—ग. [6] वक्ष्यमाणमानेन—क. ख. ग.

SGDF
Sri Gargeshwari Digital Foundation

द्वितीये त्वावरणाभिभवार्था । परिच्छिन्नत्वपक्षे तु जीवचैतन्यस्य विषयप्रकाशकतदधिष्ठानचैतन्याभेदाभिव्यक्त्यर्था। अनावृतत्वपक्षे

ह्युपरागस्य भासकतानियामकत्वेऽपि धर्मादौ ब्रह्मणि चावरणसत्त्वादनावृतोक्तोपरागस्यैव तथात्वेनादोषाच्च । अत एव स्वतो मनउपरक्तस्यापि धर्मब्रह्मादेर्न सर्वदा भानम्; आवरणेन चैतन्यस्य तदाकारत्वाभावादिति, विवरणसिद्धान्तबिन्द्वादावुक्तम् । एवं च घटादावुपरागो ब्रह्मणि त्वावरणाभिभव एव वृत्तेः प्रयोजनमिति ध्येयम् ॥

द्वितीये त्विति । तु शब्दाज्जीवोपरागार्थत्वव्यवच्छेदः । जीवस्योपादानत्वे तादात्म्यरूपोपरागस्य सिद्धत्वादिति शेषः । **अभेदाभिव्यक्त्यर्थेति** । मनोऽनवच्छेदप्रयुक्तं जीवाद्भेदं मनःपरिणामः स्वा[1]वच्छेदाद्ब्रह्मणि वृत्तिर्नाशयति। स्वत एव मनोवच्छिन्नस्य सुखाद्यवच्छिन्नब्रह्मचैतन्यस्य तु सुखादिभासनाय न वृत्त्यपेक्षा । ब्रह्मणो धर्मादेश्च मनोऽवच्छिन्नस्याप्यावृतत्वादेव न भानम् । अतएव ब्रह्मणि न जीवाभेदाभिव्यक्त्यर्था वृत्तिः, किं त्वावरणाभिभवार्था । उक्तं च सिद्धान्तबिन्दौ—जीवस्य जगदुपादानत्वे आवरणाभिभवार्था । ब्रह्मणस्तत्त्वे त्वावरणाभिभवार्था प्रमातृचैतन्योपरागार्था चेति। यद्यप्यभेदार्थेत्येव वक्तुमुचितमधिकस्य व्यर्थत्वापत्ते,[2] तथाप्यभेदसम्पत्तिमात्रेण नाभेदाभिव्यक्तिः; रूपादिमात्राकारवृत्त्या रसाद्यवच्छिन्नचैतन्यस्य प्रमात्रभेदसम्पत्तावपि मया रसो विदित इत्यादिव्यवहाराभावात् । अतोऽभेदव्यवहारसम्पादकवृत्तिविषयत्वरूपमभेदाभिव्यञ्जकं वृत्तिप्रयोजकं[3] ज्ञापयितुमभिव्यक्तीत्युक्तम् । शुद्धं ब्रह्म नोपादानं जगतः; किं त्वविद्ययोपहितं विशिष्टं वेति पक्षे तु शुद्धब्रह्मणि मनस्तादात्म्याभावेन जीवानुपरागादेवाभानोपपत्तावप्यावरणस्य शुद्धं ब्रह्म न जानामीत्यनुभवसिद्धत्वात्,

---

[1] परिणामस्वा--क. ग. [2] व्यर्थत्वात्--ख. [3] प्रयोजकं--ग.

SGDF
Sri Gargeshwari Digital Foundation

ह्यनावृतं सर्वगतमपि जीवचैतन्यं तत्तदाकारवृत्त्यैवोपरज्यते, न तु विषयैः; असङ्गत्वात्, यथा गोत्वं सर्वगतमपि सास्नादिमद्व्यक्त्याऽभिव्यज्यते, न तु केसरादिमद्व्यक्त्या; यथा वा प्रदीपप्रभा आकाशगन्धरसादिव्यापिन्यपि तान्न प्रकाशयन्ती रूपसंसर्गितया रूपमेव प्रकाशयति तद्वत्;

जगदुपादानाच्छुद्धब्रह्मणो[1] मनस्तादात्म्येन जीवोपरक्तत्वात्तत्रावरणावश्यकत्वाच्च तदभिभवार्थत्वं वृत्तेरक्षतमिति दिक्। **वृत्त्यैवोपरज्यत इति।** भासकतानियामकः सम्बन्धो वृत्त्यैवेत्यर्थः। तेन सम्बन्धान्तरस्य घटादौ सत्वेऽपि न क्षतिः। एवकारेण घटादिभिरुक्तोपरागो व्यवच्छिद्यते, न त्वविद्यादिनेति स्फुटयति—**न तु विषयैरिति।** वृत्तिं विनेति शेषः। वृत्तिविषयैर्वृत्तिद्वारैवोपरज्यते, न तु स्वप्रतिबिम्बत्वादि[2]सम्बन्धेनेति फलितोर्थः। **असङ्गत्वादिति।** असङ्गो ह्ययं पुरुष इत्यादिश्रुत्या सङ्गबोधकमानाभावेन च जीवस्य प्रपञ्चसम्बन्धराहित्यादित्यर्थः। ननु—तर्ह्यविद्याद्यनादिष्वविद्यावृत्तिमनस्तत्परिणामसुखादिषु चापि जीवस्य सङ्गो न स्यात्तत्राह—**यथा गोत्वमित्यादि।** स्वरूपसम्बन्धेन स्वसमवायिसंयोगादिसम्बन्धेन वा सर्वगतमपि गोत्वादि सास्नादिमद्व्यक्तावेवाभिव्यक्तं तथा स्वप्रतिबिम्बाश्रयाविद्यासम्बान्धित्वादिरूपसम्बन्धेन सर्वगतमपि जीवचैतन्यमविद्यादिष्वेव प्रतिबिम्बितत्वादिरूपाभिव्यक्तियुक्तमित्यर्थः। **व्यापिनी**—संयोग[3]समवायादिना संबद्धा। **अप्रकाशयन्ती**—तमोनिवृत्तिद्वारा चाक्षुषविषयानकुर्वती। **प्रकाशयति**—तमोनिवृत्तिद्वारा चाक्षुषविषयं करोति। **तद्वदिति।** यथा गोत्वादिचाक्षुषे सास्नाद्यवच्छिन्न एव चक्षुःसन्निकर्षः कारणम्, रूपचाक्षुषं प्रत्येव प्रभाधीना

---

[1] जगदुपादानब्रह्मणो–ख. जगदुपादानशुद्धब्रह्मणो–ग. [2] प्रतिबिम्बवत्त्वादि-ख. ग. [3] संयोगसंयुक्तसम–क. ख. ग.

SGDF
Sri Gargeshwari Digital Foundation

तमोनिवृत्तिः कारणमिति प्रत्यक्षादिसिद्धम्, तथा जीवस्यान्यत्रासङ्गस्याप्यविद्यामन आदिषु प्रतिबिम्बितत्वादिरूपः सङ्गः श्रुतिप्रत्यक्षादिरूपमानसिद्धः। 'जीवेशावाभासेन करोति माया चाविद्या च स्वयमेव भवति' इति श्रुतिर्हि जीवस्याविद्याप्रतिबिम्बत्वमाह। ईशस्यापि प्रतिबिम्बत्वे आभासेनेति तृतीयाया अभेदोऽर्थः। बिम्बत्वे तु ज्ञाप्यत्वमर्थः। तादात्म्येन जीवस्यैवापेक्षणीयतयेशस्यापि प्रतिबिम्बज्ञाप्यत्वात्। 'यथा ह्येको ज्योतिरात्मा विवस्वानपो भिन्ना बहुधैकोऽनुगच्छन्। उपाधिना क्रियते भेदरूपो देवः क्षेत्रेष्वेवमजोऽयमात्मा' इति। 'रूपं रूपं प्रति रूपो बभूव तदस्य रूपं प्रतिचक्षणाय। स एष इह प्रविष्ट आनखाग्रेभ्य' इत्यादिश्रुतिरपि जीवस्याविद्या[1]प्रतिबिम्बत्वमाह॥

यद्यपि भूतेन्द्रियादिकमपि क्षेत्रपदार्थः व्यवहाररूपाय जीवस्य प्रतिचक्षणाय यत्र प्रतिबिम्बः सोऽपि वीप्सितरूपपदार्थः, क्षेत्रे[2] आनखाग्ररूपावधिप्रतियोगीन्यपि क्षेत्राणि पूर्वश्रुत्यैकवाक्यत्वानुरोधात्, तथापि भूतादिषु जीवस्य प्रतिबिम्बरूपोपरागसत्त्वे सदा भानापत्तेस्तदन्यक्षेत्रमविद्यादिरूपं प्रकृते गृह्यते। एवं 'आभास एव च'। 'अत एव चोपमा सूर्यकादिवत्' इत्यादिसूत्राण्यपि तथा बोधयन्ति। अज्ञोऽहं नेशः सुखी दुःखी इत्यादिप्रत्यक्षमप्यन्यथानुपपत्तिसहकृतं तद्बोधकम्। जीवस्याविद्यामनआदावनुपादानस्य तादात्म्याभावेन प्रतिबिम्बरूपोपरागं विना तद्भानासम्भवात्। वार्तिकमतेऽविद्यादौ स्मरणानङ्गीकारान्न तत्र वृत्त्यावश्यकता। विवरणमते तु नावेदिषामित्यादिस्मरणार्थमविद्यादिविषयिका वृत्तिरावश्यकी। जीवेशभेदस्यानादित्वे तु तत्र न प्रतिबिम्बोऽन्यथा सुषुप्तावपि तद्भानापत्तेः; किंतु तद्गोचरा सविकल्पकवृत्तिरहङ्कारजन्या। न हि सुषुप्त्युत्तरमज्ञानमिव स स्मर्यते; अभावस्य तस्य

[1] स्याविद्यादि–ग. [2] क्षेत्रं–ग.

SGDF
Sri Gargeshwari Digital Foundation

केवलाग्नेर्यदाह्यस्याप्ययःपिण्डादिसमारूढाग्निदाह्यत्ववच्च, केवलचैतन्याप्रकाश्यस्यापि घटादेस्तत्तदाकारवृत्त्युपारूढचैतन्यप्रकाश्यत्वं युक्तम् । एवं चानावृतत्वपक्षे तत्तदाकारवृत्तिद्वारा चैतन्यस्य तत्तदुपरागे तत्तदर्थप्रकाशः । आवृतत्वपक्षे तत्तदाकारवृत्त्या तत्तद्विषयावच्छिन्नचैतन्यावरणाभिभवेन तत्तदर्थप्रकाशः । अन्तःकरणावच्छिन्नचैतन्यरूपत्वे जीवस्यावच्छेदकान्तःकरणतत्तद्विषयाकारवृत्त्या तत्तद्विषयावच्छिन्नचैतन्याभिव्यक्तौ तत्तत्प्रकाशः । यद्यपि प्रकाशकमधिष्ठानचैतन्यं सर्वगतं जीवचैतन्यं चान्तःकरणावच्छिन्नम्, तथापि चैतन्याभेदेनाभिव्यक्तत्वाद्व्यवस्थोपपत्तिः ॥

निर्विकल्पकावेद्यत्वाच्च । तस्य सादित्वं तु वक्ष्यते ॥

नन्वेवमविद्यादौ भासकतानियामकत्वेन क्लृप्तस्य प्रतिविम्बसम्बन्धस्याभावाद्धटादिकं जीवस्य नैव भायात्तत्राह---**केवलाग्नी**त्यादि । यथा अग्निः सर्वगोऽपि तृणायःपिण्डादिनाऽभिव्यक्तो दहति, न त्वनभिव्यक्तः; तथा वृत्त्यभिव्यक्त एव जीवः प्रकाशयतीत्यन्वयव्यतिरेकाभ्यां स्वप्रतिबिम्बवद्वृत्त्युपरागोऽपि भासकतानियामक इति भावः । **चैतन्याभेदेनेति** । अधिष्ठानीभूतस्य ब्रह्मचैतन्यस्य मनोऽनवच्छेदप्रयुक्तो यो जीवाद्भेदस्तदभावेनेत्यर्थः ॥

यत्तु जीवस्य सर्वगतत्वपक्षे स एव विषयप्रकाशक इत्यत्र विषयाधिष्ठानत्वं हेतुरुक्तः, तन्मौढ्यात्; सर्वगतत्वपक्षे आवृतत्वपक्षे[1] उपादानत्वेऽप्यनावृतत्वपक्षे जीवस्यानधिष्ठानत्वात् । यदपि सर्वगतो जीवो वृत्त्येव तद्विषयेणाप्युपरज्यताम्, गोत्वदृष्टान्तस्तु विषमः; गोत्वं हि सास्नादिमद्व्यक्त्या ज्ञायते, ब्रह्म तु वृत्त्या न ज्ञायते, किंतु ज्ञानत्वमापद्यते ।

---

[1] अनावृतत्वपक्षे–ग.

SGDF
Sri Gargeshwari Digital Foundation

प्रभापि न दृष्टान्तः; तस्यास्तमो[1] निवर्तकत्वरूपस्य प्रकाशकत्वस्याकाशेऽपि तुल्यत्वात्। नहि सा आकाशादिसंसृष्टं तमो न निवर्तयतीति, तदपि मौढ्यात्; उक्तमानबलेन वृत्त्यादौ[2] जीवस्य प्रतिबिम्बितत्वेऽपि विषये तत्सत्वे मानाभावात्। न च—सुखं साक्षात्करोमीति व्यवहार इव घटं साक्षात्करोमीति व्यवहारस्तत्र मानम्, सर्वदा तत्प्रसङ्गवारणाय चक्षुरादिसन्निकर्ष एवास्तु घटादिप्रतिबिम्बितत्वहेतुः, अविद्यागतसत्वगुणान्वयाद्घटादेरपि प्रतिबिम्बोपाधितायोग्यस्वच्छतासम्भवः, जीवेशभेदमनस्त्वादाविव रूपादावपि प्रतिबिम्बसम्भव इति—वाच्यम्; चक्षुरादेरिव विनिगमकाभावात्तत्संयुक्तमनसोऽपि सम्प्रयोगो विजातीयत्वेन घटादिगते चित्प्रतिबिम्बे हेतुर्वाच्यः, तथाच घटादिसंप्रयुक्तमनस एव जीवप्रतिबिम्बत्वेन[3] क्लृप्तस्य घटादिभासकतोपपत्तौ घटादेर्जीवप्रतिबिम्बत्वे मानाभावः, रूपपरिमाणाद्यनन्त[4]गुणादिष्वनन्तप्रतिबिम्बकल्पने गौरवं च। न च—यथा त्वन्मते द्रव्यरूपपरिमाणा[5]दिष्वेका मनोवृत्तिस्तथा तेष्वेकमेव मम प्रतिबिम्बमिति—वाच्यम्; अनेकेषु दर्पणेषु मुखस्येवानेकेषु द्रव्यरूपादिषु कल्पितसंसर्गरूपस्य प्रतिबिम्बस्यानेकत्वावश्यकत्वात्, समवायस्येवाऽऽश्रयभेदेन कल्पितसम्बन्धस्य भेदावश्यकत्वात्, रूपं पश्यामीत्याद्यनुभवसिद्धचाक्षुषादिवृत्त्यावश्यकत्वेन तयैव रूपादिप्रतिबिम्बस्यान्यथासिद्धेश्च। विषयगतप्रतिबिम्बहेतुत्वेन त्वया वाच्यस्य विषयसंयुक्तेन्द्रियस्य मन्मते विषयावच्छेदेन मनःसंयुक्तत्वात्, तस्यैव वृत्तिरूपत्वेन चक्षुरादिमनःपरिणामत्वेन च मया स्वीकाराच्च। तथा च सम्प्रयोगरूपा वृत्तिर्न तु तत्कार्येति भावः। गोत्वादिदृष्टान्तस्तु युक्त एव; यथा गोत्वादिप्रत्यक्षे व्यक्ति-

---

[1] तस्यां तमो–ग. [2] मनोवृत्त्यादौ–ग. [3] प्रतिबिम्बवत्वेन–ख. [4] परिणामाद्यनन्त–ख. [5] परिणामा–ख.

SGDF
Sri Gargeshwari Digital Foundation

नन्वियं प्रतिकर्मव्यवस्था नोपपद्यते, तथाहि—स्वसन्निकृष्टेन्द्रियजन्यस्वज्ञानात्पूर्वं घटादेः सत्त्वे प्रतीतिमात्रशरीरत्वव्याप्तकाल्पनिकत्वायोगः। न च—काल्पनिकत्वविशेषः प्रातिभासिकत्वादिरेव तद्व्याप्तः; गौरवात्। न च—प्रतीतिमात्रशरीरत्वाभावेऽपि ज्ञाननिवर्त्यत्वादिनैव कल्पितत्वं भविष्यति; प्रतीतिमात्रशरीरत्वाभावेन ज्ञाननिवर्त्यत्वाभावस्याप्यापाद्यत्वात्, प्रतीते-

---

विशेषः प्रयोजकस्तथा जीवस्य प्रतिबिम्बितत्वे वृत्तिरिति साम्यात्, यथा प्रभा तमोनिवृत्तिद्वारा रूपस्यैव भानव्यवहारे प्रयोजिका न त्वाकाशादेस्तथा स्वप्रतिबिम्बद्वारा जीवो मनस्तत्परिणामादावेव तत्प्रयोजको न घटादाविति साम्याच्च। **गौरवादिति। कल्पितत्वं** मिथ्यात्वं, प्रातीतिकत्वं चावरणशून्यस्वव्याप्यस्वकालकत्वम्। तयोश्च समशरीरत्वान्नैकस्यान्यापेक्षया गुरुत्वम्, प्रत्युत मिथ्यात्वमेव स्वान्यूनसत्ताकाभावप्रतियोगित्वादिघटितत्वाद्गुरु। प्रातीतिकत्वस्य गुरुत्वेऽपि स्वसमानाधिकरणव्याप्यतावच्छेदकान्तराघटितत्वात्तदकिञ्चित्करमिति गौरवोक्तिः परस्य भ्रान्त्यैवेति ध्येयम्॥

यत्तु कर्तृजन्यत्वव्याप्यं यथा न शरीरजन्यत्वम्; किंतु जन्यत्वम्, तथा कल्पितत्वं स्वप्रतीतिव्याप्यस्वकालकत्वरूपस्य प्रतीतिमात्रशरीरत्वस्य व्याप्यम्, न तूक्तप्रातीतिकत्वम्; सति सम्भवेऽधिकवृत्तितावच्छेदकरूपेणैव व्याप्यत्वस्वीकारादिति, तन्न; दृष्टान्ते नीलधूम इव व्यर्थत्वेनैवाव्याप्यत्वात्। न्यूनवृत्तितावच्छेदकरूपेण व्याप्यत्वास्वीकारे गन्धादेर्द्रव्यत्वादिव्याप्यत्वस्य तत्र तत्रोक्तस्योच्छेदापत्तेः। उक्तप्रातीतिकत्वस्य चिन्मात्रेऽपि सत्त्वेन कल्पितत्वाधिकवृत्तित्वाच्च॥

नन्विन्द्रियसन्निकर्षं विना प्रत्यक्षवृत्त्यसम्भवात्प्रपञ्चो न भायात्त्राह—**प्रतीतेरिति।** भानस्येत्यर्थः। तावता प्रपञ्चः सत्योऽस्तु

SGDF
Sri Gargeshwari Digital Foundation

र्विश्वसत्यत्वेन वा मिथ्यात्वेऽपि स्वप्नादिवदिन्द्रियसन्निकर्षनिरपेक्षतया वोपपत्तेः, व्यावहारिकत्वस्यापि भ्रान्तिदैर्घ्यमात्रेणोपपत्तेश्चेति—चेत्, मैवम्; प्रतीतिमात्रशरीरत्वस्य कल्पितत्वं न व्याप्यम्; दृग्दृश्यसम्बन्धानुपपत्त्यादिसहकृतोक्तानुमानात्प्रपञ्चे कल्पितत्वे सिद्धे प्रत्यभिज्ञाबलाच्च स्थायित्वे तत्रैव व्यभिचारात्। न च-शुक्तिरूप्यादिप्रत्यभिज्ञासाम्यं प्रकृतप्रत्यभिज्ञाया इति—वाच्यम्; प्रतीत्यविशेषेऽपि वणिग्वीथीस्थशुक्तिरूप्ययोः परीक्षितत्वापरीक्षितत्वाभ्यां स्थायित्वास्थायित्वरूपविशेषसम्भवात्। तथापि वा परोक्षवृत्तेरिवापरोक्षवृत्तेरपि प्रकाशत्वमस्तु, किं तदुपरक्तचैतन्येनेति—चेन्न; परोक्षस्थलेऽपि परोक्षवृत्त्युपरक्तचैतन्यस्यैव प्रकाशकत्वात्। अथ तत्राप्यपरोक्षैकरसचैतन्योपरागे विषयापरोक्ष्यप्रसङ्गः, न; विषयचैतन्याभिव्यक्तावेव विषयस्यापरोक्ष्यम्। न च परोक्षस्थले तदस्ति; विषयेन्द्रियसन्निकर्षाभावेन विषयपर्यन्तं वृत्तेरगमनात् अन्तरेव तत्र धीसमुल्लासात्। अपरोक्षस्थले तु प्रमातृचैतन्याभेदाभिव्यक्ताधिष्ठानचैतन्योपरागो विषयेऽस्ति, तत्र विषयस्य कर्मकारकत्वात्। न च—वृत्तिगतविशेषादापरोक्ष्यम्; तत्र हि विशेषो विषयकृतश्चेदोमिति ब्रूमः। जातिकृतस्तु विशेषो न सम्भवति; सोऽयमिति प्रत्यभिज्ञायां परोक्षत्वापरोक्षत्वयोः सङ्करप्रसङ्गात्, अव्याप्यवृत्तित्वात्, प्रमात्वादिना सङ्करप्रस-

---

इन्द्रियजमनोवृत्तिं विनापि स्वप्नवत्प्रत्यक्षो वास्त्विति भावः। परीक्षितत्वेति। मानान्तरसंवादाविसंवादेत्यर्थः। व्यावहारिकस्य व्यवहारकालीनतादृशपरीक्षितत्वेन व्यवहारकाले स्थायित्वसिद्धिः। प्रातीतिकस्य तु न मानान्तरेण संवादः। नात्र रूप्यमित्यादिबाधकेन विसंवादश्चेति

SGDF
Sri Gargeshwari Digital Foundation

ज्ञाच्च। किञ्च वृत्तेर्जडत्वादेव न प्रकाशकत्वम्। न च–वृत्तान्तः[1]करणवृत्त्यापि स्वप्रकाशत्वं ज्ञातत्ववदिति—वाच्यम्; स्वप्रकाशात्मसम्बन्धेनैव तस्याः प्रकाशत्वोपपत्तौ तत्स्वप्रकाशत्वे मानाभावात्। किञ्च घटं जानामीत्यनुभूयमानसकर्मकवृत्त्यन्या संवित् घटप्रकाशरूपा घटः प्रकाशत इत्याकारकानुभवसिद्धैव। न च––करोति, यतते, चलति, गच्छतीत्यादावेकार्थत्वेऽपि सकर्मकाकर्मकस्वभावत्वदर्शनादत्राप्येकार्थत्वेऽपि तथा स्यादिति—वाच्यम्; तत्राप्येकार्थत्वाभावात्। अनुकूलयत्नो हि कृञ्धात्वर्थः, यत्यर्थस्तु यत्नमात्रम्, एवं गम्यर्थ उत्तरसंयोगफलकः स्पन्दः, चलत्यर्थस्तु स्पन्दमात्रम्; तथाचैकार्थकत्वे कुत्रापि न सकर्मकत्वाकर्मकत्वव्यवस्था। न च—त्वन्मते

भावः। **स्वप्रकाशात्मेति**। आत्मस्वप्रकाशत्वं वक्ष्यते। भाष्यादिसिद्धा युक्तिश्च दर्शिता। किञ्च सुखादौ वृत्त्यकल्पनलाघवात्स्वप्रकाशात्मैव तत्रापरोक्षता। तथा च घटादावपि स एव सेत्यादि प्रपञ्चितमस्माभिः पूर्वम्। **सकर्मकवृत्तीति**। घटकर्मकवृत्तीत्यर्थः। **घटप्रकाशेति**। घटकर्तृकप्रकाशेत्यर्थः। तथा चैकस्यां क्रियायामेकस्य कर्तृत्वकर्मत्वयोरेकस्याः क्रियायाः सकर्मकत्वाकर्मकत्वयोश्च विरोधादनावृताचिद्रूपा क्रिया घटकर्तृका स[2]त्वापादकाज्ञानशून्या[3] चिद्रूपा ज्ञानक्रिया। तत्राज्ञानांशे घटस्य निरूपकतया विशेषणत्वाद्गौणः कर्मत्वव्यवहार इति मन्मतम्। त्वन्मते तु वृत्तिरेव घटकर्मिका वाच्येति तदन्या क्रिया घटकर्तृकावश्यं वाच्या। सा चानावृतचिद्रूपा, आत्मा सदा प्रकाशत इत्यादौ तथा क्लृप्तत्वादिति भावः। **अनुकूलयत्नः** कालसम्बन्धप्रयोजकयत्नः। **कुत्रापि नेति**। नन्विदमयुक्तम्; आख्यातपदभावना-

---

[1] करणावृत्त्यपि. [2] घटकर्तृका अस–ख. ग. [3] शून्यचिद्रूपा–क. ख. ग.

SGDF
Sri Gargeshwari Digital Foundation

पदयोरेकार्थत्वेऽपि सकर्मकाकर्मकत्वादिव्यवस्थादर्शनात्, न हि यजेतेत्यत्रेव यागेन भावनेत्यत्र यागकरणिका भावना प्रतीयते। एवं तृतीयादिविभक्तिकारकशब्दयोः कारकार्थकत्वेऽपि कारकशब्दार्थस्य तृतीयाद्यर्थकारकान्तरान्वयो न तु तृतीयाद्यर्थस्य। न हि कारकं कारकेण गच्छतीत्यादौ द्वितीयाद्यर्थकारके कारकपदार्थस्येव तृतीयाद्यर्थान्वयोऽस्ति। करोतियतत्योरपि न भिन्नार्थकत्वम्; कृताकृतविभागेनेत्यादिकुसुमाञ्जलौ कृञो यत्नाद्यर्थत्वात्तेन चाख्यातविवरणात्, तस्यापि यत्नोऽर्थ इत्यादिमणौ च तथोक्तत्वादिति, चेन्न; भावनादिपदस्य सिद्धावस्थभाव[1]नादिबोधकत्वेनाख्यातादिसमानार्थत्वाभावात् कारकादिपदस्य शक्तिविशिष्टबोधकत्वेन शक्तिमात्रवाचकतृतीयादिसमानार्थत्वाभावात्। उक्तं हि हरिणा—

साध्यभावस्तु[2] यस्तस्याः स आख्यातनिबन्धनः।
सिद्धभावस्तु यस्तस्याः सन्यङादि[3]निबन्धनः॥

उक्तं च वार्तिके 'कृदन्तेन हि[4] कारकविशिष्टं द्रव्यमुच्यते न तु विभक्त्येव निष्कृष्टा शक्तिः। तथा च कारकं कारकेणेति स्यादि'ति। किञ्चाख्यातपदेनैव कारकवाचिपदानां भट्टमते साकांक्षत्वात्स्वार्थप्रकारकविभक्त्यर्थकारकविशेष्यकबोधे विभक्तेर्निराकांक्षत्वाच्च यागेन भावनेत्यादौ नोक्तान्वयबोधः। घटं यतत इत्यादौ तु न निराकांक्षत्वम्, गमनादौ यतिलक्षणाकाल तस्य साकांक्षत्वात्। एवं च यत्नमात्रस्य यत्यर्थत्वे तत्र कर्मानन्वयः, तस्य धात्वर्थतावच्छेदकफलत्वाभावादेव, उक्तफलविशेष्यकस्वार्थप्रकारकबोध एव यत्यादिसमभिव्याहृतद्वितीयायाः साकांक्षत्वात्। अत एवेच्छत्यादेरपि विषयताप्रयोजकेच्छादि-

---

[1] वस्थाभावना—क. [2] सध्याभावस्तु—ग. [3] साधनादि, सद्यआदि—ख. ग. [4] कृदन्तेन न हि—ग.

SGDF
Sri Gargeshwari Digital Foundation

वाचित्वात्फलवाचकत्वं वैय्याकरणसम्मतम् ॥

अपि च करोतेर्यत्नमात्रवाचित्वे सकर्मकता न स्यात्, धात्वर्थतावच्छेदकफलशालित्वं हि कर्मत्वम्, तदन्वयिस्वार्थकत्वं सकर्मकत्वमिति तार्किकाः। स्ववाच्यव्यापारव्यधिकरणफलवाचित्वं सकर्मकत्वमिति शाब्दिकाः। क्रियाजन्यफलमात्रस्य कर्मतात्वे तदन्वयिस्वार्थकस्य सकर्मकत्वे च यत्यादेरपि सकर्मकतापत्तेः। अन्यथा गम्यादेरपि क्रियामात्रवाचितां किं न रोचयेः। अत एव पाकारम्भात्पूर्वं पाकाय [1]यत इति स्यान्न तु पाकं करोतीति; कालसम्बन्धोपधायककृतेः कृञर्थत्वात्तदानीं पाकनिष्ठकालसम्बन्धानुपधानात्। कृताकृतेत्यादौ तु यत्नत्वमात्रेणाख्यातकरोतिवाच्यता नाभिप्रेता किं त्वनुकूलयत्नत्वेन। तत्र हि फलानुकूलत्वेन करोतिवाच्यता न तु यत्नत्वेन; यत्नार्थकपदसमानार्थत्वापत्तेः। रथो गच्छतीत्यादौ करोत्यर्थकाख्यातस्य मुख्यत्वे बाधकाभावाच्चेत्याशङ्क्य—

कृताकृतविभागेन कर्तृरूपव्यवस्थया।
यत्न एव कृतिः पूर्वापरस्मिन् सैव भावना ॥

यत्नपूर्वकत्वस्य प्रतिसन्धानात्पदादौ कृतत्वव्यवहारात्तदप्रतिसन्धाने सऽहेतुकत्वप्रतिसन्धानप्यङ्कुरादावकृतत्वव्यवहारादाश्रयाथकतृजन्तकर्तृपदस्य कृत्याश्रय एव प्रयोगाद्यत्न एव कृतिर्नानुकूलमात्रम्। सा च परस्मिन् स्वकार्ये पूर्वा कारणीभूतेति भावना भावयतीति व्युत्पत्तेः। तथा च तदर्थककृञा विवरणादाख्यातमपि तदर्थकमेव। अनुकूलयत्नरूपे समुदिते प्रवृत्तमाख्यातं रथो गच्छतीत्यादावेकदेशेऽनुकूले प्रयुज्यते, साङ्गवेदाध्येतृब्राह्मणप्रवृत्तश्रोत्रियपदमिव ब्राह्मणमात्रे, इत्यादिकं मूलटीकाभ्यां प्रतिपादितम् ॥

---

[1] यतत–ख. ग.

SGDF
Sri Gargeshwari Digital Foundation

एवं मणावप्युक्तम्—'तण्डुलक्रयणादिदशायां पचतीति स्यादित्याशङ्क्य यादृशोऽनुकूलताविशेषाश्रयो व्यापारः परेषामर्थः, तादृशो यत्नो ममापीत्याद्यपि चोक्तम् ॥

यत्तु यत्नत्वमेव शक्यतावच्छेदकमनुकूलत्वं तु सम्बन्धतया भातीति पक्षधरादिभिरुक्तम्, तन्न; तथा सति वर्तमानत्वसमानाधिकरणानुकूलत्वस्यैव सम्बन्धत्वापत्त्या वर्तमानत्वादेर्लडाद्यवाच्यतापत्तेः। समवायादीनामेव सम्बन्धत्वेन भानम्, न वर्तमानत्वादेरित्युक्तौ त्वनुकूलत्वादेरपि वाच्यत्वौचित्यात्, करोतेः सकर्मकत्वानुरोधेनानुकूलयत्नार्थतावश्यकत्वे आख्यातस्यापि तदावश्यकत्वाच्च। अन्यथा ग्रामं गच्छतीत्यादावपि संयोगादेः सम्बन्धतापत्तेः। अतएव 'भूवादयो धातव' इति सूत्रे कृञ उत्पादनार्थकत्वमन्यथा यतिवदकर्मकतापत्तेरिति महाभाष्यादावुक्तम्। 'कर्मवत्कर्मणा तुल्यक्रिय' इति सूत्रे चान्यैरुक्तम्—

'कृञोऽकर्मकतापत्तेर्न हि यत्नोऽर्थ इष्यते।
किंतूत्पादनमेवातः कर्मवत्स्याद्यगाद्यपि' ॥
कर्मकर्तर्यन्यथा तु न भवेत्तद्दृशेरिवेति ॥

अस्यायमर्थः, यतः सकर्मकतानुरोधेनोत्पादनं कृञोऽर्थः, अतः कर्मवदित्यादिसूत्रेण यगादेर्विहितत्वात्क्रियते कटः स्वयमेवेति स्यात्। यत्नमात्रार्थकत्वे तु यत्नस्य कर्मस्थत्वाभावात्तन्न स्याद्दृश्यते घटः स्वयमेवेतिवत्। यद्यपि दृश्यादिधातुः कर्मस्थफलं वक्ति सकर्मकत्वात्, तथापि प्राप्य कर्मणि न कर्मवद्भावः। तदुक्तम्—

'निर्वर्त्ये च विकार्ये च कर्मवद्भाव इष्यते।
न तु प्राप्ये कर्मणीति सिद्धान्तोऽयं व्यवस्थित' इति ॥

प्राप्यत्वं तु क्रियाकृतविशेषेणानुपलभ्यमानत्वम्। न ह्ययं घटः

SGDF
Sri Gargeshwari Digital Foundation

परिणतेरकर्मकत्वात्परिणतिविशेषभूताया वृत्तेः कथं सकर्मकत्वमिति—वाच्यम्; एकस्य हि सकर्मकत्वाकर्मकत्वे एकरूपेण विरुद्धे न तु रूपान्तरेणापि; मानाभावात्, यथा स्थितेरकर्मिकाया अप्यगमनत्वेन रूपेण सकर्मकत्वम्; तथा परिणतित्वेन

केन चिद्दृष्ट इति ग्रामोऽयं केनचिद्गत इति वा शक्यं कर्मदर्शनेन ज्ञातुम्, शक्यते तु घटं करोतीत्यादौ निर्वर्त्ये, सोमं सुनोतीत्यादौ विकार्ये च तथा ज्ञातुमिति। किञ्च विशिष्टयत्नत्वं[1] न शक्यतावच्छेदकम्; येन गौरवम्। किंतु बीजादिनाऽङ्कुरः कृत इत्यादौ करोतेः, रथो गच्छतीत्यादावाख्यातस्य चानुकूले निरूढलक्षणायाः क्लृप्तत्वात्। घटं करोतीत्यादौ पचतीत्यादौ च यत्नप्रतीतेस्तयोर्यत्नशक्तत्वात्सकर्मकत्वानुरोधेन तत्र करोतेस्तत्समानार्थकत्वेनाख्यातस्य चानुकूलयत्नबोधकत्वस्य संभवादिति दिक्। **वृत्तेः** वृत्त्यवच्छिन्नचितः। वृत्त्युपहितरूपेण वृत्तिप्रयुक्ताज्ञानाभावोपहितरूपेण वा चितोऽप्युत्पत्तिस्वीकारेण परिणामत्वं बोध्यम्। यथाश्रुतं तु वृत्तेर्मन्मते ज्ञानत्वाभावेन सकर्मकत्वे मानाभावादसङ्गतम्। **स्थितेः** गतिनिवृत्तेः। **अगमनत्वेन** गमनसंसर्गाभावत्वेन। यद्यपि ग्रामं न गच्छति ग्रामस्यागमनमित्यादौ गमनस्यैव सकर्मकत्वम्, तथापि गच्छ गच्छसि चेद्दूरमित्यादौ गम्यर्थस्यागमनस्यापि सकर्मकत्वमक्षतम्। अभावविशेषणीभूते गमने विशेषणीभूतोत्तरसंयोगान्वयित्वेन दूरदेशस्य कर्मत्वम्। यद्वा संयोगाभावानुकूलक्रियात्वमगमनत्वमिह विवक्षितं संयोगाभावरूपफलशालित्वेन तस्य कर्मत्वमिति बोध्यम्। यत्तु स्थितेरगमनत्वेनेव प्रकाशस्यापि ज्ञानत्वेन सकर्मकत्वम्। प्रकाशत्वं च न ज्ञानत्वम्; किंतु तेजोज्ञानान्यतरत्वमिति,

---

[1] विशिष्टं यत्नत्वं–क.

SGDF
Sri Gargeshwari Digital Foundation

रूपेणाकर्मिकाया अपि वृत्तेर्ज्ञानत्वेन सकर्मकत्वं भविष्यतीत्यदोषः। ननु—तर्ह्यतीतः प्रकाशत इति धीर्न स्यात्, न; इष्टापत्तेः, तत्रापि वृत्तिप्रतिबिम्बितचैतन्यसत्वेन प्रकाशत इत्यादिप्रयोगसम्भवाच्च । ननु—यथा अज्ञानविरोधिवृत्तावनुभवत्वं नास्ति किन्त्वन्यत्र; तथा द्वेषविरोधिवृत्तेरन्यत्रेच्छात्वमित्यपि स्यादिति—चेन्न; बाधकसत्वासत्वाभ्यां विशेषात्, अत्रेव तत्र सकर्मकाकर्मकविलक्षणक्रियाननुभवाच्च । यथाच वृत्त्यतिरिक्तभानसिद्धिस्तथा स्वयंज्योतिष्ट्वप्रस्तावे विस्तरेण वक्ष्यामः ।

तन्न; अन्धकारे घटत्वाचप्रत्यक्षवतामिदानीं घटो मे प्रकाशते न प्रभेति व्यवहारादुक्तान्यतरस्य प्रकाशत्यर्थप्रकाशरूपत्वे प्रभायां तादात्म्येन तजोऽन्तरसत्वेन तदभावव्यवहारानुपपत्तेः । **इष्टापत्तेरिति** । आवरणशून्यचित्तादात्म्यस्योक्तधीविषयत्वादिति शेषः । यत्र भाट्टमते प्राकट्यं, तार्किकादिमते च लौकिकप्रत्यक्षं, तत्रैव मन्मते तद्धीस्वीकारादिति भावः । अभ्युपेत्याह—**तत्रापीति** । अज्ञातत्वेन साक्षिभास्यतामात्रेण तादृशबुद्ध्यभावादाह—**वृत्तिप्रतिबिम्भितेति** । **वक्ष्याम इति** । 'तमेव भान्तमनुभाति सर्वम्, अत्राऽयं पुरुषः स्वयंज्योतिः, स्वप्रकाशमहानन्दमात्मैवैतदि' त्यादिश्रुत्यादिना आत्मा स्वप्रकाशज्ञानरूप इति वक्ष्यते ॥

ननु—तमेवेत्यादिश्रुतेः सूर्यादिप्रकाश ईशाधीन इत्यर्थः, सर्वशब्दस्य प्रकृतपरत्वात्, सर्वेभ्यो दर्शपूर्णमासौ, इतिवत्। प्रकृतं च सूर्यादि, त्वन्मते नित्यातीन्द्रियस्य चिदभास्यत्वेन सर्वपदसङ्कोचावश्यकत्वात् । प्रकृतपरेदंशब्दसमभिव्याहारादेतद्वाक्यार्थनिर्णायके 'अपि च स्मर्यते' इति सूत्रे त्वद्भाष्येऽपि 'यदादित्यगतम्' इत्यादिस्मृतेरुदाहृतत्वात् । त्वन्मते ब्रह्मणो भानत्वेन भान्तमिति शतृप्रत्ययस्य तस्येति

SGDF
Sri Gargeshwari Digital Foundation

नन्वस्तु चैतन्यस्य विषयप्रकाशकत्वम्, तथाप्यन्तःकरणस्य देहान्निर्गतिर्न कल्प्या; परोक्षवैलक्षण्याय विषयस्याभिव्यक्ताऽपरोक्षचिदुपराग एव वक्तव्यः, चिदुपरागादौ चापरोक्षवृत्तेस्तदाकारत्वमेव तन्त्रम्; तस्य च तत्संश्लेषं विनापि परोक्षवृत्तेरिव तत्सन्निकृष्टकरणजन्यत्वेनैवोपपत्तिः, न तु प्रभाया इव वृत्तेस्तदावरणनिवर्तकत्वादौ तत्संश्लेषस्तन्त्रम्; नेत्रान्निर्गच्छद्भ्रुवाद्याकारवृत्त्येव स्वसंश्लिष्टनेत्रस्थकज्जलादेर्ध्रुवनेत्रमध्यवर्तिनः

षष्ठ्याः प्रपञ्चे ब्रह्मान्यभानाभावेनानुशब्दस्य चानुपपत्तेरिति—चेन्न; अत्र हीदंशब्दस्यापरोक्षार्थवाचकत्वात्, सर्वशब्देनापि तादृशयावदर्थो बोध्यते। अथ वेश्वरं प्रति नित्यातीन्द्रियस्यापि भासमानत्वादिदंशब्दो बुद्धिस्थमात्रपरः। उभयथापि सर्वशब्दो न प्रकृतसूर्यादिपरः; इदंशब्देनैव तल्लाभे तद्वैयर्थ्यापत्तेः। तस्मादिदंशब्दस्य प्रकृतसूर्यादिपरत्वशङ्कानिरासाय सर्वपदमिति भासमानं यावदुभाभ्यां[1] लभ्यते। 'अपि च स्मर्यत' इति सूत्रे तु 'न तद्भासयत' इत्यादिकं 'यदादित्यगतमि'त्यादिकं चोदाहृतम्। तच्च न प्रकृतविरुद्धम्; आद्येन ब्रह्मणोऽन्याभास्यत्वम्, अन्त्येन ब्रह्मण एव भासकत्वं प्रतिपादितमिति, भामत्यां व्याख्यातत्वात्। शतृप्रत्ययादिकमपि न विरुद्धम्; प्रभां भान्तीमनुभाति घटादिकम्, तस्या भासा घटादि भातीतिवदग्निं दहन्तमनुदहत्यय इत्यादिवच्चोपपत्तेः। उक्तं च—ब्रह्मास्ति भातीत्यादौ लकारः साधुत्वार्थ इति ध्येयम्॥

तस्यास्तदाकारापरोक्षवृत्तेः। **संश्लेषस्तन्त्रमिति**। संश्लेषः संश्लेषमात्रं मात्रपदाद्विषयत्वव्यवच्छिन्नसंश्लेषलाभः। तेन कज्जलादौ

[1] उभाभ्यां पदाभ्यां—ग.

SGDF
Sri Gangeshwari Digital Foundation

परमाण्वादेश्चापरोक्षत्वापातादिति चेत्, न; विषयेष्वभिव्यक्ताचिदुपरागे न तदाकारत्वमात्रं तन्त्रम्; परोक्षस्थलेऽपि प्रसङ्गात्, किन्तु तत्संश्लेषः; प्रभाया विषयसन्निकृष्टतेजस्त्वेनावरणाभिभावकत्वदर्शनात्तैजसस्य मनसोऽप्यज्ञानरूपावरणाभिभवाय तत्संश्लेष आवश्यकः, ध्रुवादिदेहमध्यवर्तिपरमाण्वादावतिप्रसङ्गस्तु तदाकारत्वप्रयोजकसामग्रीविरहादेव परिहरणीयः, अन्यथा इन्द्रियसन्निकर्षादेर्विद्यमानत्वात्परमाण्वाद्याकारताया दुर्निवारत्वापत्तेः। तस्मात्प्रभा (वद्) विशेषान्वयव्यतिरेकाभ्यां यत्कॢप्तं सन्निकृष्टतेजस्त्वेनावरणाभिभावकत्वम्, तस्य तदाकारत्वरूपविशेषापे-

---

वृत्त्यविषयेऽप्यापत्तिर्युज्यते । **अपरोक्षत्वापातादिति ।** ध्रुवाद्याकारवृत्तेः संयोगादिरूपसंश्लेषस्य तत्रापि सत्वादिति शेषः । उक्तवृत्तेः कज्जलादिसंयोगे मानाभावात्संयुक्तसंयोगादेः संश्लेषस्यावरणानिवर्तकत्वादयुक्तमेतत्परोक्तम् । परन्तु घटाद्याकारवृत्तेः रूपादाविव रसादावपि संयुक्तसमवायादिसत्वादापरोक्ष्यापत्तिः । न च—विषयत्वसमानाधिकरणः संश्लेषो निवर्तकः[1] सम्बन्ध इति—वाच्यम्; अपरोक्षवृत्तिविशेषत्वस्यैव निवृत्तितन्त्रत्वौचित्यादिति ध्येयम् । **प्रसङ्गादिति ।** अपरोक्षवृत्तिविषयता नावरणनिवृत्तौ तन्त्रम्; वृत्तावपरोक्षत्वजात्यनङ्गीकारस्योक्तत्वात्, शाब्दापरोक्षवृत्तौ तदसम्भवादपरोक्षविषयकत्वस्य चावरणनिवृत्तेः[2] पूर्वमसत्वात् । ननु—विषयत्वसंश्लेषोभयसम्बन्धेन निवर्तकत्वे विशेषणविशेष्यभावस्याविनिगमत्वाद्गौरवाच्च लाघवादपरोक्षत्वजातिं प्रकल्प्य तया वृत्तिर्विषयत्व[3]मात्रसम्बन्धेन निवर्तिकास्तु. अपरोक्षविषयकशाब्दवृत्तावपि तादृशजातिरननुगतकारणनियम्यास्तु, तत्राह—**तस्मादिति । सन्निकृष्टतेजस्त्वेनेति ।** सन्निकर्षसम्बन्धेन तेजस्त्वे-

---

[1] निवर्तकतावच्छेदकः—ग. [2] निवृत्तिपूर्वं—क—ख. ग. [3] वृत्तिविषयत्व—ग.

SGDF
Sri Gargeshwari Digital Foundation

क्षायामपि न त्यागः। न हि पृथिवीत्वगन्धत्वादिना कार्यकारणभावे आवश्यके अनित्यगुणत्वद्रव्यत्वादिना तत्त्यागः।

नेत्यर्थः। **न त्याग इति।** यद्विशेषयोः कार्यकारणता तत्सामान्ययोरपीति न्यायात्तमोऽज्ञानान्यतरनिवृत्तौ संयोगादिसम्बन्धेन तेजस्त्वेन हेतुत्वम्। न चैवमालोकसंयोगे सतीन्द्रियसन्निकर्षे चासति शाब्दादिवृत्त्या घटादा[1]वप्यज्ञानसामान्यनिवृत्तिः स्यात्, चक्षुःसन्निकर्षे सत्यालोकसंयोगे चासति तमोनिवृत्तिः स्यादिति—वाच्यम्; विषयत्वं संयोगाद्यन्यतमं चेत्युभयसम्बन्धेन वृत्तिज्ञानमज्ञाननाशकं संयोगाद्यन्यतम सम्बन्धेन प्रभा तमोनाशिकेत्यस्यापि स्वीकारात्। अन्यतमत्वं चाखण्डं स्वरूपत एव निवेश्यत इति न गौरवम्। एवं चापरोक्षविषयकशाब्दवृत्तावपरोक्षत्वजातिनियामककल्पनं तादृशजातिकल्पनं चाप्रामाणिकगौरवपराहतम्। नाड्यादिगोचर शाब्दादिवृत्तेर्नाड्यादौ संयोगसत्वे मानाभावः; तस्य फलबलकल्प्यत्वान्नाड्यादिविषयकवृत्तिकालेऽन्यत्र मनःस्थितिकल्पनात्। वस्तुतस्तु ऐन्द्रियकवृत्तेर्यत्र विषयत्वं तत्रावच्छेदकत्वमपि स्वीक्रियते, विनिगमनाविरहेण द्वयोरपि सन्निकर्षादिकार्यतावच्छेदकसम्बन्धत्वादित्यादेरुक्तत्वात् परोक्षवृत्तेश्च स्वविषयावच्छिन्नत्वे मानाभावात्। स्वावच्छेदकावच्छिन्नविषयकाज्ञानत्वसम्बन्धेन वृत्तिज्ञानं हेतुस्तूलाज्ञानवृत्तिप्रतियोगितासम्बन्धेन नाशं प्रत्युच्यते। मूलाज्ञानवृत्तिप्रतियोगितासम्बन्धेन नाशं प्रति तु स्वपरिणामिमनःपरिणामित्वसम्बन्धेन विजातीयवृत्तिर्हेतुरित्युक्तम्। न चापरोक्षवृत्तेर्घटादिविषयकत्वं विनेच्छादिहेतुत्वासम्भवो विषयतादि सम्बन्धेन सन्निकर्षादिकार्यत्वे विनिगमक इति वाच्यम्; असत्वापाद काज्ञानाभावस्यैव तद्व्यक्तित्वेनेच्छादिहेतुत्वात्, अन्यथा सुखादौ वृत्त्य-

---

[1]वज्ञान—ग.

SGDF
Sri Gargeshwari Digital Foundation

अतएव तदितरहेतुसाकल्ये सति घटचक्षुःसन्निकर्षस्यैव घटानुभवजनकत्वम्, न तु घटमनःसन्निकर्षस्य, तद्विलम्बेन तद्विलम्बाभावादिति निरस्तम्; आवरणभङ्गे सन्निकृष्टतेजःकरणत्वावधारणेन तस्याप्यावश्यकत्वात्। न च—स्वाशनप्रत्यक्षे चक्षुरादिवन्नियतगोलकद्वाराभावेनान्तःकरणनिर्गत्ययोगादावरणाभि-

---

विषये इच्छाद्यसम्भवात्। **घटचक्षुरिति।** घटेन्द्रियेत्यर्थः। **घटानुभवेति।** घटप्रत्यक्षेत्यर्थः। **जनकत्वं** प्रयोजकत्वम्। **करणत्वावधारणेन** सामान्यतः सन्निकर्षसम्बन्धेन तेजस्त्वेन, विशेषत उक्तसम्बन्धेन वृत्तिज्ञानत्वेन कारणत्वावधारणेन। यद्यपि चाक्षुषवृत्तिस्थले आलोकादितेजः सम्भवति, तथापि रासनादिवृत्तिस्थले तदभावात्, कार्यान्यथानुपपत्त्या तेजस्त्रसरेण्वादिसन्निकर्षकल्पनायाश्च[1]ानुगतनियामकाभावेनासम्भवात्, तावतापि वृत्तिसंश्लेषरूपविशेषप्रयोजकानिर्वाहादिन्द्रियसन्निकर्षरूपानुगतकारणनियम्यो वृत्तिज्ञानरूपतेजःसन्निकर्ष एवावरणाभिभवद्वारा साक्ष्युपरागघटनद्वारा वा विषयसाक्षात्कारे प्रयोजक इति भावः। वस्तुतस्तु मनसोऽणुत्वमते विषये संश्लेषो यद्यपि न सम्भवति; मरणपर्यन्तं तस्य देहात्यागात्, तथापि तस्य महत्त्वमते तत्सम्भवाच्चाक्षुषादिवृत्तौ चक्षुरादेर्मनसो वा सन्निकर्षो विजातीयत्वेन हेतुरित्यत्र विनिगमकाभावाद्विषयमनःसन्निकर्षश्चाक्षुषादिस्थले आवश्यकः, विषयेन्द्रियसन्निकर्षस्य च तत्र न हेतुता; मानाभावात्। न चैवं—प्रत्यक्षादिसिद्धमनःसान्निकर्षेणैव चाक्षुषादिनिर्वाहे तदन्यथानुपपत्त्या कारणत्वेन चक्षुरादि न कल्प्येतेति—वाच्यम्, तदन्यथानुपपत्त्या तत्कल्पनाभावेऽपि श्रुत्यादिसिद्धस्य चक्षुरादेर्मनस इव करणत्वस्य विनिगमका-

---

[1] कारण—ग.

SGDF
Sri Gangeshwari Digital Foundation

भवानुपपत्तिरिति वाच्यम्; सर्वत्र तत्तदिन्द्रियाधिष्ठानस्यैव द्वारत्वसंभवात् । न चान्तःकरणवृत्तित्वाविशेषादिच्छाद्वेषादिरूपवृत्तयोऽपि देहान्निर्गत्य विषयसंसृष्टा भवन्तीति कथं न स्वीक्रियत इति—वाच्यम्; आवरणाभिभावकतेजस्त्वस्य तत्प्रमापकस्य ज्ञानवत्तत्राभावात् । ननु घटप्रकाशकं चैतन्य-

---

भावेन स्वीकारात् । अतएव विवरणे चाक्षुषादिकरण[1]त्वेन चक्षुरादेरनुमानं दूषयित्वा श्रुत्यादिना तत्सिद्धिरुक्ता । **तत्तदिन्द्रियेति ।** स्वाधिष्ठानगोलकमेव तत्तदिन्द्रियाणां स्वकरण[2]मनोवृत्तिनिर्गमे द्वारमिति त्वगिन्द्रियस्य 'ओषधिवनस्पतयो लोमानि भूत्वा त्वचं प्राविशन्' इति श्रुतेस्त्वगेवाधिष्ठानम्, तत्करणकमनोवृत्तौ द्वारमित्यर्थः । 'त्वगिन्द्रियस्य साक्षादाधारो देह' इति विवरणे देहलक्षणोक्तेर्देहव्यापकः पवनविशेषस्त्वगिन्द्रियमिति तार्किकाद्युक्तेश्च देह एव वा तदधिष्ठानं तथेति बोध्यम् । **संभवादिति ।** तत्तदिन्द्रियकरण[3]वृत्तौ तत्तदिन्द्रियमनोयोगहेतुत्वस्य सर्वैः स्वीकारात् । तादृशयोगस्य चान्यावच्छेदेनेव विषयसंयुक्तेन्द्रियभागावच्छेदेनापि मनोमहत्त्वमते विनिगमकाभावेनावश्यकत्वात्, त्वाचवृत्तिं प्रति त्वगिन्द्रियस्येव मनसोऽपि सन्निकर्षस्य विनिगमकाभावेन हेतुत्वादिन्द्रियसंयुक्तविषयभागावच्छिन्नसंयोग एव मनसो विषये निर्गम इति स्थितेः त्वगिन्द्रियगोलकद्वारा मनोनिर्गमः सम्भवतीति भावः । **आवरणाभिभावकतेजस्त्वेनेति ।** विषयसंयुक्तेन्द्रियसंयुक्तमनस्त्वस्येत्यपि बोध्यम् । **तत्प्रमापकस्य ।** विषयसंसृष्टत्वप्रमापकस्य । **ज्ञानवदिति ।** चाक्षुषादिवृत्तिज्ञानरूपेण परिणतमनसीवेत्यर्थः । **अत्रेदं बोध्यम्**—विषयतासम्बन्धेन चाक्षुषादौ चक्षुरादेः सन्निकर्षो हेतुर्न तु मनस इति पररीत्यङ्गीकारेऽपि नास्माकं क्षतिः;

---

[1] कारण–ग. [2] [3] करणक–ग.

SGDF
Sri Gargeshwari Digital Foundation

मुपदेशसाहस्र्यनुसारेण घटाकारधीस्था चिद्वा, परागर्थप्रमेयेष्वित्यादिवार्तिकोक्तरीत्या धीप्रतिबिम्बितचैतन्याभेदाभिव्यक्तविषयाधिष्ठानचैतन्यं वा, नाद्यः; आध्यासिकसंबन्धस्यातन्त्रतापातात्। न द्वितीयः; आवश्यकेन विषयसंश्लिष्टवृत्तिप्रतिबिम्बितचैतन्येनैव तदज्ञाननिवृत्तिवत्तत्प्रकाशस्याप्युपपत्तौ किं विषयाधिष्ठानचैतन्याभिव्यक्तिकल्पनेनेति—चेन्न; प्रकाशकं तावदधिष्ठानचैतन्यम्। तच्चाध्यासेन विषयैः सह

इन्द्रियमनोयोगस्य चाक्षुषादिहेतुत्वावश्यकत्वात्। अन्यावच्छेदेनेव विषयसंयुक्तभागावच्छेदेनापीन्द्रिये मनःसंयोगस्य विनिगमकाभावेन मनोमहत्वमते आवश्यकत्वाच्चाक्षुषादिवृत्तेर्विषयसंश्लेषो दैववशसंपन्न इति। **उपदेशसाहस्रीति**।

घटैकाकारधीस्था चित् घटमेवावभासयेत्।
घटस्य ज्ञातता ब्रह्मचैतन्येनावभास्यते॥

इति रीतीत्यर्थः। **परागर्थेति**।

'परागर्थप्रमेयेषु या फलत्वेन संमता।
संवित्सैवेह मेयोर्थो वेदान्तोक्तिप्रमाणतः॥

इति वार्तिकम्। **प्रकाशस्य** भातीत्यादिव्यवहारस्य। सर्वगतजीवस्यानधिष्ठानत्वपक्षे आवरणाभावस्य स्वतः सिद्धत्वादावरणाभिभवं विनापि भासकत्वं युक्तं न तु तस्याधिष्ठानत्वपक्षे मनोऽवच्छिन्नचिद्रूपतापक्षे वा; प्रकाशस्य दीपादेरावृतस्याप्रकाशकत्वदर्शनादावृतचितः प्रकाशकत्वासम्भवादित्याशयेनाह—**न प्रकाशकमित्यादि**। **प्रकाशकं** प्रकाशत इति व्यवहारप्रयोजकम्। **अधिष्ठानचैतन्यम्** अधिष्ठानाभिन्नचैतन्यम्। **तच्च** अधिष्ठानं च। **अध्यासेनेति**। साक्षात्सम्बन्धान्वय्यध्यस्ततादात्म्येन सम्बद्धमित्यर्थः। तथाचाद्यपक्षे प्रकाशकस्य जीवस्य

SGDF
Sri Gangeshwari Digital Foundation

साक्षात्सम्बद्धं, प्रकाशस्य च स्वयं भासमानस्य स्वसम्बद्धसर्वभासकत्वमपि क्लृप्तमेव ; एतदनभ्युपगमे कल्पनान्तरगौरवापत्तेः । तच्चानभिव्यक्तं निर्विकल्पकरूपमाच्छादितदीपवन्न प्रकाशकमिति तदभिव्यक्तिरपेक्षिता । तच्च परोक्षस्थले वृत्त्यवच्छेदेनैवाभिव्यज्यते । अपरोक्षस्थले तु वृत्तिसम्पर्कादावरणाज्ञानाभिभवे विषयोऽ[1]भिव्यज्यते ; वृत्तेर्विषयपर्यन्तत्वात् । न च परोक्षस्थलेऽप्येवं प्रसङ्गः ; द्वाराभावेनान्तःकरणनिर्गत्यभावात् । ननु—वृत्तेस्तदाकारत्वं न तावत्तद्विषयत्वम् ; त्वयैव निरासात्,

---

विषयेष्वाध्यासिकसम्बन्धाभावेऽपि न क्षतिः । यत्र विषयोऽध्यस्तस्तस्य प्रकाशकाभेद इत्युक्तनियमाप्रच्यवाद्द्वितीय[2]पक्षोऽपि युक्त इत्याह—**प्रकाशस्येति** । भातीतिव्यवहारविरोधिनाशकस्येत्यर्थः । तत्वं च तमोनाशकत्वादालोकस्येवाज्ञानाभिभावकवृत्त्यवच्छिन्नत्वाच्चितोऽपीति भावः । **स्वयं भासमानस्योक्त**विरोधिशून्यस्य । एवकारः शेषः । **कल्पनान्तरेति** । प्रयुक्तेति शेषः । भातीति व्यवहारे विषयसंश्लिष्टवृत्तिप्रतिबिम्बितचितः प्रयोजकत्वे घटादौ तत्सम्भवति न तु सुखादावित्यनावृतचितोऽपि तद्वाच्यमिति कल्पनान्तराद्गौरवम् । अथ चावृतप्रकाशस्य [3]भासकत्वेऽपूर्वकल्पनाद्गौरवमिति भावः । नन्वभिव्यक्तचितः प्रकाशकत्वे घटादेरज्ञातत्वेन साक्षिभास्यता न स्यात्तत्राह—**तच्चेति** । प्रकाशकचैतन्यं चेत्यर्थः । **निर्विकल्पकरूपमिति** । तार्किकादिसिद्धनिर्विकल्पकतुल्यमित्यर्थः । तुल्यता च जानामीति व्यवहारा[4]विषयत्वेन । **आच्छादितेति** । यथा सूक्ष्मवस्त्राच्छादितो दीपोऽन्धतमसविरोध्यप्यवतमसाविरोधित्वाद्द्रव्यत्वादिरूपेण व्यवहारस्य प्रयोजको न तु रूपपरिमाणविशेषवत्त्वेन व्यवहारस्य, तथा चैतन्यमावृतमज्ञातत्वेन व्यवहारं

---

[1] विषये. [2] प्रच्यवः । द्वितीय—ग. [3] चावृत्तप्रकाशस्य—ग. [4] व्यवहार—ग.

SGDF
Sri Gargeshwari Digital Foundation

नापि तस्मिंश्चैतन्योपरागयोग्यतापादकत्वं, तदज्ञानाभिभावकत्वं वा; उभयोरपि तदाकारत्वप्रयोज्यत्वेन तत्त्वायोगात्, नापि घटादिवत् पृथुबुध्नोदराद्याकारत्वम्; साकारवादापातात्, संस्थानहीनजातिगुणादिवृत्तेर्निराकारत्वप्रसङ्गाच्च, घटपटाविति समूहालम्बेन विरुद्धनानाकारत्वापत्तेश्चेति चेन्न; अस्तीत्यादितद्विषयकव्यवहारप्रतिबन्धकाज्ञाननिवर्तनयोग्यत्वस्य, तत्सन्निकृष्टकरणजन्यत्वस्य

प्रयोजयति न ज्ञातत्वेनेति भावः । **आपन्नजाड्येति ।** प्रमातृचैतन्यानुपरागेत्यर्थः । **आपादकेति ।** सम्पादकेत्यर्थः । तस्मिंश्चैतन्यस्य भासकतानियामको यः सम्बन्धस्तद्घटकत्वम् । **अभिभावकत्वम्** अभिभवप्रयोजकतावच्छेदकरूपवत्त्वम् । **प्रयोज्यत्वेन** घटितत्वेन । स्वप्रतिबिम्बवद्वृत्त्याकारत्वस्यै[1]वोक्ताभिभवप्रयोजकतावच्छेदकत्वात्तदाकारत्वस्योक्तरूपत्वे आत्माश्रय इति भावः । **अस्तीत्यादिना** सन्निति व्यवहारो ग्राह्यः । **प्रतिबन्धकेति ।** अनुत्पत्तिनियतेत्यर्थः । तेनाज्ञानाभावत्वेन कारणत्वाभावान्नासङ्गतिः । अस्तीत्यादिव्यवहारेऽसत्वापादकाज्ञानाभावविशिष्टचैतन्यस्य विषयतया तादृशाज्ञानस्योक्तव्यवहारानुत्पत्तिनियतत्वमिति भावः । असत्वापादकाज्ञाननिवृत्तिप्रयोजकतावच्छेदकं यद्वृत्तिनिष्ठं विषयप्रतियोगिकं रूपं तद्वत्त्वमिति पर्यवसितम् । **तत्सन्निकृष्टेति ।** परोक्षस्थलेऽपि धूमादिज्ञानेन वह्न्यादिनिरूपितव्याप्यत्वसम्बन्धिज्ञानत्वादिकं वह्न्यादिसन्निकृष्टत्वम् । यद्यपि सम्बन्धित्वं सामान्यतोऽतिप्रसक्तम्; व्याप्यत्वाद्यप्रकारकज्ञानेऽपि कस्यचित्सम्बन्धस्य सत्वात्, तथा व्याप्यत्वप्रकारकधीनिष्ठतत्तदसाधारणसम्बन्धानामन्यतमत्वेनाखण्डेन निवेशान्न दोषः । अतएव रूपाद्याकारचाक्षुषादे

---

[1] कारसंबन्धत्वात्तदाकारवृत्तिज्ञानस्यै—ग.

SGDF
Sri Gargeshwari Digital Foundation

वा तदाकारत्वरूपत्वात्। तदुभयं च स्वकारणाधीनस्वभावविशेषात्।

रसादिसन्निकृष्टकरणजन्यत्वेऽपि न क्षतिः। रूपादि[1]सन्निकृष्टकरणजन्यत्वस्यैव चाक्षुषादौ रूपाद्याकारत्वस्य विशिष्य निर्वाच्यत्वेन रूपादिसन्निकर्षाणामेवान्यतमत्वेन निवेशात्। एवमसत्वापादकाज्ञानानिवर्तकतावच्छेदकमपि तत्तद्विषयसन्निकृष्टकरणजन्यत्वानामन्यतममेव। जन्यत्वं च जन्यतावच्छेदकीभूतं तत्तद्विषयसान्निकृष्टकरणाविशिष्टवृत्तिज्ञानत्वम्। तेन तस्य फलोपधानरूपत्वेन नाननुगमः[2]। अवच्छेदकस्य तदाकारत्वघटितत्वेन च नात्माश्रयः। यस्य यस्य विषयस्य येन येन ज्ञानेनासाधारणव्यवहारः तत्तज्ज्ञानमात्रनिष्ठानां तत्तद्विषयीयसंबन्धानामन्यतममेव तत्तज्ज्ञानेषु तत्तद्विषयाकारकत्वमिति लक्षणयोः पर्यवसितोऽर्थः। वस्तुतो 'वृत्तिज्ञानविषययोराकारताख्यः कश्चिदनिर्वाच्यः सम्बन्धोऽङ्गीक्रियते' इत्याचार्यैरेव वक्ष्यमाणत्वात्स एवात्राभिप्रेतः। तस्य च तत्तत्कारण[3]सन्निकर्षजन्यतावच्छेदकत्वेनोक्ताज्ञाननिवर्तकतावच्छेदकत्वेन च सिद्धिरिति ज्ञापयितुं द्वैविध्येनोक्तिरिति ध्येयम्॥

ननु—जन्यत्वस्य योग्यत्वस्य च फलोपधानरूपत्वे[4]ऽननुगमात्तत्स्वरूपयोग्यतावच्छेदकरूपत्वं[5] प्रकृते वाच्यम्, तस्य चान्यस्यापरिचयादुक्तजन्यत्वयोग्यत्वे एव तथा वाच्ये इत्यात्माश्रयः, तत्राह— **तदुभयं चेति। स्वकारणाधीनस्वभावविशेषात्।** स्वकारणीभूतो यः तत्तद्विषयकरणसम्बन्धस्तद्धटितस्वभावविशेषनिरूप्यं तत्तद्विषयकरणसम्बन्धविशिष्टज्ञानत्वमेवोक्तनिवृत्तियोग्यतावच्छेदकमुक्तजन्यतावच्छेदकं च। ज्ञाने उक्तसम्बन्धस्य वैशिष्ट्यमव्यवहितोत्तरत्वादिरूपमिति भावः। द्वितीयव्याख्यायां तदुभयात्मक आकाराख्यः सम्बन्धः स्ववृत्तिज्ञानरूपं

---

[1] रूप्यादि–ग. [2] नानुगमः–क. ग. [3] करण–ग. [4] रूपत्वेना–ग.
[5] रूपवत्वं–ग.

SGDF
Sri Gargeshwari Digital Foundation

न चात्माश्रयः; निवृत्तिजननस्वरूपयोग्यतया फलोपधानस्य साध्यत्वेन स्वानपेक्षणात्। ननु—दृशि विषयाध्यासस्वीकर्तुर्जीवचैतन्यं वा विषयदृक्, ब्रह्मचैतन्यं वा। नाद्यः; जीवेऽवच्छिन्नचित्स्वरूपे कल्पितेऽध्यासायोगात्। न च--विषयदृक् जीवचैतन्यमेव, अध्यासस्तु ब्रह्मचैतन्य इति—वाच्यम्; दृश्ययोरेवाध्यासिकसम्बन्धापत्तेः, अध्यस्ताधिष्ठानयोरुभयोरपि दृग्भिन्नत्वात्। अतएव न द्वितीयोऽपि; ब्रह्मणोऽपि कल्पितत्वेन तत्राध्यासायोगाच्च। न च—शुद्धचैतन्यमेकमेव, तदेवाधिष्ठानम्, तत्रावच्छेदकमविद्यादिकं

यत्कार्यं तदधीनस्वभावविशेषात्तत्कारणाधीनस्वभाव[1]विशेषाच्चेत्यर्थः। कारणस्य स्वभावोऽयं यदनुगतधर्म[2]स्वंजन्यतावच्छेदकं कल्पयति, कार्यस्याप्ययं स्वभावो यदनुगतधर्म[3] स्वकारणतावच्छेदकं कल्पयतीति तद्बलादुक्ताकारसिद्धिरिति भावः। ननूक्तनिवृत्तिजनकतावच्छेदकात्मकतदाकारकत्वेनोक्तनिवृत्तिजनकत्वे आत्माश्रयः; उक्तजनकतायास्त[3]द्घटितस्यावच्छेदकत्वादुक्तनिवृत्तौ तद्घटितस्य प्रयोजकत्वाच्चेत्याशङ्क्य निरस्यति—**न चेति। स्वरूपयोग्यतया** विषयकरणसम्बन्धानामुक्तान्यतमरूपेणाकाराख्यविषयसम्बन्धविशिष्टवृत्तिज्ञानत्वेन वा। **फलोपधानस्य** निवृत्तिजनकत्वस्य। **साध्यत्वेन** अवच्छेद्यत्वेन। **फलोपधानस्य** निवृत्तिरूपफलसम्बन्धस्य साध्यत्वेन प्रयोज्यत्वेनेति वा। **स्वानपेक्षणात्।** उक्तजनकतायां स्वघटितस्यावच्छेदकतयानपेक्षणात्। उक्तनिवृत्तौ स्वघटितस्य प्रयोजकत्वेनानपेक्षणाच्च। **ब्रह्मण** ईश्वरस्य। **अविद्यादिकं** अविद्याप्रतिबिम्बत्वादिकम्[4]।

---

[1] स्वस्य कारणस्वभावविशेषाधीनस्य कार्यस्य स्वभाव–ग. [2] धर्मः -ग.
[3] जनकतायां–त. ग. [4] अविद्याप्रतिबिम्बबिम्बित्वादिकम्–ख. ग.

SGDF
Sri Gargeshwari Digital Foundation

नाधिष्ठानकोटौ प्रविशति, तदेव च जीवशब्देन च व्यपदिश्यते उपाधिविशेषात्, तथाच जीवचैतन्यस्य दृक्त्वेऽपि दृश्याध्यासो नानुपपन्न इति—वाच्यम्; शुद्धचैतन्यस्यासंसारमावृतत्वेन जगदान्ध्य प्रसङ्गादिति—चेन्न; मूलाविद्यानिवृत्त्यभावेन सर्वत आवरणाभिभवाभावेऽपि घटाद्यवच्छेदेनावरणाभिभवादान्ध्यविरहोपपत्तेः। ननु—तर्हीदानीमपि ब्रह्मस्फुरणे चरमवृत्तिवैय्यर्थम्; अधिकभागेऽपि[1] तस्य स्फुरणात्, न ह्यखण्डार्थवेदान्तजन्यायां वृत्तौ भावोऽभावो वा विशेषणमुपलक्षणं वा प्रकारः प्रकाशत इति—चेन्न; उपाध्यविषयकब्रह्मस्फुरणस्य चरमवृत्तिप्रयुक्तत्वेन तस्याः साफल्यात्, प्रकारास्फुरणं तु तस्या भूषणमेव; इदानीन्तनस्फुरणस्य सप्रकारकत्वेनोपाधिविषयकत्वात्। 'एकधैवानुद्रष्टव्यम्' इत्यादिश्रुतिबलात् स्वसमानविषयज्ञानादेव चाज्ञाननिवृत्तेरखण्डचिन्मात्रज्ञानस्यैव मोक्षहेतुत्वावधारणात्। न चान्तःकरणावच्छिन्नचैतन्यस्य जीवत्वे सुषुप्तिदशायां तदभावेन

हेतुत्वावधारणादिति। नन्विदमयुक्तं, सप्रकारकज्ञानस्यैव संशयादिविरोधित्वात्, एकधैवेत्यादिश्रुतिर्ज्ञानानन्दादिविरोध्यज्ञानदुःखादिमत्तया ब्रह्मज्ञानं न मोक्षहेतुरित्येतत्परा। अन्यथा प्रकारार्थधाप्रत्ययासङ्गतेः। निवर्तकत्वे तु निवर्त्याज्ञानसमानविषयकत्वमपेक्ष्यते, न तु तदनतिरिक्तविषयकत्वम्; घटपटाविति समूहालम्बनस्य घटाज्ञानानिवर्तकतापत्तेरिति चेत्, भ्रान्तोऽसि; निष्प्रकारकस्यापि व्यावृत्ताकारतया संशयादिविरोधित्वम्। सा च द्वेधा विशेषणादुपलक्षणाद्वेत्यादिकं हि पूर्वमाचार्यैरुक्तम्, उपपादितं च नितरामस्माभिः। एकधेत्यादिश्रुतिस्तु नोक्तार्थपरा; तादृशज्ञानस्य मोक्षहेतुत्वाप्रसक्तेः, किंतु न्यायसिद्धस्याज्ञानतत्कार्याविषयकज्ञानमोक्षहेतुत्वस्यानुवादरूपा सती विधेयाखण्डात्मस्तुतिपरा। अन्यथा

---

[1] भानेऽपि.

SGDF
Sri Gargeshwari Digital Foundation

कृतहान्याद्यापत्तिरिति—वाच्यम्; तदाप्यस्य कारणात्मनावस्थानात्, स्थूलसूक्ष्मसाधारणस्यान्तःकरणस्योपाधित्वात्। 'तदापीतेः संसारव्यपदेशात्' इत्यस्मिन् सूत्रे चायमर्थः स्पष्टतरः। न च वृत्त्युपरक्तत्वं चैतन्यस्य न तत्प्रतिबिम्बितत्वम्; दर्पणे मुखस्येवानुद्भूतरूपेऽन्तःकरणे शब्दान्यप्रतिबिम्बनोपाधिताया अचाक्षुषचैतन्यस्य प्रतिबिम्बितायाश्चायोगादिति—वाच्यम्; उद्भूतरूपवत्त्वं न प्रतिबिम्बितो[1]पाधिताप्रयोजकम्; अस्वच्छेऽपि लोष्टादौ प्रतिबिम्बापत्तेः; किन्तु स्वच्छत्वम्,

---

'तमेव विदित्वाऽतिमृत्युमेति, अव्यवहार्यमलक्षणं प्रपञ्चोपशमं शिवमद्वैतं चतुर्थं मन्यन्ते स आत्मा स विज्ञेयः' इत्यादिश्रुतिविरोधापत्तेः। धाप्रत्ययस्तु विषयरूपप्रकारार्थः। नहि विशेषणरूपप्रकारे धा इति नियमः। निवर्त्याज्ञानाद्यविषयकत्वं तु ज्ञानेऽपेक्षत एव, अन्यथाऽह[2]मित्यादीनामपि निवर्तकतापत्तेरित्यादि विवेचितमेव मिथ्यात्वहेतुविवेचने। समूहालम्बनं तु घटाज्ञाननिवर्तकम्, निवर्त्याज्ञानतत्कार्याविषयकत्वस्यैव तदनतिरिक्तविषयकत्वरूपत्वात्। विजातीयत्वेन मूलाज्ञाननिवर्तकत्वाच्चरमवृत्तिरेव तथेत्यादिकमप्यसकृदुक्तम्। **कारणात्मना** कारणीभूताविद्यागतसंस्कारात्मना। एतेनाविद्यात्मनाऽवस्थाने अविद्यैवोपाधिरित्यागतमिति—परास्तम्; यथा हि तार्किकादिमते सूक्ष्मरूपं मनः सुषुप्तौ तिष्ठति, तथा मन्मतेऽपि ज्ञानेच्छादिस्थूलावस्थाप्रच्यवात्। ननु वृत्तेः प्रकाशकजीवचिदुपरागार्थकत्वपक्षे वृत्त्या चितो न तादात्म्यं सम्बन्धो जीवस्यानुपादानत्वात्, नापि प्रतिबिम्बसम्बन्ध इत्याद्याशङ्क्य निरस्यति—**न च वृत्तीत्यादि**। उद्भूतरूपहीनेऽपि गुहाकाशादौ मुखाद्यवच्छिन्नशब्दादिप्रतिबिम्बोपाधित्वात्। **शब्दान्येति। स्वच्छत्वं**

---

[1] प्रतिबिम्बनो. [2] अन्यथाहमज्ञ इत्या-ग.

SGDF
Sri Gargeshwari Digital Foundation

तच्च प्रकाशस्वभावत्वेन मनसस्तत्परिणामभूताया वृत्तेश्चास्त्येव ; त्रिगुणात्मकस्याप्यज्ञानस्य स्वच्छसत्वात्मकताया अपि सत्वेन तत्रापि प्रतिबिम्बितोपाधितायाः[1] सत्वात् । नापि चाक्षुषत्वं प्रतिबिम्बितत्वप्रयोजकम् ; अचाक्षुषस्याप्याकाशादेः प्रतिबिम्बितत्वदर्शनात् । ननु—चाक्षुषवृत्त्युपारूढचितः कथं रूपमात्र-

---

प्रतिबिम्बोपाधितायोग्यत्वम् । **प्रकाशस्वभावत्वेन** उक्तोपाधिताविरोधिरूपहीनत्वेन । तच्च फलबलकल्प्यम् । न हि प्रतिबिम्बभ्रममात्रेऽनुगतरूपेणोपाधीनां हेतुत्वमस्ति ; किंतु दृष्टतत्तत्प्रतिबिम्बभ्रमे तत्तदुपाधीनां हेतुत्वमिति भावः । उक्तं हि सिद्धान्तबिन्दौ—'विभ्रमहेतूनां विचित्रत्वान्न प्रतिबिम्बानुपपत्तिरिति । **सत्त्वात्मकताया अपीत्यपिना** सत्वात्मकत्वमपि प्रतिबिम्बोपाधितायां न प्रयोजकम् । अतो जीवेशभेदाविद्याचित्सम्बन्धादिष्वनाविद्यकेष्वपि प्रतिबिम्बोपाधितासम्भवेन प्रकाश्यत्वसम्भव इति ध्येयम् । **दर्शनादित्यनेन** यत्र प्रतिबिम्बोपाधिता बिम्बत्वं च दृश्यते, तत्र नापलपितुं शक्यते ; अन्यथा सर्वत्रैवानुभवापलापप्रसङ्गात् । एवं चाकाशस्य बिम्बत्वं चेद्दृष्टं तदा नापलापार्हम् । अथादृष्टम्, तथाप्यविद्यान्तःकरणादौ चित्प्रतिबिम्बं पूर्वोक्तरीत्या 'जीवेशावाभासेन करोति, इत्यादिश्रुतिप्रत्यक्षादिमानदृष्टत्वादविद्यादेरुद्भूतरूपाभावेऽपि चितोऽचाक्षुषत्वेऽपि च नापलापार्हमिति सूचितम् । एतेनोद्भूतरूपान्यस्वच्छत्वे मानाभावः, आकाशस्य तु प्रतिबिम्बं नास्त्येव ; साभ्रप्रभामण्डलादेरेव प्रतिबिम्बे आकाशीयत्वभ्रमात्, अन्यथा वाय्वादेरपि प्रतिबिम्बापत्तेरित्यादिमूर्खप्रलापोऽपास्तः । वृत्तेश्चिदुपरागार्थत्वपक्षे प्रकारान्तरेण दोषं शङ्कते—**ननु चाक्षुषेति । कथमिति ।** स्वप्रतिबिम्बवद्वृत्तिसंयुक्तसमवायरूपस्योपरागस्य रूप इव

---

[1] प्रतिबिम्बनोपाधितायाः.

SGDF
Sri Gangeshwari Digital Foundation

प्रकाशकत्वम् ? न च प्रभावन्नियमः ; वैषम्यात्, तथाहि— प्रभायां तमोविरोधित्वं रूपं प्रतीव गन्धादीन् प्रत्यपि समम् ; न हि सा गन्धदेशस्थं तमो न निवर्तयति, न चाज्ञाननिरोधित्वलक्षणं प्रकाशत्वं रूपं प्रत्येव, न तु रसादीन् प्रतीति— वाच्यम् ; अज्ञाननिवर्तकत्वस्य वृत्तिभिन्नेऽनङ्गीकारात्, प्रभाया रूपग्राहकचक्षुःसहकारित्ववत् गन्धादिग्राहिघ्राणादिसहकारित्वाभावेऽपि चितो ग्राहकान्तरासहकारित्वेन तद्वत्सहकारि-

---

रसादावपि सत्वादिति भावः। **रूपं प्रत्येवेति।** रूपावच्छिन्नमज्ञानं चाक्षुषवृत्त्यारूढचिन्निवर्तयति, न तु रसाद्यवच्छिन्नमज्ञानमित्यर्थः। तथाच चिदुपरागसत्वेऽपि रसादावज्ञानसत्त्वान्न प्रकाश इति भावः। **वृत्तिभिन्ने इति।** न च—यदीयाज्ञाननिवर्तकवृत्त्युपारूढा चित्तदेव प्रकाशयतीति—वाच्यम् ; तथा सति गन्धाकारघ्राणजवृत्तेरिव रूपाद्याकारचाक्षुषादिवृत्तेरप्यज्ञाननिवर्तकत्वं वाच्यम्, चाक्षुषादिकाले गन्धादेरिव घ्राणजादिकाले रूपादेरप्रकाशस्य तुल्यत्वात्। **तथा च वृत्तेः** सर्वत्राज्ञाननिवृत्त्यर्थत्वस्वीकारे। द्वितीये त्वावरणाभिभवार्था वृत्तिरिति सिद्धान्तव्याघातः। आद्येऽपि पक्षे आवरणाभिभवार्थत्वेन द्वितीयेत्वित्यवधारणासङ्गतेः। अतएव वृत्त्यवच्छिन्नचितोऽज्ञाननिवर्तकत्वाङ्गीकारेऽपि न निस्तारः। नचाद्यपक्षे यथा ब्रह्मणि वृत्तेरज्ञाननिवृत्त्यर्थकता, तथा प्रतिनियतेन्द्रियग्राह्यरूपादावपि, सत्ताद्रव्यत्वगुणत्वादौ तु न तथेति ब्रह्मातिरिक्ते सर्वत्र चिदुपरागार्थत्वाद्द्वितीयपक्षे च जीवस्योपादानत्वे तदभावान्नोक्तासङ्गतिरिति—वाच्यम् ; तथापि यदीयाज्ञाननिवर्तकेत्याद्युक्तप्रकारस्वीकारे गौरवात्। ननु—यथा प्रभा चक्षुःसहकारित्वात्तद्ग्राह्यस्यैव भासिका तथा चिदपि स्यात्तत्राह—**प्रभाया इति। सहकारित्वेति**

SGDF Sri Gargeshwari Digital Foundation

विलम्बेन विलम्बस्य वक्तुमशक्यत्वात्। तथाच चितः सर्वगतत्वेन सर्वसम्बन्धाद्रूपादिवद्गुरुत्वादेरप्याश्रयद्वारा साक्षाद्वा सम्बन्धित्वात्प्रकाशापत्तिः; वृत्त्युपरक्तचित्सम्बन्धस्यैव प्रकाशकत्वात्, 'असङ्गो ह्ययं पुरुषः' इति श्रुतिस्तु तत्कृतलेपाभावपरा, न तु सम्बन्धनिषेधिका; 'स यत्तत्र यत्किञ्चित्पश्यत्यनन्वागतस्तेन भवति' इति पूर्ववाक्यात्, 'यथाऽऽकाशस्थितो नित्यं वायुः सर्वत्रगो महान्' इत्यादिस्मृतेश्चेति—चेन्न; प्रभाया रूपरसादिदेशगततमोनाशकत्वं तत्सम्बन्धाद्युज्यते, चैतन्यस्य तु स्वभावतोऽसम्बद्धत्वात्तदाकारवृत्त्या तदेकसम्बन्धस्योपादानात्कथमन्यावभासकत्वप्रसङ्गः? स्वभावतो ह्यसङ्गत्वे 'असङ्गो ह्ययं पुरुषः' इति श्रुतिः प्रमाणम्। नचैषा लेपाभावपरा; अकर्तृत्वप्रतिपादनाय सम्बन्धाभावपरत्वात्। यथा चैतत्तथा व्यक्तमाकरे।

ग्राह्यभासकत्वेत्यर्थः। **विलम्बेन** अभावेन। **विलम्बस्य** गन्धाद्यभासकत्वस्य। यदि स्वप्रतिबिम्बवद्वृत्तिसंश्लेष एव चितो भासकतानियामकः सम्बन्धः तदाह—**आश्रयद्वारेति**। यदि तत्संसृष्टवृत्त्युपारूढचितः सर्वगतत्वनियामकसम्बन्धो भासकस्तदाह—**साक्षाद्वेति**। आश्रयाद्वारा वेत्यर्थः। तेन जीवस्य गुरुत्वादौ तादात्म्याभावेऽपि नासङ्गतिः। **आकरे** बृहदारण्यकभाष्यादौ। उक्तं हि तत्र—यदि स्वाभाविकं कर्तृत्वं स्यात्तदा आत्मनो मोक्ष एव न स्यात्, अतो 'दृष्ट्वैव पुण्यं च पापं चे'त्यादिना कर्तृत्वाभावप्रतिपादनेन स्वभावतोऽकर्तेति ज्ञापितम् 'ध्यायतीव लेलायतीव' इति च पूर्वमकर्तृत्वमुक्तम्, तत्र चासङ्गत्वं हेतुः, कारकसङ्गिनो हि मूर्तस्य कर्तृत्वं नान्यस्येति। अत एव व्यासः—

'शरीरस्थोऽपि कौन्तेय न करोति न लिप्यते।' इति।

SGDF
Sri Gargeshwari Digital Foundation

एवं स्मृतिरप्येतच्छ्रुत्यनुरोधेन नेया । अतः सर्वैः सह सम्बन्धाभावान्न सर्वावभासः, किंतु यदाकारा वृत्तिस्तस्यैव । अतएव इदं रजतमिति भ्रमे इदमाकारवृत्त्यवच्छिन्नचैतन्येन रजतभानानुपपत्तेः रजताकाराप्यविद्यावृत्तिरभ्युपेयते । स्वतश्चिद्बिम्बाग्राहके (वृत्तिमन्तरेण) चैतन्यस्य तदाकारत्वायोगात्, स्वतश्चिद्बिम्बग्राहके त्वन्तःकरणवृत्त्यादौ न वृत्त्यपेक्षेति नानवस्था । न चाश्रयसम्बन्धाविशेषेऽपि रूपाकारा वृत्तिर्न गन्धाद्याकारेति कुत इति—वाच्यम्; यथा तव चाक्षुषज्ञाने आश्रयसम्बन्धा-

---

उक्तं च वार्तिके—

आत्मा कर्त्रादिरूपश्चेन्माकांक्षीस्तर्हि मुक्तताम् ।
न हि स्वभावो भावानां व्यावर्तेतौष्ण्यवद्रवेः ॥ इत्यादि ।

नेयेति । जीवस्येव ब्रह्मणो वस्तुतोऽसङ्गत्वेऽप्युपादानत्वाद्ब्रह्म प्रपञ्चाश्रयः, अत एव 'न च मत्स्थानि भूतानि' इत्यपि स्मृतिः सङ्गच्छत इति भावः । अत एव जीवस्य स्वप्रतिबिम्बवद्वृत्तिविषयत्वसम्बन्धेनैव[1] भासकत्वादेव। बिम्बाग्राहक इति। रजतादाविति शेषः। ननु—घटादेः स्वच्छत्वेऽविद्यादेरिव चिद्बिम्बवत्वात्सर्वदा भानं स्यात्, प्रातीतिकरजतादेस्तु तद्दोषाभावद्वृत्तिकल्पनागौरवाच्च स्वच्छत्वमेव युक्तमिति—चेन्न; अस्वच्छरजताद्यर्थिप्रवृत्त्यनुरोधेन प्रातीतिकरजतादेरप्यस्वच्छस्यैव कल्पनात्, रजतत्वाद्यवच्छेदेनास्वच्छ[2]त्वस्य क्लृप्तत्वाच्च । अन्यथा रजतादिदर्शनोद्देशेन चक्षुरादिव्यापारः सार्वजनीनो न स्यात् । यस्य रजतादेः स्वोत्पत्तिद्वितीयक्षणे प्रतीतिस्तन्नाशकाले च नाशस्तत्र व्यवहारेऽपि[3] वृत्तिर्न कल्प्येत; स्वोत्पत्तिक्षणेऽपि लाघवेन तत्प्रतीतेर्वक्तुं

---

[1] स्वप्रतिबिम्बतद्वद्वृत्तिविषयत्वयोरन्यतरसंबन्धेनैव–ग. [2] स्वच्छ–क. ग.
[3] व्यावहारिकेऽपि–क. ग.

SGDF
Sri Gargeshwari Digital Foundation

विशेषेऽपि न गन्धो विषयः, तथास्माकमपि चक्षुर्द्वारकवृत्तौ न गन्धाद्याकारत्वम्, इन्द्रियविषयसम्बन्धानां स्वभावस्य नियामकस्य समानत्वात्। ननु—आध्यासिकसम्बन्धो

शक्यत्वात्स्वच्छत्वकल्पनया तस्य चित्प्रतिबिम्बवत्वसम्भवात्। **स्वभावस्य** गन्धादिभेदसामानाधिकरण्यस्य। द्रव्यसमवेतचाक्षुषं प्रति गन्धादिव्यावृत्तजात्या रूपादेः कारणत्वम्, रूपादिव्यावृत्तजात्या गन्धादेः प्रतिबन्धकत्वं वेति गन्धादिभिन्ननिष्ठ इन्द्रियसन्निकर्ष एव चाक्षुषाद्युपधायक इति भावः॥

यत्तूद्भूतरूपाभावाद्वृत्तौ न प्रतिबिम्ब इति रोदनं तदपास्तमेव। ननु 'असङ्गो ह्यय'मित्यादिश्रुतिरीशस्य पुण्यपापालेपपरा, 'स वा एष एतस्मिन् सम्प्रसादे रत्वा चरित्वा दृष्ट्वैव पुण्यं च पापं च पुनः प्रतिन्यायं प्रतियोन्याद्रवति, स यत्तत्र किञ्चित्पश्यत्यनन्वागतस्तेन भवत्यसङ्गो ह्ययम्,' एवं 'स वा एष एतस्मिन् स्वप्ने रत्वा चरित्वा' इत्यादि 'स वा एष एतस्मिन् बुद्धान्ते रत्वा चरित्वे'त्यादिपर्यायत्रये सुषुप्तिस्वप्नजाग्रत्सु जीवं रमयितुश्चारयितुः पुण्यपापे दर्शयितुश्चेश्वरस्य तत्तत्कर्मलेपो नास्तीत्यस्मिन्नर्थे 'अनन्वागतस्तेन भवती'त्यन्तेनोक्ते कर्मलेपसामान्याभावरूपस्यासङ्गत्वस्य हेतुत्वेन प्रतिपादनात्,

'स्वप्नेन शारीरमभिप्रहत्यासुप्तः सुप्तानभिचाकशीति।
शुक्रमादाय पुनरेति स्थानं हिरण्मयः पुरुष एकहंसः॥'

इति पूर्वोक्तश्लोके ईशस्य प्रकृतत्वाच्चेति—चेन्न; तत्त्वज्ञत्वेनेशस्य पुण्यपापलेपाप्रसक्त्या तन्निषेधवैयर्थ्याज्जीवनिष्ठस्याकर्तृत्वाद्यज्ञातस्यैव तच्छ्रुत्यर्थत्वौचित्यात्। अन्यथा तत्वान्तेषु[1] पश्यति इत्यत्र पर्यायत्रयेऽप्यश्रुतस्य णिजर्थस्य कल्पनापत्तेः। अयमित्यपरोक्षवाक्यस्येश्वरे विरुद्ध-

---

[1] क्वान्तेषु—ख. ग.

SGDF
Sri Gargeshwari Digital Foundation

त्वात्। स्वप्नेनेत्याद्युक्तवाक्ये तु स्वप्नेन सह शारीरं प्रहत्य[1] विलाप्य सुप्तान् विशेषज्ञानशून्यान् जीवानभि लक्षीकृत्य हिरण्मयः स्वप्रकाशः साक्षी चाकशीति कासते[2] पुनः कर्मोद्बोधे शुक्रमिन्द्रियगणमादाय स्थानमेतीत्यर्थाज्जीव एव प्रकृतः। अत एव तदेते श्लोका भवन्ति स्वप्नेन शारीरमित्यादिश्रुतिर्भाष्ये इत्थं व्याख्याता। ध्यायतीव लेलायतीवेत्याद्युक्तार्थे एते श्लोकाः, स्वप्नेन स्वप्नभावेन शारीरं शरीरमभि प्रहत्य निश्चेष्टीकृत्य स्वयमसुप्तोऽलुप्तदृगादिशक्तित्वात्सुप्तान् वासनाकारोद्भूतान् सर्वान् भावानभिचाकशीति, शुक्रं ज्योतिष्मदिन्द्रियगणमादाय पुनः कर्मणे एति जागरितस्थानं हिरण्मयश्चित्स्वरूप एक एव जाग्रत्स्वप्नपरलोकादीन् हन्ति गच्छतीत्येकहंसः प्राणेन कुलायं देहमवरं बीभत्सं रक्षन् स्वयं कुलायाद्बहिश्चरित्वा तदनभिमानात् ईयते गच्छति यत्र कामं यत्र विषये कामना तं वासनारूपेणोद्भूतं स्वप्नान्ते स्वप्नस्थाने उच्चावचमुत्कृष्टनिकृष्टं देवतिर्यगादिभावं ईयमानो गच्छन् देवो द्योतनवान् बहूनि रूपाणि वासनोद्भूतानि कुरुते, उत अपि स्त्रीभिः सह मोदमान इव जक्षत् हसन् वयस्यैरिव उतेव भयानि व्याघ्रादीनि पश्यन्, आराममाक्रीडामस्यात्मनो वासनोद्भूतां पश्यन्ति सर्वे, तं तु न पश्यति कोऽपीत्यादि। तदेतादृशश्रुतिसन्दर्भस्येश्वरपरतां ब्रुवाणो देवानांप्रियः शोभते। तस्माज्जीव एव प्रकृतः उक्तवाक्येषु। अन्यथा ह्यसुप्त इति सुप्तेरीशे[3] निषेधो व्यर्थोऽप्रसक्तत्वात्, जीव एव तत्प्रसक्तेः। आदायेत्यनेनाभिमान एव वाच्यः, सम्बन्धमात्रस्य शुक्रे पूर्वमपि सत्वात्, तथा च तस्येशे सङ्गत्यभावात् स्थाने तत्तद्गोलके पूर्वमपीशस्य सत्वेन स्थानमेतीत्यस्याप्यसङ्गतेश्च। जीवस्य तु मनउपाधिकस्य स्थाने पूर्वमसत्वात्तत्र तत्सङ्गतत्वात्। सर्वाणि भूतानि मत्स्थानीति तूपपादितमिति ध्येयम्॥

---

[1] भोक्तारं प्रहत्य—ग.　[2] काशते—ग.　[3] सूक्तिरीशे—ग.

SGDF
Sri Gargeshwari Digital Foundation

वृत्तेः पूर्वमप्यस्त्येव, अन्यस्तूपरागो न दृश्यत्वे तन्त्रमिति किं तदर्थया वृत्त्येति—चेन्न; जीवचैतन्यस्याधिष्ठानचैतन्यस्य[1] वाऽभेदाभिव्यक्त्यर्थत्वाद्वृत्तेः। अन्यथा मयेदं विदितमिति सम्बन्धावभासो न स्यात्। ननु—जीवचैतन्यस्यासङ्गत्वे ब्रह्मचैतन्यं सुतरामसङ्गम्; तथाच मायोपाधिकविषयोपरागत्वात् स्वतः सार्वज्ञ्यं न स्यात्, न च—ब्रह्म सर्वोपादानत्वादुपाधिं विनैव स्वस्वरूपवत्स्वाभिन्नं जगदवभासयतीति—वाच्यम्; उपादानत्वं न तावद्विशिष्टनिष्ठं परिणामित्वम्; आध्यासिकसंबन्धस्यातन्त्रतापत्तेः, अनाद्यविद्यादिकं प्रति तदभावाच्च। नापि शुद्धनिष्ठमधिष्ठानत्वम्; शुद्धस्य सर्वज्ञत्वसर्वशक्तित्वादेरभावादिति—चेन्न; ब्रह्मणोऽसङ्गत्वेऽपि सर्वेषां तत्राध्यासेन मायोपाधिं विनैव तस्य सर्वप्रकाश(क)तया सार्वज्ञ्योपपत्तेः। न च—शुद्धनिष्ठमधिष्ठानत्वं नोपादानत्वम्, सार्वज्ञ्याभावादि-

---

अन्यः स्वप्रतिबिम्बवद्वृत्तेर्विषयत्वसंश्लेषोभयरूपः। **दृश्यत्वे** अध्यस्ततादात्म्यरूपे दृक्सम्बन्धे। यद्यपि जीवाभिन्नब्रह्मचित आध्यासिकतादात्म्यरूपं दृश्यत्वं वृत्तिपूर्वमस्ति तथापि तदर्थं न वृत्तिः; किंतु मयेदं विदितमिति व्यवहारोपयुक्तोपरागायेत्याशयेनाह—**न जीवेति**। **मायोपाधिकेति**। मायावृत्तिरूपोपाधिघटितेत्यर्थः। **अधिष्ठानत्वम्** कल्पितप्रतियोगिकमकल्पितानिष्ठं तादात्म्यम्। **असङ्गत्वेऽपीति**। यादृशः सङ्गः स्वप्रतिबिम्बरूपो जीवस्याविद्यादौ तादृशस्य ब्रह्मघटाद्योरभावेऽपीत्यर्थः। **अध्यासेन** अध्यस्ततादात्म्येन। **नोपादानत्वम्** न सर्वावभासकताप्रयोजकोपादानत्वशब्दार्थः। शुद्धस्येति शेषः।

---

[1] चाऽभे.

SGDF
Sri Gargeshwari Digital Foundation

त्युक्तमिति—वाच्यम्; अविद्याकल्पितानां सर्वज्ञत्वादीनां शुद्धे सत्वात्। अन्यथा तेषां तटस्थलक्षणत्वमपि न स्यात्। ननु—आवरणाभिभवार्थत्वपक्षो न युक्तः; विवर्ताधिष्ठानस्य चिन्मात्रस्याज्ञानादिसाक्षित्वेन सदा प्रकाशनात्, अन्यस्याज्ञानकल्पितस्यावरणस्याभावादिति—चेन्न; अज्ञानादिसाक्षित्वेन स्वप्रकाशेऽप्यशनायाद्यतीतत्वादिना प्रकाशाभावादावरणस्यावश्यत्वात्। नन्वज्ञानस्य नयनपटलवत्पुंगतत्वे चैत्रस्याज्ञाननाशेऽपि मैत्रस्य तदनाशादप्रकाशो युक्तः। विषयगतत्वे तु चैत्रार्जितया वृत्त्या अज्ञाने दीपेन तमसीव नाशिते मैत्रस्यापि प्रकाशः स्यादिति—चेन्न; चैत्रावरणशक्तेरेवाज्ञानगतायाश्चैत्रार्जितवृत्त्या नाशितत्वेन स पश्यति, न मैत्रः; तत्प्रतियोगिकावरणशक्तेरनाशात्, आवरणशक्तीनां द्रष्टृविषयभेदाभ्यां भिन्नत्वात्, तमस्तु न तथेत्येकानीतप्रदीपेनाप्यन्यान्प्रति प्रकाशो युज्यते। एतेन—एकाज्ञानपक्षे शुक्तिज्ञानेन तदज्ञाननिवृत्तौ सद्य एव मोक्षापातः, अनिवृत्तौ रूप्यादेः सविलासाविद्यानिवृत्तिरूपबाधायोग इति—निरस्तम्; आवरणशक्तिनाशेऽपि मूलाज्ञाननाशाभावेन सद्यो मोक्षाभावस्य रूप्यादौ सविलासशक्तिमदविद्यानिवृत्तिरूपबाधस्य चोपपत्तेः। ननु—एकाज्ञानपक्षे रूप्यादेः शुक्तिज्ञानेन स्वकारणे प्रविलय-

---

कल्पितानामिति। परमार्थतः शुद्धमप्यविद्ययेव तत्परिणामसर्वरूपेण सार्वज्ञ्यादिनापि कल्पितेन सम्बध्यत इति भावः। तेषामिति। शुद्धं प्रतीति शेषः। उक्तं हि विवरणादौ तेषां शुद्धं प्रति तदिति भावः। अन्यस्याज्ञानकल्पितस्येति। अन्यस्मिन्नज्ञानकल्पिते इत्यर्थः। कल्पितत्वाच्छुद्धान्यदनावृतमित्यर्थः। अज्ञानादिसाक्षीत्यादि। अज्ञानाद्युपाध्यवच्छेदेन प्रकाशेऽप्यशनायाद्यतीतत्वोपलक्षितपूर्णानन्द-

SGDF
Sri Gargeshwari Digital Foundation

मात्रं क्रियते मुद्गरप्रहारेणेव घटस्य, न त्वज्ञानं निवर्त्यत इति ते मतं न युक्तम्; यतो ज्ञानमज्ञानस्यैव निवर्तकमिति व्याप्तिबलाज्ज्ञानस्याज्ञाननिवृत्तिद्वारैवान्यविरोधित्वेनाज्ञानमनिवर्त्य रूप्यादिनिवर्तकत्वायोगात्, शुक्तिज्ञानेनाज्ञानानिवृत्तावभिव्यक्तचैतन्यसम्बन्धाभावेन भ्रान्ताविव बाधेऽपि शुक्तेरप्रकाशापत्तेश्चेति—चेन्न; यतो ज्ञानमज्ञानानिवर्तकमिति व्याप्तेरुच्छेदविषयत्वात्, स्वकारणे सूक्ष्मरूपेणावस्थाने तदनङ्गीकारात्; शुक्तिज्ञानस्याचानवच्छिन्नचैतन्यावरणरूपमूलाज्ञानानिवर्तकत्वेऽप्यवच्छिन्नचैतन्यावरणरूपतूलाज्ञाननिवर्तकत्वेनाभिव्यक्तचैतन्यसम्बन्धाद्बाधदशायां रूप्यनिवृत्तिशुक्तिप्रकाशयोरप्युपपत्तेः। न चोपादेयभूतया वृत्त्योपादानभूताविद्याभिभवो न घटते; उपादेयेनोपादानाभिभवादर्शनादिति—वाच्यम्; वृश्चिकादिना गोमयादेरुपादानस्याप्यभिभवदर्शनात्। आरम्भवादानभ्युपगमाच्च न गोमयावयवानामुपादानत्वशङ्का। ननु चक्षुरादिजन्यशुक्त्यादिवृत्तेः सप्रकारिकाया निष्प्रकारकशुद्धचैतन्याविषयतया तदावरणरूपमूलाज्ञानाभिभवाभावेऽप्यवच्छिन्नविषयया तयाऽवच्छिन्नचैतन्यावरणरूपतूलाज्ञानाभिभवो युज्यत इति ते मतमयुक्तम्; अवच्छिन्ने अविद्याकल्पितेऽप्रसक्तप्रकाशे मूलाविद्याया

रूपेणाप्रकाशादावरणमावश्यकमिति भावः। उच्छेदविषयत्वादिति। ज्ञानमज्ञानान्यस्य नोच्छेदकमित्येवं रूपत्वात्। उच्छेदश्चावस्थितिसामान्यविरहः पूर्वोक्तरीत्या बोध्यः। ननु—तूलाज्ञानानङ्गीकारपक्षे वृत्त्या मूलाज्ञानं कार्याक्षमीक्रियत इति शुक्तिरूप्यादेर्न बाधः, किंतु लयमात्रमिति वाच्यम्, तच्च न सम्भवति; उपादेयेनोपादानलयादर्शनादित्याशङ्क्य निरस्यति—न चोपादेयेत्यादि। अनभ्युपगमादिति।

SGDF Sri Gargeshwari Digital Foundation

इव तदावरणशक्तेरयोगात्, त्वयानभ्युपगतत्वाच्च, जडविशिष्टात्मानं प्रति तदभ्युपगमे च विशेषणानावारकविशिष्टावारकशक्त्यभिभवस्य विशेष्यावारकशक्त्यभिभवं विनाऽयोगेन शुक्त्याकारवृत्त्यैव शुद्धात्मप्रकाशापातादिति—चेन्न; अनवबोधात्। न ह्यविद्याकल्पितेऽवच्छिन्ने अस्माभिरविद्या वा तच्छक्तिर्वाभ्युपेयते, किंतु चैतन्यमात्र एव; तस्मिंस्तु सर्वं जडमध्यस्तमस्तीत्येकाश्रयाश्रितत्वसम्बन्धाज्जडावच्छिन्नचैतन्यमावृतमिति व्यपदेशः। घटाद्याकारवृत्त्या तु तदधिष्ठानचैतन्याभिव्यक्तौ तदवच्छेदेनैव तन्निष्ठावरणाभिभवो जायत इति न शुद्धात्मप्रकाशापत्तिः। तदुक्तं संक्षेपशारीरके—

'आश्रयत्वविषयत्वभागिनी निर्विभागचितिरेव केवला।
पूर्वसिद्धतमसो हि पश्चिमो नाश्रयो भवति नापि गोचरः'॥

प्रभादिद्रव्यस्य तत्तदवयवोत्पत्तिक्रमेणोत्पत्तिस्वीकारेऽनुभवविरोधान्मानाभावाच्च। उक्तं हि भाष्यादौ—'द्रव्यारम्भोऽपि न सर्वत्रारम्भकसंयोगादेवेति शेषः। आवरणशक्तेः तूलाज्ञानस्य। चैतन्याभिव्यक्ताविति। प्रयोज्यायामिति शेषः। तथाच यद्यपि शुद्धनिष्ठमावरणमात्रम्; घटादेरुपाधित्वेनाश्रयकोटावप्रवेशात्, तथापि घटाद्याकारवृत्त्या क्रियमाणोऽभिभवो घटाद्यवच्छिन्न एव। अभिभवस्याभिभावकावच्छेदकावच्छिन्नत्वं हि मण्यादेरुत्तेजकाधीनाभिभवे दृष्टम्। अतोऽनवच्छिन्नस्या[1]वरणाभिभवस्यापत्तिः पर्यवसिता, शुद्धप्रकाशापत्तिर्नेत्यर्थः। आवरणाभिभवो हि यद्यज्ञानस्य नाशस्तदा स वृत्तिस्वरूपो वृत्तिप्रयुक्तोऽतिरिक्तो वा; उभयथापि प्रत्यक्षघटादिवृत्तेर्घटाद्यावरणस्य च घटाद्यवच्छिन्नत्वात्सोऽपि तथा। यदि तु वृत्त्यभावविशिष्टो योऽज्ञानसम्बन्धस्तदभावोऽभिभवो न नाश-

---

[1] अवच्छिन्नस्य.

SGDF
Sri Gargeshwari Digital Foundation

'बहु निगद्य किमत्र वदाम्यहं शृणुत सङ्ग्रहमद्वयशासने ।
सकलवाङ्मनसातिगता चितिः सकलवाङ्मनसव्यवहारभाक्' ॥
इति च—

तस्मादविद्यायां सत्यामपि शक्त्यभिभवाद्वा, तूलाज्ञाननाशाद्वा, अवस्थाविशेषप्रच्यवाद्वा, एकदेशनाशाद्वा, भीरुभटवदपसरणाद्वा, कटवत्संवेष्टनाद्वा, आवरणभङ्गानिर्मोक्षबाधानामुपपत्तिः । नन्ववस्थाविशेषाणामज्ञानाभिन्नत्वे एकाज्ञानपक्षक्षतिः, अज्ञानभिन्नत्वे च साक्षाज्ज्ञानेन निवृत्तिर्भ्रमाद्युपादानत्वं च न स्यात्, तेषामिव रूप्यस्यैवोपादाननाशं विना नाशप्रसङ्गश्च, शुक्त्यज्ञानं नष्टमित्यनुभवविरोधश्चेति—चेन्न ; यतोऽवस्था ताव-

---

रूपः अज्ञानैक्यात् तदापि घटादिवृत्त्या सम्पद्यमानः स तत्स्वरूप इति घटाद्यवच्छिन्न एवेति भावः । **शक्त्यभिभवाद्वेत्यादि** । शक्तिरावरणशक्तिः तूलाज्ञानमावरणविक्षेपशक्तियुक्तं ब्रह्मान्यज्ञाननाश्यं मूलाज्ञानतादात्म्यानापन्नमज्ञानम्[1] । मूलाज्ञानतादात्म्यापन्नं तु तादृशाज्ञानमवस्थाविशेषः । एकदेशनाशस्तु वृत्तौ सत्यामज्ञानस्य स्वकार्याक्षमत्वम् । तत्र वृत्तिकालाभावविशिष्टमज्ञानं भानविरोधीति स्वीकारादुपान्त्यपक्षः । वृत्त्युत्पत्तिक्षणोत्तरवृत्तिकालाभावविशिष्टमज्ञानं भानविरोधीति स्वीकारादन्त्यपक्षः । अत एव हस्तसंयोगोत्पत्त्युत्तरं यथा कटस्य वेष्टनम्, तथा वृत्त्युत्पत्त्युत्तरमज्ञानाभिभवः । यथा च प्रतिभटागमनक्षण एव भीरुभटापसरणम्, तथा वृत्त्युत्पत्तिक्षण एवाज्ञानाभिभव इत्यभिप्रायेण दृष्टान्तौ सङ्गच्छेते । एवं च नानाज्ञानपक्षे यथा वृत्त्या वृत्तिरेव वाऽज्ञाननाश इति पक्षौ, तथैकाज्ञानपक्षेऽपि वृत्तिकाले वृत्त्युत्पत्त्युत्तरकाले वाऽज्ञानाभिभव इति पक्षाविति ध्येयम् । वक्ष्यमाणरीत्या चरमपक्षाभ्यां

---

[1] युक्तब्रह्मान्यज्ञाननाश्यमूलाज्ञानतादात्म्यानापन्नमज्ञानम्—क.

SGDF
Sri Gargeshwari Digital Foundation

दवस्थावतोऽभिन्नैव, अज्ञानैक्यं तु सर्वावस्थानुस्यूतैकाकारमादाय। एवं चाज्ञानावस्थाया अज्ञानत्वेन न ज्ञानसाक्षान्निवर्त्यत्वाद्यनुपपत्तिः। यत्त्ववस्थाविशेषाणामिव रूप्यस्यैवोपादाननिवृत्तिं विना निवृत्त्यापादनं, तदयुक्तम्; अज्ञान एव ज्ञानस्य साक्षाद्विरोधावधारणेनाज्ञानावस्थायास्तदभिन्नाया ज्ञानसाक्षान्निवर्त्यत्वार्हत्वात्, न तु रूप्यादीनाम्; अनीदृक्त्वात्। अनेकाज्ञानपक्षे तु शङ्कापि नोदेति। ननु—अस्मिन् पक्षे एकया वृत्त्या सर्वतदज्ञानस्य निवृत्तिः, उत एकतदज्ञानस्य; आद्ये पुनः

भिन्नो वैकदेशनाशपक्षः। **एकाकारं** अवस्थावदज्ञानरूपैकाकारम्। यथा घटादिरूपावस्थास्वनुगतमप्यज्ञानं घटादिनाशे न नश्यति, तथा अज्ञानरूपनानावस्थास्वनुगतमज्ञानं तासां नाशेऽपि न नश्यति। इयांस्तु विशेषः—यदा घटाद्यवस्था सादिरज्ञानोच्छेदं विना नोच्छिद्यते च, अज्ञानावस्था[1] त्वनादिरवस्थावदज्ञानोच्छेदं विनाप्युच्छिद्यते चेति। न चावस्थावदभेदस्यावस्थास्वङ्गीकारो व्यर्थः, अवस्थानामप्यज्ञानत्वादेव ज्ञाननाश्यत्वादिसम्भवादिति—वाच्यम्; अवस्थास्वज्ञानत्वरूपाखण्डधर्मानङ्गीकारादवस्थावदज्ञानतादात्म्यं विना ज्ञाननाश्यत्वाद्यसम्भवादज्ञानाभिन्नावरकस्यैव ज्ञाननाश्यत्वादिस्वीकारात्। नच—कुड्यादिरूपावरकस्यापि तथात्वाज्ज्ञाननाश्यत्वाद्यापत्तिरिति—वाच्यम्; वृत्तिसाक्षाद्विरोधितायोग्यत्वरूपस्य सविषयकत्वस्यावरकत्वस्य निवेशात्। नचैवमपि तादृशावरकस्यैव ज्ञान[2]विरोधित्वमिति नियमसम्भवेनाज्ञानाभेदोऽवस्थासु व्यर्थ इति वाच्यम्; तादृशावरकस्याज्ञानाभिन्नत्वनियम इत्यत्र तात्पर्यात् नीहारेण प्रावृता जल्प्या[3]। 'अजामेकाम्' इत्यादिश्रुतावज्ञातोऽयमिति घटाद्यनुगतव्यवहारे चैकाज्ञानस्य प्रतीतेश्चेति

---

[1] नोच्छिद्यतेऽज्ञानाद्यवस्था–ग. [2] स्यैकज्ञान–क. [3] प्रावृत्या जल्प्या–क. ग.

SGDF
Sri Gargeshwari Digital Foundation

शुक्तेः कदाप्यप्रकाशो न स्यात्, अन्त्ये वृत्तिकालेऽपि प्रकाशो न स्यात्, एकस्यावरणस्य निवृत्तावप्यावरणान्तरानिवृत्तेरिति—चेन्न; एकया वृत्त्या एकाज्ञाननाशेऽपि तयैवावारणान्तराणां प्रतिरुद्धत्वात्, यावत्सा तिष्ठति तावत्प्रकाशः, तस्यामपगतायां पुनरप्रकाशश्चोपपद्यते; अज्ञानस्य ज्ञानप्रागभावस्थानीयत्वात्। यथा तवैकं ज्ञानमेकमेव प्रागभावं नाशयति, तन्नाशरूपेणोदयात्प्रागभावान्तरनिबन्धनमज्ञातत्वादिव्यवहारं च प्रतिबध्नाति, तथा ममाप्येकं ज्ञानमेकमेवाज्ञानं निवर्तयति, अज्ञानान्तरनिब-

---

भावः। **नाशरूपेणेति**। ज्ञानमेव तत्प्रागभावनाशः। इत्थं च नाशयतीति भाक्तमिति भावः। **निवर्तयतीति**। पूर्ववन्निवृत्तेर्ज्ञानातिरिक्तत्वे यथाश्रुतम्। वस्तुतो ज्ञानानतिरेकेऽपि नाशत्वज्ञानत्वाभ्यां भेदेन प्रयोज्यप्रयोजकभावस्य श्रुत्यादिसिद्धस्य पूर्वमुक्तत्वाद्यथाश्रुतं रम्यमिति ध्येयम्। **प्रागभावान्तरनिबन्धनमित्यादि**। अज्ञातो मे घट इति प्रत्यक्षं परमते तत्पुरुषीयज्ञानाविषयकवृत्तित्वविशिष्टं[1] तत्पुरुषीयज्ञानस्य संसर्गाभावं गाहते। तत्र यथा तत्पुरुषीयकिञ्चिज्ज्ञानविषये घटे तादृशाभावस्य विषयविधया तादृशप्रत्यक्षकारणस्याभावात्तादृशज्ञानरूपात्तादृशप्रत्यक्षाभावः, तथा मन्मते वृत्तिज्ञानमेकाज्ञाननिवर्तकमन्याज्ञाननिबन्धनस्य घटो न भातीत्यादिव्यवहारस्यानुत्पत्तौ प्रयोजकम्। तत्वं च तादृशव्यवहारं प्रति घटाकारवृत्तेः प्रतिबन्धकत्वात्, वृत्तिविषयत्वाभावकालोपहित एव घटे आवृतत्वस्वीकारात्, वृत्त्यविषयत्वविशिष्टं यदज्ञानं तदभाववच्चितो भानत्वस्वीकारेण तस्या वृत्तिकाले घटादौ सत्वाद्वा, सर्वथापि तादृशव्यवहाररूपकार्यानुत्पत्तिव्याप्यार्थकं प्रतिबन्धकपदं वृत्तावस्मदीयैः प्रयुज्यमानं न विरुद्धमिति प्रघट्टकार्थः।

---

[1] विशिष्टतत्पुरुषीय—क. ग.

SGDF
Sri Gargeshwari Digital Foundation

न्धनं च प्रयोजनं प्रतिबध्नातीति किमु वक्तव्यम् । अत्र च प्रतिबन्धपदेन कार्यानुत्पत्तिप्रयोजकत्वं कारणाभावप्रतिबन्धकसाधारणमभिहितम् । एवमवस्थाविशेषपक्षेऽपि प्रकाशाप्रकाशावुपपादनीयौ । एवममूर्तस्याज्ञानस्य यद्यपि दण्डादिना गवादीनामिवापसरणं करादिना कटादीनामिव संवेष्टनं च न सम्भवति ; तथापि कार्याक्षमत्वसाम्येनापसरणसंवेष्टनपक्षौ योजनीयौ । यथा ह्युत्तेजकाभावसहकृतस्य मणेः प्रतिबन्धकतायामुत्तेजकसत्वे प्रतिबन्धकार्याक्षमत्वम् ; तथा वृत्त्यभावसहकृतस्याज्ञानस्य प्रतिबन्धकतायां वृत्तौ सत्यां तत्कार्यानुदय इति द्रष्टव्यम् । ननु—चैतन्यस्य निरवयवत्वात्तस्यैकदेशेन प्रकाशो न युज्यते ; अथाकाश इव तत्तदर्थावच्छिन्नत्वमेकदेशशब्दार्थः, तर्हि नागन्तुकपदार्थावच्छिन्नचैतन्यमनाद्यज्ञानस्य विषयः ; निर्विषयस्यावरणस्यायोगात्, प्रागनवच्छिन्नावरणमेवेदानीमवच्छिन्नावरणं जात-

---

प्रतिबन्धकपदेन प्रतिबन्धकबोधकपदेन । **एवमिति** । एकया वृत्त्या एकस्या अवस्थाया नाशोऽन्यासां कार्ये च प्रतिबन्ध इत्यादिरीत्येत्यर्थः । एकदेशनाशपक्षीयं पक्षद्वयमुपपादयति — **एवममूर्तेति** । **प्रतिबन्धकार्येति** । कार्यानुत्पादरूपकार्येत्यर्थः **प्रतिबन्धकतायां** घटो भातीत्यादिव्यवहाररूपकार्योत्पत्तिप्रयोजकाभावप्रतियोगितायाम् । सा च भातीत्यादिव्यवहारे वृत्त्यभावविशिष्टाज्ञानस्य प्रतिबन्धकत्वाद्वा वक्ष्यमाणरीत्या वा बोध्या ॥

ननूक्तव्यवहारेऽज्ञानस्य प्रतिबन्धकत्वे वृत्त्यभावविशिष्टाज्ञानाभावविशिष्टचितो भानरूपत्वे च गौरवाद्वृत्तिविशेषस्यैव भानत्वं युक्तमिति—चेन्न ; सुखादौ वृत्त्यनङ्गीकारलाघवादेरुक्तत्वात् । अत एव प्रवृत्त्यादावुक्ताज्ञानाभावस्य हेतुत्वेऽपि न गौरवम्, तद्व्यक्तित्वेन तत्र तस्य

SGDF
Sri Gangeshwari Digital Foundation

मित्यपि न; अवच्छिन्नचैतन्यज्ञानेनैवानवच्छिन्नावरणनाशापत्तेः; एतेन व्यक्तितः पूर्वं जातिरिव विषयात्पूर्वमज्ञानमस्तीति निरस्तमिति – चेन्न; अनाद्यज्ञानविषयेऽनादिचैतन्ये तत्तदागन्तुकपदार्थावच्छेदाभ्युपगमात्, 'आश्रयत्वविषयत्वभागिनी

हेतुतासम्भवाच्च । तस्माद्वृत्त्यनवच्छेदकत्वसमानाधिकरणो योऽज्ञानसम्बन्धस्तस्य भानाश्रयत्वव्यवहारे [1]प्रतिबन्धकत्वात् घटादौ वृत्त्यवच्छेदकत्वकाले तथा व्यवहारः । उक्तसम्बन्धाभावाश्रयतादात्म्यापन्नचिदेव वा भानम्, तेनोक्तकालेऽज्ञानसम्बन्धसत्वेऽपि तथा व्यवहारः । वृत्त्यविषयत्वसमानाधिकरणस्यासत्वापादकाज्ञानसम्बन्धस्यास्तित्वाश्रय – व्यवहारा[2]नुपपत्तौ[3] प्रयोजकत्वं बोध्यम् । अज्ञानस्य सम्बन्धस्तु सर्वत्र विषयतावच्छेदकत्वं, तच्च घटादावेव न सुखादाविति वृत्त्यभावेऽपि सुखादौ भानादिव्यवहारः । **नाशापत्तेरिति** । यदिदानीमवच्छिन्नं तदेव प्रागनवच्छिन्नत्वाच्छुद्धविषयकमावरणमिति तन्नाशापत्तिरिति भावः । **अवच्छेदाभ्युपगमादिति** यद्यपि चिन्मात्रमेवाज्ञानाविषयस्तथापि तत्वावच्छेदकत्वं कादाचित्कप्रकाशेषु स्वीक्रियते, यथा घटाद्यत्यन्ताभावस्य देशविशेषसम्बन्धेऽनादौ परमते कालविशेषस्यावच्छेदकत्वं तद्वदेव च तत्र न नियामकापेक्षा । अस्तु वा स्वावच्छिन्नविषयताकत्वसम्बन्धेन कादाचित्कप्रकाशकार्ये प्रत्यविद्यायाः कारणत्वम्। अनादीश्वरादिनिष्ठा च तादृशावच्छेदकता न हेतुनियम्या । अथवा अवच्छेदाभ्युपगमादित्यस्याज्ञानविषयता घटाद्यवच्छिन्नेत्यत्र न तात्पर्यम्; परं त्वज्ञानविषये शुद्धचिति तत्पदार्थसम्बन्ध इत्यत्र । नचैवम्—सुखादौ सर्वदा भातीति न स्यात्, वृत्त्यनवच्छेदकवृत्तेरज्ञानतादात्म्यादेरेव प्रतिबन्धकत्वादि स्वीकार्यमिति तस्य सदा सत्वादिति—वाच्यम्; सुखादावेकस्या

---

[1] प्रतिन्धत्वात्–ग. [2] श्रयत्वव्यबहारा–ख. ग. [3] नुपत्तौ–ग.

SGDF
Sri Gargeshwari Digital Foundation

निर्विभागाचितिरेव केवला' इत्युक्तत्वात् । यदवच्छिन्नगोचरा च वृत्तिस्तदवच्छेदेनैवावरणापसरणान्नानवच्छिन्नचैतन्यावरणभङ्गप्रसङ्गः । अतएव वृत्तिविषयादवच्छिन्नचैतन्या-

अविद्यावृत्तेरनादेः स्वीकारसम्भवात् । **यदवच्छिन्नगोचरेति** । यदवच्छिन्ना यत्संश्लिष्टा यद्गोचरा यदाकारा चेत्यर्थः । प्रत्यक्षवृत्त्यभिप्रायेणेदम् । **तदवच्छेदेनैवावरणापसरणादिति** । तस्यैवोक्ताज्ञानसम्बन्धाभाववत्त्वा[1]दित्यर्थः । आवरणमभानापादकं ग्राह्यम्, तेन परोक्षवृत्तेः प्रमात्रगोचरायास्तदवच्छेदेनावरणनिवर्तकत्वेऽपि न क्षतिः । **भङ्गप्रसङ्ग इति** । अज्ञाननाशं प्रति ब्रह्माकारवृत्तेरेव हेतुत्वाद्घटादिवृत्त्या न तदापत्तिरिति भवः । तदेवमेकदेशपक्षान्तर्भावेन चरमपक्षयोर्व्याख्यानम् ॥

अथवा चरमपक्षयोः पूर्वमुपपादनम्, ननु[2] चैतन्यस्य निरवयवत्वादित्यादिना एकदेशनाशपक्षस्ताभ्यां भिन्न एव स्वीकृत्योपपाद्यते । तत्र यदवच्छिन्नेत्यादेरयमर्थः —— यत्कालावच्छिन्नघटादिविषयगोचरा वृत्तिस्तत्कालावच्छेदेन घटादिविषयेषु नाज्ञानविषयतावच्छेदकत्वरूपमावरणम्; किं त्वन्यकालावच्छेदेनेति । तथाचात्र पक्षे घटादावुक्तावच्छेदकत्वं वृत्त्यभावकाले, तत्पक्षयोस्तु घटादिकालमात्र इति भेदः । एवं चास्मिन्पक्षेऽज्ञानविषयतानवच्छेदकत्वविशिष्टघटादिचिदेव घटादिभानम्, असत्वापादकाज्ञानविषयतानवच्छेदकघटादिचिद्घटाद्यस्तित्वमिति लाघवमपि बोध्यत् ॥

यत्तु शुक्त्यादिज्ञानस्याज्ञानशक्त्यभिभावकत्वं न युक्तम् । शक्तेरज्ञानान्यत्वे आवरणत्वायोगात्, अज्ञानरूपत्वे चाज्ञननाशं विना तन्नाशायोगात्, तस्या भ्रमोपादानत्वेऽज्ञानत्वापत्तेः तस्यैवाज्ञानलक्षणत्वात्, भ्रमानुपादानत्वे भ्रमोपादानमूलाज्ञाननिवृत्तिं विना रूप्यादि-

[1] भावत्वा-ग. [2] ननु-क.

SGDF
Sri Gargeshwari Digital Foundation

अपनिवृत्त्ययोगात्, शक्त्यैवावरणविक्षेपकार्यसिद्धेरज्ञानवैम्यर्थ्यात्, शुक्त्यादाविव ब्रह्मण्यपि शक्तेरावश्यकत्वेन विपरीतगौरवापत्त्या नानाज्ञानवादस्यैव युक्तत्वाच्चेति, तन्न; अवस्थास्विव शक्तिष्वप्य ज्ञानाभेदस्वीकारेणावरणत्वादिसम्भवात्, भेदस्यापि सत्वेनाज्ञाननिवृत्तिं विना निवृत्तिसम्भवाच्च। भ्रमोपादानत्वेऽपि तासां नाज्ञानत्वम्; तदाश्रयशाक्तिविशिष्टत्वस्यैवाज्ञानलक्षणत्वात्। अथवा शुक्त्यादिज्ञाननिवृत्त्या[1] शक्तिर्न रूप्यादिभ्रमोपादानम्; किंतु तत्वावच्छेदिका। उपादानस्य त्वज्ञानस्य ब्रह्मज्ञानेनैव नाशः प्रयोजकशक्तिनाशादुपहिताज्ञानरूपोपादाननाशसम्पत्त्या रूप्यादेरुच्छेदः। न च—शक्त्यैव निर्वाहे व्यर्थमज्ञानमिति—वाच्यम्; कार्यानुकूलशक्तिमत एव कार्योपधायकत्वस्य वह्न्यादौ दृष्टत्वात्। न च—शक्त्यवस्थापक्षयोरविशेष इति—वाच्यम्, अवस्थास्वावरणविक्षेपशक्तिस्वीकारात्, शक्तीनामज्ञानवृत्तित्वं न त्ववस्थानाम्; अङ्कुराद्यवस्थानां वृक्षादिवृत्तित्वादर्शनादिति भेदाच्च। यदप्येकाज्ञानस्वीकारपक्षो न युक्तः; एकदेशनाशादिपक्षे रूप्यादिनिवृत्तिर्न स्यादुपादानानिवृत्तेरिति, तदपि न; बाधे ह्युपादाननिवृत्त्यपेक्षा न तु निवृत्तिमात्रे; तां विनापि घटादेर्विभुविशेषगुणस्य च निवृत्तेः॥

यत्तु—अवस्थास्वीकारपक्षे सर्वावस्थानुस्यूतैकाकारेणाज्ञानैक्यसमर्थनं न युक्तम्; नानाज्ञानवादापत्तेः, नानाघटानुस्यूतैकघटत्वाकारेऽपि नानाघटवदिति, तत्तुच्छम्; अवस्थास्वज्ञानतादात्म्याङ्गीकारेऽप्यज्ञानत्वरूपाखण्डधर्मानङ्गीकारात्। न हि बीजावस्थायामङ्कुरादौ बीजत्वादिनियमः, दृष्टान्ते तु घटत्वाश्रयाभिन्न[2]त्वेन घटनानात्वस्य युक्तत्वात्। न चाज्ञाननिवृत्तिं विना तदुपादेयावस्था न निवर्तेतेति—वाच्यम्; अवस्थानामनादित्वेनाज्ञानानुपादेयत्वात्तासामुपादेयत्वस्वी-

[1] निवर्त्या—ग. [2] घटत्वाश्रयाणां भिन्न—ख ग.

SGDF
Sri Gargeshwari Digital Foundation

त्प्रागज्ञानमस्तीत्यभिप्रायेण विषयात्प्रागज्ञानमस्तीति साधूक्तम्। तस्मादधिष्ठानचैतन्यं स्वाध्यस्तं भासयतीति सिद्धम्। तदयमत्र

कारेऽपि दण्डादिना घटादीनामिव ज्ञानेन निवृत्तिसम्भवात्। तासामज्ञानाभेदादज्ञानं नष्टमित्यादिव्यवहार इति न तासां कल्पना व्यर्था। यदपि नोपहिते चैतन्येऽज्ञानम्; तस्य जडत्वात्, किंतु शुद्धे, तस्य च घटाद्यवच्छेदोऽपीत्यवच्छिन्नमावृतमुच्यते इत्ययुक्तम्; तथा सति तमोघटाभ्यां युक्ते भूतले प्रकाशसम्बद्धे भूतलस्येव, अज्ञानघटाभ्यां युक्ते शुद्धचैतन्ये प्रकाशसम्बन्धे तस्यापि प्रकाशः स्यादिति, तत्तुच्छम्; घटावच्छेदेन हि भूतले आलोकसम्बद्धे तदवच्छेदेनैव तत्प्रकाशो न त्वन्यावच्छेदेनेति, त्वदृष्टान्तेनैव त्वन्मुखपिधानात्। ननु—नानाज्ञानपक्षो न युक्तः; एकाज्ञाननाशकशुक्त्यादिज्ञानेनान्येषामज्ञानानामिव शुक्त्याद्यज्ञानमात्रस्य प्रतिरुद्धत्वसम्भवेन ब्रह्मान्यज्ञानमात्रस्याज्ञाननाशकत्व[1]प्रसङ्गादिति—चेन्न; शुक्त्यज्ञानं शुक्तिज्ञानेन नष्टमित्याद्यनुभूतिपालनाय शुक्त्यादिज्ञानस्याप्यज्ञाननाशकत्वस्वीकारात्॥

यत्तु—यदवच्छिन्नगोचरा वृत्तिस्तदवच्छेदेनावरणापसारणान्नानवच्छिन्नचिदावरणभङ्ग इत्ययुक्तम्; शाखावच्छेदेन संयोगाधारस्य वृक्षत्ववद्घटाद्यवच्छेदेन भग्नावरणस्यापि शुद्धचित्त्वान्मोक्षापत्तेरिति—तत्तुच्छम्; एकदेशनाशपक्षे हीदमुक्तम्, एकदेशनाशश्च घटादिनिष्ठस्याज्ञानविषयतावच्छेदकत्वस्य वृत्तिकाले वृत्त्यभावविशिष्टत्वेनाव्याप्यवृत्तितया वा विरहः, न च तावता ब्रह्माज्ञाननिवृत्तिरापद्यत इति व्याख्यातम्। तस्मादबोधमूलकः परप्रलापः॥

तस्मादिति। उक्तदोषाणामुद्धारादित्यर्थः। घटादौ जीवस्यानुपादानत्वे सर्वगतस्यापि तस्यासङ्गस्योपरागार्था वृत्तिरिति पक्षेऽपि

---

[1] ज्ञानानाशकत्व–ख. घ.

SGDF
Sri Gargeshwari Digital Foundation

निष्कर्षः—यद्यपि विषयप्रकाशकं विषयाधिष्ठानभूतं प्रमेयचैतन्यम्, अन्तःकरणावच्छिन्नचैतन्यं तु प्रमातृ, अन्तःकरणवृत्त्यवच्छिन्न-चैतन्यं तु प्रमाणम्; तथापि यदीयान्तःकरणवृत्त्या विषयपर्यन्तं चक्षुरादिद्वारा निस्सृतया यत्प्रकाशकं चैतन्यं यत्प्रमातृचैतन्या-

---

घटादेरधिष्ठानीभूतं ब्रह्मचैतन्यमेव प्रकाशकम्, प्रकाशस्य साक्षात्स्व-सम्बद्धभासकत्वस्यालोकादौ दृष्टत्वात्। वृत्तिद्वारा तादृशचैतन्ये जीव-स्योपरागं विना ममेदं भातीत्यादिव्यवहाराभावाज्जीवस्य प्रकाशकत्वं पूर्वमुक्तम्, तत्पर्यालोचनाच्चोक्तपक्षेऽपि वृत्त्यादिघटितसम्बन्धेन जीवो-परक्तमधिष्ठानचैतन्यं प्रकाशकमिति पर्यवसितम्। स्वप्रतिबिम्बवत्सु-खादितादात्म्येन जीवोपरक्तमधिष्ठानचैतन्यं सुखादौ भासकम्। एवं चोक्तपक्षे वृत्तेरावरणाभिभवार्थत्वपक्षे चापि प्रमेयचैतन्यस्य प्रमातृचैत-न्योपरागनिष्पादनान्मयेदं साक्षात्क्रियत इत्यादिव्यवहारनिर्वाहिका वृत्ति-रिति, पूर्वोक्तपक्षत्रयेपि प्रमातृप्रमेयचितोरुपरागार्थत्वं वृत्तेरित्यादि पूर्वा-नुक्तं प्रकटयति—**यद्यपीत्यादि**। **प्रमेयचैतन्यमिति**। चैतन्य[1]-स्यैवाज्ञातत्वान्मुख्यं प्रमाविषयत्वमज्ञातत्वावच्छेदकत्वाद्घटादेरिति भावः **प्रमात्रिति**। मनोविशिष्टचैतन्यस्य चक्षुरादिप्रेरणद्वारकवृत्त्यवच्छिन्न-विषयचैतन्यरूपप्रमानिष्पादकत्वेन प्रमातृत्वमिति भावः। **प्रमाणमिति**। वृत्तेर्विषयसंश्लेषं प्रत्युपधायकत्वेन तज्जनकक्रियादिजनकत्वेन वा वृत्ति-संश्लिष्टविषयचिद्रूपां प्रमां प्रति वृत्त्यवच्छिन्नचैतन्यं करणमिति भावः। केवलवृत्तेर्जडत्वेन चिदुपरक्ता विषयसंश्लिष्टा वृत्तिः प्रमा। तत्र च चिदुपरक्तैव वृतिरुपधायिकोक्तजनकत्ववती वेति सैव प्रमाणम्। केवलस्य मनसो जडत्वेन केवलचितश्च निर्व्यापारत्वेन प्रमां प्रति स्वातन्त्र्याभावाच्चि-दुपरक्तं मनः प्रमात्रिति त्रयाणां चिद्घटितत्वमावश्यकमिति भावः। **तथापि**

---

[1] प्रमेयचैतन्य—ग.

SGDF
Sri Gurgeshwari Digital Foundation

भेदेनाभिव्यज्यते तमेव स एव जानाति नान्यं नान्यो वा । अत एवैकवृत्त्युपारूढत्वलक्षणैकलोलीभावापन्नं प्रमातृप्रमाणप्रमेय-चैतन्यं भवति । ततस्तदवच्छेदेनाज्ञाननिवृत्त्या भासमानं प्रमेय-चैतन्यमपरोक्षं फलमित्युच्यते । तत्स्वयं भासमानं सत्स्वाश्रयस्तं

त्रयाणामौपाधिकभेदसत्त्वेऽपि । **जानाति** साक्षात्करोति । **नान्यमिति** सुखादिभिन्नमिति शेषः । तेन सुखादिसाक्षात्करणे वृत्त्यनपेक्षणेऽपि न क्षतिः । **नान्य इति** । जीव इति शेषः । तेनेशस्य मनोवृत्त्यनपेक्षसाक्षात्कर्तृत्वेऽपि न क्षतिः । कथं भिन्नोपाधिकत्वेऽप्यभेदाभिव्यक्तिस्तत्राह — **अत एवेति** । वृत्तिनिस्सरणादेवेत्यर्थः । **भावापन्नमिति** । तथाचोपाधीनां मिलनादमिलन[1]प्रयुक्तो भेदो नश्यतीत्यभेदाभिव्यक्तिरिति भावः । फल-व्याप्यतारूपं साक्षात्कारकर्मत्वं घटादेरुपपादयति—**तत इति** । एकलोलीभावादित्यर्थः । **तदवच्छेदेन** घटादिविषयावच्छेदेन । **निवृत्त्या भासमानं** निवृत्त्यभिन्नस्य भासमानत्वस्याश्रयः । वृत्तेरज्ञाननिवृत्त्यर्थ-त्वपक्षान्यपक्षयोरपि जीवचिद्विषयचितोरनुपरागनिवृत्तिरूपो वृत्त्यादिद्वार-कोपरागः प्रमातृप्रमेयचितोरभेदश्चाज्ञाननिवृत्तिशब्दार्थो बोध्यः । तादृशा-नुपरागभेदयोर्भातीतिव्यवहारविरोधित्वात् । **अपरोक्षं** अपरोक्षशब्दबोध्यम् । **फलमिति**। निवृत्तेश्चैतन्यरूपत्वेऽप्युक्तनिवृत्तित्वेन वृत्तिप्रयुक्तत्वात्फलत्वम्[2]। एकदेशनाशादिपक्षेऽप्युक्तविशिष्टाज्ञानसंबन्धस्याज्ञानविषयतावच्छेदक-त्वस्य वा विरहोऽज्ञाननिवृत्तिर्बोध्या । तस्य च वृत्तिप्रयुक्तत्वात्फलत्वम् । वृत्तेरज्ञाननाशत्वपक्षेऽपि तेन रूपेण वृत्तिप्रयुक्तत्वात्फलत्वम्[2] । अधि-करणमेव ध्वंसो ज्ञानमेव स्वप्रागभावनिवृत्तिरित्यादिमतेषु ज्ञाने नाज्ञानं नष्टमित्यादिप्रतीतेस्तथावश्यं वाच्यमित्याद्युक्तम् । वृत्तेर्जीव-चिदुपरागार्थत्वपक्षे जीवचिदभेदाभिव्यक्त्यर्थत्वपक्षे च वृत्त्यादिद्वारकोप-

---

[1] मिलनामिलन–ग. [2] फलवत्त्वपू–ग.

SGDF
Sri Gargeshwari Digital Foundation

घटाद्यपि भासयतीति तत्फलव्याप्यमित्युपेयते । यन्निष्ठा च यदाकारा वृत्तिर्भवति तन्निष्ठं तदाकारमज्ञानं सा नाशयतीति नियमात्प्रमातृप्रमेयोभयव्यापिन्यपरोक्षवृत्तिः स्वावच्छेदेनावरणमपसारयति; प्रकाशस्य स्वावच्छेदेनावरणापसारकत्वदर्शनात् । अतः प्रमात्रवच्छिन्नस्यासत्वावरणस्य प्रमेयावच्छिन्नस्याभानावरणस्य चापसरणात् घटोऽयं मे स्फुरतीत्याद्यपरोक्षव्यवहारः । परोक्षस्थले तु इन्द्रियसन्निकर्षलक्षणद्वाराभावादन्तःकरणनिस्सरणाभावेन विषयपर्यन्तं वृत्तेरगमनाद्विषयावच्छिन्नप्रमेयचैतन्येन सह प्रमातृचैतन्यस्यैकवृत्त्युपारूढत्वाभावेनापरोक्षतयाऽभिव्यक्त्यभावेपि प्रमातृप्रमाणचैतन्ययोरेकलोलीभा-

---

रागः प्रमात्रभेदश्च विषयाचिति फलम् । तादृशफलसबन्धाच्च विषयचैतन्यं फलम्, तादृशचिदेव भात्यादेरर्थस्तत्प्रयोजकाचिदेव साक्षात्करोत्यादेरर्थः । एवंच घटं साक्षात्करोमीत्यादौ फलीभूतस्य धात्वर्थतावच्छेदकोक्तचैतन्यस्याश्रयत्वाद्धटादेः कर्मत्वमिति भावः । व्याप्यं आश्रयः ननु—परोक्षवृत्तिस्थलेऽप्यज्ञानं नष्टमित्यनुभवात्परोक्षभ्रमोच्छेददर्शनाच्चाज्ञाननाशो वाच्यः, तथाच वन्हिर्मे न भातीति व्यवहारो न स्यादपरोक्षभ्रमोच्छेदश्च स्यादित्यत आह—यन्निष्ठेति । उक्तसंश्लेषसंबन्धेनेत्यादिः । तन्निष्ठं तदवच्छिन्नाश्रयताकम् । तदाकारं तदवच्छिन्नविषयताकम् । स्वावच्छेदेन स्वावच्छेदकावच्छेदेन । स्फुरतीत्यादीत्यादिना घटं साक्षात्करोमीत्यादिसंग्रहः । घटो मे स्फुरतीत्यादावुक्ताज्ञाननिवृत्तिसंबन्धिचिद्रूपस्य स्फुरणस्याश्रयत्वं घटादौ विशेषणम् । प्रमातुस्तु तादृशनिवृत्तिप्रतियोगिन्यज्ञानादौ निरूपितत्वादिसंबन्धेन विशेषणत्वम् । सुखं मे स्फुरतीत्यादावपि सुखादावज्ञानाविषयतानवच्छेदकत्वरूपोक्तनिवृत्तिसत्वान्नानुपपत्तिः । घटं साक्षात्करोमीत्यादौ तूक्तभानरूपफलप्रयोजक-

SGDF
Sri Gangeshwar Digital Foundation

वापत्त्या प्रमात्रवच्छिन्नमसत्वावरणमात्रं निवर्तते; तावन्मात्रस्य वृत्त्यवच्छिन्नत्वात्। इदमेव सुषुप्तिव्यावृत्तिशब्देन विवरणाचार्यैर्व्याख्यातम्। विषयावच्छिन्नाभानावरणतत्कार्यसद्भावेपि प्रमात्रवच्छिन्नासत्वावरणनिवृत्त्याऽनुमानादौ व्यवहारोपपत्तिः। अत एव जानाम्यहं पर्वते वन्हिरस्तीति, स तु कीदृश इति मे न भातीत्यादिव्यवहारः। त्रयाणामेकलोलीभावेऽपरोक्षत्वम्। द्वयोरेकलोलीभावे तु परोक्षत्वमिति न सङ्करः। वृत्तेश्च विषयेण

चितो वृत्त्यवच्छिन्नत्वेन प्रमाणचिद्रूपत्वादाश्रयत्वेन प्रमातरि विशेषणत्वम्, उक्तफलप्रयोजक[1]वृत्त्यवच्छिन्नत्वेनोक्तफलप्रयोजकत्वं च। उक्तफले चाधेयतया घटादेर्विशेषणत्वम्, सुखं साक्षात्करोमीत्यादौ त्वज्ञानविषयतानवच्छेदकत्वसमानाधिकरणचिद्रूपं फलं प्रति मनउपहितं चैतन्यं प्रयोजकमेव; उक्तसामानाधिकरण्यघटकं सुखादिकं प्रत्यधिष्ठानत्वात्सुखादिपरिणामिकारणमनोवच्छिन्नत्वाद्वा, तादृशचैतन्यस्य च सुखाद्युपहितरूपेण प्रमात्राश्रितत्वमविरुद्धम्[2]। अविद्यां साक्षात्करोमीत्यादावपि नानुपपत्तिः; अविद्यादिनिष्ठेऽज्ञानविषयतानवच्छेदकत्वेऽनुपहिताचिद्रूपेण चैतन्यस्याधिष्ठानत्वादिना प्रयोजकत्वात्तादृशचितः प्रमातरि तादात्म्येन विशेषणत्वसम्भवाच्च। अथवा आश्रयस्याश्रितं प्रति क्षेमसाधारणजनकतया स्वातन्त्र्यरूपकर्तृत्वमेवाख्यातेनोल्लिख्यते स्फुरतीत्यादावपि भावः॥

जानाम्यहमित्यादि। अज्ञानाभावाश्रयचिज्ज्ञानं वन्हिं जानामीत्यादौ वन्ह्यादिर्नि[3]रूपितत्वसंबन्धेनाज्ञानाविशेषणम्। सुखं जानामीत्यादौ सुखादिनिरूपितमज्ञानं पुरुषान्तरे प्रसिद्धम्। प्रमातरि चावच्छेदकतासंबन्धेन ज्ञानं ज्ञानावच्छेदकत्वं वा विशेषणम्। असत्वापादका-

---

[1] त्यादौ तूक्तफलप्रयोजक—क. [2] द्धमिति—क. ग. [3] वह्न्यादिनि—क. ग.

SGDF
Sri Gangadharan Digital Foundation

ज्ञानाभावं प्रति प्रमातुरवच्छेदकत्वात्तद्विशिष्टचितं प्रत्यप्यवच्छेदकत्वम् । अत एव घटो जानातीति न स्यात् । घटादावसत्त्वापादकाज्ञानाभावावच्छेदकत्वे मानाभावात् । असत्त्वापादकाज्ञानाभावप्रयोजकचिद्वा ज्ञानम् । तत्त्वं च प्रयोजकीभूतवृत्त्यवच्छिन्नत्वेन । प्रमाणाचित एव प्रयोजकतावच्छेदकप्रमातृनिष्ठतादात्म्येन तस्य विशेषणत्वनियमान्न घटो जानातीत्यादिव्यवहारः । सुखं जानामीत्यादौ च सुखादिनिरूपितासत्त्वापादकाज्ञानाभावस्य तत्तन्मनउपहितचित्येव कल्पितत्वात्सैवाधिष्ठानत्वेन प्रयोजिका । **जानातिश्चा**कर्मक एव; अतएव परोक्षज्ञानस्य विवरणादावकर्मकत्वमुक्तम् । तस्य सकर्मकत्वे[1] त्वसत्त्वापादका((ज्ञानविरोधि) ज्ञाननिरूपकत्वस्य[2] यदधिकरणत्वं तत्प्रयोजकाचिदेव जानातेरर्थः । उक्ताधिकरणत्वरूपफलवत्त्वेन[3] घटादेर्ज्ञानकर्मता । सुखादिनिष्ठे तादृशाधिकरणत्वेऽपि सुखाद्युपहितरूपेण चित्प्रयोजिका, सुखादेरसत्त्वदशायां तादृशचिदभावे उक्ताधिकरणत्वाभावात्तद्भावे तद्भावाच्च। उक्तनिरूपकत्वाभावप्रयोजकचितो जानात्यर्थत्वे घटाकारवृत्तिदशायां प्रमातारं जानामीति स्यात्; तादृशवृत्तिप्रयुक्तस्योक्तनिरूपकत्वाभावस्य प्रमातरि सत्त्वात् । उक्ताधिकरणत्वोक्तौ तु प्रमातृनिष्ठस्य तस्य स्वतः सिद्धत्वेन घटादौ विघ्नाभावाधिकरणत्वस्य मङ्गलाप्रयुक्तत्ववत् वृत्त्यवच्छिन्नादिचिद[4]-प्रयोज्यत्वान्नोक्तापत्तिः । एवं च वृत्त्यवच्छिन्नरूपेण सुखाद्युपहितादिरूपेण च तादृशतादृशप्रयोजकत्वाद्वृत्त्यवच्छिन्नचितो जानात्यर्थतोक्तिरिति[5] तत्र तत्राचार्याणां नासङ्गता ॥

यत्तु—आवरणभङ्गजनकज्ञानं ज्ञानानुकूलव्यापारो वा जानातेरिच्छाद्वेषाद्यनुकूलव्यापार इच्छतिद्वेष्ट्यादेरर्थ इति जानात्यादेः सकर्म-

---

[1] कर्मत्वे–ग. [2] ज्ञानादिरूपकत्वस्य–ख. [3] फलत्वेन–क. [4] वृत्त्यवच्छिन्नचिद–ग. [5] क्तिः–ग.

SGDF
Sri Gargeshwari Digital Foundation

समं साक्षादेवापरोक्षस्थले संबन्धः। परोक्षस्थले त्वनुमितेरनुमेयेन तद्व्याप्यज्ञानजन्यत्वम्, शाब्द्याः संसर्गेण सह तदाश्रयवाचकपदजन्यत्वम्, स्मृतेः स्मर्तव्येन सह तद्विषयानुभवजन्य-

---

कतोपपादनं वैय्याकरणानां, तन्न; आवरणभङ्गरूपस्य फलस्य परोक्षज्ञानविषयनिष्ठत्वाभावात्, प्रमातृमात्रनिष्ठवृत्त्या प्रमातृनिष्ठस्यैवावरणभङ्गस्य सम्पादनात्, परम्परया फलसम्बन्धमादाय सकर्मकत्वोक्तावकर्मकस्यापि तदापत्तेः, 'फलव्यापारयोर्धातुरि'त्यादिना तस्यापि त्वया स्ववाच्यव्यापारसमानाधिकरणफलवाचकत्वोक्तेः, सुखादिस्थले आवरणस्यैवाप्रसिद्धत्वाच्च। अत एव ज्ञानमपि न फलम्; चैतन्यस्य तद्वृत्तिज्ञानस्य परोक्षस्य विषयनिष्ठत्वाभावाद्विषयतासम्बन्धस्य वृत्यनियामकत्वात्सुखादिस्थले तदसम्भवाच्च। यदपि विषयताजनकज्ञानादिकं जानात्यादेरर्थ इति, तदपि न; विषयताया ज्ञानाद्यतिरिक्तत्वेऽपि ज्ञानादिजन्यत्वे मानाभावात्, [1]स्वोत्पत्ति[2]क्षणे स्वविषयकत्वाभावात्। तस्माज्जानातेरुक्तरीत्यैव सकर्मकत्वम्। इच्छत्यादेस्तु फलप्रयोजकेच्छादिरेवार्थः। फलं चेच्छायाः सुखादौ प्रमातृसम्बन्धादिः, गवादौ स्वत्त्वादिः, द्विषेश्च शत्र्वादौ तत्तदनिष्ठम्, सुखाद्यनुत्पत्तावपीच्छादेस्तत्सम्बन्धस्वरूपयोग्यत्वानपायात्। सुखमिच्छतीत्यादिप्रयोगो ग्रामप्राप्त्यनुपधानेऽपि ग्रामं गच्छतीत्यादिप्रयोगवदिति दिक्। साक्षात्करोतिजानात्योर्मुख्यसकर्मकत्वानङ्गीकर्तृतार्किकादिरीत्या तयोरर्थविवेचनं तु विस्तरेण कृतमस्माभिः पूर्वम्॥

साक्षादेवेति। गन्धादिभिन्ननिष्ठः स्वसंयुक्तसमवायो रूपादौ, तद्वत्समवायादी रूपत्वादौ। स च यद्यपि परम्परारूपः, तथापि द्रव्ये

---

[1] ज्ञानादिपूर्वं विषयत्वासत्वेऽपि ज्ञानाद्यभावादेवोपपत्तेः। ज्ञानादीनां ग.

[2] स्वोत्पत्तिद्वितीयक्षणे . . . . . . ना संभवात्—ग.

SGDF
Sri Gargeshwari Digital Foundation

त्वम् । एवमन्यत्रापि परंपरासंबन्ध एवेति परोक्षापरोक्षविभागः । विस्तरेण व्युत्पादितास्माभिरियं प्रक्रिया सिद्धान्तबिन्दौ । तस्माद्विषयस्य मिथ्यात्वेपि प्रतिकर्मव्यवस्थोपपन्नेति दिक् ॥

इत्यद्वैतसिद्धौ प्रतिकर्मव्यवस्थोपपत्तिः ॥

संयोगः साक्षात्सम्बन्ध इति क्वचित्साक्षात्सम्बन्धसत्वात्साक्षादेवेत्युक्तम् । निष्ठान्तस्थले आकाराख्यवक्ष्यमाणविषयताविशेषितेति वा वाच्यम् । अवच्छेदकत्वसम्बन्धो वा साक्षात्सम्बन्धो ग्राह्यः । स च चाक्षुषादिप्रतियोगिको यथा गन्धादिव्यावृत्तस्तथा प्रतिपादितमस्माभिरन्यत्र । अयमित्यादिस्थलेऽपि[1] गोसादृश्यादिविशिष्टविशेष्यकस्वप्रकारकज्ञानजन्यत्वं गवयपदवाच्यत्वादे रूपमित्यादाविति शेषः । अनुमित्यादौ वन्ह्यादेर्विधेयतारूपस्य सम्बन्धस्य निर्वचनमिदम् । वन्हित्वादौ तु तद्घटितः सम्बन्धो बोध्यः । यावद्भिः सह यस्य ज्ञानस्य यावन्तोऽसाधारणाः सम्बन्धास्तावदन्यतमत्वं तेषां तत्र सम्बन्धतावच्छेदकमनुगतमाकाराख्यः संबन्धो वा अनुगतो बोध्यः । **सिद्धान्तबिन्दाविति** । "शरीरं व्याप्य तस्य मध्यस्थः सत्त्वप्राधान्येन पञ्चीकृतपञ्चभूतपरिणामोऽतिस्वच्छो नेत्रादिद्वारा निर्गत्य घटादिसंसृष्टस्तदाकारो भवति । स च सौरालोकचक्षुरादिवत्सङ्कोचविकासशाली । तस्य च देहावच्छिन्नो भागोऽहङ्काराख्यः कर्ता, देहघटादिमध्यवर्ती दण्डायमानो भागो वृत्तिज्ञानाख्यः क्रिया, विषयस्थभागस्तु विषयस्य ज्ञानकर्मत्वसम्पादकमभिव्यक्तियोग्यत्वमुच्यते । तत्र च मनसो भागत्रयेऽतिस्वच्छे चिदभिव्यक्ता भवति । तत्र कर्तृभागावच्छिन्ना सा प्रमात्री, क्रियाभागावच्छिन्ना प्रमाणम्, विषयगतभागावच्छिन्ना प्रमितिः, प्रमेयं तु विषयगतं ब्रह्मचैतन्यम्, तदेव ज्ञातं[2] सत्फलम्" इत्यादि प्रक्रिया सिद्धान्तबिन्दूक्ता ॥

---

[1] उपमित्यादिस्थलेऽपि—ग. [2] ज्ञानं—ग.

SGDF Sri Gargeshwari Digital Foundation

अथ प्रतिकूलतर्कनिराकरणम्.

ननु–मिथ्यात्वानुमानं प्रतिकूलतर्कपराहतम्। तथाहि विश्वं यदि कल्पितं स्यात्, साधिष्ठानं स्यात्, न चैवम्; सामान्यतो ज्ञातत्वे सत्यज्ञातविशेषवत्त्वस्याधिष्ठानत्वप्रयोजकस्य निर्विशेषे निस्सामान्ये च ब्रह्मण्यसम्भवादिति—चेन्न; स्वरूपेण ज्ञातत्वे सति विशेषेणाज्ञातत्वस्याधिष्ठानत्वप्रयोजकत्वेन ज्ञात[1]विशेषवत्त्वस्याप्रयोजकत्वात्। पुरुषो न वेति संशयधर्मिणः स्थाणोरप्यन्यत्र ज्ञातस्थाणुत्वरूपविशेषवत्वात्तत्राज्ञातविशेषवत्त्वमपि न प्रयोजकम्; विशेषवत्त्वेनाज्ञातत्वस्यैव लघुत्वेन प्रयोजकत्वात्।

तर्कैः सारस्वतै रत्नैश्चन्द्रिकाचन्द्रभूषणैः।
दुरन्तध्वान्तभङ्गाय प्रतिकर्मव्यवस्थितिः॥

इति प्रतिकर्मव्यवस्था॥

अथ प्रतिकूलतर्कनिराकरणम्.

स्वरूपेण ज्ञातत्वे सति विशेषेणाज्ञातत्वस्येति। ज्ञातत्वे सत्यज्ञातत्वस्येत्यर्थः। ज्ञातस्याप्यज्ञातत्वं न विरुध्यते; ज्ञातसामान्य रूपस्याप्यज्ञातविशेषरूपकत्वसम्भवादित्यभिप्रेत्य स्वरूपेण विशेषेणेत्युपात्तम्। **यद्यपि** सद्रूपपरिपूर्णानन्दाादिरूपयोर्न न्यूनाधिकवृत्तित्वलक्षणः सामान्यविशेषभावः, **तथापि** भ्रमकाले भासमानं सामान्यं बाधकाले भासमानं विशेषरूपमिति बोध्यम्। **तत्राज्ञातेति**। **यद्यापि** स्थाणुत्वमन्यत्र ज्ञातमपि स्थाणावज्ञातमित्यज्ञातविशेषवत्त्वमक्षतम्, **तथापि** भ्रमधर्मिणि ज्ञातविशेस्यान्यत्राज्ञातत्वसम्भवात्तदानीं च भ्रमानुपपत्तेस्तत्राज्ञाते-

---

[1] त्वेनाज्ञात.

SGDF
Sri Gargeshwari Digital Foundation

तथाच निस्सामान्ये निर्विशेषे च ब्रह्मणि स्वप्रकाशत्वेन ज्ञानात् परिपूर्णत्वानन्दत्वादिना चाज्ञानादधिष्ठानत्वमुपपन्नम्। वस्तुतस्तु कल्पितसामान्यविशेषवत्त्वं ब्रह्मण्यपि सुलभमेव; अकल्पितसामान्यविशेषवत्त्वं चाप्रसिद्धम्। नच तत्कल्पनेऽन्योन्याश्रयः;

त्यवश्यं वाच्यम्, तथाच गौरवमिति भावः। **स्वप्रकाशत्वेन ज्ञानात्** स्वप्रकाशचिद्रूपज्ञानात् **परिपूर्णानन्दत्वादिना चाज्ञानात्** परिपूर्णानन्दस्वरूपविषयकाज्ञानाच्च। **उपपन्नमिति**। यद्यप्युक्तरूपद्वयं वस्तुत एकं तथापि तयोराविद्यकालादिभेदस्य स्वीकारेण पूर्णानन्दादिरूपमेवावृतम् न तु चिद्रूपम्। अत एव पूर्णानन्दो नास्ति न भातीत्यादिव्यवहारो न तु चिद्रूपं नास्ति न भातीतिभ ावः। **एवमज्ञातत्वस्यैवाधिष्ठानत्वे प्रयोजकत्वं,** रूप्यादिभ्रमे शुक्त्याद्यवच्छेदेनेव जगद्भ्रमे किञ्चिदवच्छेदं विनैव चिदज्ञाता सत्यधिष्ठानमित्युपपाद्य[1]। यद्यज्ञानविषयविशेषवत्त्वं प्रयोजकम्, तथापि न क्षतिरित्याशयेनाह—**वस्तुतस्त्वित्यादि**। अथाज्ञान[2]विषयविशेषवत्त्वस्य नाधिष्ठानत्वे प्रयोजकत्वम्; रूप्यादिभ्रमस्थले तदभावात्, पूर्णानन्दादिरूपस्य तादृशविशेषवत्त्वस्य नेदं रूप्यमित्यादिबाधकालेपि सत्त्वात्, किं त्वज्ञानविषयतावच्छेदकविशेषावच्छिन्नत्वस्य प्रयोजकत्वम्; तच्च शुक्त्याद्यवच्छिन्नत्वरूपं रूप्यादिभ्रमेष्वेवास्ति, न तु गगनाद्यध्यासस्थले इति—चेन्न; यस्य भ्रमस्योपादानाज्ञानविषयता किञ्चिदवच्छिन्ना तत्रोक्तावच्छिन्नत्वस्य प्रयोजकत्वेऽपि, यत्र साऽनवच्छिन्ना-तत्र तस्य तत्वासंभवेनाज्ञानविषयविशेषवत्त्वस्यैव प्रयो[3]जकत्वात्। **एवं च** भ्रमान्तरे क्लृप्तत्वाभावेन गगनाध्यासेऽपि न तत्कल्पनं युक्तम्; किं त्वज्ञान[4]स्वरूपकत्वमेवाधिष्ठानत्वे पूर्वोक्तं प्रयोजकं युक्तमित्यावेदयितुमाह—**सुलभमिति**। **कल्पितसामान्येति**। संसृष्टतया कल्पितत्व-

---

[1] त्युपपाद्या—**ग.** [2] अथाज्ञात—**ग.** [3] वाप्रयोजक—**क.** [4] अज्ञात—**ग.**

SGDF
Sri Gargeshwari Digital Foundation

कल्पितसामान्यविशेषाणां प्रवाहानादित्वात्, सत्यत्वानन्दत्वादीनामेव कल्पितव्यक्तिभेदेन सामान्यत्वात्, परिपूर्णानन्दत्वादीनां च विशेषत्वात्। अतएव सामान्याकारज्ञानं विना संस्कारानुद्बोधात्कथमध्यास इति न वाच्यं, सदात्मना स्वरूपज्ञानस्यैव सामान्यज्ञानत्वात्। न ह्यध्यसनीयं सदात्मना न भाति। एतावानेव विशेषः—यदधिष्ठानं स्वत एव सदात्मना भाति, अध्यसनीयं तु तत्संबन्धात्। नन्वधिष्ठानतिरोधानं विना भ्रमासंभवः, प्रकाशरूपातिरोधाने तु तदध्यस्ताविद्यादेः प्रकाशानुपपत्तिरिति-

---

मत्र बोध्यम्। प्रवाहेति। सर्वदा संसृष्टतया प्रतीत्यभावेन सादिप्रातीतिकत्वादित्यादिः। तेषामानन्दत्वादिरूपेण सदा प्रतीतिस्वीकारेण पूर्णानन्दत्वादिरूपेणावृतत्वात्सदा प्रतीत्यभावोपपत्तेरसंसृष्टरूपेण मिथोभिन्नरूपेण चानादित्वे तु नान्योन्याश्रयत्वशङ्का। कथमिति। इदं रजतमित्याकारसंस्कारो यथा सादृश्यादिविशिष्टधर्मिज्ञानेनोद्बुद्धस्तादृशभ्रमे हेतुस्तथा सदाकाशमित्यादिसंस्कारोऽपि तदुद्बुद्धस्तादृशभ्रमे हेतुरिति तं विना कथं स इति भावः। ननु—सद्रूपं नाधिष्ठानम्, अध्यसनीयानुविद्धत्वेनाप्रतीयमानत्वात्तत्राह—न हीति। विशेषाज्ञानमध्यासकारणमिति सिद्धान्तवाक्ये विशेषाज्ञानपदं न विशेषाविषयका[1]ज्ञानपरम्; शुक्तिरूप्यादिभ्रमस्थले शुक्तित्वादिविषयकाज्ञानप्रसिद्धेः[2], किंतु भ्रमविषयव्यावृत्ताकारकज्ञानस्याभावपरम्। तादृशस्य शुक्तित्वादिप्रकारकज्ञानस्य शुक्तिरूप्यादिभ्रमं प्रति मूलीभूताज्ञानोच्छेदकत्वेन तदभावस्य तत्र प्रयोजकत्वेन क्लृप्तत्वात्। ब्रह्मनिर्विकल्पकप्रमाया यद्यपि न विशेषणविधया व्यावृत्ताकारकत्वम्, तथाप्युपलक्षणविधया द्वैताभावाद्याकारकत्वस्य प्रागुपपादितत्वान्नानुपपत्तिरित्याशये-

---

[1] विशेषविषयका—ख. ग. [2] ज्ञानाप्रसिद्धेः—ग.

SGDF
Sri Gargeshwari Digital Foundation

चेत्, न; एकस्यैवानन्दाद्यात्मना तिरोहितस्य सदात्मना प्रकाशसंभवात्। तदुक्तं वार्तिककारपादैः—

यत्प्रसादादविद्यादि सिद्ध्यतीव दिवानिशम्।
तदप्यपन्हुतेऽविद्या नाज्ञानस्यास्ति दुष्करम्॥ इति।

न च—बाधकालेऽपि सद्वि[1]शेषज्ञानमस्तीति—वाच्यम्; परिपूर्णानन्दत्वादेः[2] सत एव विशेषत्वेन तदा तदज्ञानाभावात्। धर्मत्वमात्रस्यैव कल्पितत्वात्। यद्वा भ्रमविरोधिज्ञानाभाव एव तन्त्रं, न तु विशेषाज्ञानम्; विश्वोपादानगोचराज्ञानस्य श्रवणादिजन्यमात्ममात्रविषयकं वृत्तिरूपं ज्ञानं विरोधि, न तु चिद्रूपं स्वतः सिद्धं ज्ञानम्; भ्रमविरोधिनश्च वृत्तिरूपस्य ज्ञानस्येदानीमभावोऽस्त्येव। नन्वात्मानात्मनोर्द्रष्टृदृश्यत्वात्मानात्मत्वादिना भेदज्ञानात्कथमध्यस्ताधिष्ठानभाव इति—चेन्न। इदमनिदं न भवतीति पुरोवर्त्यपुरोवर्तिनोर्भेदग्रहेऽपीदं रजतमित्यध्यासवत् सन् घट इत्याद्यध्यासो भविष्यति। न हि रूपान्त

नाह—यद्वा भ्रमेति। भविष्यतीति। सन् घटो नेति भेदग्रहाभावादिति शेषः॥

यत्तु सत्वपूर्णानन्दत्वादीनां मिथो धर्मिणश्च कल्पितभेदसत्वात्सामान्यविशेषत्वमित्यस्मदाचार्योक्तिं श्रुत्वापि निर्विशेषब्रह्मवादे ब्रह्मणः सामान्यविशेषासंभव इत्यादि कूजितम्, तत्स्वकुलपराभवप्रयुक्तमूर्च्छामाहात्म्यम्। यदपि यद्वेत्यादि न युक्तम्; मुख्याज्ञानविरोधित्वे वृत्तेर्मुख्यज्ञानत्वापत्तिः, चिद्रूपमुख्यज्ञाना[3]विरोधित्वेनाज्ञानस्य मुख्याज्ञानत्वाभावापत्तिश्चेत्यादि, तदपि तथा; वृत्तिं विनापि सुखादौ ज्ञानव्यवहारादिना वृत्तौ मुख्यज्ञानान्यत्वस्यान्वयव्यतिरेकाभ्यामज्ञानविरोधित्वस्य च

[1] असद्वि. [2] स्वत. [3] मुख्यज्ञान—क.

SGDF
Sri Gargeshwari Digital Foundation

रेण भेदग्रहो रूपान्तरेणाध्यासविरोधि; सन् घट इत्यादिप्रत्यये च सद्रूपस्यात्मनो घटाद्यनुविद्धतया भानान्न तस्य घटाद्यध्यासाधिष्ठानतानुपपत्तिः। सद्रूपेण च सर्वज्ञानविषयतोपपत्तेर्न रूपादिहीनस्याप्यात्मनः कालस्येव चाक्षुषत्वाद्यनुपपत्तिः। ननु—विश्वं यदि कल्पितं स्यात्तदा सप्रधानं स्यात्। न चैवम्; तस्मान्न कल्पितमिति चेन्न; अत्रापि प्रधानस्य सजातीयस्य सत्वात्, पूर्वप्रपञ्चसजातीयस्यैवोत्तरप्रपञ्चस्याध्यसनात्।

मानसिद्धत्वात्। चिन्मात्राविरोधित्वेऽपि वृत्त्युपारूढचिद्रूपमुख्यज्ञानविरोधित्वेनाज्ञानस्य मुख्यत्वसंभवात्। न ह्यनभिव्यक्ताग्नयदाह्यत्वेऽपि तृणाद्युपारूढाग्निदाह्यस्य न मुख्यमग्निदाह्यत्वम्। तस्मादमुख्यत्वं स्वीयं नाज्ञाने त्वमारूरूरुपः[1]। **सर्वज्ञानविषयतेति।** उपपादितमेतत्पूर्वं मिथ्यात्वहेतुविवेचने। यत्तु—सद्विषयकघटादिचाक्षुषादेव मोक्षः स्यादिति, तन्न; श्रवणादिप्रयुक्तवृत्तिरेव मूलाज्ञाननिवर्तिका, तस्या एवाज्ञानतत्कार्याविषयकत्वेनाज्ञानसमानविषयकत्वादित्यादेरुक्तत्वाद्धटादिवृत्त्यावरणे निवर्तिते सद्रूपं स्वप्रकाशतया भाति न तु वृत्त्यविषय[2] इत्यादेरप्युक्तत्वाच्च। यदपि घटः स्फुरतीत्यत्र स्फुरणानुविद्धतया घटो न प्रतीयते; किंतु घटकर्तृकं स्फुरणमिति, तदपि न; अशाब्दबोधे स्फुरणस्य घटांशेनाभात्[3]। शाब्दबोधेऽपि तादात्म्यमाख्यातार्थ इति घटस्य स्फुरणतादात्म्यं प्रतीत्या स्फुरणाधिष्ठानकत्वाविरोधात्। **अत्रापीति।** प्रधानपदेन यदि देशान्तरे कालान्तरे वा विद्यमानमध्यस्तजातीयमुच्यते, तदा जगदध्यासस्य तद्वत्त्वव्याप्यत्वमिष्टमिति भावः। यदि तादृशं सत्यं तत्पदेनोच्यते, तदा तादृशव्याप्यत्वे मानाभाव इत्याशयेनाह—

---

[1] मापः—ग. [2] वृत्तिविषय—ग. [3] भानात्—ग.

SGDF
Sri Gargeshwari Digital Foundation

अध्यासो हि स्वकारणतया संस्कारमपेक्षते न तु संस्कारविषयस्य सत्यताम्; अनुपयोगात्। नच—प्रमाजन्य एव संस्कारो भ्रमहेतुः। अतो विषयसत्यत्वमावश्यकमिति—वाच्यम्; मानाभावात्, विपरीते लाघवाच्च। अत एवाध्यस्तसजातीयं पूर्वमध्यस्तापेक्षयाऽधिकसत्ताकमपेक्षणीयमित्यपि—निरस्तम्; सत्यतावदधिकसत्ताया अप्यनुपयोगात्। पूर्वं तु ज्ञानमात्रमपेक्षते, तच्चास्त्येव। नन्वेवमधिष्ठानस्यापि ज्ञानमात्रमेव हेतुः, न तु तदिति न सदधिष्ठानापेक्षा स्यादिति शून्यवादापत्तिरिति—चेन्न; अधिष्ठानस्य ज्ञानद्वारा भ्रमाहेतुत्वेऽप्यज्ञानद्वारा भ्रमहेतुत्वेन सत्वनियमात्। भ्रमोपादानाज्ञानविषयो ह्यधिष्ठानमित्युच्यते, तच्च सत्यमेव; असत्यस्य सर्वस्याप्यज्ञानकल्पितत्वेनाज्ञानाविषयत्वात्, तदसत्यत्वे तदज्ञानस्य

अध्यासो हीति। विपरीत इति। भ्रमजन्यसाधारणेन संस्कारत्वेन हेतुत्वे इत्यर्थः। **हेतुः** प्रयोजकः। **न तु तदिति।** न तु प्रमाघटकतयाऽधिष्ठानसत्वं[1] प्रयोजकमित्यर्थः। **शून्यवादापत्तिरिति।** तथा च यथाऽधिष्ठानप्रमाहेतुत्वेनाधिष्ठानं सत्यमपेक्षते,[2] तथा प्रमाजन्य संस्कारस्य हेतुत्वेन प्रधानं सत्यमिति शेषः। नाधिष्ठानप्रमात्वेन हेतुत्वम्; येन दृष्टान्तेन[3] प्रधानप्रमाजन्यः संस्कारो हेतुरुच्येत, किंत्वज्ञानविषयक[4]त्वेनाधिष्ठानसत्यत्वापेक्षणान्न शून्यवादापत्तिरित्याशयेनाह—**नाधिष्ठानेति। ज्ञानद्वारा** कारणीभूतप्रमाघटकतया। **भ्रमाहेतुत्वे** भ्रमाप्रयोजकत्वे। **अज्ञानद्वरा** कारणीभूताज्ञानविषयतया। **भ्रमहेतुत्वेन** भ्रमोपादानत्वेन। **अज्ञानकल्पितत्वेन** अज्ञानप्रयुक्तत्वेन। तदवच्छेदकीभूतास्वप्रकाशत्वेनेति यावत्। तथा च जडस्य

---

[1] धिष्ठानं–**क. ग.** [2] मपेक्ष्यते–**ख. ग.** [3] तद्दृष्टान्तेन–**ग.** [4] विषय–**ग.**

SGDF
Sri Gargeshwari Digital Foundation

भ्रमाबाधकत्वप्रसङ्गात्, जगति भ्रमबाधव्यवस्था च न स्यात्। बाधेन हि किंचिद्विरुद्धं तत्वमुपदर्शयता आरोपितमतत्वं बाधनीयम्। उभयाध्यासे तु किं केन बाध्यते। अत एव

प्रकाशाप्रसक्त्या नाज्ञानविषयत्वम् । स्वप्रकाशस्य तु चैतन्यस्य मोक्षकालेऽप्यन्वयान्नासत्यतेति भावः । **भ्रमाबाधकत्वेति**। व्यावहारिकभ्रमाबाधकत्वेत्यर्थः । तेन प्रातीतिकभ्रमे मिथ्याभूतशुक्त्यादिज्ञानस्य बाधकत्वेऽपि न क्षतिः । ननु—मिथ्याविषयकज्ञानमपि बाधकमस्तु तत्राह—**जगतीति**। **विरुद्धं** व्यावृत्तरूपम्। **तत्त्वं** बाध्यापेक्षयाऽधिकसत्ताकम् । **उपदर्शयता** विषयीकुर्वता। एवकारः शेषः। उक्तं हि भामत्याम्—'तत्वपक्षपातो हि धियां स्वभावः। यदाहुर्बाह्या अपि—

निरुपद्रवभूतार्थस्वभावस्य विपर्ययैः।
न बाधो यत्नवत्वेऽपि[1] बुद्धेस्तत्पक्षपाततः॥ इति॥

बाध्यापेक्षयाधिकसत्ताकविषयकधीरेव बाधिका स्वभावात्, न तु न्यूनसत्ताकविषयकधीरिति तत्र पर्यवसितार्थः। यत्तु—स्वाप्नस्यगजाद्यभावज्ञानस्य स्वाप्नगजादिधीबाधकत्व[2]माचार्यैः पूर्वमुक्तम्। तत्र बाधो मिथ्यात्वनिश्चयः । तथा च मिथ्यात्वस्य स्वान्यूनसत्ताकस्य स्वसमानाधिकरणाभावस्य प्रतियोगित्वरूपतयाऽधिकसत्ताकाभावज्ञानं विनापि तदुपपद्यत एवेति ध्येयम्॥

यत्त्वबाधितविषयकज्ञानस्य बाधकत्वेऽन्योन्याश्रयात् त्रिचतुरकक्षास्वबाधितविषया स्वप्नधीवत्पश्चाद्बाध्य[3]स्याप्यधिष्ठानस्य धीर्बाधिका संभवति, अथाधिष्ठानस्य बाधानुपलम्भात्सत्यता वाच्या; तर्हि प्रधानस्यापि तत एव साऽस्त्विति—तन्न; यदि ह्यबाधितविषयकत्वेन ज्ञाय-

[1] बाधापन्नवत्वेऽपि—ग. [2] बाधक—क. [3] धीवत्पश्चाबाध्य-ग.

SGDF
Sri Gangeshwari Digital Foundation

भगवता भाष्यकारेण 'सत्यानृते मिथुनीकृत्ये' त्युक्तम्। नन्वेतत्प्रपञ्चसाध्यार्थक्रियाकारिणः प्रपञ्चान्तरस्याभावेन स्वोचितार्थक्रियाकारिणोस्य न मिथ्यात्वमिति—चेन्न ; स्वाप्नमायादौ व्यभिचारात् स्वोचितक्रियाकारित्वस्य पारमार्थिकसत्वाप्रयोजकत्वात्। नापि—श्रुत्यादिसिद्धोत्पत्त्यादिमत्त्वं सत्त्वे तन्त्रम् ; स्वप्नप्रपञ्चे व्यभिचारात्, तस्यापि 'न तत्र रथा न रथयोगा न पन्थानो भवन्त्यथ रथान् रथयोगान् पथः सृजत' इत्यादि श्रुत्योत्पत्यादि प्रतिपादनात्। न च—कल्पाद्यभ्रमायोगः ; कल्पान्तरीयसंस्कारस्य तत्र हेतुत्वात्। न च—जन्मान्तरीयसंस्कारस्य कार्यजनकत्वेऽतिप्रसङ्गः ; अदृष्टादिवशेन क्वचिदुद्बोधेऽप्यन्यत्रानुद्बोधोपपत्तेः, कार्योन्नेयधर्माणां यथाकार्यमुन्नयनात्। अन्यथा जातस्य स्तन्यपानादौ प्रवृत्तिर्न स्यात्। ननु—चैत्रेण मैत्रे संस्काराध्यासेऽपि मैत्रस्य भ्रमादर्शनात् जगद्भ्रमहेतुसंस्कारस्य सत्त्वं दुर्वारम्। न च—स्वेनाध्यस्ता-

---

मानप्रमा बाधिकोच्यते, तदा प्रमायां तथा ज्ञातायां भ्रमो बाधितः सन् बाधितविषयकत्वेन ज्ञेयः। ततो भ्रमस्याबाधकत्वज्ञानात् तेन बाधितविषयकत्वं प्रमायां ज्ञेयमित्यन्योन्याश्रयः स्यात्। अबाधितविषयकधीत्वेन बाधकत्वे तु नासौ। वस्तुतस्तेन ज्ञायमानत्वरूपेण बाधकत्वेऽपि सर्वसाक्षित्वादिनाधिष्ठानस्याबाध्यत्वनिश्चयस्य प्रागुक्तत्वान्न भ्रमस्याबाधकत्वनिश्चयस्तत्रापेक्ष्यत इति नान्योन्याश्रयः। **अत एवाधिष्ठानवत्प्रधानस्यापि बाधानुपलम्भ इत्ययुक्तम्** ; साक्षित्वादिनाधिष्ठानस्य बाधासम्भवेऽपि प्रधानस्य ससृष्टत्वदृश्यत्वादिना बाधसम्भवात्। **कल्पाद्यभ्रमेति**। तत्कल्पीयज्ञानजन्यसंस्कारस्य पूर्वमभावादित्यादिः। **स्तन्यपानादाविति**। इष्टसाधनत्वस्मृत्यसम्भवेनेति

SGDF Sri Gargeshwari Digital Foundation

त्संस्काराद्भ्रमः; भ्रमात्पूर्वं स्वस्य कार्यानुमेयसंस्काराध्यास-नियमाभावादिति—चेन्न; शुक्तिरूप्यस्य कुण्डलाजनकत्ववच्चैत्राध्यस्तसंस्कारस्य मैत्रभ्रमाजनकत्वेऽपि वणिग्वीथीस्थरूप्यस्य कुण्डलजनकत्ववत्स्वेनाध्यस्तस्य संस्कारस्य वियदाद्यध्यासजनकत्वोपपत्तेस्तत्प्रतीत्यभावेऽपि तदध्यासस्य पूर्वं सत्वात्, कृत्स्नस्यापि व्यावहारिकपदार्थस्याज्ञातसत्वाभ्युपगमात्। ननु—प्रातिभासिकरूप्ये त्रैकालिकनिषेधस्य त्वन्मते व्यावहारिकरूप्यविषयत्ववद्व्यावहारिकप्रपञ्चेऽपि 'नेह नाने'ति त्रैकालिकनि-

---

शेषः। कार्यानुमेयसंस्काराध्यासनियमाभावादिति। यतः संस्कारः कार्यरूपलिङ्गैकगम्योऽतः प्रतीत्यभावात्पूर्वं तत्सत्वे मानाभावादित्यर्थः। आगन्तुकदोषजन्यत्वाच्छुक्तिरूप्यादिकमिव चैत्राध्यस्तमैत्रसंस्कारो न कार्यविशेषजनकः; अध्यस्तत्वेऽपि वणिग्वीथीरूप्यमिवोक्तजन्यत्वाभावात् स्वस्मिन्मैत्रेण कल्पितः संस्कारः कार्यविशेषजनक इत्याशयेनाह—न शुक्तीति। पूर्वं सत्वादिति। न च—वियदादेरध्यासत्वाभावेनैवोपपत्तेर्न संस्कारो वियदादिकार्यकल्प्य इति—वाच्यम्; दृश्यत्वादिना वियदादिमिथ्यात्वनिश्चयोत्तरं तदन्यथानुपपत्त्या तत्कल्पनात्। वियदादिसत्यत्वमतेऽपि जन्यत्वेन विनाशित्वेन च श्रुत्यादिसिद्धस्य पूर्व[1]कल्पीयस्य सूक्ष्मावस्थारूपो नाश एवोत्तरकल्पीयस्य प्रागभाव इत्यवश्यं वाच्यम्। 'तद्धेदं तर्ह्यव्याकृतमासीत्' भूतग्रामः स एवायं भूत्वा भूत्वा प्रलीयत, इत्यादि श्रुतिस्मृतिभ्यो निरन्वयनाशासत्कार्यवादायोगात्, तथा च स एव नाशः संस्कारशब्देनास्माभिरुच्यमानः स्थूलावस्थवियदादिरूपेण जायत इति संस्कारहेतुत्वस्य दुर्वारत्वाच्च।

---

[1] तस्य पूर्व—ग

SGDF
Sri Gangadhareshwar Digital Foundation

षेधस्य पारमार्थिकप्रपञ्चान्तरविषयताऽवश्यं वाच्येति—चेन्न ; भ्रमबाधवैय्यधिकरण्यापातेनास्य पक्षस्यानङ्गीकारपराहतत्वात् । अङ्गीकारेपि व्यावहारिकनिषेधे पारमार्थिकनिषेधत्वं न सम्भवति ; अप्रतीतस्य निषेधायोगात् । प्रतीत्या सहाध्यासातिरिक्तसम्बन्धाभावेन पारमार्थिके प्रतीतत्वाभावात् । ननु—प्रधानाधिष्ठानयोः सादृश्याभावात्कथमध्यासः? अथ निर्गुणयोरपि गुणयोः सादृश्यवदत्रापि किञ्चित्सादृश्यं भविष्यतीति, तन्न ; निर्धर्मके ब्रह्मणि तस्याप्यध्यासाधीनत्वेनान्योन्याश्रयात् । यद्यपि सादृश्यं सोपाधिकाध्यासे न कारणम्, व्यभिचारात् । तथापि निरुपाधिकाध्यासेऽन्वयव्यतिरेकाभ्यां तस्यावश्यमपेक्षणीयत्वात्, सोपाधिकेऽपि 'रक्तः स्फटिक' इत्यादौ द्रव्यत्वादिना सादृश्यस्य सत्वाच्चेति—चेन्न ; अविद्याध्यासस्यानादित्वेन कारणानपेक्षस्य सादृश्यानपेक्षत्वात्, अन्तःकरणाध्यासेऽप्य[1]विद्यासम्बन्धित्वस्यैव सादृश्यस्य विद्यमानत्वात् । वस्तुतस्तु—न भ्रमे सादृश्यस्यापेक्षानियमः, निरुपाधिकेऽपि 'पीतः शङ्ख'

प्रपञ्चान्तरविषयकेति । उक्तनिषेधप्रतियोगित्वेन प्रपञ्चान्तर[2]विषयकेत्यर्थः । निरुपाधिकेऽपीति । न च—पीतः शङ्ख इत्यादौ नेत्ररश्मिसंस्पृष्टपित्तद्रव्यस्य शङ्खादौ संसर्गात्तदीयं पतित्वमनुभूयमानमारोप्यत इति सोपाधिकाध्यास एवायमिति—वाच्यम् ; एतत्कल्पनायां मानाभावात् । परम्परासम्बन्धेन गोलकावच्छिन्ननेत्रस्थपित्तादिदोषाणामेव शङ्खादौ स्मर्यमाणपीतत्वादिभ्रमहेतुत्वस्यैव प्रयुक्तत्वात् । अन्यथा पुरुषान्तरेणापि तादृशपित्तस्य शङ्खादिस्थस्य ग्रहणापत्तेः । यदीयनेत्रस्थं तत्तेनैव गृह्यत इति नियमकल्पने गौरवात् । आदिपदग्राह्ये रूप्य[3]-

---

[1] से त्ववि. [2] प्रपञ्चान्तरे—ख. ग. [3] ग्राह्यरूप्य—ग.

SGDF
Sri Gargeshwari Digital Foundation

इत्यादौ व्यभिचारात्। 'रक्तः स्फटिक' इत्यादावपि द्रव्यत्वादिना सादृश्यमस्तीत्यपि न; प्रधानमात्रवृत्तितया प्रागवगतमध्याससमये चाधिष्ठानवृत्तितया गृहीतं यत्तदेव हि सादृश्यं विपर्ययप्रयोजकमिति त्वयापि वाच्यम्, न तु प्रागेव प्रधानाधिष्ठानोभयवृत्तितया गृहीतम्; तस्य संशायकत्वात्। द्रव्यत्वादि च लोहितालोहितवृत्तितया प्राग्गृहीतमिति न विपर्ययप्रयोजकम्। किञ्च सादृश्यं न स्वतो भ्रमकारणम्; मानाभावात्, किन्तु संस्कारोद्बोधेन सामग्रीसम्पादकतया, संस्कारोद्बोधश्च

भृङ्गारगतशुक्लजलादौ नीलत्वादिभ्रमे सोपाधिकत्वस्य शङ्कितुमशक्यत्वात्। तत्र जपाकुसुमादिवत्स्वधर्मसङ्क्रामकरूपस्योपाधेरसम्भवात्। शुक्त्यादौ रूप्यादिसादृश्याज्ञानकाले नीलभागावच्छिन्नसन्निकर्षादिरूपाया विशेषदर्शनसामग्र्याः सत्वेन तयैव प्रतिबन्धाद्रूप्याद्यध्यासानुत्पत्तिसम्भवेन क्वापि भ्रमे सादृश्यज्ञानहेतुत्वे मानाभावाच्च। **प्रागवगतमिति**। प्रधानसम्बन्धितया यत्कदाचिदवगतं तस्यैव सादृश्यस्य शुक्लत्वादेः प्रधानसंस्कारोद्बोधकत्वमिति तथावगतत्वमावश्यकं बोध्यम्। **अध्याससमये** अध्यासोत्पत्त्यव्यवहितपूर्वसमये। **प्रागेव** अध्यासोत्पत्त्यव्यवहितपूर्वसमय एव। **संशायकत्वादिति**। प्रधानस्य लौहित्यादिमत्तयाऽधिष्ठानस्य स्फटिकादेर्लौहित्याद्यभाववत्तया गृह्यमाणत्वादुभयवृत्तित्वरूपसाधारणधर्मत्वरूपत्वात्साधारणधर्मधीविधया तज्ज्ञानस्य[1] संशयजनकत्वादित्यर्थः। तथा च—संशयसामग्र्यां सत्यां न निश्चयरूपो भ्रम इति भावः। **सादृश्यं** सादृश्यज्ञानम्। **संस्कारोद्बोधेनेति**। उद्बोधश्च शक्त्युत्पादनादिरूप इति भावः। अथवा **न स्वतो भ्रमकारणमिति**। स्वतः सादृश्यधीत्वेन भ्रममात्रे कारणं नेत्यर्थः। **संस्कारोद्बोधेन** संस्कारचरमसहकारित्वेन। **सामग्रीति** काचित्कभ्रमसामग्रीत्यर्थः। **एवं च**

[1] धीविषयात्तज्ज्ञानस्य—ग.

SGDF
Sri Gargeshwari Digital Foundation

न सादृश्यैकनियतः; अदृष्टादिनापि तत्सम्भवात्। तदुक्तम्—'सदृशादृष्टचिन्ताद्याः स्मृतिबीजस्य बोधकाः' इति। चिन्तादिकं च प्रणिधानसूत्रे व्याख्यातम्। तथाचान्यतः संस्कारोद्बोधे सति सादृश्यमनुपयोगि। तदुक्तं विवरणे—

नव्यमते संस्कारचरमसहकारिण एवोद्बोधकरूपत्वेऽपि न क्षतिः। **प्रणिधानसूत्र** गौतमोक्तपञ्चाध्यायगित तृतीयाध्यायीयद्वितीयाह्निकस्थे "प्रणिधान निबन्धाभ्यासलिङ्गलक्षणसादृश्यपरिग्रहाश्रयाश्रितसम्बन्धानन्तर्यवियोगैककार्यविरोधातिशयप्राप्तिव्यवधानसुखदुःखेच्छाद्वेषभयार्थित्वक्रियारागधर्माधर्मनिमित्तेभ्य" इति सूत्रे। **प्रणिधानं** चिन्ताधारा यस्मिन्विषये तद्गतविशेषाणां[1] स्मारिका, निबन्धः एकवाक्योक्ताः प्रमाणप्रमेयादयो मिथः स्मारकाः। **अभ्यासः** ज्ञानावृत्तिकृतः संस्कारः शीघ्रस्मारकः, लिङ्गं व्याप्यम्, **लक्षणं** व्यावर्तकम्, **सादृश्यं** सदृशौ मिथः स्मारकौ, एवं **परिग्रहः** स्वस्वामिनौ, आश्रयाश्रितौ पोषकपोष्यौ, **संबन्धाः** शिष्याचार्यादिभावापन्नाः, **आनन्तर्यं** पूर्वापरकालानुष्ठेयाः स्नानतर्पणादयः, **वियोगो** वियुक्ताः, **एककार्यं** एककार्याः, **अतिशयो** न्यूनाधिकतामापन्नाः,[2] **विरोधि** विरुद्धाः, **प्राप्तिः** प्राप्यप्रापकाः, **व्यवधानं** आच्छाद्याच्छादकाः असिकाषादयः[3] **सुखदुःखे** अनुभूयमाने मूलस्य स्मारके, **इच्छा**, स्नेहो यत्र जातस्तस्य, एवं **द्वेषः भयं** यतस्तस्य मुहुः स्मारकम्, एवं अर्थित्वं अप्राप्तेच्छा[4] यत्र तस्य, **क्रिया** रथाधिशिल्पं, कर्तुः रागो लब्धविषये बुभुक्षा तस्य, धर्मो गतजन्मादेः, अधर्मो दुःखहेतुः धीविषयस्य, **निमित्तं** कार्यकारणादिभावापन्ना मिथः स्मारकाः, सर्वेषां स्मारकाणामुपलक्षण-

---

[1] यस्मिन् विशेषाणां–**क.** [2] न्यूनाधिकतापन्नाः–**क. ख. ग.** [3] कोशादयः–**ग.** [4] अप्राप्तप्राप्तीच्छा–**ख. ग.**

SGDF
Sri Gargeshwari Digital Foundation

'निरुपाधिकभ्रमकार्यदर्शनमेव गुणावयवसामान्याभावेऽपि केतकी-गन्धसदृशः सर्पगन्धं इतिवत्सादृश्यान्तरं वा शङ्खपीतिमादाविव कारणान्तरं वा कल्पयती'ति । ननु-दोषं विना भ्रम-स्वीकारे तदप्रामाण्यस्य स्वतस्त्वापत्तिः, दोषजन्यत्वस्वीकारे तु दोषस्याप्यध्यसनीयत्वेनानवस्थापत्तिरिति—चेन्न; अनाद्य-विद्याध्यासस्य दोषानपेक्षत्वात् । साद्यध्यासस्य चाविद्यादि-दोषजन्यत्वान्नाप्रामाण्यस्य स्वतस्त्वम्; नाप्यनवस्था । अन्यथा तार्किकाणामप्यनादिप्रमा गुणं विनापीति प्रामाण्यपरतस्त्वं भज्येत । जन्यप्रमामात्रस्य गुणजन्यत्वं तु जन्याध्यासमात्रस्य दोषजन्यत्वेन समम् । ननु—लाघवेन प्रथमोपस्थितत्वेन च प्रवृत्तिमात्रं प्रति संसर्गधिय इव धूममात्रं प्रति वन्हेरिव चाध्यासमात्रं प्रति दोषादीनां जनकत्वादविद्याध्यासोऽपि कथं क्लृप्तकारणेन विना भवतु? अन्यथा संसर्गधीरपि प्रवृत्तिविशेषे वन्हिरपि धूमविशेषे हेतुरिति स्यात्; तथाचाख्यातिवादश्चानु-मानमात्रोच्छेदश्चापद्येयाताम् । किंचाविद्यारूपविषयस्यानादि-त्वेऽपि तत्प्रतीतेर्दोषाजन्यत्वे प्रामाण्यापातः; अप्रामाण्यप्रयो-जकस्य दोषजन्यत्वस्याभावात्, अथ भेदवदविद्याख्यदोषस्य स्वपरनिर्वाहकत्वम्; एवमपि भेदो भिन्न इतिवत् "अज्ञान-मज्ञात"मिति व्यवहारो भवतु; प्रतीतिमात्रशरीरस्य स्ववि-षयधीहेतुत्वं कुतः? स्वस्य स्वस्मात्पूर्ववृत्तित्वासंभवादिति—चेन्न; अध्यासत्वस्य लघुत्वेऽपि प्रथमोपस्थितत्वेऽपि न दोष-

---

मिदम् । गुणावयवसामान्येति । गुणविशेषरूपस्यावयवविशेषरूपस्य च सामान्येत्यर्थः । कारणान्तरम् । सादृश्यनिरपेक्षदोषादिरूपम् । यत्तु प्रातीतिकदृष्टान्तेन व्यावहारिकस्योत्पत्त्यादिमत्त्वेऽपि मिथ्या-

SGDF
Sri Gargeshwari Digital Foundation

जन्यतायां तन्त्रत्वम्; दोषस्यापि दृश्यत्वेनाध्यसनीयतयाऽनवस्थापत्तेः। यथा नित्यज्ञानवादिनां ज्ञानत्वस्य न शरीरजन्यतादावच्छेदकत्वम्, नवा गुणजन्यत्वस्य प्रामाण्यप्रयोजकत्वम्, बाधकबलात्, तद्वज्जन्याध्यासं प्रत्येव दोषादीनां कारणत्वम्; गुणाजन्यत्वेऽप्यबाधितविषयतयानित्यज्ञानप्रामाण्यवत् दोषाजन्यत्वेऽपि बाधितविषयतयानाद्यध्यासस्याप्यप्रामाण्योपपत्तिः। बाधितविषयत्वेऽपि न दोषजन्यत्वमवच्छेदकम्; दोषजन्यत्वेऽप्यवच्छेदकान्तरान्वेषणेऽनवस्थापातात्। बाधितविषयत्वस्य दोषाजन्यवृत्तित्वेऽपि दोषजन्यत्वस्य तद्व्याप्यत्वोपपत्तेः। अत एव शबरस्वामिना 'यस्य दुष्टं करणं यत्र च मिथ्येति प्रत्ययः स एवासमीचीनो नान्य' इति वदता दुष्टकरणजन्यत्वमन्तरेणाप्यर्थान्यथात्वमप्रामाण्यप्रयोजकमुक्तम्। अविद्याध्यासरूपस्य साक्षिचैतन्यस्याविद्याजन्यत्वानभ्युपगमान्न प्रतीतिमात्रशरीरत्वव्याघातः; अहमज्ञ इत्याद्यभिलापकारणीभूतवृत्तिरूपाध्यासं प्रति त्वविद्यायाः कारणत्वमस्त्येव, घटादीनामिव स्वप्रत्यक्षं प्रति।

त्वोक्तिर्न युक्ता; प्रातीतिकस्य तुच्छत्वेन स्वरूपेण निषेधसंभवेऽपि व्यावहारिकस्य तदसंभवादिति रोदनम्, तत्स्वरूपेण निषेधेऽपि व्यावहारिकस्य सत्वेन प्रतीत्यर्हत्वादिना तुच्छवैलक्षण्यात्परिहृतम्। यत्तु संशायकस्यापि द्रव्यत्वादेः संस्कारोद्बोधकत्वेन विपर्ययजनकत्वमिति, तन्न; संशयसामग्र्यां सत्यां निश्चयासंभवात्। संशयनिश्चयत्वाभ्यां कार्यत्वास्वीकारेऽपि कोटिद्वयस्यैव भासकसत्वे भानावश्यकत्वात्। घटादीनामिवेति। तथाच विषयविधयाऽविद्याजन्यत्वादेवा[1]विद्यादोषजन्यत्वमप्रामाण्यप्रयोजकं स्थितमेव। नहि भ्रमत्वेन दोषजन्यत्वमप्रमात्व-

---

[1] र्वा—ग.

SGDF
Sri Gargeshwari Digital Foundation

वह्निविशिष्टधियोस्तु बाधकाभावात्सामान्येनैव धूमप्रवृत्ती प्रति हेतुतेति न पूर्वोक्तदोषापातः। नन्वविद्याध्यासस्यानादित्वेन दोषाद्यनपेक्षावदधिष्ठानानपेक्षापि स्यादिति चेन्न; जनकत्वेनाधिष्ठानानपेक्षायामप्याश्रयत्वेन तदपेक्षानियमात्, परममहत्वादेराश्रयपेक्षावत् अध्यासस्य साधिष्ठानत्वनियमेनात्रापि परतन्त्रत्वस्य समत्वात्, भास्यस्याविद्याध्यासस्य भासकतयाप्यधिष्ठानापेक्षणाच्च। अविद्यावच्छिन्नचैतन्यस्याविद्यादिसकलद्वैतद्रष्टृत्वात्तस्यैव चान्तःकरणावच्छेदेन प्रमातृत्वात्, भ्रमप्रमयोः सामानाधिकरण्योपपत्तेर्भ्रमस्य समानाधिकरणप्रमानिवर्त्यत्वमुपपद्यते। ननु—देहेन्द्रियादिकं विना कथमन्तःकरणाध्यासः? कात्रानुपपत्तिः? अधिष्ठानापरोक्षत्वं ह्यपरोक्षभ्रमे कारणम्,

प्रयोजकम्; तत्तदनुगतदोषकार्यत्वस्य भ्रमत्वाविशेषेऽपि[1] तत्तद्व्यक्तित्वेनैवावच्छेदात्। अपितु भ्रमत्वव्याप्यरूपेण दोषजन्यत्वं तत्प्रयोजकम्। तथाच विषयजन्यवृत्तिज्ञानमात्रनिष्ठधर्मस्यापि तथात्वात्तत्प्रयोजकत्वमक्षतम्। न चाविद्याविषयकवृत्तेः प्रत्यक्षत्वे इन्द्रियसान्निकर्षजन्यत्वापत्तिरिति—वाच्यम्; संयुक्ततादात्म्यादिसन्निकर्षस्याविद्यायां सत्वेनेष्टत्वात्, चाक्षुषत्वाद्यवच्छिन्नं प्रति चक्षुरादिसन्निकर्षहेतुतावश्यकत्वेन सामान्यतः प्रत्यक्षे तद्धेतुत्वे मानाभावाच्च। नव्यमते मानसप्रत्यक्षे सन्निकर्षस्याहेतुत्वाच्च साधिष्ठानकत्वनियमेनाविद्याविषयतादात्म्यनियमेनाविद्याध्यासो यद्युक्ततादात्म्ययुक्तो न स्यात्तदाऽविद्यासमानविषयकधीनिवर्त्यो न स्यात्, ब्रह्मवत्तुच्छवद्वेति तर्केण तथा नियम इति भावः। **भ्रमप्रमयोः** भ्रमतन्निवर्तकप्रमयोः। **ननु**—नित्यज्ञानस्याबाधितविषयकत्वेन प्रमात्वमिव बाधितविषयकत्वेन भ्रमत्वमित्ययुक्तम्; न ह्यावयोः प्रमात्वं गुणप्रयोज्यं किंतु स्वतः, तथाच गुणाप्रयुक्तत्वेन प्रमात्वमिव दोषाप्रयुक्त-

[1] विशेषित—ग.

SGDF
Sri Gargeshwari Digital Foundation

तद्यत्राधिष्ठानं स्वतो नापरोक्षम्, यथा शुक्त्याद्यवच्छिन्न-चैतन्यम्; तत्र तदपरोक्षार्थं देहेन्द्रियाद्यपेक्षा, प्रकृते चाविद्या-वच्छिन्नं चैतन्यमधिष्टानम्, तत्र चैतन्यस्य स्वप्रकाशत्वेना-विद्यायाश्च तदध्यस्तत्वेन तेनैव साक्षिणापरोक्षत्वात्कुत्र देहेन्द्रि-याद्यपेक्षा? अथैवं प्रलये देहेन्द्रियाद्यभावेऽप्यज्ञानसद्भावेनान्तः-करणाध्यासप्रसङ्गः, न; तदा देहेन्द्रियादिसर्जनविलम्बहेतु-

---

त्वेन भ्रमत्वं ते स्वतः स्यात्, अतएव शाबरवाक्ये दुष्टकरणजन्यत्वं मिथ्यात्वेन ज्ञेयत्वं च समुच्चितमप्रमात्वप्रयोजकमित्यर्थ इति–चेन्न; भावानवबोधात्। यथाहि तार्किकमते जन्यताघटितं प्रमात्वं गुण-जन्यतावच्छेदकं नित्यसाधारणस्यातत्वात्, तथा मन्मते भ्रमत्व-मपि तादृशदोषजन्यतावच्छेदकं तत एव। नच–तावता तस्य स्वत-स्त्वम्। शाबरवाक्यं तु नोभयस्याप्रमात्वप्रयोजकत्वपरम्; चरमस्यैव तत्सम्भवादाद्यवैय्यर्थ्यापत्तेरनादिसाधारणत्वाच्च। दुष्टकरणजन्यत्वं तु भ्रमत्वस्य जन्यत्वघटितस्य दोष[1]प्रयुक्तत्वज्ञापनद्वारा बौद्धसम्मतस्य भ्रमत्व-स्वतस्त्वस्य निरासाय। यत्त्वविद्याकारवृत्तेरविद्यारूपविषयजन्यत्वे प्रमात्वा-पत्तिरिति, तन्न! अनुभूयमानरक्तत्वादेः स्फटिकादावारोपे व्यभिचारेण विषयजन्यत्वस्य प्रमात्वाव्याप्यत्वात्। कुत्र देहेति। न च—अधिष्ठा-नान्य एव भ्रान्तो वाच्यः, स च देहेन्द्रियादिमानेव, अविद्यावच्छिन्न-चैतन्यं तु नाधिष्ठानान्यदिति देहेन्द्रियादि विना कथमन्तःकरणाध्यास इति—वाच्यम्; कौन्तेयस्य स्वस्मिन् राधेयत्वभ्रमेऽन्तःकरणावच्छिन्न-चित्येव स्वप्नाध्यासपक्षे चाधिष्ठानस्यैव भ्रान्तत्वस्वीकारादविद्यावच्छिन्न-चैतन्यमधिष्ठानमित्यत्राधिष्ठानपदस्याधारपरत्वाच्छङ्काऽनुत्थानाच्च। मूली-भूताविद्याविषयो मुख्याधिष्ठानम्, तच्च पूर्णानन्दरूपमेव। यत्तु तमः-

---

[1] घटितदोष–क. ग.

SGDF
Sri Gargeshwari Digital Foundation

नैव तद्विलम्बसम्भवात्, अन्यथा तदा देहेन्द्रियादिकमपि कुतो नोत्पद्येत? नच—दोषादीनामभ्यस्तत्वेन तदभावस्य

प्रकाशवदविद्याचितोर्नाश्रयाश्रयित्वमिति—तन्न; चितो वृत्त्युपहिताया एव प्रकाशस्थानीयत्वात्। **कुतो नेति।** नच—भूतादिविलम्बेन देहादिविलम्बो युज्यते, अविद्यामात्रमूलकस्तु मनोध्यासः कथं विलम्बत इति—वाच्यम्; देहादेरिव मनसोऽपि भौतिकत्वात् ॥

ननु—भूतोत्पत्तिविलम्बोऽपि कुतः; ईक्षणाभावादिति चेत्सोऽपि कुत इति चेत्, कस्तवाभिप्रायः? वस्तुगत्या यत्साक्षिण[1] ईक्षणं जायते तत्पूर्वक्षणेष्वपि तत्कारणाविद्यादिसत्वात्तदापत्तिरिति चेत्कोऽयं क्षणः? न हीक्षणस्याश्रयस्तत्पूर्ववृत्तिमान्[2] मन्मते कश्चन क्षणः प्रसिद्धः, किंतु ईक्षणोत्पत्तिकालोत्तरं क्षणादिव्यवहारः। तर्हि स्वाधिकरणसमयध्वंसानधिकरणसमयसम्बन्धरूपोत्पत्तिः कथमीक्षणस्येति चेत्, यदधिकरणकालसामान्ये यत्कालवृत्तिध्वंसाप्रतियोगित्वम्, तस्य तत्कालसंबन्ध उत्पत्तिर्महाप्रलयस्येवेति ग्रहाण। सामग्रीमत्क्षणं विना कथमीक्षणरूपकार्योत्पत्तिरिति चेद्भ्रान्तोसि; सामग्रीमत्क्षणोत्तरक्षणत्वं हि कार्यस्य व्याप्यम्, न तु व्यापकम्, व्याप्यमपि न कार्यमात्रस्य, किंत्वीक्षणान्यस्य। ननु—क्षणो नातिरिक्तः पदार्थः, न वा स्वजन्यविभागप्रागभावावच्छिन्नक्रियामात्रम्; किंतु स्ववृत्तिध्वंसप्रतियोग्यनाधारो वा स्ववृत्तिस्वपूर्ववृत्तियावत्पदार्थविशिष्टो वा। तथाचेक्षणपूर्वावस्थाया जगत्कामनासूक्ष्मा[3]वस्थावृत्तीक्षणरूपध्वंसप्रतियोगिन्या अनाधार[4]त्वस्या (स्य) जगत्कामनासूक्ष्मावस्थायां सत्वात्। तद्वती सा क्षणः। [5]एवमुक्तसूक्ष्मावस्थादियावदर्थविशिष्टरूपणेक्षणं[6] स्वाश्रय इति चेदेवमपीक्षणपूर्वं

---

[1] यत्क्षणे—ग. ख. [2] वर्ती वा—ख. ग. [3] आकाशसूक्ष्मा—ग. [4] त्वस्याकाशसूक्ष्मा—ग. [5] एवमविद्या . . . पाक्तयावदर्थ—ग. [6] विशिष्टत्वरूपेक्षणं—ग.

SGDF
Sri Gargeshwari Digital Foundation

तात्त्विकत्वादतात्त्विकेन तात्त्विककार्यप्रतिबन्धस्यायुक्तत्वात् बौद्धेन दुष्टतया कल्पितस्य वेदजन्यज्ञानस्येव कल्पितदोषजन्यस्य द्वैतविज्ञानस्य प्रामाण्यापात इति वाच्यम् ; बौद्धकल्पितस्य प्रातिभासिक-

---

तत्सामग्र्यव्यवहितोत्तरक्षणाऽप्रसिद्धिः। यदि च श्रुतिस्मृतिपुराणाद्युक्तस्य प्रलयकालपरिमाणस्यानुरोधात्तार्किकादिमते परमाणुक्रिया इव मन्मतेऽपि सूक्ष्माविद्यावृत्तयः सुषुप्ताविव प्रलये स्वीक्रियन्ते ; अन्यथा प्रलयकाल एतावानिति परिमाणोक्तेरसंभवात्, अतएवाविद्यावृत्तिरपि प्रामाणिकी ; अन्यथाऽविद्यादेः साक्षिभास्यत्वसम्भवेन तत्राविद्यायाः कारणत्वे मानाभावात्, सुखमहमस्वाप्समित्यादिस्मृतिमूलसौषुप्ताविद्यावृत्तौ वार्तिककृताऽनङ्गीकारात्, प्रलये तदावश्यकत्वेन तादृशकारणत्वस्य क्लृप्तत्वे तु तत एव सृष्टिकाले तत्सम्भवादविद्याकाराविद्यावृत्तेरेवाहङ्कार-सुखादिरूपविषयसहकृत[1]विद्याहङ्कारादिविषयकत्वस्यासम्भवः, अविवादश्च वादिनां प्रलयकालीनेषु मूलकारणगतास्थिरकार्येषु ; साङ्ख्याभ्यां क्षणिकानां सत्वादिपरिणामानां तार्किकाभ्यां च परमाणुक्रियाणां स्वीकारात्, मीमांसकस्तु न प्रलयमनुमन्तेति[2] नात्र पुरस्क्रियते इति विभाव्यते, तदा न कोऽपि शङ्कावकाशः। प्रलयीयपूर्वहेतुकाविद्यावृत्तीनामेव चरमाया वृत्तेरीक्षणहेतुत्वसम्भवादिति ध्येयम् ॥

तात्त्विकत्वादिति। द्वैतविज्ञानप्रामाण्यापात इत्यग्रेणान्वयः। **प्रामाण्यं** तात्त्विकप्रामाण्यम्। ननु—दोषाणां तात्त्विकप्रामाण्याश्रयप्रतिबन्धकानामपि सत्वात्कथं तदापत्तिस्तत्राह—**अतात्त्विकेनेति**। **तात्त्विककार्येति**। तात्त्विकविषयकज्ञानत्वरूप[3]तात्त्विकप्रामाण्याश्रये-त्यर्थः। तेन तस्यायुक्तत्वे दृष्टान्तमाह—**बौद्धेनेति**। **दुष्टतया**

---

[1] विद्याया अहङ्कारादि—ग. [2] प्रलयमनुमन्यते—ग. प्रलयमन्तेति—क.
[3] ज्ञानरूप—ग.

SGDF
Sri Gargeshwari Digital Foundation

दोषस्य व्यावहारिकवेदापेक्षया न्यूनसत्ताकत्वेन तदप्रामाण्याप्रयोजकत्वेऽप्यविद्याख्यदोषद्वैतप्रपञ्चयोः समसत्ताकत्वेन कार्यकारणभावनियमेन च कारणीभूताविद्याख्यदोषाभावे कार्यभूतद्वैतप्रपञ्चतद्विज्ञानयोरभावनियमेन नाविद्यामिथ्यात्वेन द्वैतज्ञानसत्यतापातः; कारणमिथ्यात्वे कार्यमिथ्यात्वस्यावश्यकत्वात्-

---

दोषजन्यतया । **समसत्ताकत्वेनेति** । ननु—स्वसमसत्ताकेऽपि ब्रह्मज्ञानेऽविद्यादोषो नाप्रामाण्यप्रयोजकः; मिथ्यात्वात्, अतो द्वैतज्ञानेऽपि तथा । न च ब्रह्मज्ञानेऽविद्याया उपादानत्वेऽपि भ्रमत्वेन नाविद्यादोषनिमित्तकत्वमिति स न तत्र तथेति वाच्यम्; न हि द्वैतभ्रमत्वेनाप्यविद्यादोषनिमित्तकता, किं तु कार्यत्वेनाविद्योपादानकत्वमेवेत्यत आह—**कार्यकारणभावनियमेनेति** । तथा च यत्र विषयेऽविद्या कारणं तस्यैव ज्ञानाप्रामाण्ये प्रयोजिकेति न ब्रह्मज्ञाने सा तथेति भावः। **सत्यतापातः** तात्त्विकप्रामाण्यादिरूपस्य भ्रमवैलक्षण्यस्यापातः । ननु—विद्यमानस्याप्यविद्यादोषस्य मिथ्यात्वेन तात्त्विकस्य तदभावस्य सत्त्वात्कुतो न तात्त्विकप्रामाण्यापातः? तात्त्विकस्य दोषाभावस्य ब्रह्मज्ञाने तात्त्विकप्रामाण्यप्रयोजकत्वेन क्लृप्तत्वात्तत्राह—**कारणीभूतेति** । **दोषाभावे** प्रतियोगिव्यधिकरणदोषाभावे । तथा च नोक्ताभावो ब्रह्मज्ञाने उक्तप्रयोजकत्वेन क्लृप्तः; आवयोः प्रामाण्यस्य स्वतस्त्वात्, ब्रह्मणस्तात्त्विकत्वात्तद्धीप्रामाण्यस्योक्तप्रयोजकं विनापि तात्त्विकत्वसंभवात्, उक्ताभावमात्रस्य तात्त्विकप्रामाण्यप्रयोजकत्वे काचादिदोषस्यापि मिथ्यात्वेन तात्त्विकाभावस्य तत्कालेऽपि सत्त्वेन तात्त्विकप्रामाण्यप्रयोजकत्वापत्तेश्च । अत एव भ्रमत्वे दोषस्य प्रयोजकत्वात्तदभावे तात्त्विकदोषाभावः[1] प्रयोजक इत्यपास्तम् । अथ प्रतियोगिव्यधिकरणो दोषा-

---

[1] तात्त्विको दोषाभावः—ग.

SGDF
Sri Gangeshwari Digital Foundation

ब्रह्मज्ञानेतराबाध्यत्वरूपव्यावहारिकत्वस्य बाध्याबाध्यसाधारणस्य मिथ्यात्वसिद्ध्यनपेक्षत्वान्न सत्त्वविभागासिद्धिः । ननु—दोषादीनां रूप्यादिभ्रमहेतूनां पारमार्थिकसत्त्वमौत्सर्गिकप्रामाण्येन सिद्धमिति परमार्थसतामेव तेषां हेतुत्वमिति—चेन्न; व्यावहारिकप्रामाण्यस्य साक्षिणा ग्रहणेऽपि त्रिकालाबाध्यत्वरूपतात्त्विकप्रामाण्यं न केनापि गृह्यत इति प्रत्यक्षबाधोद्धारे प्रागेवाभिहितत्वात् । न च—रूप्याद्यध्यासे दोषादीनामधिष्ठान

भावो भ्रमत्वाभावे प्रयोजक उच्येत; तदपि न; तावता काचादिदोषाभावस्य तादृशस्य तत्प्रयोजकत्वसम्भवेऽप्यविद्यादोषाभावस्य तादृशस्य तदसम्भवात्तत्काले द्वैततद्विज्ञानयोरेवाभावात् । द्वैताज्ञाने भ्रमत्वाभावप्रयोजकत्वस्य दूरनिरस्तत्वादिति । भ्रमवैलक्षण्यं द्वैतज्ञाने नापादयितुं शक्यत इति भावः । ननु—वियदादिज्ञानस्य प्रमात्वेनेव भ्रमत्वेनापि न कार्यता; मानाभावान्मयाऽविद्याया दोषत्वानभ्युपगमाच्च । तथा च तस्य भ्रमवैलक्षण्यमिव भ्रमत्वमपि निर्मूलकम्, तत्राह—**कारणमिथ्यात्व इति ।** कारणस्याविद्यारूपप्रयोजकस्य, मिथ्यात्वे ज्ञाननिवर्त्यत्वे, कार्यस्याविद्याप्रयुक्तद्वैतमात्रस्य, मिथ्यात्वावश्यकत्वादविद्यानिवृत्तिद्वारा ज्ञाननिवर्त्त्यत्वावश्यकत्वात। तथा च भ्रमत्वेन कार्यत्वाभावेऽपि द्वैतस्याविद्याप्रयुक्तत्वेनज्ञाननिवर्त्यतायोग्यत्वरूपमिथ्यात्वाद्वैतज्ञानस्य मिथ्याविषयकत्वरूपं भ्रमत्वमर्थवशसम्पन्नमिति भावः । नन्वेवम्—बौद्धदुष्टवेदजज्ञानस्य द्वैतज्ञानस्य च कल्पितदोषप्रयुक्तत्वाविशेषेऽप्यविद्यादोषस्य द्वैतज्ञानसमसत्ताकत्वात्तद्भ्रमत्वादिप्रयोजकत्वमिति पर्यवसितम्, तच्च न युक्तम्, भ्रमत्वनिश्चयात्पूर्वं समसत्ताकत्वस्य ब्रह्मज्ञानबाध्यत्वादिरूपस्य तयोरनिश्चयादित्यत आह—**ब्रह्मज्ञानेतरेति ।** तथाच पूर्वं ब्रह्मज्ञानेतराबाध्यत्वरूपसत्ताया ब्रह्मणीव प्रपञ्चेऽपि निश्चयसम्भवात्, द्वैतं यदि मिथ्या

SGDF
Sri Gargeshwari Digital Foundation

समसत्ताकत्वं दृष्टमितीहापि तथेति—वाच्यम्; साधर्म्यसमजात्युत्तरत्वात्। वस्तुतस्तु सर्वत्र चैतन्यस्यैवाधिष्ठानत्वेन कुत्रापि दोषादीनामधिष्ठानसमसत्ताकत्वाभावात्। न च—बाधकज्ञानं सत्यमेव वक्तव्यम्, अन्यथा बाधपरम्परया अनवस्थापत्तेरिति वाच्यम्; वेदान्तवाक्यजन्यचरमचित्तवृत्तेः कतकरजोन्यायेन स्वपरबाधकतयाऽनवस्थाया अभावात्। दृश्यत्वमात्रेण युगपत्कृत्स्नबाधसंभवात्। नहि गुहायां न शब्द इति शब्दः स्वं

न स्यात्तदा स्वसमानसत्ताकाविद्याप्रयुक्तं न स्यादिति तर्केण मिथ्यात्वनिश्चयः। तदिदमुक्तं कारणमिथ्यात्व इति। वेदजज्ञाने तु न तथा; बौद्धकल्पित[1]दोषस्य प्रातीतिकतया स्वसमानसत्ताकतत्प्रयुक्तं न स्यादित्यापत्तेरिष्टत्वादिति भावः। **साधर्म्यसमेति**। तर्कं विना दोषत्वादिसाधर्म्यमात्रेणापादनबोधकवाक्यत्वात्। **कुत्रापीति**। ननु—शुद्धचिति रूप्याद्यध्यासे तस्य ब्रह्मज्ञानेतराबाध्यत्वरूपव्यावहारिकत्वापत्तिरिति—चेन्न; शुद्धचितो रूप्याद्युपादानाविद्याविषयत्वेऽपि तदवच्छेदकत्वस्य शुक्त्यादौ स्वीकारेण तदाकारवृत्त्या तादृशावच्छेदकत्वनाशेन रूप्यादिबाधात्[2]॥

ननु—ब्रह्मज्ञानेन ब्रह्माज्ञानकार्यस्यैव बाध्यत्वेन ब्रह्माज्ञानसम्बन्धस्य जीवेशभेदादेश्चानादिवर्णस्य[3] बाधासम्भवेन तस्यैवाधिष्ठानसमसत्ताकत्वेन कुत्रापीत्यादिकमयुक्तम्, ब्रह्मज्ञाने स्वबाधकत्वमप्युक्तम्,[4] तस्य दोषाजन्यत्वेनाबाध्यत्वात्, दोषस्य च सत्यत्वनियमेनाविद्याया अदोषत्वेन ब्रह्मज्ञाने तदजन्यत्वात्, एकस्य बाध्यबाधकत्वयोर्विरोधाच्च। गुहायां न शब्द इत्यत्र तु शब्दमात्रनिषेध आनुभविकत्वान्नविरुद्धः,

---

[1] काल्पित—क. [2] बाधस्योक्तत्वात्—ग. [3] वर्गस्य—ग. [4] प्ययुक्तम्—ख. ग.

SGDF
Sri Gargeshwari Digital Foundation

न निषेधति; अन्यथा स्वस्य स्वेनानिषेधे तत्राप्यनवस्थापत्तिः, शब्दमात्रनिषेधानुभवविरोधश्च। यद्यपि बाधकज्ञानं वृत्त्युपरक्त-चैतन्यरूपं स्वतः सत्यमेव; तथापि तदवच्छेदिकाया वृत्तेर्दृश्य-त्वेन मिथ्यात्वाद्बाधोपपत्तिः। ननु बन्धस्यात्यन्ताभावप्रतियो-गित्वरूपमिथ्यात्वे तदभावार्थं यत्नो न स्यात्; अत्यन्ताभावस्या-साध्यत्वात्। अतएव न तत्प्रतीत्यभावार्थमपि यत्नः, तस्या अपि मिथ्यात्वात्, अन्यथा मोक्षेऽपि बन्धप्रतीत्या तद्दशायामपि प्रातिभासिकबन्धापातात्। अथ पारमार्थिकत्वाकारेण मिथ्यात्वम्,

---

शब्दत्वस्य निषेध्यतावच्छेदकत्वेन प्रतीयमानस्य शब्दमात्रे सत्वाच्चेति—चेन्न; शुक्त्याद्यज्ञानतत्कार्ययोरिव शुक्त्याद्यज्ञानाचित्सम्बन्धस्यापि शुक्त्यादिज्ञानबाध्यत्वेनाज्ञानप्रयुक्तत्वस्यैवाज्ञाननाश्य[1]तावच्छेदकत्वस्याज्ञानतत्प्रयुक्तयोर्युगपन्नाशे तु शुक्त्याद्यज्ञानतत्प्रयुक्तान्यतर-त्वेन शुक्त्यादिधीनाश्यत्ववत् दृश्यत्वेन ब्रह्मज्ञाननाश्यत्वस्यावश्य-कत्वात्। दोषस्य च सत्यत्वं न नः सम्मतम्; मानाभावादित्युक्तम्। एकस्यापि भिन्नरूपाभ्यां बाध्यबाधकत्वे प्रामाणिके को विरोधः? यथाहि शब्दत्वं शब्दमात्रवृत्ति; तथाऽज्ञानप्रयुक्तत्वादिकं ब्रह्म-ज्ञानवृत्तीत्यलं मूढोक्तिचिन्तया। **तदभावार्थं** तदत्यन्ताभावार्थम्। **असा-ध्यत्वादिति।** निवृत्तिस्तु ज्ञानसम्बन्धस्य सम्भवति; शशविषाण-वन्मिथ्यात्वेनासत्वात्। **मिथ्यात्वादिति।** तथाच तस्या निवृत्त्य-सम्भवेनात्यन्ताभावार्थमेव यत्नो वाच्यः। तत्र चाध्यस्तत्व[2]दोष उक्त इति भावः। ननु—क्षेमसाधारणं साध्यत्वमत्यन्ताभावेऽप्यस्ति तत्राह—**अन्यथेति।** अनिवर्त्यस्यापि मिथ्याभूतस्य सम्बन्धत्व[3] इत्यर्थः। **पारमार्थिकत्वाकारेण मिथ्यात्वं** पारमार्थिकत्वा-

---

[1] नाशनाश्य—ख. ग. [2] चासाध्यत्व—ख. ग. [3] बन्धत्व-ग.

SGDF
Sri Gargeshwari Digital Foundation

स्वरूपेण तु निवृत्तिरेव, न ; तस्याः स्वरूपाबाधेनाप्युपपत्तेरिति—चेन्न; सत्यस्य ब्रह्मणो निवृत्त्यदर्शनेन स्वरूपतो मिथ्यात्वाभावे निवृत्त्ययोगान्मिथ्यात्वं निवृत्त्यनुकूलमेव। नच—तदर्थं प्रवृत्त्यनुपपत्तिः; अधिष्ठानसाक्षात्कारानन्तरं तथैव, ततः पूर्वं तु कण्ठगतविस्मृतचामीकरप्राप्तय इव भ्रमबाधकज्ञानोत्पत्तये प्रवृत्त्युपपत्तेः। अत्यन्ताभावाधिकरणे च प्रतियोगिवत्तन्निवृत्तिरप्युपपादितैव। नच—त्रैकालिकनिषेधप्रतियोगिनि तुच्छे निवृत्तिर्न दृष्टेति कथं तादृशि प्रपञ्चे सा स्यादिति—वाच्यम्; यथाकथंचित्सजातीयेऽदर्शनस्याप्रयोजकत्वात्। अन्यथा अनुत्पन्ने निवृत्तिर्न दृष्टेति प्रागभावोपि न निवर्तेत। तस्मात्स्वभावविशेष एव तुच्छानित्यविलक्षणो निवृत्तिप्रयोजक इति वाच्यम्। सा च निवृत्तिरधिकरणस्वरूपेति पक्षे घटनाशार्थं मुद्गरपातादाविव मननादौ प्रवृत्तिरूहनीया। अतिरिक्तेति पक्षे

वच्छिन्नं स्व[1]समानाधिकरणात्यन्ताभावप्रतियोगित्वम्। निवृत्तिरेव नतु मिथ्यात्वम्। यद्यपि बन्धात्यन्ताभावे प्रतियोगिमत्कालाऽनवच्छिन्नत्वविशिष्टे क्षेमसाधारणं साध्यत्वं सम्भवति; तथापि तादृशात्यन्ताभावस्यैव प्रकृते नाशरूपत्वात्। "क्षीयन्ते चास्य कर्माणि तस्मिन्दृष्टे परावरे" "तरति शोकमात्मवित्" इत्यादौ तरत्यादेर्नाशयत्याद्यर्थे निरूढत्वात्, ज्ञानेन तु तदज्ञानं येषां नाशितमित्यादिस्मृतेश्च, बन्धनाशार्थत्वं ज्ञानस्याह—सत्यस्येति। तथैवेति। तदा बन्धस्य मिथ्यात्वेन निश्चितत्वेनाद्वेष्यत्वात्तन्निवृत्ताविच्छाविरहादिति शेषः। चामीकरप्राप्तये चामीकरासत्वभ्रमबाधकज्ञानोत्पत्तये। ऊहनीयेति। यद्यपि तत्तदधिकरणं सिद्धत्वेन ज्ञातम्, तथापि निवृत्तित्वेन रूपेण न तथा; निवृत्तित्वस्य

---

[1] च्छिन्नस्व–ग.

SGDF
Sri Gargeshwari Digital Foundation

त्वनिर्वचनीया, पञ्चमप्रकारा चरमवृत्तिरूपा वा सा; सर्वथा जन्यैवेति न काप्यानुपपत्तिः। ननु—बन्धस्य ब्रह्मण्यध्यस्तत्वे तन्निदिध्यासनसाध्यतत्साक्षात्कारनिवर्त्यत्वं श्रवणादिनियमादृष्टसापेक्षब्रह्मज्ञानानिवर्त्यत्वं च न स्यात्; नहि देवतानिदिध्यासनसाध्यतत्साक्षात्कारनिवर्त्यं दुरितं तत्राध्यस्तम्, न वा दूरागमनादिनियमादृष्टसापेक्षसेतुदर्शननिवर्त्यं दुरितं तत्राध्यस्तमिति—चेन्न;

मुद्गरपाताद्युत्तरकालावच्छेदेनैव तत्तदधिकरणे संबन्धस्वीकारात्। **अनिर्वचनीयेति**। अनिर्वाच्यत्वेऽप्यज्ञानकालीनाज्ञानप्रयुक्तत्वेनैव ज्ञाननाश्यत्वस्वीकारान्न ज्ञाननिवर्त्त्या सा। एवं पञ्चमप्रकारापि बोध्या। **वृत्तिरूपेति**। एवं च घटादिनाशोऽपि मुद्गरपातादिरूपस्तस्य घटादिरूपद्वेष्यविरोधित्वेनेष्टत्वम्। विरोधित्वं च यत्र यत्क्षणे मुद्गरपातादिस्तत्र तत्क्षणेऽवश्यं घटाद्यभाव इत्यादिरूपं सुखविरोधित्वेन द्वेष्यत्ववत् द्वेष्यविरोधित्वेनेष्टत्वं सर्वानुभविकम्। अतएव सुखादीष्टविरोधितया पिशाचादिकं द्विषन्ति। तद्विरोधितया च [1]न सिद्धनामेच्छन्ति। स्पष्टश्चायमर्थो बौद्धाधिकारतट्टीकादौ। संभवति च निवृत्तेर्मुद्गरपातादिरूपत्वेऽपि निवृत्तित्वेन रूपेण स्वस्यापि स्वसाध्यता। स्वोत्पत्तिद्वितीयक्षणावच्छेदनोक्तनिवृत्तित्वसंबन्धस्य स्वस्मिन् स्वीकारेण क्षेमसाधारणजन्यत्वसंभवादित्यादि मुहुरुक्तम्॥

ननु—निवृत्तेरुत्पत्त्यभावपक्षे घटादिर्मुद्गरपाताद्युत्तरं क्व गत इति पर्यनुयोग इति चेत्तर्हि निवृत्तेरुत्पत्तिपक्षेऽपि पर्यनुयोगः स किं न स्यात्। अथ तार्किकादिमते तस्या अत्यन्तप्रतियोगिभिन्नत्वात्तादृशपर्यनुयोगो ननु सांख्यादिमते; तस्याः प्रतियोग्यभेदस्यापि स्वीकारान्नाशरूपेण प्रतियोगी परिणत इत्युत्तरसंभवादिति—चेन्न; तत्रापि प्रतियोग्यवस्था क्व

---

[1] न नृसिद्ध—ग.

SGDF
Sri Gargeshwari Digital Foundation

गतेति पर्यनुयोगस्य संभवान्न नाशावस्था पूर्वं स्थिता कारणव्यापारवैय्यर्थ्यादिति कुत आगता सेति पर्यनुयोगाच्च। अथ स्थितैव सा, कारणव्यापारस्तु तदभिव्यक्तय इति चेत्तर्ह्यभिव्यक्तिर्न स्थितेति तत्रैव तदापत्तिः। अत एव प्रतियोग्यवस्था तिष्ठत्येवाग्रे, परन्तु नाभिव्यज्यत इत्यपास्तम्। अथ पूर्वमसत्यप्यभिव्यंक्तिस्तत्तत्काले संबद्ध्यते सामग्रीव्याप्तेः; तर्हि पूर्व सदपि प्रतियोगि मुद्गरपाताद्युत्तरकाले न संबध्यते मुद्गरपातादिघटितसामग्रीमत्क्षणत्वस्य घटादिक्षणाव्यवहितपूर्वान्यत्वव्याप्यत्वादिति कुत आगत इत्यस्येव क गत इत्यस्यापि नावकाश इति सुचिरं विभावनीयम्। एवं चाज्ञानतत्कार्ययोर्नाशस्तयोश्चरमक्षण एव प्रथमक्षण उत्पत्तिरिव नाशव्यवहारानुरोधात्तत्रैव नाशत्वरूपोऽखण्डधर्मः स्वीक्रियते। स च क्षणश्चरमवृत्तिरेव, न तु चरमवृत्तेरुत्पत्तिद्वितीयक्षणः; अज्ञानादिनाशाद्युगपदेव द्वैतमात्रोच्छेदे बाधकाभावादिति मुख्यपक्षोऽयं चरममुक्त इति ध्येयम्। "निवृत्तिरात्मा मोहस्य ज्ञातत्वेनोपलक्षित" इत्यादिवार्तिकं तु ज्ञानज्ञेयान्यस्या मोहनिवृत्तेरप्रामाणिकत्वाभिप्रायकम्। मुक्तेः पूर्वं[1] जायमानस्य मोहनाशव्यवहारस्योक्तरीत्योपपत्तेरात्मनो नाशत्वे मानाभावात्। मुक्तिकाले च तन्नाशे अतीतत्वमेव व्यवह्रियते। अत एव मुद्गरपातानन्तरं घटो नष्ट इति व्यवहारः॥

यत्तु तत्र नाशोत्पत्तावतीतत्वं व्यवह्रियते; उत्पत्तेः प्रत्ययार्थत्वात्, अतएव पूर्वनष्टमद्य नश्यतीति न प्रयोगः; उत्पत्ताववच्छेदकत्वेनाद्यादेरन्वयादिति मणिदीधित्यादावुक्तम्, तन्न; उक्तरीत्या घटादिनाशस्य क्षणिकत्वेनोपपत्तावुत्पत्तेः प्रत्ययार्थत्वे मानाभावात्, आद्यवृत्ति[2]ध्वंसप्रतियोगि चिरनष्टमित्यस्याप्यननुभवपराहतत्वात्। अन्यथोत्पत्तेरपि स्थैर्यमङ्गीकृत्य चिरोत्पन्नमद्योत्पद्यत इत्यस्योक्तरीत्यावारणापत्तेः।

---

[1] प्रायकमुक्तम्। पूर्वं–क. ख. [2] अद्यवृत्ति–क.

SGDF
Sri Gangadharan Digital Foundation

अथ चिरनष्टेऽतीतत्वादि कथम्, वर्तमाननाशप्रतियोगित्वाभावादिति—चेद्वर्तमाननाशप्रतियोगी यो नाशस्तत्प्रतियोगित्वस्याप्यतीततारूपत्वात्। यथाहि घटसत्ताकाले घटप्रागभावेऽतीतत्वधीस्तथा घटनाशकालेऽपि सा। तच्चातीतत्वं वर्तमाननाशप्रतियोगिनो घटरूपनाशस्य प्रतियोगित्वमेव। घटस्येव तन्नाशस्य घटप्रागभावनाशत्वे तु घटनाशकाले घटप्रागभावो नश्यतीति प्रत्ययापत्तिः। न च—भवन्मतेऽपि तद्घटस्योत्पत्तिदिनाद्द्वितीयदिने तद्घटप्रागभावो नश्यतीति धीः स्यात्, तद्घटरूपस्य नाशस्य वर्तमानत्वादिति—वाच्यम्; मन्मते प्रागभावाधिकरणचरमक्षणस्यैव प्रागभावनाशत्वात्। अथैवमपि घटनाशकाले घटेऽतीतत्वं न प्रतीयेत; विद्यमाननाशप्रतियोगिनो घटरूपनाशस्य यत्प्रतियोगित्वं तस्य घटेऽस्वीकारात्, घटीयचरमक्षणे स्वीकाराच्चेति—चेन्न; विद्यमाननाशप्रतियोगिनाशप्रतियोगिनाशप्रतियोगित्वस्याप्यतीतारूपत्वात्, तवापि मते विद्यमानत्वस्य तत्तत्कालरूपस्य वाच्यतया एकरूपत्वाभावात्, घटे नाशोत्पत्त्यवधिकस्यानतिप्रसक्तकालस्यैव विद्यमानत्वरूपतया निवेशेन विद्यमाननाशप्रतियोगित्वस्यैव मन्मतेऽपि सर्वत्रातीततारूपत्वसंभवाच्च ॥

वस्तुतस्तु शरदि पुष्प्यन्ति सप्तच्छदा इत्यादौ सप्तमीविभक्तेरुत्पत्त्यर्थकत्वस्य क्लृप्ततया तत एवोत्पत्तिलाभेन विवक्षितार्थनिर्वाहेण नाख्यातस्योत्पत्तिरर्थ इति ध्येयम्। (कालवृत्तिनाशप्रतियोगिकत्वादिकमेव तदुच्यताम्, स च कालः स्थूल एवेति दिक्[1])। यत्त्वधिकरणब्रह्मरूपाया निवृत्तेर्न क्षेमसाधारणं साध्यत्वम्; तस्या उत्तरावध्यभावेन यद्व्यतिरेक इत्यस्यासंभवात्, अतएवात्यन्ताभावस्य साध्यत्वं पूर्वं दूषितमिति, तत्तुच्छम्; यत्सत्त्वेऽग्रिमक्षणेऽवश्यं यत्सत्त्वं [2]तद्व्यतिरेके

[1] अयं कुण्डलितः पाठः—ख. पुस्तके नास्ति. [2] यद्यति—ग.

SGDF Sri Gargeshwari Digital Foundation

आत्माध्यस्तगौरत्वादेः शुक्त्याद्यध्यस्तरूप्यादेश्च तत्तत्साक्षात्कारनिवर्त्यत्वदर्शनेन प्रपञ्चस्यापि ब्रह्मण्यध्यस्ततया तत्साक्षात्कारनिवर्त्यत्वस्यावश्यकत्वात् । नहि शुक्त्याद्यध्यस्तं रूप्यादि

चाग्रिमक्षणेऽवश्यं यद्व्यतिरेक इत्येतन्मात्रं हि न; तत्पटादेरपि दण्डादिसाध्यतापत्तेः, दण्डादिसत्वासत्वयोः कचिद्देशेऽग्रिमक्षणावच्छेदेन पटादेरवश्यं सत्वाऽसत्वसंभवात्, किंतु यद्वद्देशावच्छेदेन यद्वत्क्षणस्योत्तरक्षणे तदवच्छेदेनावश्यं यत्सत्वं यद्व्यतिरेकस्याश्रयदेशावच्छेदेन तद्वत्क्षणस्योत्तरक्षणे तदवच्छेदेन यद्व्यतिरेकस्तस्य तत्साध्यत्वम् । अतस्तत्वज्ञान व्यतिरेकस्याश्रयदेशावच्छेदेन तद्वत्क्षणस्योत्तरक्षणे तादृशदेशावच्छेदेन द्वैतनिवृत्तित्वविशिष्टस्य ब्रह्मणः साध्यतावच्छेदकतादात्म्यसंबन्धेन नानुपपत्तिः । नहि तत्वज्ञानशून्यपुरुषावच्छेदेन कदापि द्वैतनिवृत्तिधीरस्तीति ध्येयम् ॥

तत्तत्साक्षात्कारनिवर्त्यत्वदर्शनेनेति । गौरत्वादावात्मनो निदिध्यासनजन्यसाक्षात्कारनिवर्त्यत्वस्य रूप्यादौ शुक्त्यादेर्निदिध्यासनजन्यसाक्षात्कारानिवर्त्यत्वस्य च दर्शनेनेत्यर्थः । विपरीतभावनासत्वे शुक्त्यादावपि निदिध्यासनापेक्षेति बोध्यम् । तथाच यद्यन्निदिध्यासनजन्यसाक्षात्कारनिवर्त्यं तत्तत्र न कल्पितमिति व्याप्तिर्नेति भावः । यत्तु यद्यत्र कल्पितं तत्तन्निदिध्यासनाजन्यसाक्षात्कारनिवर्त्यं नेति व्याप्तिरिति न दोष इति—तत्तुच्छम्; उक्तस्थले एव[1] व्यभिचारानुद्धारात् । नन्वधिष्ठानसाक्षात्कारं विनाप्युक्तसाक्षात्काराद्दुरितस्येव प्रपञ्चस्यापि ब्रह्मसाक्षात्कारान्निवृत्तिरस्तु, किं ब्रह्मणि प्रपञ्चस्य कल्पि-

---

[1] एवं—क. ख.

SGDF
Sri Gargeshwari Digital Foundation

शुक्त्यादिज्ञानं विना निवर्तते। देवतादर्शनादिना तु प्रायश्चित्तसमकक्ष्येण दुरितस्य कारणात्मनावस्थानमात्रं क्रियते, न तु शुक्तिज्ञानेन रूप्यस्येव निवृत्तिः; अधिष्ठानाज्ञानरूपोपादानकस्यारोपितस्य तन्निवृत्तिं विना निवृत्त्ययोगात्। अज्ञाननिवृत्तिश्चाधिष्ठानज्ञानादेवेत्युक्तं प्राक्। श्रवणादिनियमादृष्टं च न मुक्तिं प्रति कारणम्, किंतु ब्रह्मापरोक्ष्यं प्रति। नन्ववघातसाध्यवैतुष्यान्यापूर्वस्येव श्रवणादिसाध्यापरोक्ष्यान्यमुक्तेरेव तत्साध्यत्वम्; अन्यथा श्रवणादिनियमादृष्टसाध्ये साक्षात्कारे श्रवणनिरपेक्षस्योपायान्तरस्याप्रसक्त्या तत्प्रसक्त्यधीननियमाविध्ययोगात्।

तत्वेन; तत्राह देवतादर्शनादिनेति। निवृत्तिरिति। बाधरूपेत्यादिः। निवृत्त्ययोगात् बाधायोगात्। श्रवणादिनियमादृष्टमिति। श्रवणाद्याश्रितनियमेन जन्यादृष्टमित्यर्थः। अवघातादिमात्रस्य विधेयत्वे आक्षेपादेव तस्य वैतुष्यादिसाधनत्वस्य प्राप्तत्वादवघाताद्याश्रितनियमस्यादृष्टार्थतया विधेयत्वात्। अतएव दृष्टफलकावघातादेः कृष्णलादौ बाधात्तदाश्रितनियमानुष्ठानलोपः। अथवा नियमतात्पर्यकविधिविषयश्रवणादिजन्यादृष्टमित्यर्थः। यद्यपि हि वैतुष्यादिफलसाधनत्वमवघातादेराक्षेपादेव लब्धुं शक्यम्, तथाप्याक्षेपप्रवृत्तेः पूर्वं शीघ्रप्रवृत्तया प्रत्यक्षश्रुत्योक्तफलार्थतयाऽवघातादि विधीयते। तेनाक्षेपप्रवृत्तिप्रतिबन्धाद्दलनादिनिवृत्तिफलकावघातादिनियमधीरूपफलसिद्धिः। तादृशनियमधीरूपफलकस्याप्यवघातादेर्यदि वैतुष्यादिद्वारकप्रदेयनिष्पत्त्यधीनयागनिष्पत्तिमात्रद्वारा यागीयापूर्वसिद्धिः फलम्; तदा तादृशावघातादिविधिर्व्यर्थः; दलनादिनाप्युक्तयागनिष्पत्तिरूपद्वारसम्भवात्। अतोऽदृष्टद्वारापि यागीयापूर्वसिद्धिः फलमिति कल्प्यते; तथापि यागीयापूर्वप्रयोजकवैतुष्यादिदृष्टफलविशिष्टोद्देशेन प्रथमतोऽवघातादिविधि-

SGDF Sri Gargeshwari Digital Foundation

नच—परोक्षज्ञानं श्रवणात्, अपरोक्षं तु नियमादृष्टादिति—युक्तम्; श्रवणादिविधौ परोक्षज्ञानप्रवाहरूपनिदिध्यासनसाध्यापरोक्षस्यैव दृशिनोद्देश्यत्वात्, त्वन्मते परोक्षज्ञाने

प्रवृत्तेस्तादृशदृष्टफलमेवावघातादिप्रयोजकम्; न तूक्तापूर्वजनकापूर्वविशिष्टोद्देशेन पश्चात्कल्प्यमानस्यावघातादिविधेर्विषयभूतमदृष्टफलमित्युक्तम्। दृष्ट[1]फलबाधात्कृष्णलादाववघातादिबाधः। यत्तु नियमादृष्टेति नियमजन्यादृष्टेत्यर्थ इति व्याख्याय नियमप्रयोजनापेक्षया कल्प्यत्वान्नियमजन्यमुच्यत इत्युक्तिः, तच्छोभते; नियमप्रयोजनापेक्षया कल्पेत्यर्थ[2] इत्येव व्याख्यातुमुचितत्वात्। **अपूर्वस्येवेति**। आग्नेयाद्युत्पत्त्यपूर्वस्येवेत्यर्थः। यत्तु परमापूर्वे यथावघातादिजन्यनियमादृष्टसाध्यत्वं न तु वैतुष्यादौ, तथा मुक्तौ श्रवणादिनियमादृष्टसाध्यता न तु साक्षात्कार इति व्याख्यानम्, तन्न अवघातादेराग्नेयादिजन्यपरमापूर्वार्थत्वादाज्यादिषु सङ्कर इत्याशङ्क्य आग्नेयाग्नीषोमीयैन्द्राग्नीयोत्पत्त्यपूर्वार्थत्वादाज्यादेराग्नेयादिद्रव्यत्वाभावान्न तेषु तस्य सङ्कर इति तृतीयप्रथमीये "तेषामर्थेन सम्बन्ध" इत्यधिकरणे सिद्धान्तितत्वात्। अवघातादिनियमापूर्वस्याप्याग्नेयाद्युत्पत्त्यपूर्वार्थत्वादिति ध्येयम्। **विध्ययोगादिति**। मुक्तौ तु तादृशोपायान्तरं प्रसक्तमिति पराभिमानः। वस्तुतो मुक्तिः श्रवणाद्यधीनसाक्षात्कारेणैव साध्यत इति तस्यामपि श्रवणादिनिरपेक्षोपायान्तरमप्रसक्तम्। दुःखोच्छेदप्रयोजकत्वादिसामान्यरूपेण मुक्तौ तर्कशास्त्रादिश्रवणसाध्यात्मज्ञानमिव वक्ष्यमाणरीत्या सामान्यरूपेण साक्षात्कारेऽपि तत्प्रसक्तमिति न सम्भवदुक्तिकमिदं परवाक्यमिति बोध्यम्। **दृशिनेति**। साक्षात्कारस्यैव निदिध्यासनफलत्वात्तदुद्देशेनैव निदिध्यासनविधानात् श्रवणमनने अपि

---

[1] प्युक्तदृष्ट—क. ख. [2] कल्प्येत्यर्थ इति भवितुमुचितम्.

SGDF
Sri Gargeshwari Digital Foundation

तदुद्देशेनैव विधेये ; अन्यथा परोक्षज्ञानस्य श्रवणमनने प्रत्युद्देश्यतया समर्पणाय दृशेरावृत्तिः स्यात् । सकृत्प्रतिसंहितदृशिनार्थद्वयबोधनासम्भवादिति भावः ॥

वस्तुतस्तु "श्रोतव्यो मन्तव्यो निदिध्यासितव्य" इति पृथगुपात्तानां श्रवणादीनां विधेयानां भेदाद्वाक्यभेदावश्यकत्वादुक्तावृत्तिर्न दोषाय । विविदिषन्ति यज्ञेनेत्यादौ तु एकेनैवाख्यातेनोपात्ता नाना भावना विधेया इति वाक्याभेदः । अथ सम्भवत्येकवाक्यत्वे वाक्यभेदायोगात्, "मनननिदिध्यासनाभ्यां फलोपकार्यङ्गाभ्यां सहितं श्रवणं नामाङ्गी विधीयत" इति विवरणाद्युक्तेश्च, त्रितयविशिष्टा एकैव भावना विधेया ; मनननिदिध्यासनसहितेन श्रवणेन पश्येदिति विधिविपरिणामसंभवादित्युच्येत तथापि पत्नयवेक्षितमाज्यमित्यादावीक्षतेश्चाक्षुषवाचकत्वनिर्णयात् दृशिर् प्रेक्षण इति स्मृत्या दृशेर्वीक्षणवाचकत्वात्साक्षात्कारे दृशिर्लाक्षणिक एव वाच्य इति निश्चयात्मकज्ञानेऽपि लाक्षणिकत्वसम्भवात्तदुद्देशेन तादृशश्रवणविधौ को दोषः । प्रमेयगतासम्भावनायां विपरीतभावनायाश्च निवृत्तिद्वारा तादृशफले मनननिदिध्यासनयोरुपकारकत्वसम्भवात् । अतएव त्रयाणां प्राधान्येन विधावपि न क्षतिः ; निश्चयत्वेनैव त्रितयफलत्वसम्भवात् । नहि निदिध्यासनस्य साक्षात्कारो दृष्टं फलम् ; नित्यपरोक्षविषये तदसम्भवात् , क्वचिदेव कामिन्यादिसाक्षात्कारे निदिध्यासनसहितोत्कटरागादिदोषविधया परं कारणम् , किंतु विपरीतसंस्कारनिवृत्तिद्वारा निश्चयः । अतएव "मनननिदिध्यासनाभावे[1] जातोऽपि ब्रह्मसाक्षात्कारोऽसम्भावनाविपरीतभावनादोषाभ्यां परोक्षकल्प इति" विवरणादावुक्तम् । उक्तदोषाहिताप्रामाण्यसंशयविषयत्वेनानिश्चयरूपत्वान्नाविद्यानिवर्तक इति तदर्थः ॥

---

[1] निदिध्यासनभावे—ख.

SGDF
Sri Gargeshwari Digital Foundation

कामनाया अयोगेन तस्योद्देश्यत्वायोगाच्चेतिचेन्न; तत्र क्रत्वर्थस्य नियमापूर्वस्य परमापूर्वसाधकत्वेऽपि पुरुषार्थहिरण्यधारणादिनियमा-

---

कामनाया इति । ब्रह्मज्ञानं भवत्विति कामनापूर्वकाले ज्ञानविशेषणतया ब्रह्मणोऽपि ज्ञातव्यत्वेन परोक्षज्ञानस्य सिद्धत्वेन न तादृशकामना सम्भवतीति भावः । **सोपाधिब्रह्मज्ञानस्यापातब्रह्मज्ञानस्य** च सिद्धत्वेन ब्रह्मान्या[1]विषयकनिश्चयो भवत्विति कामनाया एव वाच्यत्वादापातज्ञानेनैव तदुत्पत्तिसंभवाच्च नेयमनुपपत्तिरिति तु विभावनीयम् । **क्रत्वर्थनियमापूर्वस्येति ।** क्रतुं तत्कारकं वोद्दिश्य विहितं यत्तज्जन्यनियमादृष्टस्येत्यर्थः । **परमापूर्वेति ।** उत्तराङ्गजन्यनियमादृष्टाभिप्रायेणेदम् । अवघातादिजन्यनियमादृष्टस्योक्तरीत्याग्नेयाद्युत्पत्त्यपूर्वसाधनत्वात् । अथवोत्पत्त्यपूर्वस्यापि वैतुष्यादिद्वारावघातादिप्रयोज्यत्वात्परमापूर्वसाधनत्वमेव तज्जन्यनियमादृष्टस्य परेण वाच्यम् । अन्यथावघातादिफलान्यदेव तदीयनियमादृष्टफलमिति स्वकल्पितनियमभङ्गापत्तेः । तथास्वीकारेऽपि पुरुषार्थनियमादृष्टस्य दृष्टफलसाधनत्वमवश्यं परेण वाच्यमित्यभिप्रायकमिदम् । **पुरुषार्थहिरण्यधारणादीति ।** तृतीयचतुर्थे स्थितम् । 'सुवर्णं हिरण्यं भार्यम्, सुवर्ण एव भवति, दुर्वर्णोऽस्य भ्रातृव्यो भवती' इत्यनारभ्य श्रुते वाक्ये शोभनवर्णहिरण्यधारणं क्रत्वर्थमुत पुरुषार्थमिति संशये, फलकल्पने गौरवात्तत्क्रत्वर्थम्, दुर्वर्ण इत्यादिकं तु न फलपरम्; कामशब्दाभावात् । नच—रात्रिसत्रवत्तदभावेऽप्यार्थवादिकं फलमस्त्विति—वाच्यम्; क्रत्वङ्गत्वेन गतिसम्भवात् । तथाच वैदिककर्मत्वसामान्यादग्निहोत्रादिकर्मसु निवेशः । **तत्र सूत्रम् 'अद्रव्यत्वात्तु शेषः स्यादि'ति ।** द्रव्यदेवतासम्बन्धाश्रवणान्न स्वतन्त्रं कर्म किंतु क्रतुशेष इत्यर्थः । **सिद्धान्तसूत्रं तु 'अप्रकरणे तु तद्धर्मस्ततो विशेषादि' ति ।**

---

[1] ब्रह्मान्य—क. ग.

SGDF
Sri Gargeshwari Digital Foundation

हिरण्यधारणादितद्धर्मः पुरुषार्थम्; यतोऽप्रकरणे आम्नातत्वेन प्रकरणाधीताद्विशिष्यते। नहि क्रत्वनुवादेन धारणं विहितम्; येन आहवनीये जुहोतीति होमानुवादेन विहिताहवनीयवत्क्रत्वङ्गं भवेत्, नाप्यव्यभिचरितक्रतुसम्बन्धाश्रयणं प्रकृते सम्भवति; हिरण्यधारणस्य लोकेऽपि सत्वेन क्रत्वव्यभिचाराभावात्; तस्माद्भ्रातृव्यदुर्वर्णतादिरूपपुरुषापेक्षितफलाय हिरण्यधारणं विधीयते, विनियोगभङ्गोऽप्यगत्या सक्तून् जुहोतीतिवदिति। तथाच हिरण्यधारणादिफलस्य भ्रातृव्यदुर्वर्ण[1]तादेर्लोकसिद्धत्वादुक्तविधेः साधनान्तरव्यवच्छेदफलकनियमतात्पर्यकत्वेन नियमादृष्टस्याप्युक्तरीत्या स्वीकारात्, तस्य च यथादृष्टान्तरस्य साध्यस्यासम्भवाद्भ्रातृव्यदुर्वर्णतादिरूपं हिरण्यधारणफलं प्रति साधनत्वम्, तथा श्रवणादिनियमादृष्टस्यापि तत्फलसाक्षात्कारं प्रतीति भावः॥

ननु भ्रातृव्यदुर्वर्णतादिकं न नियमादृष्टफलम्; तस्य हिरण्यधारणादिकं प्रति दृष्टफलत्वात्, किंतु दुरितोत्पत्तिप्रबन्धः,[2] असति हि नियमादृष्टे दुर्वर्णतादिफलोत्पादनं दुरितोत्पादकमिति कल्प्यते- उक्तं हि भाष्यादौ चतुर्थे—द्रव्यार्जनोद्देशेन प्रतिग्रहादिनियमविधिस्थले प्रतिग्रहाद्यन्योपायेन द्रव्यार्जनं प्रत्यवायजनकमिति तुल्यं तत्पुरुषार्थनियममात्रे। तथाच कथं तद्दृष्टान्तेन साक्षात्कारस्य नियमादृष्टफलत्वोक्तिरिति—चेन्न; दुरितानुत्पादकत्वविशिष्टतया द्रव्यार्जनदुर्वर्णतोत्पादनादेर्नियमादृष्टसाध्यत्वात्। अनुत्पादकत्वं चोत्पत्त्यनुकूलशक्तिनाशवत्वम्। प्रतिबन्धकेन हि कार्यानुकूलशक्तिर्नाश्यत इति मीमांसकाः। यदि तु प्रतिबन्धककालीने कारणेऽव्याप्यवृत्तित्वाच्छक्तिर्नास्तीति मतम्; तथापि शक्त्यत्यन्ताभावे क्षेमसाधारणसाध्यत्वसम्भवात्तद्विशिष्टतया तस्य तदव्याहतम्। **अत एवोक्तं** नियमादृष्टमप्य-

---

[1] भ्रातृव्यस्य दुर्वर्ण—क. ग. [2] प्रतिबन्धः—ग.

SGDF Sri Gangeshwara Digital Foundation

दृष्टस्य तदभाववच्छ्रवणादिनियमापूर्वस्य श्रवणादिसाध्यसाक्षात्कारान्यफलाभावेऽपि तेनैव फलवत्त्वोपपत्तेः, 'सर्वापेक्षा च यज्ञादिश्रुतेरश्ववत्' दिति न्यायात्, 'सर्वं कर्माखिलं पार्थ ज्ञाने परिसमाप्यते' इति स्मृतेश्च। अत्र सर्वाखिलपदाभ्यां कर्मशब्दवाच्यापूर्वमात्रस्य ज्ञाने समाप्तिर्दर्शिता ; मोक्षस्याविद्यानिवृत्तिरूपस्य ज्ञानातिरिक्तासाध्यत्वनियमाच्च। ज्ञाने त्वसंभावनादिनिवृत्त्या प्रतिबन्धकदुरितनिवृत्त्या च दृष्टादृष्टांशोपयोगः। सामान्यपुरस्कारेण च प्रसक्तस्य साधनान्तरस्य निवृत्तिः सर्वत्र निय-

---

र्जनाङ्गमि'' ति । यत्तु—हिरण्यधारणादिविधिरपूर्वविधिरेव ; सत्यपि हिरण्यधारणादौ भ्रातृव्यस्य दुर्वर्णतानुत्पत्तेः, दूरस्थभ्रातृव्ये तदनुत्पत्तेश्चेति—तत्तुच्छम् ; तद्धारणादेरनिष्टसाधनत्वधीद्वेषादिद्वारैव भ्रातृव्ये दुर्वर्णतोत्पादकत्वेन तादृशसहकारिसत्वे दुःखविशेषरूपदुर्वर्णतानुत्पत्तेरभावात्, सुवर्णतारूपफलांशेऽपूर्वविधित्वस्य शंकितुमशक्यत्वाच्च ॥

सर्वापेक्षेति । मुक्तौ तत्वसाक्षात्कारान्यस्य नापेक्षा ; तत्वसाक्षात्कारे सर्वधर्मजन्यादृष्टापेक्षा, ''विविदिषन्ति यज्ञेनेत्यादिश्रुतेः, कषाये कर्मभिः पक्के ततो ज्ञानं प्रवर्तत'' इत्यादिस्मृतेश्च । **यथाश्वो रथचालनादौ** विनियुज्यते योग्यत्वान्न तु लाङ्गलाकर्षणादावयोग्यत्वात्, तथा तत्वसाक्षात्कारे कर्माणि न तु मोक्षे इति सूत्रार्थः । **ज्ञाने समाप्तिः** । ज्ञानसाध्याजनकत्वे सति ज्ञानजनकत्वम् । **दृष्टादृष्टेति** । दृष्टस्य श्रवणादेरसंभावनादिनिवृत्तावदृष्टस्य श्रवणादिनियमादृष्टस्य ज्ञानप्रतिबन्धकदुरितनिवृत्तावुपयोग इत्यर्थः । **सामान्यपुरस्कारेणेति** । नियमविध्यभावे हि सामान्यधर्मावच्छिन्नं प्रत्येव लौकिकसाधनं प्राप्तम् ; लौकिकप्रमाणस्य यागीयव्रीहिवैतुष्यमात्रगतविशेषावच्छिन्नं प्रति साधनत्वाग्राहकत्वात् । तथा च तादृशलौकिकसाधनान्तरनिवृत्तिरेव विधि-

SGDF
Sri Gargeshwari Digital Foundation

मविधेः फलम्, विशेषरूपेण त्वपूर्वविधित्वमेव। यथाहि 'व्रीहीनवहन्ती'त्यादावपूर्वसाधनीभूतव्रीहिवैतुष्ये विशिष्यावघातातिरिक्तसाधनान्तराप्रसक्तावपि व्रीहिवैतुष्यमात्रे प्रसक्तस्य नखविदलनादेर्निवृत्तिः; विशिष्य कार्यकारणभावबोधनात्, तथा निर्विशेषब्रह्मात्माभेदसाक्षात्कारप्रतिबन्धनिवृत्तौ श्रवणाद्यतिरिक्तसाध-

---

त्सितसाधनपाक्षिकाप्राप्तिव्यवच्छेदरूपनियमतात्पर्यकविधेः फलमिति भावः। **विशेषरूपेणेति**। प्रकृतापूर्वसाधनवैतुष्यादिविशिष्टत्वरूपविशेषधर्मावच्छिन्नोद्देशेन त्ववघातादिविधेरपूर्वविधित्वम्, उक्तधर्मावच्छेदेन प्रसक्तसाधनान्तरस्य निवृत्तिफलकनियमतात्पर्यकत्वं नेत्यर्थः॥

ननु तुषतण्डुलविभागादिरूपे वैतुष्यादौ क्रियाप्रयोजकत्वेन दलनादेः प्रसक्तिः; तद्रूपावच्छिन्ननिवृत्तेर्नियमविधिफलत्वेऽवघातादिकमपि न निवर्तेत। अथापूर्वसाधनवैतुष्येऽवघातनियमो विधिविषय इति तादृशवैतुष्येऽवघाताद्यन्यस्यैव क्रियाप्रयोजकस्य निवृत्तिर्न त्ववघातादेः; तर्हि क्रियात्वेन विभागमात्रे कारणत्वे मानाभावात्, तत्तत्क्रियात्वेन तत्तत्क्रियाविशिष्टविभागे कारणत्वेऽपि दलनादेः क्रियाविशेषप्रयोजकस्यापूर्वीयवैतुष्ये कथं प्रसक्तिरत आह— **यथा व्रीहीनित्यादि**। **प्रसक्तस्येति**। क्रियाप्रयोजकत्वेनेत्यादिः। **विशिष्य कार्यकारणभावबोधनात्** अपूर्वीयवैतुष्यमवघातादिनैव साध्यमिति तात्पर्यविषयतया विधिना बोधनात्। तथाच विभागत्वेन क्रियाजन्यत्वमावश्यकम्; यद्विशेषयोरिति न्यायात्। कार्यमात्रवृत्तित्वेन विभागत्वस्य कार्यतावच्छेदकत्वावश्यकत्वाद्द्रव्यत्वादिनेव क्रियात्वादिनापि तद्वृति हेतुत्वात्। तदनङ्गीकारेऽपि विध्यभावेऽपूर्वीयवैतुष्यहेतुक्रियाविशेषेऽपि दलनादिप्रसक्त्या नानुपपत्तिः। दलनेऽनुष्ठिते तादृशवैतुष्यस्यापि तादृशक्रियाविशेषविशिष्टत्वसंभवादिति भावः। **निर्विशेषेत्यादि**। उक्तसाक्षात्कारे प्रतिबन्धकनिवृत्तिद्वारा वेदान्तश्रवणाद्यन्य-

SGDF
Sri Gargeshwari Digital Foundation

नान्तराप्रसक्तावप्यात्मज्ञानमात्रप्रतिबन्धनिवृत्तौ साङ्ख्यादिशास्त्रस्यापि प्रसक्तेस्तन्निवृत्तिर्विशिष्य वेदान्तवाक्यविचारविधानादिति परमगम्भीरोऽयं ग्रन्थार्थः। ननु यदि विश्वं कल्पितं स्यात्तदा

साधनाप्रसक्तावित्यर्थः । **आत्मज्ञानेत्यादि** । आत्मज्ञानत्वावच्छिन्ने प्रतिबन्धनिवृत्तिद्वारा साङ्ख्यादिशास्त्रश्रवणादीनां प्रसक्तेरित्यर्थः ॥

यद्यप्युक्तसाक्षात्कारप्रतिबन्धनिवृत्तिं प्रति वेदान्तश्रवणादेरिवाकर्तृत्वस्य प्रकाशत्वादिप्रकारकज्ञानप्रतिबन्धकनिवृत्तिं प्रत्येव साङ्ख्यादिश्रवणादेर्हेतुता न त्वकर्तृत्वाद्युपलक्षितात्मविषयकास्मदभिमतनिर्विकल्पकप्रतिबन्धकनिवृत्तिं प्रति "असङ्गो ह्ययं पुरुषः स्वयं ज्योतिरित्यादिवाक्येभ्यः कथमखण्डार्थधीरित्याद्यसंभावनायाः साङ्ख्यादिविचारादिना निवृत्त्यसंभवात्, "तत्तु समन्वयादि"त्यादि शारीरकोक्तन्यायैरेव तस्या निवृत्तेः, तथा चोक्तसाक्षात्कारसाधारणसामान्यरूपेण न साङ्ख्यश्रवणादिप्रसक्तिः, तथापि प्रतिबन्धनिवृत्तिद्वारोक्तप्रकारकात्मनिश्चयत्वावच्छिन्नं प्रति विशेषहेतुत्वे वाच्ये यद्विशेषयोरिति न्यायेनात्मज्ञानत्वावच्छिन्नं प्रत्यपि सामान्यत उक्तद्वारा साङ्ख्यश्रवणादीनां हेतुत्वावश्यकत्वादुक्तसामान्यरूपावच्छिन्ने तत्प्रसक्तिर्बोध्या ॥

अथवा कर्तृत्वादिधीविरोधितावच्छेदकमकर्तृत्वादिप्रकारक इव तदुपलक्षितनिर्विकल्पकेऽपि; जातिविशेषादिरूपत्वात्, तदेव साङ्ख्यादिश्रवणादिप्रयुक्ताया अकर्तृत्वाद्यंशेऽसंभावनानिवृत्तेर्जन्यतावच्छेदकमिति नानुपपत्तिः । नचैवम्—निर्विकल्पकप्रतिबन्धकनिवृत्तौ[1] साङ्ख्यादेः कारणत्वे कथं तन्निवृत्तिर्विधिनेति—वाच्यम्; विधिना प्रतिबन्धकविशेषरूपस्याद्वितीयस्वरूपाद्यंशेऽसंभावनादेर्निवृत्तिर्वेदान्तश्रवणादिनैव कार्येति बोधनात्। तादृशप्रतिबन्धकनिवृत्तावपि साङ्ख्यादेर्यद्विशेषयोरिति न्यायेन

---

[1] प्रतिबन्धनिवृत्तौ—क. ख.

SGDF
Sri Gargeshwari Digital Foundation

"जन्माद्यस्य यत" इति सूत्रे, "यतो वा इमानी"त्यादिश्रुतौ च जन्माद्युक्तिः, 'ईक्षतेर्नाशब्दमि'ति सूत्रे'तदैक्षते"त्यादिश्रुतौ

सामान्यतः प्रसक्तेः । यत्तु—सामान्यधर्मपुरस्कारेणेत्याद्ययुक्तम्; अपूर्वीयव्रीहिनिष्ठे वैतुष्ये येन रूपेणावघातस्य प्राप्तिस्तेन रूपेण दलनादेरपि प्राप्तेरुभयोरपि वैतुष्यत्वावच्छिन्ने हेतुत्वात्, न हि प्राप्तिर्निष्पत्तिरपि तु स्वरूपयोग्यता? सा च दलनादेरप्यस्ति, एतावानेव विशेषो यदवघातसाध्यवैतुष्येऽपूर्वीयत्वे न दलनादिसाध्ये इति, श्रवणादेस्तु ब्रह्मात्माऽभेदसाक्षात्कारत्वावच्छिन्न एव हेतुता, तत्र च नोपायान्तरप्राप्ति, तथाच श्रवणादितन्नियमादृष्टयोरुक्तसाक्षात्कारहेतुत्वे नियमविध्यनुपपत्तेर्मोक्षं प्रत्येव नियमादृष्टहेतुतेति—तन्न; दलनादेर्ह्यपूर्वीयव्रीहिवैतुष्ये कारणत्वं न विशेषतः; न हि दलनसाध्यक्रियाव्यक्तेस्तद्व्यक्तित्वेनोक्तवैतुष्ये हेतुत्वमपि तु तद्व्यक्तिविशिष्टे वैतुष्ये, नवा दलनादेर्विशेषान्तररूपेण तादृशवैतुष्ये हेतुत्वमस्ति; मानाभावात्, अतएव वैतुष्यत्वावच्छिन्ने हेतुत्वादिति मौढ्यमेव; तत्सत्त्वे वा तदप्यवघातजन्यक्रियाविशेषहेतुत्वापेक्षया सामान्यत एव, अवघातक्रियायास्तु तत्तद्व्यक्तित्वेन तत्तद्व्यक्ति[1] विशिष्टविभागरूपे वैतुष्ये हेतुत्वाद्विशेषत एव तत्स्वरूपयोग्यताप्राप्तिरिति तु मौढ्यमात्रम्; नहि विधिः स्वरूपयोग्यतां निवर्तयत्यपि तु दलनाद्यनुष्ठानभ्रान्तिम् । तस्मात्तद्भ्रान्तिरेव प्राप्तिः । तथाच वैतुष्य इव साक्षात्कारेऽप्युपायान्तरस्य सामान्यतः प्राप्तत्वात्तन्निवृत्तेर्विधिफलत्वे नानुपपत्तिरिति गम्भीरार्थो न मन्दधीगम्य इति ध्येयम् ॥

जन्माद्यस्य सूत्रे जन्माद्यस्य यत इति सूत्रे। जन्माद्युक्तिः जगज्जन्मादिकारणत्वरूपब्रह्मलक्षणोक्तिः। **ईक्षतेरिति । यतो वा इमानि**

---

[1] क्रियायास्तु तत्तद्व्यक्ति—क.

SGDF
Sri Gargeshwari Digital Foundation

च ईश्वरस्येक्षापूर्वककर्तृत्वोक्तिः, 'लोकवत्तु लीलाकैवल्य'मिति सूत्रे 'आप्तकामस्य का स्पृहे'त्यादिश्रुतौ च प्रयोजनाभावेऽपि लीलया सृष्ट्याद्युक्तिः, 'वैषम्यनैर्घृण्ये न सापेक्षत्वा'दिति सूत्रे 'पुण्येन पुण्यं लोकं नयती'त्यादिश्रुतौ च कर्मसापेक्षत्वेनावैषम्योक्तिः, 'तेजोऽतस्तथा ह्याहे'तिसूत्रे 'वायोरग्नि'रित्यादिश्रुतौ च तेजआदेर्वाय्वादिजन्यत्वोक्तिः, 'विपर्ययेण तु क्रमोऽत उपपद्यते चेति' सूत्रे 'पृथिव्यप्सु प्रलीयत' इत्यादि स्मृतौ च पृथिव्यादीनामबादौ प्रलयोक्तिरित्याद्ययुक्तं स्यात्; न हि कल्पिते तत्तद्विरोधशङ्का तन्निराकरणं च युक्तमिति—चेन्न;

भूतानि जायन्ते' इत्यादिवाक्यम; न प्रधानबोधकम्; यतोऽशब्दम्, प्रधानबोधकशब्दशून्यम्। उक्तेऽर्थे हेतुमाह --ईक्षतेरिति। तदैक्षतेतीक्षधातुसमभिव्याहारविशेषादिति सूत्रशब्दार्थः। **लोकवदिति**। तुशब्दात्प्रयोजनाभावे स्रष्टृत्वानुपपत्तिरूपपूर्वपक्षव्यवच्छेदः। यथा लोके प्रयोजनमप्रतिसन्धायापि राजादीनां लीलारूपा प्राणिमात्रस्य निश्वासादिरूपा वा चेष्टा दृश्यते, तथा जगत्सृष्टिरीशस्येत्यर्थः। **वैषम्येति**। कस्यचिदुत्तमं, कस्यचिन्मध्यमं, कस्यचिदधममैश्वर्यं विदधातीति वैषम्यम्, दुःखं संहारं च जनयतीति नैर्घृण्यं च स्यादीशस्येति चेन्न? पुण्यापुण्ये सहकारिणी अपेक्ष्य तथा करणादित्यर्थः। **तेजोऽत इति**। अतो वायोरेव तेजो जायते, हि यस्माद्वायोरग्निरिति श्रुतिस्तथा आह। **विपर्ययेणेति**। अतः पूर्वोक्तात्सृष्टिक्रमाद्विपर्ययेण विपरीततयैव लयस्य क्रमः। दृश्यते हि लोके घटादेर्मृदादौ लयः, तस्मात्कार्यस्य कारणे लय इत्यर्थः। **तत्तद्विरोधशङ्केति**। तत्तद्विरोधघटितपूर्वपक्षेत्यर्थः। **ब्रह्मणो** लक्षणासंभवो विरुद्ध इति जन्मादिसूत्रे पूर्वपक्षो न युक्तः; **लक्षणस्य** कल्पितत्वेन तदसम्भवस्याविरुद्धत्वात्। (एवमीक्षतिसूत्रे

SGDF
Sri Gargeshwari Digital Foundation

प्रपञ्चस्य कल्पितस्यापि व्यावहारिकसत्वाभ्युपगमेन तद्दशायां विरोधशङ्कातत्परिहारयोरुचितत्वात्, इन्द्रजालादावध्यस्तेऽप्यैन्द्रजालिकादेरीक्षापूर्वकं स्रष्टृत्वादेर्दर्शनाच्च । यथा च कल्पितस्यापि जन्माद्युपपत्तिस्तथाऽनिर्वचनीयवादे वक्ष्यते । स्वप्नेऽपि सृष्ट्यादेः श्रुत्या प्रतिपादनाच्च । अध्यस्तस्यापि सर्पस्य भयकम्पादिजनकत्ववत् वाय्वादीनां तेजआदिजनकत्वमप्युपपन्नम् । 'तदभिध्यानादेव तु तल्लिङ्गात्स' इति सूत्रे च तत्तद्भावापन्नस्य ब्रह्मण एव कारणत्वाभिधानात् । अबादौ पृथिव्यादिलयोक्तिरपि तत्तद्भावापन्नचैतन्ये व्याख्येयेति नाधिष्ठानातिरिक्ते लयोक्तिः ।

पूर्वपक्षो न युक्तः ; लक्षणस्य कल्पितत्वेन तदसम्भवस्याविरुद्धत्वात् [1])

एवमीक्षतिसूत्रे परिणामित्वादिना प्रधानमेव कारणत्वादिमन्न ब्रह्मेति लोकवदित्यादिसूत्रे प्रयोजनमननुसन्धाय न स्रष्टृतेति कारणत्वादिस्रष्टृत्वविरोधपूर्वपक्षः **वैषम्येत्यादिसूत्रेष्वपि** तत्तद्विरोधेन पूर्वपक्षो न सम्भवति ; **कल्पिते** विरोधासम्भवादिति भावः । **व्यावहारिकसत्वेति** । व्यवहारकालाबाध्यत्वेत्यर्थः । **ननु**—तथापि कल्पिते ईक्षापूर्वकसृष्ट्यादि न युक्तम् ; स्वप्नसृष्ट्यर्थमीक्षणादर्शनात्, सदन्यस्य च प्रपञ्चस्य जन्मादि वाय्वादेस्तेजआदिहेतुत्वं च न युक्तम् ; शशविषाणादौ तददर्शनात्, कल्पितस्य कल्पितान्तरलयाधारत्वं च न युक्तम्; अधिष्ठान एव कल्पितस्य लयदर्शनादित्यत आह—**इन्द्रेत्यादि** । परमसमाधानमाह—**तदभिध्यानादिति** । स ईश एव तत्तत्कार्यमभिध्यायन्नाकाशादिभावापन्नः सन् सृजति, अचेतनस्य कारणत्वासंभवात्केवलाकाशादेः कारणत्वाभावात्, "य आकाशे तिष्ठन्नाकाशमन्तरो यमयति, सोऽकामयत बहु स्यामि' ति प्रस्तुत्य 'सच्च

---

[1] अयं कुण्डलितः पाठः क्वचिन्न दृश्यते.

SGDF
Sri Gargeshwari Digital Foundation

वैषम्यनैर्घृण्यप्रयोजनादिशङ्कापरिहारादिकं तूपासनावस्थायाम् ।

त्यच्चाभवत्, तदात्मानं स्वयमकुरुते 'त्यादि श्रुतिलिङ्गात् । अत एव 'तत्तेज ऐक्षत, ता आप ऐक्षन्ते' ति ईशावेशादचेतनस्येक्षितृत्वम् । व्यवहारदशामाश्रित्य वैषम्यादिशङ्कातत्परिहाराविति समाधानं सूत्रारूढतया भाष्यादावुक्तमित्याशयेनाह—**वैषम्यनैर्घृण्यप्रयोजनादीत्यादि । उपासनावस्थायामिति ।** कर्मावस्थायामित्यपि बोध्यम् । **उक्तं हि शारीरकसंक्षेपे**—

आरम्भसंहतिविकारविवर्तवादा
नाश्रित्य वादिजनता खलु वावदीति ।
आरम्भसंहतिमते परिहृत्य वादौ
द्वावत्र सङ्ग्रहपदं नमते[1] मुनीन्द्रः ॥
तत्रापि पूर्वमुपगम्य विकारवादं
भोक्त्रादिसूत्रमवतार्य विरोधनुत्यै ।
प्रावर्तत व्यवहृतेः परिरक्षणाय
कर्मादिगोचरविधावुपयोगहेतोः ॥
विवर्तवादस्य हि पूर्वभूमि-
र्वेदान्तवादे परिणामवादः ।
व्यवस्थितेऽस्मिन् परिणामवादे
स्वयं समायाति विवर्तवादः ॥
अभेदिनः सावयवस्य सत्य-
विचित्ररूपान्तरदर्शकत्वम् ।
वदन्ति धीराः परिणाममस्या
वसुंधराया इव सस्यसृष्टिम् ॥

[1] नपते-ग तपते क.

SGDF
Sri Gurgeshwari Digital Foundation

भोक्त्रापत्तेरविभागश्चेत्स्याल्लोकवदित्यापाततः परिणामवादाभ्युपगमेन, 'तदनन्यत्वमारम्भणशब्दादिभ्य' इति तु विवर्तवादे

अभेदिनो निर्विकृतेर्विवर्तो
मृषास्वरूपान्तरदर्शकत्वम् ॥

इत्यादि। **यदोपासनायां नियुज्यते पुरुषस्तदा न मिथ्यात्वनिश्चयस्तस्य।** विधिषु श्राद्धस्यैवाधिकारित्वादिति भावः। **भोक्त्रापत्तेरिति।** भोग्यजातस्य भोक्तृभावापत्तिः; भोक्त्रभिन्नब्रह्माभिन्नत्वात्, एवं भोक्तुरपि भोग्यभावापत्तिर्भोग्याभिन्नब्रह्माभिन्नत्वात्, अतो भोक्तृभोग्यविभागो न स्यादिति—चेन्न; यतो लोके समुद्राभिन्नत्वेऽपि तरङ्गफेनादीनां यथा मिथो नाभेदः, तथा कारणीभूतब्रह्माभेदेऽपि भोक्तृभोग्ययोर्न स इति सूत्रार्थः। **अभ्युपगमेनेति।** उक्तं हि तदनन्यत्वमित्यादिसूत्रे भाष्ये-अभ्युपगम्य चेमं व्यावहारिकं भोक्तृभोग्यलक्षणं विभागं स्याल्लोकवदिति परिहार उक्तो न त्वयं विभागः **परमार्थतोऽस्तीति।** भामत्यामप्युक्तम्—-इमां शंकामापाततो लोकसिद्धदृष्टान्तेन निराकरोति सूत्रकारः' "स्याल्लोकवदिति"। परिहाररहस्यमाह—**तदनन्यत्वमित्यादीति।** विस्तरेण चायमर्थः—

भोक्त्रादिसूत्रे परिणामवाद-
माश्रित्य तद्वादिभिरुक्तदोषम्।
समादधानो मुनिराह तस्मा-
त्सिद्धान्तसिद्धिं पुनरुत्तरत्र ॥
प्रत्यासन्ना परिणतिरियं विप्रकृष्टस्तु पूर्वः
संघातादिः सकल उदितो वेदसिद्धान्तापिद्धः।
एतावत्त्वादियमभिमता सूत्रकारस्य भाति
भ्रान्तिस्पष्टस्फुटनिजमनःकौशलानां नराणाम् ॥

SGDF
Sri Gargeshwari Digital Foundation

परमसिद्धान्तदशायां न शङ्का न चोत्तरम्; मायाविन इवेश्वरस्य स्वप्रतिबिम्बभूतजीवभ्रमयितृत्वेन सर्वविरोधनिरासोपपत्तेः। नन्वी-

---

इत्यादि शारीरकसंक्षेपादौ विवेचितः। तदनन्यत्वमित्यादि। तस्य ब्रह्मणोऽनन्यत्वं नास्त्यन्यत्त्वमभिन्नं यत्र तत्वं "वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यमि"त्यादि श्रुतिभ्यः। आदिना दृग्दृश्यसंबन्धानुपपत्यादिप्रपञ्चसत्यताखण्डनयुक्तिभ्यः। स्वप्रतिबिम्बे-त्यादि। यतो जीवः स्वप्रतिबिम्बमतस्तद्भ्रमयितृत्वमीशस्येत्यर्थः। विरो-धनिरासेति। कल्पितसृष्टौ न वैषम्यादि; जीवानामीशाधीन-सुखाद्युत्कर्षापकर्षभ्रमेण तदसंभवात्। नहि मायाविनः स्वमायानिर्मिते-नोत्कृष्टापकृष्ट मनुष्यादियुक्तनगरेण वैषम्यादिकं रागद्वेषादिरूपं संभव-तीति। विवर्तवादालम्बने वैषम्यादिकमीशे विरुद्धमिति विरोधशङ्का न सम्भवतीति भावः। मायाविन इवेति। यथा मायाविनः उत्कर्षापकर्ष-विशिष्टेन्द्रजालादेर्निर्मातृत्वे संहर्तृत्वे वा न वैषम्यनैर्घृण्ये तथेशस्याप्युत्कृ-ष्टापकृष्टभ्रमघटितसृष्टिसंहारयोर्न ते इत्यर्थः। भ्रान्तानां जीवानां भ्रमयितुरीशस्य च मिथ्यात्वं ज्ञापयितुमाह—स्वप्रतिबिम्बेति। तथा चाविद्याप्रयुक्तबिम्बप्रतिबिम्बभावयोरेशिजवियोर्मिथ्यात्वात्सुतरां न विरो-धशङ्का। न हि स्वप्ने कस्य चित्कुत्र चित्पुरुषे वैषम्यादि यद्दृश्यते तत्र विरोधः प्रबोधकाले शङ्क्यते इति भावः। विरोधनिरासेति। वैष म्यादिप्रयुक्तविरोधशङ्काविरहेत्यर्थः। उक्तविरहे भ्रमयितृत्वेनेति तृती-यार्थस्य ज्ञाप्यत्वस्यान्वयः। यत्तु परिणामवादाभ्युपगमेन शङ्कापरिहारौ न युक्तौ; वस्तुगत्या त्वत्सिद्धान्ते तद्वादानभ्युपगमादिति, तन्न; परिणामवादस्यानादिभ्रान्तिसिद्धत्वेन शिष्यबुद्ध्यारूढत्वेन प्रथमं तद्वाद-माश्रित्यैव समाधानौचित्यादन्यथा शिष्यव्याकुलतापत्तेः। तद्वादाभ्युप-गमेनापि समाधानसम्भवे तदनुक्तौ न्यूनतापत्तेश्च। अत्र भ्रामयितृत्वेति

SGDF
Sri Gargeshwari Digital Foundation

श्वरस्यापि सपरिकरस्य जीवेनाध्यस्तत्वात्कथं भ्रमयितृत्वम्, न; अविद्योपहितचित एवानादेरीश्वरत्वेनान्तःकरणोपहितजीवकल्पितत्वायोगात्, जीवकल्पितत्वपक्षेऽपि तादृग्धर्मविशिष्टतयैव कल्प-

---

परग्रन्थे प्रयुक्तं तदसाध्विति ज्ञापयितुमाचार्यैर्भ्रमयितृत्वेत्युक्तम्। न च—"मितां ह्रस्व" इति सूत्रे "वा चित्तविराग" इत्यतो वेत्यनुवृत्तेस्तदपि साध्विति—वाच्यम्; लोके तथा प्रयोगाभावात्। संक्रामयतीत्यादिकं क्रम एव स्वार्थिकतद्धितान्तत्वेन क्रामस्तस्मान्नाम्नो णिजन्तादुपपद्यते। भ्रामयन् सर्वभूतानीत्यादावपि तथैव छान्दसाद्वोपपात्तिः। उन्नामयतीत्यादावपि नामणिजन्तत्वेनोपपात्तिः। अत एव "केचिदत्र वेत्यनुवर्तयन्ति, सा च व्यवस्थितविभाषा, तेनान्यत्र [1]सङ्क्रामयेत्यादि सिद्धमिति" काशिकावाक्ये केचिदित्यस्वारस्यं सूचितम्। सङ्क्रामयेत्यादावेव व्यवस्थितविभाषाया दीर्घत्वमिति चोक्तम्। **जीवेनेति।** मनोऽवच्छिन्नेनेत्यर्थः। मनोध्यासपूर्वमीश्वरो न जीवकल्पितः; तत्कल्पितत्वस्य तदीयाधिष्ठानधीसाध्यत्वात्, तादृशधियश्च देहेन्द्रियादिसाध्यत्वात्, मनोध्यासोत्तरमपि न स तत्कल्तिः; मनोभ्रमस्यापीश्वराधीनत्वादित्यभिमानः। **वस्तुतस्तु**—भ्रान्तिमात्रे देहेन्द्रियाद्यपेक्षाविरहस्योक्तत्वात्, नित्यपरोक्षस्येशस्य संस्कारादेरिव जीवीयाधिष्ठानज्ञानेनोत्पत्तिसम्भवात्, स्वेतरसर्वभ्रमे ईशस्य हेतुत्वसम्भवात्, मनोध्यास पूर्वमीशस्य कल्पनं सम्भवत्येव, तथापि जन्यभ्रममात्रस्येशाधीनत्वं सकारणम्। कारणं तु "ध्येयं नारायणात्सर्वमत[2]स्सर्वं प्रवर्तते। मयाध्यक्षेण प्रकृतिः सूयते सचराचरमि"त्यादिश्रुतिस्मृतिसिद्धं व्यवस्थापयितुमाह-**नाविद्योपहितचित इति। जीवकल्पितत्वपक्ष इति।** ईश्वरादिसर्वं कार्यं जीवकल्पितं प्रातिभासिकमिति दृष्टिसृष्टिपक्ष इत्यर्थः। **तत्तद्धर्मेति।**

---

[1] संक्रामयतीत्या—ग. [2] मत्त:—ख.

SGDF
Sri Gargeshwari Digital Foundation

नेन तस्य भ्रमयितृत्वाद्युपपत्तेः 'परिकल्पितोऽपि मरणाय भवेद्दुरगो यथा न तु नभो मलिनमि' ति न्यायात् । ननु—जीवानां वाय्वादिभ्योऽन्नयाद्युत्पत्तिरिति भ्रमोऽस्ति, यः स्वाप्नभ्रम इव श्रुतेरालम्बनं स्यात्, न च भ्रान्तिं विना कल्पितमस्ति ; न चैतद्वाक्यजभ्रान्तिकल्पितमेव एतद्वाक्यालम्बनम् ; वेदस्य भ्रमजनकत्वप्रसङ्गात्, अनुवादे तु न दोषः, न चेश्वर एव तत्तत्कल्पकः तस्य भ्रान्तत्वप्रसङ्गात्, तदभ्युपगमेऽपि न निस्तारः ; भ्रान्तेर्देहेन्द्रियादिकार्यत्वात्तेषां च पृथिव्यादिकार्यत्वात्पृथिव्याद्युत्पत्तेः प्राक् भ्रान्त्ययोगादिति—चेन्न ; भ्रान्तिमात्रे देहेन्द्रियाद्यपेक्षायाः प्रागेव निरासात्, ईश्वराध्यस्तवाय्वादिहेतुकान्नयाद्युत्पत्त्यालम्बनत्वेन वेदस्य भ्रमाजनकत्वात्, अध्यस्तस्य चाध्यस्तत्वेन स्फुरणान्न मायाविन इव ईश्वरस्य भ्रान्तत्वप्रसङ्गः ।

सर्वकार्यहेतुत्वेश्वरत्वादीत्यर्थः । न्यायादिति । यथा प्रातीतिकत्वाविशेषेऽपि सर्पो मरणहेतुर्भयविशेषोत्पत्तिद्वारा न तु नभोमालिन्यं तथा स्वभिन्नत्वादिना परोक्षतया कल्पित ईश एव स्वोत्तरसर्वसंसारभ्रमे हेतुर्नियन्तृत्वादिमान्नान्य इत्यर्थः । भ्रमाजनकत्वादिति । वस्तुतः स्वाप्नसृष्टिबोधकश्रुतेरिवाकाशाद्वायुरित्यादिश्रुतेरप्युत्तरोत्तरस्याः पूर्वपूर्वकल्पसिद्धजीवभ्रमानुवादत्वसम्भवात् । तादृशभ्रमपरम्परायाश्चानाद्यविद्यादिसिद्धत्वान्नानुपपत्तिः । किञ्चानुवादे तु न दोष इति कथमुक्तम्? अनुवादाभावेऽपि श्रुतेरद्वैततात्पर्यकत्वेन भ्रमजनकत्वस्यादोषत्वसम्भवात्, मानान्तरकृतबाधासम्भवेन श्रुत्या तादृशभ्रमजननसम्भवात्, तादृशभ्रमस्य तत्वतो भ्रमत्वेऽपि व्यावहारिकप्रमात्वाच्चेति ध्येयम् ॥

भ्रान्तत्वप्रसङ्ग इति । निश्चयस्याप्रामाण्यधीशून्यस्यैव बाधि

SGDF
Sri Gargeshwari Digital Foundation

न चाध्यस्तत्वे उत्पत्त्याद्यनुपपत्तिः ; अनध्यस्तस्य क्वाप्युत्पत्त्याद्यदर्शनेनाध्यस्तत्वस्यैव तदुपपादकत्वात्, सत्कार्यवादासत्कार्यवादनिषेधेनानिर्वचनीयकार्यवादमात्रे कार्यकारणभावपर्यवसानात्। तदेवं कृत्स्नस्य प्रपञ्चस्याद्वये ब्रह्मणि कल्पनोपपत्तेर्न प्रतिकूलतर्कपराहतिः ॥

इत्यद्वैतसिद्धौ ब्रह्मणि प्रपञ्चकल्पनोपपादनेन
प्रतिकूलतर्कनिराकरणम् ॥

तद्विषयकज्ञानस्य भ्रमपदार्थत्वादीश्वरीयप्रपञ्चज्ञाने च निश्चयत्वस्य बाधितविषयकत्वेनेश्वरेण ज्ञातत्वस्य च सत्वान्न भ्रमपदार्थत्वमिति भावः। सत्कार्यवादासत्कार्यवादनिषेधेनेति । उत्पत्तेः पूर्वं कार्यस्य सत्वे कारणव्यापारवैय्यर्थ्यमभिव्यक्त्यर्थत्वे सैवासतीति कार्यमेवासदास्ताम्, असत्वे चोत्पत्तिपूर्वकालस्य कार्यासम्बन्धित्वेनावच्छेदकत्वासम्भवात्कालानवच्छिन्नासत्वस्य सत्वविरुद्धस्यापत्तिः । अत उत्पत्त्यादिकं प्रतीयमानं विचारासहत्वादनिर्वाच्यमित्यनिर्वाच्यवाद एव पर्यवसानम् । उक्तं हि—

का तदस्तु गतिस्तत्तत्प्रतीतिव्यवहारयोः ।
उपपादयितुं तैस्तैर्मतैराशंक[1]नीययोः ।
अनिर्वक्तव्यतावादपादसेवागतिस्तयोरिति ।
तर्कैः सारस्वतै रत्नैश्चन्द्रिकाचन्द्रभूषणैः ।
मिथ्यानुमितौ ध्वान्तभङ्गो दुस्तर्कभञ्जनः ।

इति प्रतिकूलतर्कनिराकरणम्.

---

[1] रशक—क. ख.

SGDF
Sri Gargeshwari Digital Foundation

अथ मिथ्यात्वश्रुत्युपपत्तिः

एतदनुमानमेकमेवाद्वितीयमित्यादिश्रुतिरप्यनुगृह्णाति । ननु—श्रुत्या स्वस्वरूपस्वप्रामाण्यस्वयोग्यतादेर्मिथ्यात्वाबोधनेन प्रत्यक्षादिसिद्धतत्सत्त्वोपजीवनेन च ब्रह्मेतरसकलमिथ्यात्वासिद्धिः, 'सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्ये' ति न्यायेन प्रत्यक्षादिसिद्धघटादिमिथ्यात्वासिद्धिश्च, योग्यतादिमिथ्यात्वबोधने च श्रुत्यर्थस्याताात्विकत्वापत्तिः; शाब्दबोधस्य शब्दतत्प्रामाण्ययोग्यतादिना समसत्ताकत्वनियमात्, न च—सदर्थस्वाप्नदेवतावाक्ये व्यभिचारः; आप्तत्वापौरुषेत्वायोगेन तस्य शब्दत्वेन प्रामाण्यायोगात्, किं तूपश्रुतिवत्तादृशशब्दज्ञानं लिङ्गत्वेन प्रमाणमिति—चेन्न; निर्दोषशब्दत्वेन तस्य शब्दविधयैव प्रामाण्यसंभवात्, आप्तत्वापौरुषेयत्वयोर्दोषाभाव एवोपक्षयात् व्याप्त्याद्युपस्थितिकल्पने गौरवात्, वक्तुः कल्पि-

---

अथ मिथ्यात्वश्रुत्युपपत्तिः

योग्यतादीति । बाधाभावरूपयोग्यतायास्तत्त्वविशिष्टरूपेण मिथ्यात्वबोधकशक्तिरूपा शब्दनिष्ठा वा सेति भावः । आदिनाऽऽकाङ्क्षादेर्ग्रहणम् । **आप्तेति** । वाक्यार्थप्रमावदुक्तेत्यर्थः । **प्रामाण्यायोगादिति** । तथाच प्रमाणशब्दबोध्यत्वेन स्वबोधकशब्दादिसमसत्ताकत्वं साध्यमिति भावः । **उपश्रुतिवदिति** । एतत्कर्तव्यं न वेति सन्दिहानेन श्रूयमाणस्यान्यकार्यत्वपरस्यावश्यमेतत्कार्यमित्यस्यान्यं प्रत्यन्येनोक्तस्य वाक्यस्योपश्रुतित्वम् । तस्य सन्दिग्धप्रकृतकार्यकर्तव्यतायां शब्दतया यथा न प्रामाण्यम्; अतत्परत्वादाप्तत्वाद्यभावाच्च किंत्वनुमापकतयागमेन तथा बोधनात्, तथोक्तवाक्यस्य सदर्थ इत्यर्थः ।

SGDF
Sri Gargeshwari Digital Foundation

तत्वेऽपि तद्गतदोषस्यार्थसंवादेन कल्पयितुमशक्यत्वाच्च। तथाच शब्दसमसत्ताकत्वस्य व्यभिचारात् योग्यतादिसमसत्ताकत्व-नियमसिद्धेरप्रयोजकत्वाच्च परोक्षत्वानित्यत्वाद्युपाधिसंभवाच्च श्रुत्या योग्यतादिसकलमिथ्यात्वबोधनेऽपि तदर्थस्य न मिथ्या-

---

शब्दसमसत्ताकत्वस्य स्वंबोधकशब्दसमसत्ताकत्वस्य। **व्यभिचारात्** प्रमाणशब्दबोध्यत्वं प्रत्यव्यापकत्वात्। **नियमसिद्धेः** व्याप्तिज्ञानस्य। **अप्रयोजकत्वात्** निश्चायकतर्का[1]भावेन सन्देहरूपत्वेनानुमित्यनुपधायक-त्वात्। **परोक्षत्वेति**। यथाश्रुतं घटादौ साध्याव्यापकमतः साक्षि-स्वरूपान्यत्वरूपं परोक्षत्वं बोध्यम्। **न च** पक्षेतरत्वतुल्यतेति—**वाच्यम्;** उक्तोपाधिर्यदि साध्यव्यापकं न स्यात्तदा साक्षिणः स्वबोधक-योग्यतादिसमसत्ताकत्वं स्यात्, तथाच तस्य बाध्यत्वं निःसाक्षिकं स्यादिति तर्केण व्यापकतानिश्चयाद्बाधोन्नीतपक्षेतरत्वतुल्यत्वात्। **आत्म-गुरुत्वान्यतरत्वाद्यवच्छिन्नसाध्यव्यापकं यथाश्रुतं वा परोक्षत्वम्। **अनि-त्यत्वेति**। नाशित्वेत्यर्थः। "अतोन्यदार्तमि"त्यादि श्रुत्या "यावद्वि-कारं तु विभागो लोकवदि"ति न्यायेन च गगनादेरपि नाशित्वान्न साध्या-व्यापकत्वम्। **यत्तु**—शब्दप्रामाण्यासाधारणप्रयोजकवत्वं प्रकृते प्रमाण-शब्दत्वम्, तच्च न विषयाबाधमात्रम्; तस्य प्रामाण्यमात्रे प्रयोजकत्वात्, शुकादिवाक्यसाधारण्याच्च, किंतु वाक्यार्थप्रमात्वबोधविषयादिमदुक्तत्व-मिति न स्वाप्नवाक्यार्थे व्यभिचार इति—**तत्तुच्छम्;** प्रमासामान्य इव प्रमाविशेषेऽपि विषयाबाधस्यैव लाघवेन हेतुत्वौचित्यात्। शुकादि-वाक्ये प्रमापकत्वस्येष्टत्वात्। सन्निपातेत्यादेः सन्निपातः संबन्धः स लक्षणं निमित्तं यस्य तादृशो विधिस्तद्विघातस्य स्वनिमित्तभूतसन्निपात-विघातस्य निमित्तं नेत्यर्थः। तथाच यथा शतानीत्यादौ शि सन्निपातं

---

[1] तर्क–ख.

SGDF
Sri Gargeshwari Digital Foundation

त्वम्; मिथ्यात्वप्रयोजकरूपाभावात्। महाभाष्योक्तन्यायोदाहरणमपि न युक्तम्; विषयवैषम्यात्। तथाहि—शतानि सहस्राणीत्यत्र सर्वनामस्थानसंज्ञकशिसन्निपातेन विहितो नुम् "ष्णान्ता षडि" ति षट्संज्ञाद्वारा "षड्भ्यो लुगि" ति शिस्वरूपसर्वनामस्थानस्य पञ्चेत्यादाविव लुङ्निमित्तं न भवति; तत्सन्निपातेनैव विहितत्वात्, तत्सद्भावनियमेनैव विहितत्वादित्यर्थः। अलुप्त-

---

निमित्तीकृत्य प्रवर्तमानो नुम्विधिर्नान्तत्वद्वारकषट्संज्ञया शिलोपेन तद्विघातस्य न निमित्तम्, तथा मिथ्यात्वधर्मिग्राहकप्रत्यक्षादिप्रामाण्यसन्निपातं निमित्तीकृत्य प्रवर्तमाना विश्वमिथ्यात्वविधायकश्रुतिर्नोक्तसन्निपातविघातस्य निमित्तमित्याशयेन सन्निपातेत्याद्युक्तम्। तदयुक्तम्; दृष्टान्ते शिसद्भावरूपसम्बन्धस्य निमित्तस्य विघातासम्भवेऽपि दार्ष्टान्तिके तात्विकप्रामाण्यसम्बन्धस्यातादृशस्य विघातसम्भवात्। व्यावहारिकप्रामाण्यसम्बन्धस्य तादृशत्वेऽपि तदविघातादित्याभिप्रेत्याह—**महाभाष्येत्यादि। सर्वनामस्थानसंज्ञकेति**। "शि सर्वनामस्थानमि" त्यनेन विहितोक्तसंज्ञकेत्यर्थः। **विहित इति**। सर्वनामस्थाने इत्यनुवृत्तौ "नपुंसकस्य झलच" इत्यनेन विहित इत्यर्थः। **विहितत्वादिति**। न चोपदेशकाले यत् ष्णान्तं तस्यैव षट्संज्ञा[1] विधीयते, अन्यथा येन विधिस्तदन्तस्य ग्रहणमित्यनेनैवान्तलाभादन्तग्रहणं[2] व्यर्थं स्यात्, तथाच शतानीत्यादौ सा न प्रसक्तेति—वाच्यम्; अन्तग्रहणे[3] संख्याया इत्यस्यानुवृत्तौ मानाभावाद्विप्रुषयमाण इत्यादावपि षट्संज्ञास्यादन्ते गृहीते तु स्त्रीलिङ्गनिर्देशाऽन्यथानुपपत्त्या सङ्ख्यानुवृत्तिः। तथाच तत्रैवार्थापत्तेरुपक्षयात्स्वभावनान्तत्वाक्षेपाभावात्सन्निपातेत्यादि न्यायेनैव स्वभावनान्त-

---

[1] संज्ञा—ग. [2] येन विधिस्तदन्तस्येत्यन्तग्रहणसिद्धावन्तग्रहणमिति स्यात्. [3] तादृग्ग्रहणे—ग.

SGDF
Sri Gargeshwari Digital Foundation

स्यैव सर्वनामस्थानस्य नुम्निमित्तत्वात्, न "लुमताङ्गस्ये" ति लुमता लुप्तेऽङ्गकार्यनिषेधात्। तथाचालुप्तप्रत्ययत्वेन यत्र निमित्तता तत्र सन्निपातलक्षणन्यायावतारः, यत्र तु "प्रत्ययलोपे प्रत्ययलक्षण-मि" ति न्यायेन लुप्तेऽपि प्रत्यये कार्यं भवति, तत्रालुप्तत्ववि-शेषणनैरपेक्ष्येण प्रत्ययत्वमात्रेणैव निमित्तत्वान्न सन्निपातलक्षण-न्यायावतारः; प्रत्ययसद्भावस्य तत्रानुपजीव्यत्वात्। एवं स्थिते यद्यमिथ्याभूतत्वेन प्रत्यक्षादेर्निमित्तता स्यात्तदा प्रत्ययस्यालुप्त-त्वेन निमित्ततायामिव भवेदेतन्न्यायावतारः। प्रत्यक्षादेस्तु स्वरूपे-णैव निमित्तता स्वप्नाद्यर्थस्याप्यर्थक्रियाकारित्वदर्शनेन प्रागेवोप-पादिता। अतो यद्बाध्यते तात्विकत्वं तन्नोपजीव्यम्; यच्चोपजीव्यमर्थक्रियासामर्थ्यलक्षणव्यावहारिकप्रामाण्यं तच्च न

त्यागसम्भवेन स्वभावनान्तत्वाक्षेपवैय्यर्थ्याच्च। लुमतेति। [1]लुशब्दयुक्तेन [2]लुक्श्लुलुपित्येषामन्यतमेनेत्यर्थः। अङ्गस्य "यस्मात्प्रत्ययाविधिस्तदङ्ग-मि"त्यनेन[3] विहिताङ्गसंज्ञाकस्य प्रकृतेरिति यावत्। लुप्ते विहितलोप-योग्ये। तेन लोपात्पूर्वमपि नाङ्गकार्यमिति ध्येयम्। लुप्तेऽपीति। अग्निविदित्यादौ लुप्तेऽपि क्विबादौ लुगादि[4]कार्यमित्यर्थः। यद्यपि 'स्थानिवदादेश' इत्यादिनैव लुप्तप्रत्ययस्य निमित्तता, 'प्रत्ययलोप इत्यादिकं तु प्रत्ययमात्रनिमित्तकमेव कार्यं प्रत्ययलोप इति नियमार्थम्। तेन बोभवीतीत्यादौ लुप्तप्रत्ययमात्रनिमित्तकयङो[5] ङित्वेऽपि नात्मनेपद-मित्यादि वैय्याकरणैरुक्तम्, तथापि नियमबोधकवाक्येन नियम्यप्रापकं[6] स्थानीत्याद्येवाभिप्रेतमिति न दोषः। अर्थक्रियासामर्थ्येति। प्रवृत्त्यादि-कार्ये सामर्थ्येत्यर्थः। व्यावहारिकेति। व्यवहारकालाबाध्यविषयकत्व-

---

[1] लुवर्णयुक्तेन–ग. [2] लुक् श्लुलुबित्ये. इति भवितुमुचितम्. [3] यस्मा-त्प्रत्ययविधिस्तदादीत्यनेन. इति स्यात्। [4] तुगादि–क. ख. [5] लुप्तयङो–ख. [6] नियम्याप्रापकम्–क. ख.

SGDF
Sri Gargeshwari Digital Foundation

बाध्यत इति किं केन सङ्गतम्? तदुक्तं टीकाकृद्भिः—"उत्पा-

रूपेत्यर्थः । न बाध्यत इति । विचारकाले प्रपञ्चस्य बाधेऽपि व्यवहार-कालाबाध्यत्वं न विहन्यत इत्यर्थः ॥

वस्तुतस्तु तात्विकत्वेन प्रत्यक्षादेर्निमित्तत्वेऽपि न प्रकृते उक्त-न्यायावतारः; सामान्यविषयकोक्तन्यायस्य विशेषविषयकेनाद्वैतश्रुति-तात्पर्यान्यथानुपपत्त्यादिना 'तदनन्यत्वमारम्भणशब्दादिभ्य' इत्या-दिन्यायेन, 'प्राबल्यमागमस्यैव जात्या तेषु त्रिषु स्मृतमि'त्यादिस्मृत्या च बाधसम्भवात् । अतएव महाभाष्ये नदि ब्राह्मणीत्यादौ तन्नयायान-वतारात् तन्नयायानादरमाशङ्क्य तन्नयाय आवश्यको दोषेषु तु प्रति-विधातव्यमित्युक्तम् । तत्र च 'एङ्ह्रस्वात्सम्बुद्धेः' इति सूत्रे गुणा-दित्यकृत्वा एङ्ह्रस्वादिति करणं ज्ञापयति, यदेतदन्यविषय एवोक्त-न्यायावतारः, यदि हि नदि ब्राह्मणीत्यादौ सन्निपातन्यायेन सम्बुद्धि-लोपबाधः, तदा गुणात्सम्बुद्धेरित्येव सूत्रं क्रियेत, एकार, ओकार, अकाररूपाद्गुणात्सम्बुद्धिलोपसम्भवात् । [1]न हि ब्राह्मणीत्यादाविकारा-दिरूपाद्ध्रस्वात्सम्बुद्धिलोपस्योक्तन्यायबाध्यत्वस्वीकारात् । एवं 'हलि-सवर्षोम्' 'कष्टाय क्रमणे' इत्यादि सूत्राण्यपि तन्नयायाप्रवृत्तिज्ञापका-नीत्यर्थ इति कैय्यटः । तथा चोक्तसूत्रान्यथानुपपत्तिरिव विशेषविषय-कन्यायान्तरमप्युक्तन्यायं बाधत एव । किंचोपजीवकं नोपजीव्यविघा-तमित्येवोक्तन्यायः, तस्य च बाधः स्फुट एव । लोके उपजीवकेन वन्ह्यादिना तृणादेर्विघातात् । अतएव अचि ह्रस्वश्च वा इत्यकृत्वा 'ङिति ह्रस्वश्च, वामि,'ति सूत्रद्वयकरणं सन्निपातेत्यादिपरिभाषाया ज्ञापकमिति कौस्तुभे उक्तम् । तन्नयायस्य व्यभिचारित्वेऽपि पदनिष्प-त्त्यर्थं क्वचिदादर इति तत्र भावः । अन्यथा ज्ञापकानुसरणवैय्यर्थ्यात् ।

[1] नदि ब्राह्मणीति स्यात्.

SGDF
Sri Gargeshwari Digital Foundation

दकाप्रतिद्वन्द्वित्वादि" ति। अतएव ज्योतिष्टोमादिविधेरुपजीव्याग्निविद्यावद्विषयत्वेनेव द्वैतनिषेधस्यापि स्वोपजीव्ययोग्यतादीतरविषयत्वेन सङ्कोचस्य वा सृष्ट्यादिश्रुतेरिव कल्पितविषय-

---

तस्मात्कल्प्यमानेऽर्थे उपजीव्यविरोधो दोषः, कल्पनाया उपजीव्याविरोधेनैव प्रवृत्तेः। यथानुभवकारण[1]त्वमुपजीव्य संस्कारस्य कारणत्वेन कल्पनं नानुभवकारण[2]त्वं विहन्ति। यत्र तूपजीव्यविघातकत्वं मानाः न्तरेण क्लृप्तम्, यथा वन्ह्यादेस्तृणादिविघातकत्वं प्रत्यक्षेण, अद्वैतश्रुतेप्रत्यक्षादिविघातकत्वमुक्तमानेन क्लृप्तम्, तत्र तन्न दोषः। तथा च 'न तौ पशाविति' शास्त्रस्य पशावाज्यभागप्रापकत्वेनोपजीव्यातिदेशं प्रति विघातकत्वेऽपि यथा सर्वथा न तत्र विघातकत्वम्, तथा प्रत्यक्षादेः सत्यत्वविघातिकाप्यद्वैतश्रुतिर्व्यावहारिकसत्यतां न विहन्तीति ध्येयम्॥

विद्यावदिति। यथा ज्योतिष्टोमादिविधेः सामान्यतः स्वर्गकामाधिकारिकत्वेन श्रुतस्यापि वेदार्थविज्ञसाग्निकविषयकत्वम्; अन्यथा तदर्थानुष्ठानासम्भवात्, आहवनीये जुहोतीत्यादिनाग्निविधानाद्विधेयार्थस्यानुष्ठाने [3]तेन ज्ञानहेतुत्वाच्च, तथाद्वैतश्रुतेर्योग्यताद्यन्यविषयकत्वम्। योग्यतादिमिथ्यात्वे स्वस्यैवाप्रामाण्यापत्तेः। शब्दार्थस्य योग्यतादिसमसत्ताकत्वनियमादित्यर्थः। षष्ठस्य प्रथमे स्थितम्—अग्निहोत्रादिवैदिककर्मसु चतुर्णामपि वर्णानामधिकारः शूद्रभिन्नानां वेति संशये, चातुर्वर्ण्यमविशेषात्' इति सूत्रे[4] विधिषु विशेषाश्रवणात् चतुर्णामिति पूर्वः पक्षः। अग्निहोत्रादीनामग्निविद्यापेक्षिणा[5]माधानोपनयनसिद्धयोराग्निविद्ययोर्लाभसम्भवे 'निषादस्थपतिं याजयेत्, इत्यादाविव शूद्रे तदाक्षेपे

---

[1] वादिकारण–ग. [2] नुभवस्य कारण–ग. [3] तज्ज्ञान–ग. [4] सूत्रम्–क.ख. [5] विद्यापेक्षाणा–क.

SGDF
Sri Gargeshwari Digital Foundation

त्वस्य वोपपत्तौ न तात्त्विकसर्वमिथ्यात्वपरत्वकल्पनं युक्तमित्यपास्तम् ; दृष्टान्ते अग्निविद्यादेरिव दार्ष्टान्तिके योग्यतादेस्तात्त्विकस्यानुपजीव्यत्वात्। न हि योग्यता तात्त्विकयोग्यतात्वेन निमित्तम्, किंतु योग्यतात्वेनैव । सकलद्वैताभावस्याधिकरणस्वरूपत्वेन तदधिकरणस्य च ब्रह्मणः 'सत्यं ज्ञानमनन्तं ब्रह्म' 'तत्सत्यं स आत्मा' इत्यादिश्रुत्या सत्यत्वप्रतिपादनान्न सृष्ट्यादिश्रुतेरिव कल्पितविषयत्वोपपत्तिः । तस्माद्योग्यतादेर्मिथ्या-

---

मानाभावादाधानोपनयनयोश्च' वसन्ते ब्राह्मणोऽग्निनादधीत 'ग्रीष्मे राजन्यः, शरदि वैश्यः, वसन्ते ब्राह्मणमुपनयीत, ग्रीष्मे राजन्यम्, शरदि वैश्यम्' इति विहितयोरशूद्राणामेव सिद्धेस्तेषामेवाधिकारस्तेष्विति सिद्धान्तः। **तात्त्विकसर्वमिथ्यात्वेति** । तात्त्विको यः स्वसमानाधिकरणाभावस्तत्प्रतियोगित्वेत्यर्थः । अत एवेत्यस्यार्थं विवृणोति— **दृष्टान्त इति** । ननु—विधीनां स्वार्थसमसत्ताकाग्निविद्यापेक्षावद्द्वैतनिषेधश्रुतेरपि तादृशयोग्यतापेक्षास्तु ; निषेधश्रुत्या च न तात्त्विकाभावो बोध्यते ; 'परास्य शक्तिर्विविधे' ति श्रुत्या विचित्रप्रपञ्चकारणविचित्रशक्तिरूपस्य द्वैतस्य ब्रह्मरूपताबोधनेन तात्त्विकत्वात्, द्वैतसामान्याभावस्य तात्त्विकत्वासम्भवादिति—चेत् ; भ्रान्तोऽसि ; विधीनामुक्तापेक्षा हि युक्ता, तदर्थस्येवाग्नेरपि व्यावहारिकस्यैव विहितत्वात्तज्ज्ञानरूपविद्याया अपि तथात्वात्। वस्तुतस्तस्यामपि न नियमः ; 'शाण्डिल्याय स्वप्नं निवेदयेत्, 'नेक्षेत वारिस्थमादित्यमित्यादौ स्वप्नवारिस्थादित्यादिज्ञानस्य वेदजन्यस्यापि भ्रमसमानविषयकत्वेन प्रातीतिकत्वात्, निषेधश्रुतेस्तु तात्त्विकार्थकत्वेऽपि तात्त्विकयोग्यतादिकत्वे मानाभाव इत्युक्तम् । ब्रह्मणोऽत्यन्ताभिन्ना तच्छक्तिश्चेत्तदा तत्तात्त्विकत्वं न द्वैतमिथ्यात्वे बाधकम्। अथ सा तद्भिन्ना, अन्यथा नानाविधत्व-

SGDF
Sri Gargeshwari Digital Foundation

त्वेऽपि वेदान्तबोध्यं सत्यमेवेति स्थितम्। यथा चाविद्यातत्कार्यस्य स्वरूपतो निषेधेऽपि तुच्छवैलक्षण्यम्, पारमार्थिकत्वाकारेण निषेधे वा पारमार्थिकत्वधर्मशून्यस्यापि ब्रह्मणः स्वरूपेण सत्वम्, तथोपपादितमधस्तात्। ननु—तत्वमस्यादिवाक्येन प्रत्यक्षाद्यविरोधाय तत्वंपदलक्षितयोरैक्यामिव मिथ्यात्वश्रुत्यापि तदविरोधाय प्रत्यक्षादिसिद्धादन्यस्यैव मिथ्यात्वं बोध्यम्; अन्यथा प्रत्यक्षाद्यनुग्रहाय व्यावहारिकमपि सत्वं न कल्प्येत। "नेह नाने" त्यादिनिषेधेनात्यन्तासत्वबोधनादिति—चेन्न; विशिष्टयोरैक्ये विशेषणयोरप्यैक्यापातेन सर्वत्र विशिष्टाभेदप-

---

व्याघाताच्चदा मिथ्यैव दृग्दृश्यसम्बन्धानुपपत्त्यादित्युक्तेरुक्तत्वात्[1]। तस्मात्परास्येत्यादिश्रुतिः सृष्टिवाक्यवद्द्वैतश्रुतित्वाद्व्यावहारिकशक्तिबोधिका न तु ब्रह्मणि तदत्यन्ताभेदपरा। न च शब्दस्वरूपादेः शब्दार्थस्य च समसत्ताकत्वनियमत्यागे सति बाधकाभावादद्वैतश्रुत्यर्थतात्विकतासिद्धिः, तस्यां चोक्तनियमत्याग इत्यन्योन्याश्रय इति—वाच्यम्; अद्वैतश्रुत्यर्थतात्विकत्वसन्देहोपि तर्काभावेन व्यभिचारसन्देहादुक्तनियमानिश्चयात्॥

ननु प्रपञ्चः स्वरूपेण निषिद्धस्तुच्छः स्यात्, पारमार्थिकत्वेन निषिद्धश्चेद्ब्रह्मापि तथास्तु, [2]अथ ब्रह्म तेन रूपेण मिथ्यैव स्वरूपेणैव सन्निर्धर्मकत्वात्तर्हि प्रपञ्चोऽपि[3] ब्रह्मवत्स्वरूपेण सन्नस्तु तत्राह—**यथाचेति**। **वैलक्षण्यं** सत्वप्रतीत्यर्हत्वादिति शेषः। **ब्रह्मण इति**। एवकारः शेषः। एकेन ब्रह्मणा सता सर्वत्र सदाकारधीसम्भवात्; तदन्यस्य सद्रूपतायां मानाभाव इत्याद्युक्तमित्यर्थः। **विशिष्टाभेदपरेति**।

---

[1] नुपपत्तेरित्युक्तत्वादिति स्यात्. [2] अथ तेन रूपेण ब्रह्मापि–ग. [3] पि तथास्तु तत्राह—यथाचेति–ग.

SGDF
Sri Gargeshwari Digital Foundation

रवाक्यस्य लक्षितविशेष्यैक्यपरत्वनियमेन तत्त्वमसीत्यत्रापि तथाभ्युपगमात् । तदुक्तम्—

"अविरुद्धविशेषणद्वयप्रभवत्वेऽपि विशिष्टयोर्द्वयोः ॥
घटते न यदैकता तदा न तरां तद्विपरीतरूपयोः" ॥ इति ।

मिथ्यात्वबोधकश्रुतौ तु नास्ति प्रत्यक्षादिविरोधः;

विशिष्टद्वयोपस्थापकपदद्वयघटितेत्यर्थः । **लक्षितेत्यादि** । द्रव्यत्वघटत्वाद्युपहितयोरभेदपरत्वेऽपि लक्षणास्त्येव ; विशिष्टान्वयस्यौत्सर्गिकत्वात् । परंतु विशिष्टान्वयाभावावश्यकत्वे उपहितलक्षणायां न मानम् । यत्र तु 'तेन घटेन जलमाहर' इत्यादावुपहितान्वये तात्पर्यम्, तत्र 'एकहायन्या पिङ्गाक्ष्या क्रीणाति' इत्यादाविव करणत्वे उपहितान्वयानुरोधादुपहितलक्षणास्तु । द्रव्यं घट इत्यादौ तु न तस्यां मानमिति तद्वदेव तत्त्वमसीत्यादावपि तात्पर्यानुरोधाद्विशेष्यस्वरूपयोरत्यन्ताभेदरूपव्यक्तिमात्रस्वरूपैक्यबोध इति भावः । **अविरुद्धेति** । द्रव्यत्वघटत्वादिरूपेत्यर्थः । **प्रभवत्वे** घटितत्वे । **एकता** अत्यन्ताभेदः ॥

ननु—न वयमुपजीव्यविरोधं प्रकृते वदामः, किंतु प्रत्यक्षाद्यविरोधेनापि मिथ्यात्वश्रुत्युपपत्तौ तद्विरोधित्वं तस्या न युक्तमितीति—चेन्न ; प्रत्यक्षस्येव मानान्तराणामप्यनुरोधे मिथ्यात्वश्रुतेर्विषयालाभादतात्त्विकप्रामाण्यस्य प्रत्यक्षादाववश्यं वाच्यत्वात् । यत्तु—**प्रत्यक्षाद्यननुरोधे** तत्त्वमसीत्यादावपि विशेषणयोरैक्यपरत्वं स्यात् ; तदनुरोधे तु मिथ्यात्वश्रुतावपि प्रत्यक्षाद्यासिद्धवस्तुमिथ्यात्वपरत्वं युक्तमिति, तन्न ; नहि तत्त्वमसीत्यादिश्रुतेः प्रत्यक्षाद्यनुरोधेन विशेषणयोरैक्यपरत्वाभाव इति वदामः, किंतु सोऽयमित्यादिवाक्यस्य ; तस्यास्तु तदनुरोधेऽपि व्यक्तिस्वरूपमात्रतात्पर्यग्राहकानुरोधेन सोऽयमित्यादाविवाखण्डार्थत्वा-

SGDF
Sri Gargeshwari Digital Foundation

तात्त्विकत्वांशस्यानुपजीव्यत्वात्, व्यावहारिकसत्त्वस्य चोपजीव्यत्वान्नात्यन्तासत्त्वकल्पनमित्यस्याप्युक्तप्रायत्वात् । ननु—श्रुतेस्तात्पर्यं चैतन्यमात्रे वा, द्वितीयाभावविशिष्टे वा, तदुपलक्षिते वा । नाद्यः; विश्वामिथ्यात्वासिद्धेरिष्टापत्तेः, तस्य स्वप्रकाशतया नित्यसिद्धत्वेन श्रुतिवैयर्थ्याच्च । न द्वितीयः; अखण्डार्थत्वहानात् । अतएव न तृतीयः ; काकवदितिवद्द्वितीयाभाववदित्यनेनापि सप्रकारकज्ञानजननेनाखण्डार्थत्वायोगात्, चिन्मात्रस्य नित्यसिद्धत्वेन तदन्यस्य च मुमुक्ष्वज्ञेयत्वेन काकेन संस्थानविशेषस्येव द्वितीयाभावेनोपलक्ष्यस्यान्यस्याभावात्तस्योपलक्षणत्वायोगाच्चेति—चेन्न ; काकस्य संस्थानविशेष इव द्वितीयाभावस्य स्वरूपमेवोपलक्ष्यमित्युपलक्ष्याभावनिबन्धनोप-

---

ङ्गीकारात्[1] । मिथ्यात्वश्रुतौ तु 'नेह नानास्ति किंचन' 'नेति नेति' इत्यादौ सर्वनाम्ना सर्वमानोपस्थितानां हि निषेधतात्पर्यस्य स्फुटत्वादलीकनिषेधस्य प्राप्तत्वादप्रयोजनकत्वाच्च न प्रत्यक्षाद्यसिद्धालीकमिथ्यात्वपरत्वमिति विशेषात् ॥

ननु—श्रुतेः प्रत्यक्षाद्यननुरोधे विश्वस्य ख्यात्यन्यथानुपपत्त्य[2]-गम्यमसद्वैलक्षण्यमपि बाध्येतेत्यत्यन्तासत्त्वं स्यात्तत्राह—**व्यावहारिकसत्त्वस्येति** । **उक्तप्रायत्वादिति** । यच्चोपजीव्यमित्यादिनेत्यादिः । व्यावहारिकत्वोपजीव्य[3]तोक्त्या अत्यन्तासत्त्वं नेत्यर्थादुक्तमित्यर्थः ॥

काकवदिति । यथा काकवन्तो देवदत्तगृहा इत्युक्ते उत्तृणत्वरूपोपलक्ष्यतावच्छेदकप्रकारेण बोधः, तथा द्वितीयाभाववदित्यनेनापि किंचिदुपलक्ष्यतावच्छेदकरूपेण स इति भावः । **संस्थानविशेषस्य**

---

[1] कारः–ग. [2] ख्यात्यन्यथानुपपत्ति–क. ग. [3] व्यावहारिसत्त्वोपजीव्य–क. ग.

SGDF
Sri Gangeshwari Digital Foundation

लक्षणत्वानुपपत्तेरभावात्। उपलक्षणत्वे ह्युपलक्ष्यसत्वमात्रं तन्त्रम्, न तु तस्य स्वरूपातिरिक्तत्वमपि; गौरवात्, उपलक्ष्यतावच्छेदकरूपाभावेऽपि स्वतोव्यावृत्तजातिवदुपलक्ष्यत्वसम्भवात्। अतएव न सप्रकारकत्वापत्तिः; काकवदित्यत्राप्युपलक्षणस्याप्रकारत्वात्, किंतु स्वरूपातिरिक्तधर्मस्य तत्रोपलक्षणत्वेन सप्रकारकत्वम्, इह तु तन्नेति वैषम्यम्। नचोपलक्षणवैयर्थ्यम्; अनर्थनिवृत्तिहेतुत्वेन द्वितीयाभावद्वारकस्वरूपज्ञानस्योद्देश्यत्वात्, तस्य प्रागसिद्धत्वात्। न च मिथ्यात्वासिद्ध्यचेष्टापत्तिः; अवान्तर-

---

उत्तृणत्वादेः। **स्वतो व्यावृत्तेति**। घट इत्यादिज्ञाने इतराविशेषिताखण्डरूपेण भातघटत्वादीत्यर्थः। **उपलक्ष्यत्वसम्भवात्** सद्वितीयात्मकत्वधीविरोधिविषयतासम्भवात्। तथाच व्यावृत्ताकारता हि द्वेधेत्यादिना द्वितीयाभाववत्त्वाद्युपस्थितिद्वारकस्य निष्प्रकारकज्ञानस्यापि सद्वितीयात्मकत्वादिधीविरोधित्वेन व्यवस्थापितत्वात्, प्रकृते अखण्डार्थकत्वमव्याहतमिति भावः। **इह त्विति**। स्वरूपनिर्विकल्पकस्यैव सद्वितीयात्मकत्वधीविरोधितया तज्जननद्वारा द्वितीयाभावज्ञानस्य सद्वितीयव्यावर्तकत्वस्य पर्यवसन्नत्वेनाद्वितीयत्वे उपलक्षणत्वस्य सम्भवादिति शेषः। **अनर्थेति**। सद्वितीयत्वज्ञानेत्यर्थः। **द्वितीयाभावद्वारकेति**। द्वितीयाभाववत्त्वेन ब्रह्मोपस्थितिद्वारकलक्षणाज्ञानाधीनेत्यर्थः। **अवान्तरेति**। उक्तं हि शारीरकसंक्षेपे—

सामानाधिकरण्यमत्र भवति प्राथम्यभागान्वयः
पश्चादेव विशेषणेतरतया पश्चाद्विरोधोद्भवाः[1]।
उत्पन्ने च विरोध एकरसके वस्तुन्यखण्डात्मके
वृत्तिर्लक्षणया भवत्ययमिह ज्ञेयः क्रमः सूरिभिः॥

---

[1] भवात्–ग.

SGDF
Sri Garib Dass Oriental Digital Foundation

सामानाधिकरण्यमत्र पदयोर्ज्ञेयं तदीयार्थयोः
संबन्धस्तु विशेषणेतरतया ताभ्यां सहास्यात्मनः ।
सम्बन्धोऽप्यथ लक्ष्यलक्षणतया विज्ञेय एवं बुधै-
रेतान्यर्थपदानि बुद्धिपदवीमारोहणीयानि तु ॥ इति ॥

अत्र पदार्थानां विशिष्टानामभेदबोधोत्तरं विरोधस्फूर्त्या लक्षणाज्ञानेनाखण्डार्थबोधस्योक्तत्वादद्वितीयाभेदेन ब्रह्मणो बोधेऽवान्तरवाक्यतात्पर्यम्[1] । अथवाऽद्वितीयत्वेनाद्वितीयपदाद्ब्रह्मोपस्थितिर्लक्षणाज्ञानाऽपूर्वमवश्यमपेक्षिता । तथाचावान्तरवाक्यार्थानुभवरूपायां तस्यामेवावान्तरतात्पर्यस्वीकारेण ब्रह्मणि[2] द्वितीयाभावानुभवसम्भवेन मिथ्यात्वसिद्धिः । एतेन प्रथम[3]पदयोरेकार्थकत्वं समानविभक्तिकसाकांक्षत्वादिमत्पदयोर्भिन्नार्थत्वासम्भवादित्यधिकारिणानुसन्धीयते, पश्चात्तदर्थयोरत्यन्ताभेदः, अन्यथोक्तैकार्थ्यासम्भवादित्यनुसन्धीयते, पश्चाद्विरोधादिकमित्युक्तश्लोकयोरभिप्रेतार्थ इत्याचार्यैरपि व्याख्यानात् । तत्र पदार्थत्वेन शक्यलक्ष्यसाधारण्येन[4] पदार्थयोरभेद इति प्रतिसन्धानस्योक्तत्वादुक्तप्रतिसन्धानस्य तर्करूपत्वाच्च पदार्थतावच्छेदकरूपेण पदार्थयोरभेदप्रमायां कथमवान्तरतात्पर्योक्तिरित्यपास्तम् ; सत्यज्ञानादिरूढपदार्थानां संसर्गप्रमायाः पूर्वमनङ्गीकारेऽप्यद्वितीयादियौगिकपदार्थप्रमाया आवश्यकत्वात्, अवान्तरवाक्यार्थबोधं विना महावाक्यार्थबोधासम्भवात् । अन्यथा ब्रह्मणि सद्वितीयत्वादिसंशयानिवृत्तावद्वितीयादिपदार्थधीपूर्वकवाक्यार्थबोधे संशयत्वस्यौचित्यावर्जितत्वेन निश्चयत्वासम्भवात्, तर्करूपाद्वितीयत्वज्ञानस्यानिश्चयत्वात्तत्तत्पदमुख्यार्थतावच्छेदकरूपेण निश्चयं विना तद्विशिष्टसम्बन्धरूपलक्षणा[5]ज्ञानासम्भवादुक्तप्रतिसन्धानस्यार्थापत्त्यादिरूपत्वसम्भ-

---

[1] न्तरतात्पर्यम्—क. ख. [2] णाब्रह्मणि—क. [3] सिद्धिरेव । तेन प्रथमं—ग. [4] साधारणेन—क. खं. [5] लक्षण—ख.

SGDF
Sri Gargeshwari Digital Foundation

तात्पर्यस्य तत्रापि सत्त्वात्, तद्द्वारैव स्वरूपचैतन्ये महातात्पर्यात्। अतएव श्रुतिबोध्यस्य विशेषणस्योपलक्षणस्य वा द्वितीयाभावस्य सत्वेऽद्वैतहानिः, असत्वे चादण्डे दण्डीति वाक्यवत् काकहीने काकवदिति वाक्यवच्चाद्वैतवाक्यस्यातत्वावेदकत्वापत्तिरिति — निरस्तम्; आद्ये द्वितीयाभावसत्वेन द्वितीयाभावासिद्ध्यापादनस्यानुचितत्वात्, अभावस्याधिकरणातिरेकानभ्युपगमाच्च। द्वितीये तु सृष्टयादिवाक्यवदुपलक्ष्यस्वरूपसत्यत्वमादाय तत्वावेदकत्वात् मुख्यतात्पर्यविषयस्यासत्यतायामेवातत्त्वावेदकत्वाभ्युपगमात्। अतएव महातात्पर्याभिप्रायेण चैतन्यमात्रे तात्पर्यमित्याद्यपक्षेऽपि न दोषः; अवान्तरतात्पर्येण मिथ्यात्वासिद्धेरपि स्वीकारेणेष्टापत्तेरप्यसम्भवात्। ननु—द्वितीयाभावे महातात्पर्याभावः किं

वेन शाब्दत्वानङ्गीकारेऽपि क्षतिविरहाच्च, धूमोऽस्तीत्यादिवाक्यस्य वन्ह्यनुमिताविवाद्वितीयत्वादि[1]वाक्यस्योक्तार्थापत्त्यादौ तात्पर्यसम्भवाच्च, तदिदमुक्तम्—**तद्द्वारैवेति**। अद्वितीयत्वेन ब्रह्मधीरूपमिथ्यात्वासिद्धितात्पर्यद्वारैवेत्यर्थः। **सत्वे** तात्विकत्वे। **द्वितीयाभावासिद्धीति**। द्वितीयाभावरूपाद्वैतब्रह्महानीत्यर्थः। **मुख्यत इत्यादि**। अमुख्यतात्पर्यविषयेष्वतत्वावेदकत्वेऽपि मुख्यतात्पर्यविषये तत्वावेदकत्वमित्यर्थः॥

यत्तु अवान्तरतात्पर्यं तत्रैवाङ्गीक्रियते यत्र तद्विषयघटितो म[2]हावाक्यार्थः; द्वितीयाभावादिस्तु नाखण्डमहावाक्यार्थघटक इति, तत्र न तदिति—तन्न; भूतार्थवादानां स्तुतिद्वारभूतदेवताविग्रहादौ धूमोऽस्तीत्यादेर्वन्ह्यनुमित्यादिद्वारभूतधूमास्तित्वादाविव महातात्पर्यविषयाघटकेऽप्यवान्तरतात्पर्यसम्भवात्। न च—द्वितीयाभावद्वारकमेव स्वरूपज्ञानमनर्थनिवर्तकमिति न युक्तम्; न हि द्वारविशेषाजन्यः

---

[1] तीयादि--क. [2] टितम–ग.

SGDF
Sri Gangeshwari Digital Foundation

प्रमाणान्तरप्राप्तया, यथा वायुक्षेपिष्ठत्वादौ, उत तद्विरोधित्वेन; यथा आत्मवपोत्खननादौ, उतोद्देश्यविशेषणत्वादिना; यथा ग्रहैक

शुक्तिसाक्षात्कारो न रूप्यभ्रमानिवर्तक इति--वाच्यम्; श्रवणाद्यजन्यस्यापातज्ञानस्याद्वितीयत्वादिपरामर्शशून्यस्य वा द्वितीयत्वाद्युपलक्षितस्वरूपज्ञानस्याप्रमात्वेनाशङ्क्यमानत्वादनिश्चयेन[1] सद्वितीयत्वादिभ्रमानिवर्तकत्वात्, परैरप्यद्वितीयत्वादिनिश्चयस्योक्तभ्रमानिवृत्तिप्रयोजकत्वाङ्गीकारात्। अखण्डवाक्यार्थानुकूलत्वेन महातात्पर्यस्य परं तत्रायुक्तत्वात्। अतएव दूरस्थसन्निकर्षादिजन्यः शुक्त्यादिसाक्षात्कारो न भ्रमनिवर्तकः; सद्वितीयत्वादिभ्रमानिवृत्तौ च विरुद्धधर्मयोगेन जीवब्रह्मणोरैक्यानिर्णय इति तन्निवृत्त्यावश्यकत्वादिति ध्येयम्॥

तद्विरोधेन प्रमाणान्तरविरोधेन। **क्षेपिष्टत्वेति**। क्षिप्रकारित्वेत्यर्थः। **वपोत्खननादौ** शरीरान्तरस्थद्रव्यविशेषरूपवपानिष्कासनादौ। उक्तं ह्यर्थवादाधिकरणे—वायुर्वै क्षेपिष्ठेत्यादेः, स प्रजापतिरात्मनो वपामुदखिददित्यादेश्च, न स्वार्थता[2]त्पर्यमिति। **ग्रहैकत्वादाविति**। ज्योतिष्टोमे श्रुते "दशापवित्रेण ग्रहं सम्मार्ष्टि" इत्यादौ ग्रहैकत्वादि विवक्षितं न वेति संशये, श्रुतस्याविवक्षाबीजाभाद्विवक्षितमिति प्राप्ते ग्रहस्य कर्मत्वादपूर्वसाधनत्वेन तमुद्दिश्य सम्मार्गरूपसंस्कारविधानात् प्रतिप्रधानं संस्कारावगमात्सर्वे ग्रहाः सम्मार्जनीयाः। यदि हि यागे पशुरिव सम्मार्गे ग्रहो गुणः स्यात्तदा प्रयोजनाभावात्प्रतिगुणं न प्रधानमावर्तनीयमिति सङ्ख्यापेक्षायां पश्वेकत्ववद्ग्रहैकत्वं विवक्षेत। प्रयोजनानुरोधेन तु प्रतिग्रहं गुणीभूतसम्मार्गावृत्तिसिद्धौ न परिच्छेदकत्वेन सङ्ख्यापेक्षेति नानाकांक्षितमुद्देश्यविशेषणसंख्यादि विवाक्षितम्। किंचैकेत्वादेरुद्देश्ये विधेये वा निवेशः। नाद्यः; ग्रहमेकत्वं चोद्दिश्य

[1] दनिश्चयत्वेन—क. ख. [2] स्वार्थे ता—ग.

SGDF
Sri Gargeshwari Digital Foundation

त्वादौ, नाद्यः; त्वयैव द्वितीयभावस्य प्रमाणान्तरप्राप्त्यनभ्युपगमात् । द्वितीयेऽपि विरोधिमानं न तावत्प्रत्यक्षादि द्वैतग्राहि; त्वन्मते तस्यैव श्रुतिबाध्यत्वात्; नाद्वैतवाक्यान्तरम्; तस्यात्ममात्रपरत्वे द्वितीयाभावाविरोधित्वात्, न हि विशेष्यविषयं 'अग्निहोत्रं जुहोति' इति वाक्यं विशि विषयेण 'दध्ना जुहोति' इति वाक्येन विरुध्यते, द्वैताभावपरत्वे त्वेकविषयत्वेन सुतरामविरोधात् । नापि तृतीयः 'ग्रहं सम्मार्ष्टि' इत्यत्र सम्मार्जनस्यैवाखण्डार्थपरे वाक्ये विधेयान्तरस्याभावेन विशे-

---

सम्मार्गविधौ प्रत्युद्देश्यं वाक्यसमाप्त्या वाक्यभेदापत्तेः, प्रत्येकं ग्रहाणामेकत्वात्सम्मार्गवारणालाभाच्च । अतएवैकत्वविशिष्टग्रहोद्देशेनापि न सम्मार्गविधिः; युगपत्सङ्ख्याकारके विभक्त्या बोध्येते न तु सङ्ख्यां बोधयित्वा तद्विशिष्टस्य कर्मत्वादिकारकम् । नान्त्यः; एकत्वसम्मार्गयोर्विधाने वाक्यभेदात्सर्वग्रहेषु सम्मार्गस्य वारयितुमशक्यत्वात्सम्मार्गस्य विधेयत्वेन एकत्वोद्देश्यग्रहे विशे[1]णत्वायोगात् । समानश्रुत्युपात्तयोः सङ्ख्याकारकयोर्मिथ एवान्वयान्नामार्थे सङ्ख्यान्वयासम्भवात् । तस्मात्साधुत्वार्थमेकवचनमिति तृतीयप्रथमे स्थितम् । तथाच तद्वदुद्देश्यविशेषणत्वाद्द्वितीयाभावो न विवक्षित इत्यर्थः । यतु—ग्रहैकत्वदृष्टान्तेनाद्वितयित्वस्य वाक्यार्थाप्रवेशेऽ[2]पि ग्रहैकत्वस्येव तस्याबाधितप्रतीतिर्दुर्वारेति—तत्तुच्छम्; तात्पर्यविषयवाक्यार्थप्रविष्टेऽर्थे शब्दस्याप्रमाणत्वेन प्रतीयमानस्याप्यद्वितीयत्वस्य द्वितीयत्वेन तत्प्रतीतेर्बाधसम्भवात् । अखण्डार्थबोधे सामग्र्यभावे[3]नाद्वितीयत्वभानासम्भराच्च । त्वयेति । अद्वैतश्रुतेरननुवादित्ववादिनेत्यादिः । विशिष्टविषयेणेति । होममुद्दिश्य

---

[1] ग्रहविशे–ग. [2] वाक्यार्थप्रवेशे–ख. [3] सामग्र्यसत्वेना–ग.

SGDF
Sri Gargeshwari Digital Foundation

ष्यस्य शास्त्रगम्यस्य चिन्मात्रस्याप्राप्तत्वेनोद्देश्यत्वायोगाच्च द्वितीयाभावस्योद्देश्यविशेषणत्वानुपपत्तेः, अविवक्षाहेतोरनुवाद्यत्वस्याप्यभावाच्चेति—चेन्न; स्वयमेव स्वबोधितमपि द्वितीयाभावं द्वितीयत्वादेव निषेधतीति स्वविरोधादेव श्रुतेस्तत्रातात्पर्यात्। मानविरोधित्वमात्रस्य तात्पर्याभावे प्रयोजकत्वात्स्वविरोधेऽपि न क्षतिः। नन्वेकेनैव प्रमाणेनैकस्य प्राप्तिनिषेधावनुपपन्नौ, न; रूपभेदेनाविरोधात्। द्वितीयाभावस्वरूपं हि शास्त्रेण प्राप्यते।

दर्धिविधायकेनेत्यर्थः। न क्षतिः। न मान[1]विरोधक्षतिः। तथाच वपोत्खननादिवाक्यवदद्वैतवाक्यम्, न त्वमुख्यार्थमहा[2]तात्पर्यकमिति भावः। अनुपपन्नाविति। ग्रहणाग्रहणवाक्याभ्यामेकस्य विधिनिषेधसत्त्वेऽपि[3] नैकेन तत्सत्त्वम्, निषेधवाक्येन निषेधस्य विधिर्निषेध्यस्य निषेधश्चेत्यङ्गीकारेऽपि नैकस्य तेन विधिनिषेधौ। एकस्यैकेन विधाने निषेधे च वाच्ये क्रमेण तयोरङ्गीकारे विरम्यव्यापारापत्तिः, युगपदङ्गीकारे विधेयस्य निषेधार्थमनुवादायोगोऽनुवादस्य प्राप्तिपूर्वकत्वात्। सकृदुच्चरितस्योभयतात्पर्यासम्भवात्। आवृत्तिकल्पने वाक्यभेदापत्तिश्च। किंचैकस्य विधिनिषेधयोः स्वतन्त्रतात्पर्याभावे तयोर्वैय्यर्थ्यम्। न हि निषेधार्थमेव कचित्किंचिद्विधीयत इति दृष्टमिति भावः। रूपभेदेनेति। भूतार्थवादादीनां देवताविग्रहादि विधाय तद्द्वारा स्तुत्यादितात्पर्याङ्गीकारात् स्वतन्त्रतात्पर्यभेद एव विरम्यव्यापारादेर्दोषत्वम्। स्वतन्त्रतात्पर्याभावेऽपि प्रकृते विधिनिषेधावेकस्य न व्यर्थौ; एकरूपेण विधिनिषेधस्थल एव हि तथा, तत्र हि विधेयस्यैव निषेधो निषेधार्थमेव विधानम्; प्रकृते तु द्वितीयमात्रस्य निषेधो द्वितीयाभावमात्रस्य विधेयतेति। तद्विधानं विनाखण्डार्थविषयकनिषेधवाक्यार्थासिद्धेरुक्तत्वान्न तयोर्वैय्यर्थ्यमिति भावः॥

---

[1] न क्षति मान—ख. [2] त्वमुख्यार्थ महा—क. ग. [3] निषेधासत्वेऽपि—ग.

SGDF
Sri Gargeshwari Digital Foundation

तस्य च प्राप्यतावच्छेदकरूपं द्वितीयाभावत्वम्; तच्च न निषेध्यतावच्छेदकम्, किंतु द्वितीयत्वमेव निषेध्यमात्रानुगतम्। तत्र तदनभ्युपगमे तु न तस्य निषेध्यत्वम्, न वा तेनात्मनः सद्वितीयत्वापत्तिरिति न कोऽपि दोषः। यत्र तु प्राप्यतावच्छेदकमेव निषेध्यतावच्छेदकम्, तत्र प्राप्तिनिषेधशास्त्रयोरतुल्यविषयत्वेऽपि विशेषशास्त्रविषयपरित्यागेन सामान्यशास्त्रप्रवृत्तिः, तुल्यविषयत्वे त्वगत्या विकल्प इति न निषेधस्यासङ्कोचेन प्रवृत्तिः; यथा 'न हिंस्यात्सर्वा भूतानि' इति निषेधशास्त्रस्य 'अग्नीषोमीयं पशुमालभेत' इत्यादिप्राप्तिशास्त्रविषयेतरविषयत्वम्' 'अतिरात्रे षोडशिनं गृह्णाति' 'नातिरात्रे षोडशिनं गृह्णाती' इत्यादिप्राप्तिनिषेधशास्त्रयोस्तु विकल्पेनैकविषयत्वम्; एकस्यैव

निषेध्यमात्रेति। द्वितीयाभावादिसर्वनिषेध्येत्यर्थः। ननु—द्वितीयाभावस्य ब्रह्मरूपतापक्षे द्वितीयत्वं न तदनुगतमिति कथं तेन तन्निषेधस्तत्राह—**तत्र तदनभ्युपगम इति**। द्वितीयाभावे द्वितीयत्वानङ्गीकार इत्यर्थः। ननु—यथा न हिंस्यादित्यस्य विहितेतरहिंसानिषेधकत्वम्, यथा वा ग्रहणाग्रहणवाक्ययोः स्वार्थे स्वतन्त्रतात्पर्यग्रहणम्,[1] तथाद्वैतवाक्यं स्वविहितादद्वितीयत्वादन्यस्यैव द्वितीयस्य निषेधकम्, द्वितीयाभावविधाने द्वितीयनिषेधे च स्वतन्त्रतात्पर्यकं किं न स्यात्तत्राह **यत्र त्विति**। **अतुल्यविषयत्वे** सामान्यविशेषभावाद्यापन्नविषत्वे। **तुल्यविषयत्वे** सामान्यविशेषभावाद्यनापन्नविषयत्वे॥

अगत्या विकल्प इति। अतिरात्रे ग्रहणाग्रहणवाक्ययोर्दशमाष्टमे चिन्तितम्। विधिप्रतिषेधयोर्विरोधान्नातिरात्रेत्यादि पर्युदास इति प्राप्ते, अतिरात्रभिन्ने षोडशिनं गृह्णातीत्यस्य षोडशिभिन्नमतिरात्रे गृह्णातीत्यस्य वा

---

[1] स्वतन्त्रतात्पर्यं—ग.

SGDF Sri Gargeshwari Digital Foundation

हिंसात्वस्य षोडाशिग्रहत्वस्य च प्राप्तिनिषेधयोरवच्छेदकत्वात्, तत्र निषेधशास्त्रस्याऽसङ्कुचद्वृत्तित्वे प्राप्तिशास्त्रस्य सर्वात्मना

पर्युदासस्य स्वीकारे पर्युदस्तत्वादननुष्ठेयत्वस्य विहितत्वादनुष्ठेयत्वस्य च सिद्ध्या विकल्पापरिहारान्न पर्युदासोऽर्थः, लक्षणायां मानाभावात्, किंतु प्रतिषेधः। तत्र यद्यपि 'नानृतं वदेत्' इत्यादावनृतवदनादेरिव षोडशिग्रहणादेः क्रतुवैगुण्यजनकत्वं न निषेधवाक्येनाक्षिप्यते; 'समिधो यजती'त्यादिनेव 'षोडशिनं गृह्णाती'त्यादिना विधिना तस्य क्रतुसाद्गुण्यजनकत्वाक्षेपेण विरोधात्, तथापि षोडशिग्रहणाद्यभावेऽपीतराङ्गैः क्रतुसाद्गुण्यमित्येवाक्षिप्यते। ग्रहणस्य च फलभूमप्रयोजकत्वकल्पनान्न तत्र प्रवृत्त्यनुपपत्तिः। यद्यपि च—

"प्रमाणत्वाप्रमाणत्वपरित्यागप्रकल्पनात्।
तदुज्जीवनहानाभ्यां विकल्पेष्वष्टदोषता"॥

व्रीह्यादिप्रयोगे यवादिशास्त्रे प्रतीतप्रामाण्यत्यागः, निर्दोषत्वे प्रामाण्यबीजे सत्यप्यप्रामाण्यकल्पनम्, यवादिप्रयोगे च तच्छास्त्रे त्यक्तस्वीकृतयोः[1] प्रामाण्याप्रामाण्ययोः स्वीकारत्यागाविति, यवादिशास्त्रे दोषचतुष्टयम्। एवं यवादिप्रयोगे व्रीह्यादिशास्त्रे प्रतीतप्रामाण्यत्यागोऽप्रामाण्यकल्पनं च व्रीहिप्रयोगे[2] तच्छास्त्रे तयोः प्रामाण्याप्रामाण्ययोः स्वीकारत्यागावित्यष्टदोषतेत्यर्थः, तथाप्यगत्या सा स्वीक्रियते। तदुक्तं वार्तिके—

"एवमेकत्र चत्वारो दोषा वाक्ये प्रदर्शिताः।
त एव च प्रसज्येरन् द्वितीयेऽपि प्रकल्पिते॥"
"एवमेषोऽष्टदोषोऽपि यद्व्रीहियवशास्त्रयोः।
विकल्प आश्रितस्तत्र गतिरन्या न विद्यते॥" इति॥

---

[1] त्यक्तेत्युक्तस्वीकृतयोः—ख. ग. [2] पूर्वव्रीहिप्रयोगे—ग.

SGDF
Sri Gargeshwari Digital Foundation

वैय्यर्थ्यापत्तिः; प्रकृते च द्वितीयत्वेन रूपेण निषेधस्यैव शास्त्रार्थत्वात् न कस्यापि वैयर्थ्याशङ्का। अतएव द्वितीयाभावनिषेधे पुनर्द्वितीयोन्मज्जनापत्तिरिति–निरस्तम्। उपपादितमेतन्मिथ्यात्वमिथ्यात्वसाधने। यथा प्रतियोग्यभावयोर्निषेध्यतावच्छेदकैक्ये नैकनिषेधेऽपरसत्त्वापत्तिरिति। न च स्वेनैव निषिद्धस्य द्वितीया-

---

शास्त्रार्थत्वात् शास्त्रीयस्वतन्त्रतात्पर्यविषयत्वेन निर्णीतत्वात्। यत्र विहिते निषेधे च वाक्यस्य स्वतन्त्रतात्पर्यं निर्णीतम्, तत्रान्यथानुपपत्त्या विहितेतरस्य निषेधे तात्पर्यं कल्प्यते। प्रकृते तु विहिते तन्न तथा; किंतु निषेधे इत्यसङ्कोचेनैव तत्र तत्। न च—द्वितीयाभावस्यापि निषेधे निषेधस्वरूपासिद्धिरिति––वाच्यम्। द्वितीयसामान्यवैशिष्ट्यधीविरोधिबुद्धावेव हि महातात्पर्यमद्वैतवाक्यस्य कल्प्यते। 'द्वितीयाद्वै भयं भवति, स मृत्युमाप्नोति, य इह नानेव पश्यति, इति निन्दार्थवादात्। उक्तविरोधित्वं च चिन्मात्रबुद्धेरपि, उपलक्षणविधया द्वितीयाभावरूप[1]व्यावृत्ताकारत्वात्। तथा च निषेधत्वविशिष्टे महातात्पर्याभावात्तस्य तात्विकत्वेनासिद्धिर्न दोषः। एवमेकरूपेण विधिनिषेधस्थले विधिवैय्यर्थ्यानुरोधेन निषेधसङ्कोचेन विहिते स्वतन्त्रतात्पर्यकल्पनेऽपि प्रकृते निषेधशेषतया द्वितीयाभावविधायकस्याप्यद्वैतवाक्यस्य निषेधमहा[2]तात्पर्यकत्वेनावैय्यर्थ्यान्न विधेये स्वतन्त्रतात्पर्यम्, प्रयोजनाभावात्। उक्तविरोधिधीरूपशेषविघातापत्तेर्वाक्यभेदापत्तेश्चेति भावः। **अतएव** द्वितीयत्वेन द्वितीयसामान्यनिषेधादेव। **निरस्तमिति।** द्वितीयाभावस्य तत्वेन निषेध एव द्वितीयोन्मज्जनं स च प्रकृते नास्तीति तदनापत्तिरिति भावः। **निषिद्धस्य**—निषिध्यमानस्य।

---

[1] स्वरूप–ग.　　[2] निषेधे महा–ग.

SGDF
Sri Gargeshwari Digital Foundation

भावस्य द्वितीयस्यैव विशेषणत्वेनोपलक्षणत्वेन वा पुनरुपादानं न युक्तमिति—वाच्यम् । अभावबुद्धौ निषिद्धस्यापि प्रतियोगिनः 'सा शुक्ति' रित्यत्र प्रतिषिद्धस्यापि पूर्वप्रतीतरजतस्योपलक्षणतयोपादानदर्शनात्, असङ्कीर्णज्ञानप्रयोजकत्वस्य

उपादानम्—निषेधकप्रमाणं न विषयीकरणम् । **प्रतियोगिन** इत्युपलक्षणतयोपादानदर्शनादित्यत्रान्वेति । **उपलक्षणतया**—अभावविशेष्यानन्वितया । ज्ञानान्तरोपात्तं स्वाविषय[1]काधिष्ठानबुद्ध्युपकारकं सुसदृशं दृष्टान्तमाह—**सेत्यादि** । प्रसिद्धस्यापि पूर्वप्रतीतरजतस्य सा शुक्तिरित्यत्रोपलक्षणतयेत्यन्वयः । यतः पूर्वप्रतीतमतः प्रसिद्धं तत्पदबोध्यत्वरूपयोग्यतारूपं प्राप्तस्य रजतस्य स्वोपलक्षितशुक्तिस्वरूपमिदंत्वेन लक्षणयोपस्थाप्य सा शुक्तिरिति वाक्यजन्यबुद्ध्युपकारकत्वं दृष्टमित्यर्थः । ननु—प्रतियोग्युपादानं विनाभावविशेषस्य रजतोपादानं विना धर्मिविशेषस्य चालाभात्तद्युक्तम्; निषेधबुद्धिं तु विघटयत्प्रतियोग्युपादानमेवायुक्तं निषेधकप्रमाणस्येत्यत आह—**असङ्कीर्णेति** । व्यावृत्ताकारकेत्यर्थः । प्रकृतेऽपि द्वितीयाभावत्वेनोपादानं निषेध[2]बुद्धेर्विघटकमित्युक्तम् । अतस्तदुपकारकत्वेन तदुपादानमपि न दोषः । यत्तु—अभावबुद्धावभावांशे घटादिः प्रतियोगी नोपलक्षणम्, किंतु घटादिप्रतियोगिकत्वं प्रकार इति—तत्तुच्छम्; घटत्वाद्यवच्छिन्नप्रतियोगिताकत्वसम्बन्धेन घटादेरभावांशे प्रकारत्वस्यानुभाविकत्वात् । घटो नास्तीत्यादिशब्दजन्यबुद्धावन्वयितावच्छेदकावच्छिन्नप्रतियोगिताकत्व-सम्बन्धे भाना[3]वश्यकत्वात्, लाघवेन तादृशबुद्धेरेव प्रतिबन्धकत्वात्, त्वदुक्तविषयकत्वे तस्या घटवत्तादिबुद्ध्यविरोधित्वापत्तेश्च ॥

---

[1] स्वविषय–क. [2] न निषेध–क.ग. [3] संबन्धभाना–ख. मानावश्य–क.

SGDF Sri Gargeshwari Digital Foundation

प्रकृतेऽपि तुल्यत्वात्। तस्मात् 'एकमेवाद्वितीय' मित्यादि-श्रुतिर्विश्वमिथ्यात्वे प्रमाणमिति सिद्धम् ॥

इत्यद्वैतसिद्धौ मिथ्यात्वश्रुत्युपपत्तिः ॥

ननु—द्वितीयाभावे स्वतन्त्रतात्पर्यमेव ; उपक्रमोपसंहारयोरुक्तत्वेन सुषुप्तौ फलवत्त्वदर्शनेन चानन्यशेषत्वेनावान्तरतात्पर्यासम्भवात्, अन्यथा द्वितीयाभावस्य व्यावहारिकत्वे तद्बोधकश्रुत्या व्यावहारिकद्वैत-ग्राहिप्रत्यक्षादिबाधासम्भवाच्चेत्यत आह—**तस्मादिति**। द्वितीयत्वेन द्वितीयाभावस्य स्वतन्त्रतात्पर्यायोग्यत्वादित्यर्थः। 'स मृत्युमाप्नोति य इह नानेव पश्यति, 'द्वितीयाद्वै भय' मित्यादिश्रुतिभिर्द्वितीयत्व-सामान्यनिन्दया तद्धीविरोध्यखण्डबुद्धावेवोपक्रमादिनिष्ठा न द्वितीया-भावबुद्धौ। 'तमादेशमप्राक्ष्यो येनाश्रुतं[1] कस्मिन्नु भगवो विज्ञाते सर्वमिदं विज्ञातम्' इत्याद्युपक्रमायाः, "तत्सत्यं स आत्मा तत्त्वमसि, येनाक्षरं पुरुषं वेद सत्यं प्रोवाच तां तत्वतो ब्रह्मविद्याम्, इत्युपसंहारायाः श्रुतेर्जगदुपादानाखण्डब्रह्मण्येव प्रवृत्तत्वात्। यद्यपि कष्टं कर्मे, त्यनु-भवाद्दुःखोपधायकजाग्रत्स्वप्नव्यापारसामान्याभावस्य दुःखाभावरूपव्यञ्जकयोगेन लोके सुखमस्वाप्समिति स्मृतिमूलानुभवेन 'सुषुप्तिकाले सकले विलीने तमोभिभूतः सुखरूपमेति, इत्यादिश्रुत्या "सुखमस्यात्मनो रूपं सर्वेहोपवतिस्तनु" रित्यादिस्मृत्या च साक्षिसुखयोगोल्लेखः, तथापि न द्वितीयाभावो निरतिशयसुखयुक्तः; आविद्यकत्वेन दुःख-बीजाविद्यायुक्तत्वात् "प्रेयोऽन्यस्मात्सर्वस्मादेष एव परम आनन्द" इत्यादिश्रुत्या शुद्धात्मन एवोक्तसुखत्वाच्चेति शुद्धात्मैव स्वातन्त्र्येण

---

[1] येनाश्रुतं श्रुतम्–ग.

SGDF
Sri Gargeshwari Digital Foundation

अथ अद्वैतश्रुतेर्बाधोद्धारः

नन्वापातप्रतिपन्न एव न तावच्छ्रुत्यर्थः; कश्छन्दसां योगमावेद धीर' इत्यादिश्रुत्या 'बिभेत्यल्पश्रुताद्वेद' इति स्मृत्या च वेदार्थस्यातिगहनतोक्तेः, मीमांसावैयर्थ्यप्रसङ्गाच्च, किंतु मानान्तरेण पूर्वोत्तरेण चाविरुद्ध एवार्थः; अविरोधग्रहणार्थं च मीमांसासाफल्यम्, अतएव 'आज्यैः स्तुवते' 'आकाशादेव

शास्त्रार्थः, तन्यते व्यज्यतेऽनयेति तनूरात्मरूपसुखव्यञ्जिकेति यावत्। व्यावहारिकोऽप्यभावोऽद्वैत[1]स्यामिथ्यात्वं घटयत्येव, स्वान्यूनसत्ताकाभावस्य तथात्वेनोक्तत्वात्। बाधस्तु तस्याखण्डाधिष्ठानप्रमयैवेति नानुपपत्तिरिति भावः। इत्यादीत्यादिपदान्नेह नानास्तीत्यादिश्रुतयोपि परमतात्पर्येणाखण्डार्थमवान्तरतात्पर्येण द्वैतमिथ्यात्वं बोधयन्तीत्यर्थः॥

तर्कैः सारस्वतै रत्नैश्चन्द्रिकाचन्द्रभूषणैः।
दुरन्तध्वान्तभङ्गाय मिथ्यात्वश्रुतिसङ्गतिः॥

इति मिथ्यात्वश्रुत्युपपत्तिः.

अथ अद्वैतश्रुतेर्बाधोद्धारः

कश्छन्दसामित्यादि। छन्दसां वेदवाक्यानाम्, योगं तात्पर्यम्, धीरोऽपि को वेदेत्यर्थः। छन्दसां गायत्र्यादीनां योगं स्तुतशस्त्रात्मना विनियोगं को वेदेति माधवीयभाष्यव्याख्यानस्यापि वेदतात्पर्यदुर्ज्ञेयत्वे तात्पर्यम्। **अल्पश्रुतात्** अल्पविद्याकात्पुरुषात्। **आज्यैरित्यादि**। आज्यैरित्यादौ घृतादित्यागेन सामपरत्वं पूर्वमीमांसायां चित्राधिकरणे स्थापितम्। **आकाशादित्यादौ** गगनादि-

---

[1] द्वैतस्या–क. ग.

SGDF
Sri Gargeshwari Digital Foundation

समुत्पद्यन्त' इत्यादावापातप्रतीतघृतगगनादिपरित्यागेनाज्या-काशादिपदानां सामपरमात्माद्यर्थत्वं स्थापितं पूर्वोत्तरमीमांस-

---

त्यागेन परमात्मपरत्वमुत्तरमीमांसायामाकाशाधिकरणे स्थापितमित्यर्थः । 'चित्रया यजेत पशुकामः' 'पञ्चदशान्याज्यानि' 'सप्तदशानि पृष्ठानि' 'त्रिवृद्बहिष्पवमान' मित्यादौ चित्राज्यपृष्ठबहिष्पवमान-शब्दानां गुणवाचित्वं कर्मनामत्वं वेति संशये, द्रव्य एव रूढानां कर्मनामत्वासम्भवाद्गुणवाचकत्वमेव; तत्र[1] चित्रापदेन चित्रत्वस्त्रीत्व-योरुक्तेः साहित्येनावगतयोस्तयोः सामर्थ्यात्प्राणिद्रव्यकयागमुद्दिश्य विधानावगमात्प्रकृतानां[2] दधि मधु घृतं पयो धाना उदकं तण्डुलास्त-त्संसृष्टं प्राजापत्यमित्युक्तयागानामुद्देश्यत्वेनाप्यग्नीषोमीयाद्युद्देशेन तयो-र्विधिः, 'धेनुर्दक्षिणे'तिवदुभयविशिष्टकरणत्वविधानान्न वाक्यभेदः; पशुकाम इति तु यागसाधनपशुकामनानुवादः। एवमाज्यपृष्ठे अपि द्रव्ये संख्याविशिष्टे पवनक्रियाविशिष्टं त्रिवृच्छब्दितत्रिभण्डीद्रव्यं च प्रकृतस्तोत्रमुद्दिश्य विधेयम्; तेषां च द्रव्याणां स्तोत्रं प्रत्युपकारकत्वं तद्देशस्थापनेनादृष्टार्थेकेन सामर्थ्यात्, अतः—

नावान्तरक्रियायोगादृते वाक्योपकल्पितात् ।
गुणद्रव्ये कथंभावैर्गृह्णन्ति प्रकृताः[3] क्रियाः ॥

इति वार्तिकोक्त्या न विरोध इति बोध्यम्। 'आज्यैः स्तुवते पृष्ठैः स्तुवते' इत्याद्युत्पत्तिवाक्येषु तु स्तोत्रमात्रं विधीयते; आज्यादिपदं तु गुणवाक्यप्राप्ताज्याद्यनुवाद इति प्राप्ते प्राप्तयागानुवादेन चित्रत्वस्त्रीत्व-रूपानेकविधाने वाक्यभेदात्पशुगतस्य करणत्वस्यापि प्राप्तत्वेन तस्य तदुभयविशिष्टतया विध्यसम्भवात्, 'अजोऽग्नीषोमीय' इत्यनेन

---

[1] गुणवाचित्वम्, कर्मैव तत्र–ग. [2] प्राकृतानां–ग. [3] प्राकृताः–ग.

SGDF
Sri Gargeshwari Digital Foundation

योश्चित्राकाशाद्यधिकरणेषु ; अन्यथा तत्तत्पूर्वपक्षाभ्युपगमापत्तेः,

---

विहितप्राकरणिकपुंस्त्वावरुद्धे स्त्रीत्वविध्ययोगान्न गुणविधिः; किंतु प्राकरणिकानामेव दध्यादियागानां चित्रापदं नामधेयं विचित्रद्रव्यकत्वरूपचित्रत्व[1]रूढम्। इष्टयेति विशेष्याध्याहारात्स्त्रीलिङ्गता। एवमाज्यादिवाक्येष्वपि संख्याद्रव्यादिपदानामसमस्तत्वेन तदर्थानां मिथोऽनन्वयात्, प्राप्तस्तोत्रानुवादेन द्रव्यसंख्याद्यनेकविधाने वाक्यभेदात्, एकविभक्त्यर्थकारके नामार्थद्वयानन्वयेन तद्द्वयविशिष्टकारकविध्ययोगात्, स्तोत्रे आज्यादिद्रव्यस्य करणत्वासम्भवेनोत्पत्तिवाक्ये द्रव्यविशिष्टस्तोत्रविधिमङ्गीकृत्योक्तवाक्ये द्रव्यानुवादेन सङ्ख्याविधेरपि वक्तुमशक्यत्वात्, स्तोत्रदेशस्थापनस्य चाश्रुतत्वात्तद्द्वारकादृष्टार्थत्व[2]कल्पने गौरवात्, स्तुतिगतऋक्सङ्ख्यारूपस्तोमवाचितद्धितान्तस्य पञ्चदशानीत्यादेरनुपपत्तेरुत्पत्तिवाक्यगुणवाक्ययोराज्यादिपदं स्तोत्रनामधेयम्। अतएव 'यदाजिमायंस्तदाज्यस्याज्यत्वं स इन्द्रोऽवेत् अग्निर्वा इदमग्र उद्घोष्यतीति अस्मिन् यज्ञे काष्ठां गच्छत' इत्यर्थवादे यानि स्तोत्राणि काष्ठां कृत्वा यस्माद्देवा आजिं गतास्तानि तस्मादाज्यानीत्यन्वाख्यानमुक्तम्। पञ्चदशानीत्यादिकं सङ्ख्यामात्रविधिरिति प्रथमचतुर्थे स्थितम्॥

आकाशाधिकरणेति। 'आकाश इति होवाच' इति श्रुते
प्रथमत्वात्प्रधानत्वादाकाशं मुख्यमेव नः।
तदानुगुण्येनान्यानि व्याख्येयानीति निश्चयः॥

'अस्य लोकस्य का गति'रिति प्रश्नोत्तररूपे आकाश इत्यत्र गतित्वेन प्रतिपाद्यतया प्राधान्यात्, 'सर्वाणि ह वा एतानि भूतान्याकाशादेव समुत्पद्यन्ते आकाशं प्रत्यस्तं यन्ती'त्यादीनां तु तद्विशेषणतया गुणत्वात्, गुणे त्वन्याय्यकल्पनेति न्यायेन प्रधानानुसारेण गुणो

---

[1] रूपचित्रत्वरूपचित्रत्व—क. [2] र्थकत्व—ग.

SGDF
Sri Gargeshwari Digital Foundation

नेयः; प्रथमावगतत्वेनानुपजातविरोध्याकाशपदस्य भूताकाशो मुख्योऽर्थ इति तदानुगुण्येनोपजातविरोधि चरमप्रतीतं पदान्तरं नेयम्, तस्माद्भूताकाशमेवोद्गीथे सम्पाद्योपास्यं न ब्रह्मेति प्राप्ते ॥

सामानाधिकरण्येन प्रश्नतत्प्रतिवाक्ययोः ।
पौर्वापर्यपरामर्शात्प्रधानत्वेऽपि गौणता ॥

सर्वलोककारणस्य पृष्टत्वात्तदेवाकाशशब्दार्थो न भूताकाशः; तस्य स्वस्मिन्नकारणत्वात् । न चाकाशपदानुसारेण प्रश्नस्थं लोकपदमाकाशकार्यपरमिति—वाच्यम्; अनुपजातविरोधिलोकपदस्य उपजातविरोधिनाकाशपदेनासङ्कोचात् । अपि च सर्वाणि ह वेत्यत्र सर्वपदं सङ्कोच्यम्, एवकारोऽप्यसमञ्जसः, न खल्वाकाशमेव कारणं मूलकारणपरिग्रहे तु ब्रह्मैव मूलकारणमिति स समञ्जसः । एवम् 'आकाश एवैतेभ्यः सर्वेभ्यो ज्यायानाकाशः परायणं स एष परोवरीयानुद्गीथ' इत्यादिकं ब्रह्मण्येव समञ्जसमिति तदेवाकाशशब्दार्थः । यद्यपि शालावत्यादीनां संवादे छान्दोग्ये 'का साम्नो गतिरि'त्यादिप्रकृत्य 'अपां का गतिरित्यसौ लोक इति, न स्वर्गं लोकमतिनयेदि'ति शिलकप्रश्नशालावत्यप्रत्युत्तरोत्तरं अमुष्य लोकस्य का गतिरिति अयं लोक इति अस्य लोकस्य का गतिरिति न प्रतिष्ठां लोकमतिनये'दिति प्रवाहणप्रश्नशालावत्यप्रत्युत्तरे तदुत्तरं 'अन्तवद्वै किल ते शालावत्य सामेति प्रवाहणेनोक्ते 'अस्य लोकस्य का गति'रिति शालावत्येन पृष्टे 'आकाश इति होवाच सर्वाणि ह वा इमानि भूतान्याकाशादेव समुत्पद्यन्ते आकाशं प्रत्यस्तं यन्ति आकाशो ह्येवैतेभ्यः सर्वेभ्यो ज्यायानाकाशः परायणम्' स एष परोवरीयानुद्गीथः स एषोऽनन्तः, परोवरीयो हास्य भवति, परोवरीयसो ह लोकान् जयति, य एतमेवं विद्वान् परोवरीयांसमुद्गीथमुपास्ते' इति श्रुतम्, तत्रातिनयेदित्य-

SGDF
Sri Gargeshwari Digital Foundation

तथाचोक्तं वार्तिककारैः शास्त्रं शब्दविज्ञानादसन्निकृष्टेऽर्थे विज्ञानमित्यत्र—

असन्निकृष्टवाचा च द्वयमत्र जिहासितम्।

स्यातिक्रमेदित्यर्थः। प्रतिष्ठामित्यस्य पृथिवीमित्यर्थः। तथा च स्वर्गलोकस्यान्या गतिर्न मृग्येति तात्पर्यार्थः। एवं चास्य लोकस्येत्यनेन पृथिवीमात्रस्य प्रकृतस्योक्तत्वात्तत्कारणत्वं भूताकाशस्य परम्परया सम्भवत्येव, तथापि प्रवाहणोक्ता[1]वेवास्येति पदं पृथिवीपरम्; न प्रतिष्ठामित्यस्य तदुत्तर एव श्रवणात्, शालावत्योक्तौ त्वस्येति पदं सर्वकार्यपरम्;[2] सर्वनामश्रुतेः सङ्कोचे मानाभावात्, प्रकरणापेक्षया प्राबल्यात्, अन्तवत्त्वदोषापनिनीषया प्रवृत्तयोः प्रश्नोत्तरयोरस्येति पदेन पृथिवीमात्रकारणोक्त्यसम्भवाच्चेति ध्येयम्॥

इत्यत्रेति। शाबरभाष्यवाक्य इति शेषः। 'चोदनालक्षणोऽर्थो धर्म' इति द्वितीयसूत्रोक्तचोदनाशब्दितविधिवाक्यरूपस्य शास्त्रस्यासन्निकृष्टार्थज्ञानजनकविधिवाक्यत्वं शास्त्रत्वमिति भाष्याभिप्रायः। तदुक्तं काशिकाकृता 'प्रत्यक्षवदत्रापि शब्दतज्ज्ञानादिप्रामाण्यं ज्ञातव्यम्; न त्वर्थज्ञानं शास्त्रमित्यभिनिवेष्टव्यम्'। वस्तुतस्तु वृत्तिरूपसाङ्ख्यस्य वृत्त्यवच्छिन्नचैतन्यरूपमौपनिषदस्य संमतं[3] ज्ञानप्रमाणमत्र भाष्याभिप्रेतम्, यद्यपि 'ज्ञानसम्बन्धस्यैकदेशदर्शनादेकदेशान्तरेऽसन्निकृष्टार्थे बुद्धिरनुमानम्' इत्यनुमानलक्षणभाष्यव्याख्यानावसरे वार्तिके असन्निकृष्टवाचेत्यादिकमुक्तम्; न तु शास्त्रलक्षणस्योक्तस्य व्याख्यानावसरे; तथाप्येकशक्तः[4] शब्दार्थोऽन्यत्राप्युक्त एवे[5]त्याशयेन शास्त्रलक्षणे

---

[1] दाल्भ्योक्ता–ग. [2] पदे सर्वकार्यपरे–ग. [3] रूपज्ञानमेव सांख्यमौपनिषदसमंतं–ग. [4] प्येकत्रोक्तः–ग. [5] इवे–क. ग.

SGDF
Sri Gangeshwari Digital Foundation

ताद्रूप्येण परिच्छेदस्तद्विपर्ययतोऽपि च ॥
विषयाविषयौ ज्ञात्वा तेनोत्सर्गापवादयोः ।
बाधाबाधौ विवेक्तव्यौ न तु सामान्यदर्शनात् ॥
अन्य एवैकदेशेन शास्त्रस्यार्थः प्रतीयते ।
अन्यस्तु परिपूर्णेन समस्ताङ्गोपसंहृतौ ॥ इति ॥

उक्तमित्युक्तम् । **ताद्रूप्येणेत्यादि** । येन रूपेण चोदनाबोध्यत्वं तेन रूपेण प्रमितत्वं तद्विपरीतरूपेण प्रमितत्वं च जिहासितमभावविशेषणतया लक्षणे घटकमित्यर्थः । तथाच मानान्तरेणाप्रमितमबाधितं च यत्तद्विषयकविधिवाक्यत्वं विधिवाक्यजन्यं तज्ज्ञानं वा शास्त्रमिति फलितार्थः । धर्माधर्मचोदनानामेव लक्ष्यत्वाद्विधीति । शब्दप्रमाणमात्रस्य लक्ष्यत्वे तु तन्न देयम् । एतदुत्तरवार्तिकेऽप्युक्तम्—

'ताद्रूप्येण परिच्छिन्ने प्रमाणं निष्फलं परम् ।
विपरीतपरिच्छिन्ने नावकाशः परस्य तु' ॥ इति ॥

अथ घटः सन्नित्यादि विशिष्य सत्यताग्राहकं यत्प्रत्यक्षादि तदविषये मिथ्यात्वमद्वैतश्रुतिर्गृह्णातीत्याशयेन स्मृतिपादीयवार्तिकमाह— **विषयेत्यादि** । ननु—द्वैतवाक्यस्य विरुद्धस्योपस्थितेः पूर्वमेवाद्वैतवाक्यं सर्वमिथ्यात्वं बोधयत्वित्याशङ्क्य तथा सति नञ्पदं विहाय निषेध्यस्य कर्तव्यतां निषेधवाक्यं बोधयेदित्युत्तरं हृदि निधाय कर्त्रधिकरणवार्तिकोक्तं वृद्धवाक्यमाह—**अन्य एवेत्यादि** । एकदेशमात्रपर्यालोचनान्न वाक्यार्थनिर्णयः अतिप्रसङ्गादिति भावः । **अङ्गेति** यत्सापेक्षतया वाक्यार्थनिर्णयस्तदित्यर्थः । उक्तं चोक्तवार्तिकात्प्राग्वार्तिके—यदि शास्त्रैकदेशालोचनेन विरुद्धार्थोपगमेन शास्त्रविरोध उद्भाव्यते, तदा 'सुरा न पातव्या' इत्यस्याप्येकदेशेन पानं विहितं कुर्यात्, 'यावज्जीवमग्निहोत्रं जुहोती'ति वाक्यमात्रपर्यालोचनेन दीक्षि-

SGDF
Sri Gangeshwari Digital Foundation

अन्यत्राप्युक्तम्—

विरुद्धवत्प्रतीयन्त आगमा यत्र ये मिथः ।
तत्र दृष्टानुसारेण तेषामर्था विवक्षिताः ॥ इति ॥

तथाच प्रत्यक्षादिविरोधात्पूर्वोत्तराविरोधाच्च नाद्वैतपरत्वमेकमेवेत्यादिवाक्यानामिति—चेन्न ; द्वैतप्रत्यक्षस्य चन्द्रप्रादेशिकत्वप्रत्यक्षवत्सम्भाविताप्रामाण्यतया अद्वैतश्रुतिविरोधित्वाभावात्। यथाच श्रुत्या प्रत्यक्षं बाध्यते, तथा प्रपञ्चितमधस्तात् । किञ्च प्रत्यक्षं नियतविषयम् । श्रुतिः सर्वविषया ! तथाच यत्र प्रत्यक्षेण भेदो न गृहीतः, तत्रैवाभेदश्रुतेरवकाशः । ननु—ययोरैक्यं श्रुत्या बोध्यते तयोर्भेदः प्रसक्तो न वा । नान्त्यः अप्रसक्तप्रतिषेधापातात् । नाद्यः ; प्रसञ्जकप्रमाणविरोधेनैक्यस्य

तोऽप्यजुह्वत्प्रत्यवेयादि 'ति । दृष्टानुसारेण—प्रमाणत्वेन निश्चितमानान्तरानुसारेण । यत्र प्रत्यक्षेणेति । तथाच प्रत्यक्षादिविषयः सर्वोऽपि श्रुतिबाधितः, श्रुतिविषयस्तु सर्वोऽपि न प्रत्यक्षादिबाधित, इति श्रुतिः प्रबला । सामान्यविषयसावकाशविषयत्वादिना श्रुतेर्दुर्बलता तु पूर्वमेव निरस्ता ; सामान्यविशेषन्यायस्य निश्चितप्रामाण्योभयविषयकत्वात्, श्रुतेर्विषयान्तर इव प्रत्यक्षादेरपि स्वविषय एव व्यावहारिकभेदविषकत्वेन सावकाशत्वादित्यादिना । किंच घटपटौ भिन्नाविति ज्ञानेन बाधकत्वाभिमतात्स्वस्माद्बाध्यत्वाभिमतस्य श्रौतैक्य ज्ञानस्य भिन्नत्वेनाग्रहणात्तत्र लब्धपदा 'सर्वं खल्विदं ब्रह्मे'त्याद्यैक्यश्रुतिस्तयोरैक्यं गृह्णाति । एवं चोक्तप्रत्यक्षं स्वाभिन्नस्योक्तैक्यज्ञानस्य न बाधकमिति निर्बाधोक्तश्रुतिः सर्वाद्वैते पर्यवस्यतीत्यादि वक्ष्यमाणं बोध्यम् । आद्यपक्षे प्रसञ्जकं प्रत्यक्षादिमानं श्रुत्या बाध्यत

SGDF
Sri Gargeshwari Digital Foundation

बोधयितुमशक्यत्वादिति—चेन्न ; अन्त्यपक्षाभ्युपगमे दोषाभावात् । अप्रसक्तप्रतिषेध इति च किमप्रसिद्धप्रतियोगिकत्वम्, किं वा निष्प्रयोजनत्वमिति विवेचनीयम् । नाद्यः; अन्यत्र प्रसिद्धस्यैव भेदस्य भेदत्वेनोपस्थितस्य परस्परप्रतियोग्यनुयोगिभावेनान्यत्र निषेधसम्भवात् । न च तत्रैव प्रसिद्धिस्तन्त्रम्; निषेधप्रमामात्रोच्छेदप्रसङ्गात् । न द्वितीयः ; अनर्थनिवृत्तेरेव प्रयोजनत्वात्, 'नान्तरिक्षेऽग्निश्चेतव्य' इत्यादौ स्तुतिमात्रप्रयोजनेनाप्यप्रयोजनेनाप्यप्रसक्तनिषेधदर्शनाच्च । अथ श्रुत्या

इति समाधानसम्भवेऽपि तस्य पूर्वमुक्तत्वादाह—**अन्त्यपक्षेति** । **अन्यत्रेत्यादि** । ययोरैक्यं बोधनीयं तयोरेकतरप्रतियोगिकभेदत्वेन वस्त्वन्तरे प्रसिद्धस्य तयोरन्यतरत्र प्रतिषेध[1]सम्भवादित्यर्थः । **तत्रैव**—निषेधाधिकरण एव । **प्रसिद्धिः** प्रमा । **निषेधप्रमामात्रेति** । न हि यत्रातिरात्रादिव्यक्तौ षोडशिग्रहणादेर्निषेधस्तत्र तत्प्रमास्ति ; विरोधात् । यथा चातिरात्रे भ्रमरूपा प्रसक्तिस्तथा प्रकृतेऽपि संशयरूपा सम्भवतीति तद्बाधेऽपि न प्रमाणबाध इति भावः । अथवा निषेधमात्रं प्रतियोगिप्रसक्त्यभावस्थलीयनिषेधो 'नान्तरिक्षेऽग्निश्चेतव्य' इत्यादिरूपः ॥

. ननु—नान्तरिक्ष इत्याद्यर्थवादस्य 'हिरण्यं निधाय चेतव्य' मिति विहितहिरण्यस्तुतिपरत्वम् ; न निषेधपरत्वम्. तथा च प्रमारूपप्रसक्तेर्निषेधाधिकरणे विरहेऽपि प्रसक्तिमात्रं निषेधस्थलेऽपेक्षितमेव । न च तत्संशयरूपम् ; निश्चयस्यैव कल्पनौचित्यात्, तत्र नातिरात्र इत्यादौ प्रसक्तिबाधेऽपि प्रसञ्जकस्य ग्रहणविध्यादेर्नात्यन्तबाधः, अद्वैतवाक्ये तु प्रसञ्जस्य प्रत्यक्षादेः सर्वात्मना बाध इत्युक्तम्, तत्राह—**नान्तरिक्ष इति** । यद्यपि स्तुतौ लक्षणया तात्पर्यम्, तथापि तदुप-

---

[1] तयोरन्यतरत्वप्रतिषेध–ग.

SGDF
Sri Gargeshwari Digital Foundation

ययोरभेदो बोध्यते तयोरुपस्थितिरास्ति, न वा, नान्त्यः ; अनुपस्थितयोरभेदबोधनायोगात् । आद्ये सा किं श्रुतिजन्या, प्रत्यक्षादिजन्या वा, नाद्यः ; श्रुतेर्मानान्तरागोचराभेदमात्रपरत्वेन घटाद्युपस्थितेस्तज्जन्यत्वाभावेन सर्वाद्वैतासिद्धेः, श्रुतिस्थाकिञ्चनेत्यादिपदानामनुवादकत्वाभ्युपगमात् । द्वितीये तु तयोर्भेदोऽपि प्रत्यक्षादिसिद्ध इति क्वाद्वैतश्रुत्यवकाशः ? मैवम् ; यत् प्रत्यक्षादिना गृह्यते, तद्भेदोऽपि तेन गृह्यत एवेति नियमाभावात् । तथा हि—न तावत्पदार्थस्वरूपज्ञानमेव भेदज्ञानम् ; अभेदभ्रमोच्छेदप्रसङ्गात् । स्वरूपभेदवादिनामपि स्वरूपज्ञानाद्घटत्वादिप्रकारकाद्भेदत्वप्रकारकं भेदज्ञानं विलक्षणमेव ; अन्यथा भेदाग्रहनिबन्धनव्यवहारानुदयप्रसङ्गात् । अतएव स्वरूपज्ञानोत्तरकालमवश्यं भेदज्ञानमित्यपि न ; अनवस्थाप्रसङ्गाच्च । तथाहि—'घटपटौ भिन्नौ जानामी'ति घटपटभेदधीः स्वप्रकाशा वा, अनुव्यवसायसिद्धा वा, साक्षिसिद्धा वा, न स्वप्रतियोगिकभेदविषया ; भेदाधियः प्रतियोगिधीजन्यत्वनियमेन प्रतियोगिधीव्यक्तिभिन्नव्यक्तित्वावश्यकत्वा-

---

पादको वाक्यार्थबोधो वाच्य एव । अतएवार्थवादाधिकरणे 'अन्त्ययोर्यथोक्त'मिति सूत्रे तथोक्तम् । 'गुणवादस्तु' इति सूत्रेण च गौण्या वृत्त्या बाधितार्थकार्थवादानां वाक्यार्थधीः स्तुत्युपपादिकोक्तेति, तत्रैव प्रकृतेऽप्यप्रसक्तप्रतिषेधः । यथाच स्तुतिधीः प्रयोजनम्, तथा प्रकृतेऽपि सर्वाभिन्नब्रह्मबोधस्य भेदभ्रमसंशयसामान्यनिवृत्तिरिति भावः । **न स्वप्रतियोगिकभेदविषयेति** । स्वविषयेषु घटपटतद्भेदेषु[1] ज्ञानान्तरेषु च स्वभेदमनवगाहमानेत्यर्थः । **भिन्नव्यक्तित्वेति** । उत्तरवृत्ति-

---

[1] घटतद्भेदेषु—क.

SGDF
Sri Gargeshwari Digital Foundation

त्स्वस्या एव स्वजन्यत्वानुपपत्तेः। ज्ञानान्तरेण च तद्भेदग्रहे क्वचिद्भेदधीधाराविश्रान्तिरवश्यं वाच्या; अन्यथा सुषुप्ति-विषयान्तरसञ्चारादिकं न स्यात्। अतस्तत्रापि चरमभेदधीरेवो-दाहरणम्। तथाच बाधकत्वाभिमता या घटपटभेदधीः स्वभेदा-विषया भासते, तया सह बाध्यत्वाभिमताया ऐक्यधिय ऐक्यं बोधयित्वा निर्बाधा सती श्रुतिः सर्वाभेदे पर्यवस्यति। न ह्यभेदेऽपि

त्वेत्यर्थः। तेनानुव्यवसायसिद्धत्वादिपक्षयोर्व्यक्तिभेदस्य पराभ्युपगत-त्वेऽपि न क्षतिः। **स्वस्याः**—स्वकीयायाः प्रतियोगिधीपूर्वकालीनायाः प्रतियोगिधीसमानकालीनायाश्च **स्वजन्यत्वानुपपत्तेः** प्रतियोगिधीजन्य-त्वानुपपत्तेः। **उदाहरणमिति**। चरमधीर्यत्र यद्भेदं गाहते ताभ्यां तद्भेदेन च सह तस्या अभेदमद्वैतश्रुतिर्बोधयतीति, सा धीस्तादृशाभेदं गाहितुं नेष्टे। एवं च पूर्वपूर्वधियामपि स्वविषयेण सह भेदासिद्ध्या श्रुतिः सर्वाभेदे पर्यवस्यति। प्रकारान्तरेणापि श्रुतेः सर्वाभेदे पर्यवसानमाह—**तथा चेति**। चरमधिया स्वभेदस्य कुत्राप्यग्रहणे चेत्यर्थः। **न ह्यभेदे इत्यादि**। ययोर्भेदश्चरमधीविषयस्ताभ्यां तद्भेदेन च तस्या अभेदे[1]-बाध्यत्वाभिमतज्ञानेन सह तस्या अभेदे[1] च बाध्यबाधकत्वं न हीत्यर्थः। बाधकस्य स्वविषयेण सह भेदोपमर्दे भेदविशेषविषयकत्व-रूपबाधक[2]तावच्छेदकस्योपमर्दबाध्य[3]बाधकधियोर्भेदोपमर्दे बाध्यधीविष-यस्य बाधकधीविषयभेदोपमर्दात् बाधकधिया न स्वविषयबाधनसम्भवः। उक्तं हि पूर्वबाधकस्य[4] स्वबाध्यविषयकत्वमिति भावः। एतेनाभेदे बाध्यबाधकत्वास्वीकारे ब्रह्मज्ञानं स्वस्वरूपबाधकं न स्यादित्यपास्तम्। स्वविषयबा[5]धकत्वादेरेव प्रकृतग्रन्थार्थत्वात्। न च—द्वैताभाव-

[1] तस्याभे–क. ग. [2] साधक–ग. [3] मर्दः बाध्य–ग. [4] पूर्व बाधक–ग.
[5] याबा–क. ग.

SGDF
Sri Gargeshwari Digital Foundation

बाध्यबाधकभावः; स्वस्यापि स्वबाधकतापत्तेः। तदुक्तं खण्डनकृद्भिः—

'सुदूरधावनश्रान्ता बाधबुद्धिपरम्परा।
निवृत्तावद्वयाम्नायैः पार्ष्णिग्राहैर्विजीयते ॥इति॥

विषयकत्वांशे यथा 'एकमेवाद्वितीयमि'ति श्रुतिः स्वमपि बाधते, तथैक्यविषयकत्वांशेऽपि स्वं बाधतामिति—वाच्यम्; स्वप्रतिपाद्याशेषीभूतविषयाबाधकत्वस्य बाधके स्वीकारात्, द्वितीयाभावस्य स्वप्रतिपाद्याखण्डार्थशेषत्वात्, अद्वैतवाक्यस्य द्वितीयाभावविषयकत्वेऽपि[1] तज्जन्याखण्डाद्वैतज्ञानस्य तदभावात्, बाधकज्ञानस्य स्वविषयाबाधकत्वनियमाक्षतेश्च। अथाद्वैतज्ञानेन द्वैतमपि न बाध्यताम्; द्वैतस्य स्वविषयैक्येन बोधितत्वात्स्वविषयेनाद्वैतेन स्वस्याभेदबोधनेनाद्वैतमपि विषयकत्व[2]रूपस्य बाधकतावच्छेदकस्योपमर्दाच्चेति—चेन्न; स्वोत्पत्तिक्षणे ऐक्यबोधनेऽपि भेदानुपमर्दात्। पश्चादेव तदुपमर्दे सिद्धे च न बाध्यं न वा बाधकमस्तीति बाध्यबाधकभावो मयापि नोच्यते। तव त्वद्वैतज्ञानोत्तरं भेदज्ञानस्य तद्बाधकस्य न स्वीकारः सम्भवति। पूर्वं जातमपि भेदज्ञानं न चरमधीभेदविषयकमिति चरमधीलब्धपदाऽद्वैतश्रुतिर्भेदज्ञानमात्रमाभासीकरोतीति ध्येयम्॥

स्वबाधकतापत्तेः—स्वविषयबाधकतापत्तेः। **सुदूरधावनश्रान्ता**—चरमधीभिन्नज्ञानेषु सुदूरदेशेषु भेदावगाहनरूपं धावनं कृतवत्यपि सुप्तुप्तिलोपाद्यापत्तिरूपश्रान्त्या चरमधीरूपदेशे भेदावगाहनरूपधावनं कर्तुमशक्ता, बाधबुद्धेः—भेदज्ञानस्य परम्परा श्रेणी, निवृत्तौ तस्या अद्वयश्रुतिबाधकत्वायोग्यत्वप्राप्तौ, पार्ष्णिग्राहैः बाधबुद्धिपरम्पराविरोधिविषयकत्वरूपबाधकतावच्छेदकयुक्तैः, अद्वयाऽऽम्नायैः

---

[1] विषयत्वेऽपि—ख. [2] नाद्वैतविषयकत्व—ग.

SGDF
Sri Gargeshwari Digital Foundation

न च—सिद्धान्ते घटतद्धीभेदग्राहिणा स्वप्रकाशेन साक्षिणा स्वस्मिन्नितरभेदस्यापि ग्रहणान्नानवस्था, अन्यथा स्वस्य घटादिभ्योऽभेदसंशयः स्यादिति—वाच्यम्; साक्षिणः स्वप्रकाशत्वेऽपि स्वनिष्ठेतरप्रतियोगिकभेदग्रहे इतरप्रतियोग्युपस्थितिसापेक्षत्वात्। अन्यथा स्वस्यान्तःकरणाद्यभेदभ्रमो न स्यात्। स्वप्रकाशेन भेदाग्रहेऽपि मानान्तरेण भेदग्रहान्न घटाद्यभेदसंशय इति न किञ्चिदेतत्। स्यादेतत्—'घटपटौ भिन्ना'विति प्रत्यक्षं

विजीयते बाध्यते। **इतरप्रतियोगिकभेदेति।** स्वविषयाज्ज्ञानान्तराच्च भेदेत्यर्थः। **इतरप्रतियोगी**—इतरात्मकप्रतियोगी। सप्रतियोगिकत्वेन भेदस्फुरणस्यैवाभेदधीविरोधित्वात्तदेव प्रकृते वाच्यम्, तच्च न सम्भवति, ज्ञानान्तररूपप्रतियोग्युपस्थित्यभावकालीनस्य साक्षिनिष्ठभेदस्यावृतत्वस्वीकारेण तादृशोपस्थितिसापेक्षत्वात्। अभावमात्रस्यानुपलब्धत्वे तु न भेदे केवलसाक्षिवेद्यत्वशङ्कापीत्यनुपलब्धस्वाकारक[1]वृत्त्यवच्छिन्नसाक्षिवेद्य एव स इति भावः। **अन्यथा**—साक्षिण इतरनैरपेक्ष्येण स्वनिष्ठभेदग्राहकत्वे। **अन्तःकरणाद्यभेदभ्रमः**—अन्तःकरणादेर्भेदाविषयकोऽहमिति भ्रमो न स्यात्। इतरसापेक्षतया भेदग्राहकत्वे तु विपरीतसंस्काररूपदोषाभावस्यान्तःकरणभेदस्फुरणापेक्षणीयत्वात्तदभावान्न तादृशस्फुरणम्। न च—मम मन इति भेदस्फुरणं सर्वदास्त्येवेति—वाच्यम्; तस्य तादात्म्यरूपसम्बन्धविषयकत्वेऽपि भेदाविषयकत्वात्, शरीरत्वादिनेव मनस्त्वेन तादात्म्याध्यासाभावात्, मम शरीरमितिवन्मम मन इत्यस्य सम्भवेऽपि मम मनुष्य इतिवन्ममाहमित्यस्याभावात्तदापादनसम्भवाच्च। एतेनेदानींतनस्य देहात्मनोरिव मनआत्मनोर्भेदज्ञानस्य सत्त्वेऽपि विपरीतभावनारूपदोषात्तयोरभेदभ्रमः सम्भवतीति तदभावापादनं न युक्तमिति परास्तम्॥

---

[1] स्वाकार—ग.

SGDF
Sri Gurgeshwari Digital Foundation

स्वस्याद्वैतज्ञानादिना भेदं विनानुपपत्तेस्तमप्याक्षिपतीति सर्वत्र भेदस्याप्रत्यक्षत्वेऽपि नाद्वैतश्रुतेरवकाशः—अत्रोच्यते; आक्षेपो ह्यनुमानमर्थापत्तिर्वा । तत्र विवादाध्यासिता बुद्धिः सर्वतो भिन्नेति नानुमानं संभवति; स्वतोऽपि भेदसाधने बाधात्, दृष्टान्तस्य च साध्यविकलत्वात् । यतःकुतश्चिद्भेदसाधने त्वनुमानाविषये लब्धावकाशा श्रुतिरभेदं बोधयिष्यति । न च स्वव्यतिरिक्तात्सर्वतो भिन्नेति साध्यम्; अद्वैतवादिनं प्रत्यप्रसिद्धविशेषणत्वात् । एतेन—सर्वं सर्वस्माद्भिन्नमिति वाक्य-

---

यत्तु—पदार्थस्वरूपस्य भेदत्वेन ज्ञानं प्रति दोषस्य प्रतिबन्धकत्वादभेदभ्रमसम्भवादभेदभ्रमोच्छेदप्रसङ्गादिति पूर्वोक्तमयुक्तम् । न च—तादृशभ्रमस्थले श्रुत्याप्यभेदो बोधनीय इति—वाच्यम्; दोषप्रयुक्तभेदाग्रह[1]निबन्धनाभेदग्रहस्य भ्रमत्वनियमेन श्रौताभेदज्ञानस्य भ्रमत्वापत्तेः, चरमज्ञाने श्रुत्यवकाशोक्तिरपि न युक्ता; तस्य प्रत्यक्षेण श्रुत्या वा विषयीकृतत्वे तत्र[2] श्रुतिवृत्त्युक्त्ययोगादिति—तन्न; श्रौतस्याभेदज्ञानस्य दोषाजन्यत्वेन श्रौतत्वेन चाभ्रमत्वात्, दोषप्रयुक्ते भेदग्रहमूलकत्वस्य भ्रमत्वव्याप्यत्वे मानाभावात्, भेदग्रहस्य दोषप्रयुक्तता नियमेन दोषग्राह्यभेदयोर्वस्तुनोरभेदग्रहस्य प्रमात्वनियमाच्च । चरमज्ञाने श्रुत्यवकाशोक्तिर्युक्तैव; चरमत्वं हि प्रकृते भेदेनागृह्यमाणत्वम् । न त्वगृह्यमाणत्वम्; तथाचागृहीतभेदेऽपि साक्षिसिद्धे तत्र श्रुतिः प्रवर्तत इत्यत्र न दोषः ॥

ज्ञानादिनेत्यादिना स्वविषयोपग्रहः । तं ऐक्यज्ञानात्स्वविषयाच्च स्वस्य भेदम् । **सर्वतो भिन्नेति** । बुद्धित्वात् बुद्ध्यन्तरवदिति शेषः । **अनुमानाविषये** अनुमेयभेदाप्रतियोगिनि । **वाक्यमपीत्यपिकारेणा-**

---

[1] भेदग्रह—ख. [2] चरमत्वहानेरविषयीकृतत्वे तत्र—ग.

SGDF Sri Garibdas Digital Foundation

मपि—निरस्तम्; तदुक्तम्—

'हेत्वाद्यभावसार्वज्ञ्ये सर्वं पक्षयताऽऽस्थिते।
किंचित्तु त्यजता दत्ता सैव द्वारद्वयश्रुतेः॥ इति।

नुमानसमुच्चयः। हेत्वादीत्यादि। सर्वस्मिन्पक्षीकृते हेतोरभावः; हेतोरपि पक्षत्वेन तस्मिंस्तस्यासिद्धत्वात्। अद्वैतमते साध्यहेत्वोरविशेषेण साध्याविशेषश्च, तयोः पक्षस्य चैक्याद्बाधस्वरूपासिद्धिव्याप्यत्वासिद्ध्यादिश्च; दृष्टान्तस्यापि पक्षत्वाद्दृष्टान्तासिद्धिश्च, सर्वस्य भेदप्रतियोगित्वानुयोगित्वे विशिष्य तत्तद्रूपेण साध्ये निवेश्ये; अन्यथा केनचिद्रूपेण ते आदाय सिद्धसाधनार्थान्तरयोरापत्तेः। तथाच तत्तद्रूपेण ज्ञाने आवश्यके सार्वज्ञ्यापत्तिः। एवं च हेत्वाद्यभावे सार्वज्ञ्ये चाद्वैतवादिना आस्थिते आपादेत[1] सति सर्वं पक्षयता पक्षयितुं पूर्वं प्रवर्तमानेन त्वया पश्चात्किंचित् कानिचित्त्यक्तव्यानि पक्षाद्बहिष्कार्याणि। तथाच त्वया सैव त्यक्ता[2] तत्तत्स्वरूपैवाद्वयश्रुतेः सर्वाद्वैतबोधनरूपगमनाय चरमोपायरूपा द्वाः दत्तैव। तुशब्दादनुमानाप्रयोगव्यवच्छेदः। तथाच शब्दमात्रे त्वयानुमानप्रयोगे कृतेऽपि श्रुतेरवकाशः सिद्ध्यत्येवेति लब्धपदा सा सर्वाद्वैतं बोधयतीति भावः॥

ननूक्तप्रत्यक्षं यद्यद्वैतज्ञानात्स्वविषयाच्च भिन्नं न स्यात्तदा भेदविषयकं न स्यात्; ययोर्भेदो विषयस्तयोरैक्याविषयकत्वात् भेदप्रतियोग्यनुयोगिनोः स्वविषयीभूतयोः स्वभिन्नत्वाभावे तयोर्भेदानुपपत्तेः। न हि स्वात्यन्ताभिन्नमुभयं मिथो भिन्नमिति सम्भवति, विरोधादिति युक्तेरुक्तप्रत्यक्षस्य स्वविषयादद्वैतज्ञानाच्च भेदं विना भेदविषयकत्वमनुपपन्नमित्यनुपपत्तिधर्मिकरणिकाऽर्थापत्तिरास्तां भेदग्राहिका

---

[1] आपादे—ख.   [2] त्यक्त—ग.

SGDF
Sri Gargeshwari Digital Foundation

नाप्यर्थापत्तिः सर्वभेदविषया ; स्वाविषयत्वात् । ययोर्हि भेदं विना यत्रानुपपत्तिर्गृहीता, तयोस्तत्र भेदग्रहेऽप्यनुपपत्तावनुपपत्त्यन्तराग्रहणात् । सर्वत्र तद्ग्रहणे तु धाराविश्रान्तौ चरमधीरुदाहरणम् । तदुक्तम्—

आद्यधीवेद्यभेदीयाप्यन्यथानुपपन्नता ।
स्वज्ञानापेक्षणादन्ते बाधते नाद्वयश्रुतिम् ॥ इति ॥

ननु—यावदुपपादकं तत्सर्वमर्थापत्तेर्विषयः । न तु

तत्राह—**नाप्यर्थेति** । स्वविषयत्वं विवृणोति । **ययोरित्यादि** । ययोरद्वैतज्ञानाद्युक्तप्रत्यक्षयोर्भेदं विना यत्रोक्तप्रत्यक्षस्य घटपटभेदविषयकत्वेऽनुपपत्तिर्गृहीता, तत्रोक्तप्रत्यक्षताद‍ृशविषयकत्वे निमित्ते तदुपपत्तय इति यावत् । **तयोः** अद्वैतज्ञानाद्युक्तप्रत्यक्षयोः । **भेदग्रहेऽपि अनुपपत्तावर्थापत्ति**प्रमायामनुपपत्त्यन्तरस्याद्वैतज्ञानादितो भेदं विना किंचिदनुपपन्नमित्यस्याग्रहणात् । तथाचोक्तार्थापत्तावद्वैतज्ञानादिभेदाग्रहान्नार्थापत्तिः सर्वभेदविषयेति भावः । सर्वत्रोक्तार्थापत्त्यादौ । **धारेति** । सुषुप्तादिलोपापत्त्येत्यादिः । **चरमधीः** चरमार्थापत्तिः । अद्वैतज्ञानादिभेदं विना यस्याः किंचिदनुपपन्नमिति गृहीतं[1] सार्थापत्तिरिति यावत् । **आद्येत्यादि** । आद्यधीर्घटपटभेदधीः तद्वेद्यभेदीया तस्या धियस्ताद‍ृशभेदविषयकत्वमद्वैतज्ञानादेस्तस्यां भेदं विनानुपपन्नमित्याकारानुपपन्नता अनुपपत्तिधीरद्वयश्रुतिं न बाधते । स्वज्ञानापेक्षणात् स्वस्मिन् ताद‍ृशानुपपत्तिज्ञाने अद्वैतज्ञानादिभेदज्ञानमपेक्ष्यैव तस्यास्तद्बाधकत्वसम्भवात्, स्वस्मिन्नुक्तभेदज्ञानाभावे तत्रैव श्रुतेरवकाशेन सर्वाद्वैतपर्यवसानात् । अथ तस्यामपि ताद‍ृशभेदं विना स्वविषयभेदविशेषविषयकत्वमनुपपन्नमिति ज्ञानात्ताद‍ृशभेदग्रहः ; तथाप्यन्ते धाराविश्रान्तौ तां न

---

[1] न गृहीतं-ग.

SGDF
Sri Gargeshwari Digital Foundation

यत्किंचिदुपपादकम्; तथाचार्थापत्तेरितरस्माद्भेदाभावे तत्रैवाभेदश्रुतेर्लब्धावकाशत्वाद्धटपटभेदसिद्ध्यापत्तेरर्थापत्तिविषयत्वं वाच्यम्; अन्यथा दृग्दृश्यसम्बन्धानुपपत्तिर्ज्ञाननिवर्त्यत्वानुपपत्तिश्च स्वमिथ्यात्वविषया न स्यात्; सर्वं खल्विदं ब्रह्म' इति श्रुतिः 'नेह नाना, इति ब्रह्मणि भेदमात्रनिषेधानुपपत्तिश्च स्वाभेदविषया न स्यात्; तथा च तत्रापि श्रुत्यन्तरमर्थापत्त्यन्तरं वा वाच्यमिति तवाप्यनवस्थापत्तिरिति। मैवं वोचः; वस्तुत उपपादकत्वं नार्थापत्तिविषयत्वे तन्त्रम्, किंतूपपादकत्वेन ज्ञातत्वम्; अन्यथार्थापत्तिभ्रमानुपपत्तेः। तथा च येन

बाधत इत्यर्थः। **उपपादकमिति**। यद्विनानुपपन्नत्वमन्यत्र ज्ञायते तदित्यर्थः। **इतरस्मात्** अद्वैतज्ञानादितः। **नेह नानेतीति**। निषेधपदार्थे निषेधबोधकवाक्ये चेति। **भेदमात्रेति**। भेदसामान्येत्यर्थः। 'नात्र काचन भिदास्ती'त्यादित्यादिश्रुत्येकवाक्यतया नानाशब्दस्य भेदार्थकत्वम्' भिदाशब्दस्यापि भिन्नार्थकतया भिन्नार्थकत्वं वा, नञ्शब्दस्य नाञ्प्रत्यया[1]न्तस्य तत्पदनिष्पत्त्या तथार्थसम्भवात्। यद्यप्ययं प्रत्ययः स्वार्थिकतया महाभाष्यादावुक्तः, तथापि नञ्पदस्यैवाघटवदित्यादाविव भिन्ननिरूढत्वसम्भवात्। तथाच भिन्ननिषेधेऽपि भेदस्य विशेषणस्य निषेध इत्याभिप्रायेणेदम्। नानापदस्यानेकार्थकत्वे तु पूर्वोक्तरीत्या भेदस्याप्यनेकत्वेन निषेध इति बोध्यम्। **स्वाभेदेति**। अभेदस्याखण्डब्रह्मरूपत्वेन वक्ष्यमाणत्वाद्भेदाभावातिरेकेण भेदनिषेधानुपपत्तिगम्यत्वमिति भावः॥

अर्थापत्तिभ्रमेति। अर्थापत्तिरूपभ्रमेत्यर्थः। **येन येनोपपाद-**

---

[1] नञ्प्रत्यया—ग.

SGDF
Sri Gargeshwari Digital Foundation

रूपेणोपपादकत्वं गृहीतम्, तद्रूपावच्छिन्नमुपपादकमर्थापत्तेर्विषयः। तत्र यद्यर्थापत्तिगतभेदसाधारणमुपपादकतावच्छेदकमेकं भवेत्, तदा सोऽपि भायादेव। नचैवमस्ति; तदनिरूपणात्। तथाहि—घटपटभिन्नत्वमुपपाद्यम्, तदुपपादकं च न सर्वभिन्नत्वम्; स्वतोऽपि भेदापत्त्या तदसम्भवात्। नापि स्वातिरिक्तसर्वभिन्नत्वम्; अद्वैतवादिनं प्रति स्वातिरेकविशेषणासिद्धेः, स्वत्वाननुगमाच्च। तथाच तेन तेन रूपेण तत्तद्भिन्नत्वमेव उपपादकमुपेयम्। अत उपपादकतावच्छेदकनानात्वान्न सर्वमुपपादकमर्थापत्तेर्विषय इति पृथक्पृथगनुपपत्तिज्ञानापेक्षायां सर्वत्रानुपपत्तिज्ञानेऽनवस्थानात् क्वचिद्धाराविश्रान्तौ तत्रैव लब्धावकाशा श्रुतिः सर्वाद्वैते पर्यवस्यतीति किमनुपपन्नम्। दृष्टान्ते

कत्वं गृहीतमिति। यद्रूपावच्छिन्नं विनानुपपन्नत्वं गृहीतमित्यर्थः। **सोऽपि** अर्थापत्तिगतो भेदोऽपि। **उपपाद्यमिति**। विषयितासंबन्धेनेत्यादिः, तेन पक्षीभूतज्ञाननिष्ठतालाभः। **सर्वभिन्नत्वम्** सर्वस्मात्सर्वस्य भेदः। **स्वातिरिक्तसर्वभिन्नत्वम्**, सर्वत्र स्वातिरिक्तात्सर्वस्माद्भेदः। **अद्वैतवादिनमिति**। अद्वैते विप्रतिपन्नमित्यर्थः। तथाचाद्वैते विप्रतिपत्तिकाले स्वातिरिक्तसर्वत्वस्य निर्णयो नेति भावः। **स्वत्वेति**। तथाच भेदग्राहकं यद्यज्ज्ञानं तत्र तत्र तत्तदन्यसर्वभिन्नत्वमर्थापत्तेर्विषयो वाच्यः, तथाचोक्तज्ञानं प्रत्यक्षार्थापत्त्यादिरूपमनन्तमित्यनुगतरूपं विना पक्षतया साध्यघटकतया वा न तन्निर्देशसम्भवः। न च—भेदग्राहकत्वेनानुगतरूपेण निर्देश इति—वाच्यम्; भेदग्राहकभिन्नभेदस्य साध्यत्वे भेदग्राहकाणां मिथो भेदस्यार्थापत्त्यविषयतया तत्रैवाद्वयश्रुतेरवकाशसम्भवादिति भावः। **नानात्वात्**। तत्तद्धर्मावच्छिन्नप्रतियोगिताकभेदत्वरूपत्वात्। **विश्रान्ताविति**। तत्तदनन्तधर्मावच्छिन्नप्रतियोगिताक-

SGDF
Sri Gargeshwari Digital Foundation

च सर्वत्र स्वसाधारणमुपपादकतावच्छेदकमेकमेवेति तदवच्छिन्नतया स्वस्यापि भानमिति वैषम्यम्। तथाहि—दृश्यत्वावच्छिन्नमिथ्यात्वं विना दृक्सम्बन्धानुपपत्तिग्रहात्तदवच्छिन्नमिथ्यात्वमर्थापत्तेर्विषय इति स्वमिथ्यात्वमपि स्वाविषयः। एवमेव ज्ञाननिवर्त्यत्वानुपपत्तेरपि स्वविषयत्वम्; तत्रापि दृश्यत्वादेरेकस्यैवावच्छेदकत्वात्। एवं च ब्रह्मणि सर्वाभेदबोधिकायाः श्रुतेर्भेदमात्रनिषेधान्यथानुपपत्तेश्च स्वाभेदाविषयत्वमाविरुद्धम्। न हि सर्वभेदे स्वभेदापत्तिरिव सर्वाभेदे स्वाभेदो दोषाय। तस्माद्द्वैतश्रुतिर्बाध्यबाधकयोरैक्यबोधनेन निराबाधा सर्वाद्वैतं प्रतिपादयति। ननु—शब्दबुद्धिकर्मणां विरम्यव्यापाराभावात्कथमादावल्पविषया बुद्धिः पश्चाद्बहुविषयापि भवतीत्युच्यत इति—चेन्न; श्रुतितो द्रागेव जातायाः सर्वविषयाया अद्वैतबुद्धेः प्रामाण्यं व्यवस्थापयन्तीनामस्मद्बुद्धीनामेव क्रमेण जायमानत्वात्।

भेदानां दुर्ज्ञेयत्वात्क्वचित्कस्यचिद्भेदज्ञानासम्भवे इत्यपि बोध्यम्। **तथाहीति**। प्रपञ्चस्येति शेषः। **सर्वभेदे** उक्तार्थापत्तिविषये सति। **स्वाभेदः** स्वाभेदापत्तिः। **कथमित्यादि**। चरमज्ञाने आदौ लब्धपदा पश्चात्सर्वाद्वैतविषयेति कथामित्यर्थः। **द्रागेव** युगपदेव। **प्रामाण्यमित्यादि**। यत्र प्रत्यक्षादिना भेदो न गृहीतः, तत्र श्रुतेरबाधितविषयकत्वम्। प्रत्यक्षादिविषये तु सर्वत्र श्रुतेः प्रवृत्तिरिति प्रत्यक्षादिकं नाबाधितकिञ्चिद्विषयकम्। अतः प्रत्यक्षादितः श्रुतिः प्रबला। एवं बाध्यत्वाभिमतश्रौतज्ञानस्य द्वैतमात्रोच्छेदकत्वेन बाधकत्वाभिमतप्रत्यक्षादिस्वरूपोच्छेदकत्वादपि सा प्रबला। बाध्यकालेऽनुच्छिन्नस्वरूपं हि बाधकं स्यात्। अतएव सर्वकथंतामूलोच्छेदकत्वेनापि सा तथा। तदुक्तं खण्डने—

SGDF
Sri Gargeshwari Digital Foundation

अयोग्यताज्ञानं च न शाब्दबोधे प्रतिबन्धकम्, न वा योग्यताज्ञानं हेतुः; येन प्रथमं सर्वाद्वैतबुद्धिर्न स्यात्। तदुक्तम्—

अत्यन्तासत्यपि ज्ञानमर्थे शब्दः करोति हि।
अबाधात्तु प्रमामत्र स्वतः प्रामाण्यनिश्चलाम्॥ इति।

प्रवृत्तेनाप्यनौचित्यमूलं येन न लूयते।
तत्रानौचित्यसाम्राज्यं वैपरीत्यात्तु नात्र तत्॥ इति।

अत्राद्वैतश्रुतावित्यादिरीत्या श्रुतेर्बाध्यत्वशंकानिरासेन प्रामाण्यव्यवस्थापकानामस्मदीयज्ञानानां श्रुतिप्राबल्यविषयकानामेव क्रमेणोत्पत्तिः। श्रुत्या तु सकृदेव सर्वाद्वैतं बोध्यते। न तु प्रत्यक्षाद्य—गृहीतभेदके चरमज्ञाने वा आदावद्वैतं बोधयित्वा पश्चादन्यत्र बोध्यत इति भावः। **न स्यादिति।** प्रत्यक्षादिरूपेणायोग्यताज्ञानेन प्रतिबन्धादिति शेषः। **अत्यन्तासति।** विपरीततया निश्चिते कलहादिस्थल इति शेषः। **अबाधादिति।** कलहादिस्थलेऽनाप्तत्वादिना वाक्यार्थज्ञानस्य भ्रमत्वेऽपि श्रौतज्ञानस्योक्तरीत्या भ्रमत्वज्ञानरूपबाधासंभवादित्यर्थः। **स्वतः प्रामाण्यनिश्चलाम्,** स्वतःसिद्धप्रमात्वान्निश्शंकाप्रामाण्यं विपरीतज्ञानरूपस्यायोग्यताज्ञानस्य प्रतिबध्यत्वं न परोक्षापरोक्षसाधारणरूपेण; प्रत्यक्षस्थले इच्छाविषयस्याप्रतिबध्य[1]त्वेन तद्व्यावृत्तरूपेणैव प्रतिबध्यत्वात्। **अतएवोक्तं** मणिकृता 'प्रत्यक्षादावुत्पन्ने ज्ञानेऽप्रामाण्यमासज्यते बाधेन अनुमितौ तूत्पत्तिरेव प्रतिबध्यत' इति। एवंच परोक्षस्यानुमितित्वेनैव प्रतिबध्यत्वम्; विपरीतधीसत्वे उद्बोधकसत्वे मानाभावेन तदभावादेव स्मृत्यभावोपपत्तेरनुगतोद्बोधके मानाभावात्। भावे वा परोक्षत्वजातौ मानाभावेनाक्लृप्तत्वात्। बाधस्थले शाब्दबोधस्य निश्चितत्वात्। अन्यथा कलहादिस्थले शाब्दान्य-

---

[1] बाध्य—ख.

SGDF
Sri Gangeshwari Digital Foundation

वेदान्तकल्पलतिकायामस्यार्थस्य प्रपञ्चो द्रष्टव्यः। एतेन—चरमज्ञानमिथ्यात्वेऽपि न तद्विषयस्य मिथ्यात्वम्; ज्ञान-मिथ्यात्वस्य विषयमिथ्यात्वासाधकत्वात्। अद्वैतज्ञाने व्यभि-चारादिति—निरस्तम्; श्रुत्यैव द्वैतमात्रनिषेध्यत्वबोधनात्। अद्वैतज्ञानविषये च मिथ्यात्वबोधकाभावादेव सत्यत्वम्, न तु ज्ञानमिथ्यात्वादिति न किंचिदेतत्। ननु—द्वैतज्ञानाद्वैतज्ञान-योरभेदे कथं बाध्यबाधकभावः? न च व्यावहारिकभेदमात्रेण सः; द्वैतज्ञानस्यापि बाधकत्वापत्तेरिति—चेन्न; व्यावहारिक-भेदमात्रस्य बाधकत्वाप्रयोजकत्वात्। यद्धि परीक्षितप्रमाणभाव-

---

विशिष्टधीसामग्रीकल्पने गौरवाच्छाब्दव्यावृत्तरूपेणैव प्रतिबध्यत्वम्। योग्यताज्ञानहेतुत्वे च न मानम्; इतरकारणसत्वे तद्विलम्बेन शाब्दधी-विलम्बस्यादृष्टत्वादिति भावः। **एतेन** द्रागेव श्रुत्या सर्वाद्वैतबोधनेन। श्रुत्यैवेत्येवकारार्थो विवक्षितः, स च ज्ञानमिथ्यात्वस्य विषयमिथ्यात्वसाध-कत्वव्यवच्छेदः। श्रुतेर्बोध[1]कत्वं तु नात्र विवक्षितम्; तेनैतेनेत्यनेन न पौनरुक्त्यम्। **ज्ञानमिथ्यात्वादिति।** विषयमिथ्यात्वमिति शेषः। **व्यावहारिकभेदमात्रस्येत्यादि।** यद्यप्यद्वैतज्ञानोत्पत्तिद्वितीयक्षणे द्वैत-मात्रोच्छेदः; जीवन्मुक्तानामपि भेदप्रतिभासो भ्रमत्वेन निश्चीयमान-त्वान्न बाध्यबाधकभावादितद्धीप्रयोजकः; न हि विरोधिविषयकत्वा-द्यंशे बाध्यत्वाभिमताद्भिन्नत्वांशे वा भ्रमत्वेन निश्चीयमानज्ञाने बाधकत्वं भ्रमत्वज्ञानोत्पादकत्वं तद्धीर्वा कस्यचित्संभवति, तथापि द्वैतवादिनां विचारदशायां पापासंभावनादिदोषेण द्वैत[2]ज्ञानस्यैव भ्रमत्वशंकास्पद-त्वात्, तेषां द्वैतज्ञानस्यातथात्वादतथाभूतभेदज्ञानसंभवात्, तान्प्रत्य

---

[1] बोध—ग. [2] णाद्वैत—ग.

SGDF
Sri Gargeshwari Digital Foundation

त्वेन बलवत्, तद्बाधकम्, यत्तु सन्दिग्धप्रमाणभावत्वेन दुर्बलं तद्बाध्यमिति व्यवस्थायां द्वैतज्ञानस्य दुर्बलत्वेनाबाधकत्वस्याद्वैतज्ञानस्य च बलवत्वेन बाधकत्वस्य शब्दप्रत्यक्षबलाबलविचारे दर्शितत्वात्। यत्तु 'आपो वा इदं सर्वं भूत' मित्यादिश्रुतिः, 'विमतम्, जलाभिन्नम्' प्रतीतत्वाज्जलवदि' त्यनुमानं वा स्वबाधकस्य जलाभेदं गृहीत्वा निर्बाधं सत्त्वदुक्तन्यायेन सर्वस्य जलाभेदं बोधयेदिति तन्न; जलाभेदबोधनेऽपि

द्वैतज्ञानं बाधकत्वेनोपन्यस्य, बाधकत्वाभिमतप्रत्यक्षादिस्वरूपोच्छेदकत्वादिरूपश्रुतिप्राबल्योपन्यासेन श्रौताद्वैतज्ञाने भ्रमत्वशंकाया अनवकाशं चोपन्यस्य, तेषामद्वैतज्ञाने बाधकत्वज्ञानमद्वैतज्ञानवता कारयितुं शक्यते। न च–तदा द्वैतवादिभिरद्वैतज्ञानिनं प्रति व्यवहारव्याघातोऽद्वैतज्ञानेनापादनीयः, यदि त्वमद्वैतज्ञानवान् तदा व्याहतद्वैतव्यवहारः स्या इतीति वाच्यम्; बाधकाद्वैतज्ञाने सत्यपि द्वैतसंस्काराधीनप्रतिभासस्य प्रारब्धकर्मकृतप्रतिबन्धेनानुच्छेदाद्वैतवादिकृतापादनस्याद्वैतज्ञानिनं प्रति निष्फलत्वात्। न हि तस्य द्वैतधीर्भ्रमत्वेनानिश्चीयमाना संभवति, न वापाद्यापादकादिभदे[1]श्रद्धास्ति येन तत्तत्पराभूतये प्रभवेत्। तदुक्तं खण्डने—

नानात्वमवलम्ब्यापि वदत्यद्वैतवादिनि।
असिद्धभेदाद्व्याघातः पतेदापादकात्कुतः॥ इति॥

अत एवाद्वैतज्ञानिनं प्रति पक्षादौ बाधकत्वोपन्यासो व्यर्थ इति भावः। **सन्दिग्धप्रमाणभावत्वेन** अनिश्चितप्रामाण्यकत्वेन प्रामाण्यानिश्चायकशून्यत्वेन। **दर्शितत्वादिति**। अत्राप्युक्तरीत्याद्वैतदर्शिनं प्रति प्रत्यक्षादेर्बाधकत्वेनोपन्यासासम्भवादि[2]प्रयोजकेन सर्वाद्वैतबोधकत्वेन

---

[1] भेदे **श्र. ग्र.**   [2] ससम्भवादि–**ग.**

SGDF
Sri Gargeshwari Digital Foundation

बाध्यबाधकयोरैक्याबोधनात् बाधकस्य बाधकत्वोपपत्तेः। ऐक्यज्ञानभेदज्ञानयोर्बाध्यबाधकभावस्य जलाभेदज्ञानेनानपायात् । बाधकाभेदो हि बाधकत्वाभावे प्रयोजकः; बाधकस्य स्वबाधकत्वादर्शनात् । अतो न बाध्यबाधकैक्यज्ञानस्य जलाभेदज्ञानसाम्यम् । एतेन—सर्वं सर्वस्माद्भिन्नमिति मद्वाक्यमद्वैतवाक्यतज्ज्ञानतद्विषयाणां तेभ्यो भेदमादौ गृहीत्वा निर्बाधं सत्सर्वभेदे पर्यवस्यतीति—निरस्तम्; बाध्यबाधकयोरभेदे बाधकत्वाभाववत् भेदेऽपि बाधकत्वं न स्यादित्यत्र हेत्वभावात् पूर्वोक्तदोषा-

---

प्राबल्यमद्वैतश्रुतेरित्युक्तत्वादिति शेषः। तथा च पूर्वं बलाबल[1]विचारे संभावितदोषत्वेन प्रत्यक्षस्याबलत्वं, तदभावेन श्रुतेर्बलत्वं[2] दर्शितम्, अत्राप्युक्तं बलाबलम्, बलाबलेनैव बाध्यबाधकत्वव्यवस्थेत्यपि तत्रैवोक्तम्। अतो न सा भेदमात्रेणेति भावः। **बाध्यबाधकयोरिति**। आपः सर्वमिति ज्ञानपृथिव्यादयोनापइति ज्ञानयोरित्यर्थः। **ऐक्यज्ञानभेदज्ञानयोः**। उक्तज्ञानयोः। **बाधकाभेदः** बाधके बाध्याभेदः। **बाध्यबाधकैक्येति**। सर्वाद्वैतेत्यर्थः। **तज्ज्ञान[3]तद्विषयाणां** अद्वैतज्ञानाद्वैतानाम् । **तेभ्यः** अद्वैतवाक्यमद्वैतज्ञानमद्वैतं चेत्येतेभ्यः। **निर्बाधं सदिति**। बाधकत्वाभिमतद्वैतज्ञानं तद्भिन्नत्वेन निश्चितमतस्तेन भेदज्ञानं न बाध्यतया निश्चेतुं शक्यत इत्यर्थः। **हेत्वभावादिति**। अद्वैतज्ञानं तत्वेन साक्षिगृह्यमाणं तद्भिन्नत्वेन गृहीतुमशक्यम्। शक्यत्वे वा तदभिन्नत्वेनाप्यद्वैतश्रुत्यैव तस्य गृह्यमाणत्वात्तदकिंचित्करम् । शाब्दबोधे च विपरीतधीर्न विरोधिनीति भावः। **पूर्वोक्तेति**। अद्वैतज्ञानिनं प्रति तादृशवाक्यस्य सश्रद्धभेदज्ञानाजनकत्वात्तदुपन्यासो व्यर्थः, भेदज्ञानस्य स्वस्मादपि भेदसिद्ध्या बाधकत्वाभावापत्त्या स्वातिरिक्ते[4]

---

[1] पूर्वबलावल–ग. [2] बलं–ख. ग. [3] तज्ञान–ख. अज्ञान–ग. [4] स्वातिरिक्त–ग.

SGDF Sri Gargeshwari Digital Foundation

चेति दिक् । सर्वासत्त्वं सर्वमिथ्यात्वान्नातिरिच्यते; अतः

सर्वभेदाविषयकत्त्वं वाच्यम्; तथाच स्वान्यस्मिन्सर्वस्मिन्सर्वभेदरूपे वाक्यार्थे वाच्येऽद्वैतज्ञानिनं प्रति पदार्थाप्रसिद्धश्चेत्यादीत्यर्थः । अत्रापो वेत्यादिनारायणीयोपानिषद्वाक्यस्य स्तुतिपरत्वेनाभेदपरत्वाभावाद्भेदप्रत्यक्षापेक्षया दुर्बलत्वम् । सर्वं न सर्वमित्यादिवाक्यस्याप्यनाप्तवाक्यत्वेन घटो न घट इत्यादिवदपार्थकत्वेन च दुर्बलत्वमित्यपि बोध्यम् । ननु 'इदं वा अग्रे नैव किंचनासीत्' इति श्रुतिः, विमतम्, असत्, प्रतीतत्वादि'त्यनुमानं वा स्वबाधकत्वाभिमतस्य सत्यज्ञानादिवाक्यस्यासत्वमादौ गृहीत्वा, सर्वासत्वं बोधयेदित्यत आह—**सर्वासत्वमिति ।** अपरोक्षतया ज्ञायमानानां पृथिव्यादीनामलीकत्वासंभवेन सर्वस्य मिथ्यात्वरूपासत्वमेव वाच्यम्; तथाच मिथ्याभूतस्याप्यर्थक्रियाकारित्वेन पूर्वोक्तत्वात्, मिथ्यात्वेन ज्ञायमानस्यापि सत्यादिवाक्यस्य प्रमाजनकत्वज्ञानसंभवात्, अतथात्वज्ञानाधीनाप्रमात्वज्ञानस्य सत्यादिवाक्यजन्यज्ञाने[1] वक्तुमशक्यत्वात्, अन्यथासत्व[2]वाक्यादावप्यसत्वज्ञानेन तज्जन्यज्ञानेऽप्यप्रमात्वधीसंभवात्, अद्वैतज्ञानिनं प्रति स्वान्यदसदित्युपन्यासस्य विशेषणाप्रसिद्ध्या कर्तुमशक्यत्वात्, द्वैतमात्रोच्छेदकत्वादिना 'सत्यं ज्ञानमद्वितीयमि'त्यादिवाक्यस्य सर्वासत्वादिवाक्याद्यपेक्षयोक्तरीत्या प्राबल्याच्छून्यवादापत्तेश्च नोक्तापत्तिरित्यर्थः ॥

ननु साक्षिणान्तःकरणाद्यभेदभ्रमो न स्यादिति पूर्वोक्तापत्तिर्नियुक्ता; इष्टत्वात्, अत एव मम मन इति भेदप्रत्यक्षमिति—चेन्न; सुखादौ मनो निमित्तमात्मोपादानमित्यत्र गौरवान्मन एवोपादानमिति तद्धर्मसुखादेरात्मधर्मत्वस्यानुभूयमानस्य मनआत्मतादात्म्याध्यासं विनानुपपत्तेः साक्षितादात्म्यं विना मम मन इति प्रत्यक्षस्याप्यसंभवात् ।

[1] ज्ञानेन—ख. [2] सर्वासत्व—ख. ग.

SGDF
Sri Gargeshwari Digital Foundation

दृग्दृश्ययोः सम्बन्धस्याध्यस्ततादात्म्यरूपत्वेनोक्तत्वात् । अन्यथा ह्यक्लृप्त-जातीयसम्बन्धकल्पने गौरवम् ; कार्यमात्रे निमित्तत्वस्येवोपादानत्वस्या-प्यात्मन्यविनिगम्यत्वेन स्वीकारात्, प्रकृतिश्चेत्यादिन्यायात् । मम मन इत्यत्र तु गतिरुक्तसाक्षि[1]वृत्तित्वेनाध्यस्ते मनःपरिणामसंकल्पादौ धीः साक्षिभेदविषया चेति न दोषः । यत्तु—साक्षिणा स्वस्मिन् स्वेतरभेद-ग्रहः, तत्र च स्वेतरत्वेन यत्किंचिदितरज्ञानमपेक्ष्यते[2] इतरत्वं च भावरूपं सत्त्वप्रतिद्वंद्वि, न तु भेदरूपम् ; येनानवस्था स्यादिति— तन्न ; भावरूपेतरत्वे मानाभावात्, तेन रूपेण भेदग्रहेऽपि तदन्य-रूपेण भेदाग्रहादभेदस्य श्रुत्या ग्रहे बाधकाभावाच्च ॥

ननु—अर्थापत्तिसाधारणमेकं घटपटभेदोपपादकं नास्तीत्युक्त-मयुक्तम् ; घटपटभेदसिद्धिविरोधी यो भेदाभावस्तद्विरहस्य तत्वसंभवात्, यथा हि घटपटभेदज्ञानस्याद्वैतज्ञानेन भेदाभावे घटपटभेदासिद्धिस्तथार्था-पत्तेरद्वैतज्ञानादभेदेप्युक्तरीत्या सेत्यर्थापत्तिभेदोऽपि तदुपपादक इति— चेत्, भ्रान्तोसि ; न ह्युक्तभेदसिद्धिविरोधितावच्छेदकमेकमस्ति; येनानु-गतरूपेण निवेशः । नच—भेदज्ञाननिष्ठं यदबाधकत्वं तदनुमापकत्व-रूपं तदेकं भेदज्ञानमैक्यज्ञानं प्रत्यबाधकम्, तदैक्यात्, यद्यदैक्यवत्त-त्तदबाधकम्, यथा संप्रतिपन्नमिति व्याप्तेर्भेदज्ञानरूपपक्षधर्मतायाश्च ज्ञानविषयत्वरूपस्योक्तानुमापकत्वस्यैक्ये सत्वादिति—वाच्यम् ; भेद-ज्ञाने स्वैक्यस्यापि तादृशैक्यतया तद्भेदस्यापि तदभावत्वेन रूपेण भेदज्ञाने सिद्ध्यापत्तेः भेदमात्रस्य तादृशत्वेन विशेषणस्याव्यावर्तकत्वा-पत्तेः, तादृशैक्यस्य सिद्ध्यसिद्धिभ्यां व्याघाताच्च । तस्मादिदं भेदज्ञान-मद्वैतज्ञानाबाधकत्वव्याप्याद्वैतज्ञानैक्यवदित्यादिज्ञानाविषयत्वरूपं तत्त-ज्ज्ञाननिष्ठाबाधकत्वानुमापकत्वं तत्तज्ज्ञानभेदेनाननुगतमेव विरोधिशेषि-

---

[1] गतिरुक्ता साक्षि-ग. [2] मपेक्षते-ग.

SGDF
Sri Gargeshwari Digital Foundation

'सर्वमसदि'ति प्रत्यवस्थानमनवकाशम्। ननु श्रुत्या सर्वस्य मिथ्यात्वं वा बोध्यते, ब्रह्माभिन्नत्वं वा। आद्ये 'सर्वं खल्विदं ब्रह्मे'ति सामानाधिकरण्यं न स्यात्; सत्यानृतयोरैक्यायोगात्। द्वितीये 'इदं रजतम्' 'गौरोऽह'मित्यादिभ्रमाणां प्रमात्वं स्यात्; आत्मनि देहादिभेदस्यानृतात्वद्व्यावृत्तेश्च बोधकानां वेदान्तानां 'नेदं रजत'मित्यादि बाधकस्य चाप्रामाण्यं स्यात्, घटज्ञानेनैव तदभिन्नब्रह्मतदभेदादेः

ताव[1]च्छेदकमिति क्वानुगमः? एवंच 'घटो न पट' इत्यादिज्ञानस्य भेदविषयकत्वं प्रति तादृशज्ञानस्याद्वैतज्ञानाद्भेदत्वेन[2] तादृशभेदग्राहकार्थापत्तेरद्वैतज्ञानाद्भेदत्वेन एवमन्येषामपि तस्माद्भेदत्वेनोपपादकत्वमेव युक्तम्; अननुगमस्याविशिष्टत्वात्। तदिदमुक्तं उपपादकतावच्छेदकनानात्वादित्यादि। यदपि सर्वाद्वैतज्ञाने श्रौते बाधविधया प्रतिबन्धकत्वासंभवेऽपि भेदज्ञानं तत्र भ्रमत्वं कल्पयत्विति तन्मौढ्यम्; भ्रमत्वकल्पकत्वरूपबाधकत्वस्यैवोक्तदौर्बल्येन निरस्तत्वात्॥

श्रुत्या ''एकमेवाद्वितीयमि'त्यादिश्रुत्या। **मिथ्यात्वमिति**। अद्वितीयादिपदस्य द्वितीयाभाववत्त्वेन ब्रह्मणोऽवान्तरतात्पर्येण बोधकत्वमित्युक्तत्वादित्यादिः। **ब्रह्माभिन्नत्वमिति**। सर्वस्येत्यनुषज्यते। अद्वितीयादिपदस्य द्वितीयत्वादिरूपविशेषेण निषेधपरत्वादित्यादिः। ब्रह्माभिन्नत्वं ब्रह्मणि प्रसक्तस्य भेदसामान्यस्य निषेधः। भेदसामान्ये च सत्तास्फूर्तिरूपेण ब्रह्मणोऽनुगमात्तत्र तत्प्रसक्तिः। ब्रह्माद्वितीयत्वस्य तद्भेदव्यापकतया तन्निषेधात्तान्निषेधो बोध्यः। एकादिपदस्य तु भेदशून्यरूपकेवलवाचकस्य सङ्कोचाभावात्साक्षादेव सर्वभेदशून्यबोधकत्व-

---

[1] विरोधिताव-ग. [2] दकत्वेन-ग.

SGDF
Sri Gargeshwari Digital Foundation

सर्वस्यापि वस्तुतो ज्ञातत्वेन सार्वज्ञ्यम्, वेदान्तानां वैय्यर्थ्यम्, सद्यो मोक्षश्च स्यात्, सुखदुःखबन्धमोक्षभेदाभेददूषणभूषणजयपराजयभ्रान्तिप्रमादेरपि वस्तुतो भेदाभावेन सर्वसङ्करापत्त्या स्वक्रियास्वन्यायस्ववचनाविरोधाश्च स्युरिति चेन्न; आद्ये मृद्घटः' इदं रजत' मित्यादाविवं उपादानोपादेयभावेनापि सामानाधिकरण्योपपत्तेः। द्वितीये वस्तुतो भेदाभावेऽप्याविद्यकभेदमादाय सर्वव्यवस्थोपपत्तेः। न च—भेदस्याप्यनाविद्यकब्रह्माभिन्नत्वेनाविद्यकत्वायोग इति—वाच्यम्; आविद्यकत्वस्याप्याविद्यकस्यैवाङ्गीकारात्, अथाविद्यकत्वस्यापि ब्रह्माभिन्नत्वात्कथमाविद्यकत्वमिति चेत् तस्मिन्नपि तस्य कल्पितत्वादिति गृहाण। ननु—मुक्तावाविद्यकस्यापि भेदस्याभावेनानन्दस्य दुःखाभिन्नत्वेनापुरुषार्थत्वापातः' तत्तदसाधारणस्वभावस्य तत्र तत्राभावेऽपि तत्तदभेदे पारिभाषिकोऽयमभेदो भेदे पर्यवस्येत्।

मिति ध्येयम्। **ऐक्यायोगादिति**। तथाच श्रुतीनां पूर्वापरविरोध इति भावः। **प्रमात्वमिति**। सर्वस्य ब्रह्मणा सर्वाभिन्नेनाभेदात्सर्वाभिन्नत्वादित्यादिः। द्वितीयपक्षेऽपि 'नेह नाना,' 'अनिन्द्रियमविषयम्' इत्यादिश्रुतिभिर्मिथ्यात्वेन बोधिते प्रपञ्चे 'सर्वं खल्विदं ब्रह्मे'ति वाक्येन ब्रह्माभेदबोधानुपपत्तिर्बोध्या। उपादानोपादेययोः सामानाधिकरण्ये पराभ्युपगतं दृष्टान्तमाह—**मृद्घट इति**। सत्यमिथ्यासामानाधिकरण्ये पराभ्युपगतं तमाह—**इदमित्यादि**। **भेदाभावेऽपीति**। व्यवहारकाले तदनिश्चयादिति शेषः। **तत्तदसाधारणेति**। अपुरुषार्थत्वादिरूपदुःखादिमात्रधर्मेत्यर्थः। **तत्र तत्र** मोक्षानन्दादौ। **तत्तदभेदे** तत्र तत्र[1]

---

[1] तत्र—ग.

SGDF
Sri Gargeshwari Digital Foundation

असाधारणरूपेण भेदमभ्युपेत्य सद्रूपेण भेदनिषेधेऽपीष्टापत्तिर-प्रसक्तनिषेधश्चेति-चेन्न; एकस्यामेव ब्रह्मव्यक्तौ तत्तदसाधारण-स्वभावानां कल्पितत्वेनासत्वात्सर्वकल्पनानिषेधकाले कल्पित-धर्मावच्छिन्नभेदाभेदादिप्रसक्तेरयोगात्। अत एव नाप्रसक्तप्रति-षेध इष्टापत्तिर्वा; 'सद्द्रव्यं', 'सन् गुण' इत्यादिप्रतीत्या प्रस-क्तानां तत्तद्धर्माणां ब्रह्मणि प्रतिषेधात्। अतः सर्वधर्मशून्याया एकस्या एव सद्व्यक्तेश्चिदानन्दरूपायाः प्रतिपादनान्न परिभाषि-कोऽयमभेद इति सिद्धम्। तदेवं 'सर्वं ब्रह्माभिन्न' मिति मते

दुःखाद्यभेदे। सद्रूपेण भेदनिषेधे सद्भेदस्य निषेधे ब्रह्मणीत्यादिः। तत्तदसाधारणस्वभावानां दुःखत्वापुरुषार्थत्वादीनां द्वैतानां असत्वात् निषेधयोग्यत्वात्। भेदाभेदादीति। भेदो दृष्टान्तत्वेनोक्तः। उक्तश्रुते-र्भेदसामान्यनिषेधकत्वपक्षे द्वितीयमात्रस्य भेदव्याप्यत्वेनार्थान्निषेधः। 'नेह नाना,' 'अस्थूल' मित्यादिश्रुत्यन्तरेण वा स इति भावः। अतएव द्वैत-सामान्यस्यैकस्यां ब्रह्मव्यक्तौ कल्पितत्वादेव। तत्तद्धर्माणामिति। द्रव्य-गुणादीनां भेदसामान्यस्य चेत्यर्थः। यत्र यत्र भेदप्रसक्तिस्तस्य सद्रूप-तादात्म्यावगमाद्ब्रह्मणि सद्रूपे भेदभेद्यसामान्ययोः प्रसक्तिरिति भावः। सर्वधर्मशून्याया इति। भेदभेद्यसामान्याभाववत्त्वरूपव्यावृत्ताकारेणोप-लक्षिताया इत्यर्थः। न पारिभाषिक इति। यादृशभेदज्ञानं यद्विषयक-प्रमोच्छेद्यम्, तादृशभेदस्य विरोधी अभेदः स एव। भेदमात्रज्ञानं चाखण्डोक्तव्यक्तिप्रमोच्छेद्यम्, तादृशव्यक्तेः सर्वाधिष्ठानत्वादुक्तव्या-वृत्ताकारोपलक्षितत्वाच्च तदुत्तरं सत् द्रव्यं गुणो नेत्यादिबुद्धेरुच्छेदौ-चित्यात्, सदन्यभिन्नं नेत्यादिशब्दजन्यबुद्धेः परेणापि तदुच्छेदकत्व-स्वीकारादिति, सैव व्यक्तिर्भेदसामान्यविरोध्यभेद इति भावः। सर्वं ब्रह्माभिन्नमिति मते। द्रव्यगुणादिकं द्रव्यत्वादिनावच्छिन्ना या

SGDF
Sri Gargeshwari Digital Foundation

मिथ्याभूतस्य ब्रह्मभेदेऽपि सन्मात्रमेव ब्रह्माभिन्नमिति मते वा न प्रत्यक्षादिविरोधः। नापि पूर्वोत्तरविरोधः ॥

इत्यद्वैतश्रुतेर्बाधोद्धारः.

ब्रह्मभेदाभावानुयोगिता तद्वच्छ्रुत्यापि तादृशाभेदो बोध्यत इति मते। मतान्तरमाह—**मिथ्येति**। 'एकमेवे'त्यादिश्रुत्या मिथ्यात्वेन बोधितेत्यर्थः। प्रपञ्चस्येत्यादिः। **सन्मात्रमेव ब्रह्माभिन्नं** सत्वेन सदेव ब्रह्मभेदाभावानुयोगि न द्रव्यत्वादिना द्रव्यादि; द्रव्यत्वाद्यवच्छिन्नानुयोगिताकभेदस्य सत्वावच्छेदेनापि प्रसक्तेरुक्तत्वात्सत्वावच्छेदेनापि भेदनिषेधः श्रुत्या बोध्यते। भेदस्य मिथ्यात्वेन तदभावस्य द्रव्यादौ सत्वेऽपि तदनुयोगिता न द्रव्यत्वादिना; किंतु सत्वेन, सैव 'सर्वं खल्विदं ब्रह्मे'ति श्रुतिविषयः; द्रव्यत्वादिसर्वधर्मविशिष्टस्य कल्पितभावरूपसत्तादात्म्यादभिन्नसत्तादात्म्यरूपं सामानाधिकरण्यमेव ब्रह्मणो द्रव्यादौ भातीति स्वीकारात्। अथवा प्रपञ्चे ब्रह्मणः कल्पितं यद्भास्यतानियामकं भावरूपं तादात्म्यं तदेवोक्तश्रुतिविषय इति भावः। **न प्रत्यक्षेत्यादि**। आद्यमते उक्तरीत्या'नेदं रजतमि'त्यादिप्रत्यक्षस्य द्वितीयमते'सर्वं खल्विदमित्यादिश्रुतिविरोधात्पूर्वोत्तरश्रुतीनां विरोधो नेत्यर्थः। अथवा—तथाच प्रत्यक्षादिविरोधात्पूर्वोत्तराविरोधाच्चेत्यादिना श्रुतेरद्वैतपरत्वाभावशङ्का कृता पूर्वम्, तत्र प्रत्यक्षाद्यविरोधमुपसंहृत्य पूर्वापरविरोधं श्रुतौ वक्ष्यमाणं निरसितुं प्रतिजानीते—**नापीति** ॥

यत्तु—प्रमेयत्वादिरूपेण भेदं [1]श्रुतिर्वक्तीति—तन्न; उक्तं हि खण्डने—'एकपदमुक्त्वा यदेवकारमादत्ते श्रुतिस्तेन सात्यन्तिकाभेद-

---

[1] णाभेदं–क. ग.

SGDF
Sri Gargeshwari Digital Foundation

अथ एकमेवेत्यादिश्रुत्यर्थविचारः

ननु—यद्यपि 'सलिल एको द्रष्टा अद्वैत' इत्यत्र सलिलशब्दस्य तत्सादृश्यात्स्वच्छत्वमात्रपरत्वात् तस्य च सर्वमलासंसर्गित्वस्वरूपस्याद्वैतेऽप्युपपत्तेः 'सदेव सोम्येदमग्र आसी-

---

परा'स चाखण्डाचिदेव, किंचिद्विशिष्टस्य विवक्षितत्वे गौणाभेद एव तथा स्याद्विशिष्टकेवलयोर्भेदसत्वेन तस्य भेदसामान्याविरोधित्वात्। यत्तु—सर्वं वस्तु स्वस्मादभिन्नमित्यद्वैतवाक्यार्थः, एवं 'नेह नाने'त्याद्यर्थोऽपि स एव; घटादिव्यक्तौ क्षणिकवादेन नानात्वप्रसक्तेरित्यादि—तन्न; ब्रह्माद्वैतस्यैव प्रकरणत्वात्[1]उक्ताभेदस्य भेदसामान्याविरोधित्वात्, भेदभेद्यसामान्यानिषेधेन मुख्याभेदबोधने बाधकाभावाच्च ॥

इत्यद्वैतश्रुतेर्बाधोद्धारः.

अथ एकमेवेत्यादिश्रुत्यर्थविचारः

सलिलशब्दस्य सलिलवाचकशब्दस्य। तेन तत्सादृश्येत्यत्र तत्पदस्य प्रक्रान्तसलिलबोधकत्वम्। स्वच्छत्वेति। त्वंपदार्थशोधकप्रकरणे जलरूपमुख्यार्थस्यान्वयासंभवाद्द्रष्टृपदेन ब्रह्मोक्त्वा तत्र सप्तम्यन्तत्वं सलिलपदस्य कल्पयित्वा जलाधेयत्वान्वयकल्पनस्यायुक्तत्वमिति भावः। एतेन—सलिलवत्स्वच्छीभूत इति बृहदारण्यकभाष्यव्याख्या न युक्ता; लाक्षणिकत्वेऽपि सलिलपदस्य क्लीबत्वात्, 'आप एवेदमग्र आसंस्ता आपः सत्यमसृजन्ते'त्यादिबृहदारण्यकात् 'आपो वा इदमग्र आसन्सलिलमेवे'त्यादिश्रुत्यन्तराच्च प्रकृते सलिलपदस्य सप्तम्यन्तत्वौचित्याच्चेति—परास्तम्; सृष्टिवाक्ये जलान्वयसंभवेऽपि प्रकृते तदसम्भवात्।

---

[1] प्राकरणिकत्वात्—ग.

SGDF Sri Gargeshwari Digital Foundation

दि'त्यत्र चाग्रपदस्य 'तदैक्षत नामरूपे व्याकरोदि'त्यादेश्च कालेक्षणनामरूपात्मकप्रपञ्चप्रापकस्याविद्यकद्वैतविषयकत्वेन वास्तवाद्वैतविरोधित्वाभावः; तथापि 'सदेव सोम्येदमग्र आसीदि'त्यनेन इदंशब्दोदितस्य विश्वस्य सदभेदेन सत्वमुक्त्वा पुनरद्वितीयपदेन तन्निषेधे व्याघातः, न हि 'सदासी'दित्यस्यासदासीदित्यर्थ इति—चेन्न; सद्व्यतिरेकेण नासीदित्यर्थस्यैव

क्लीबत्वत्यागस्तु छान्दसत्वात्। सलिलपदस्य सादृश्यरूपसंबन्धार्थकार्शआद्यच्प्रत्ययान्तस्य पुंस्त्वसंभवाच्च। 'सर्वप्रातिपदिकेभ्यः क्विब्वक्तव्य' इत्यनुशासनादाचारार्थकक्विबन्तसलिलशब्दात्पचाद्यच्प्रत्ययेन पुंस्त्वसम्भवेन सलिलमिवाचरतीत्यर्थकस्य सलिल इत्यस्य सम्भवाच्च विरोधित्वाभाव इति। नचाद्वैतस्याग्रसत्वादिद्वैतसंबन्धासंभवरूपविरोधासंभवेऽपि एकमेव सदद्वितीयमित्यादिपदैरखण्डस्वरूपस्य बोधो विरोधिविषयताशालिद्वितीयबोधात्मको न संभवतीति—वाच्यम्; द्वितीयसंबन्धज्ञानं प्रति महावाक्यजन्यज्ञानस्यैव मूलोच्छेदकत्वेन विरोधित्वात्। मूलोच्छेदकज्ञान एवारोपितभावना[1]नङ्गीकारात्। ग्राह्याभावाकारज्ञानविधया तूक्ताखण्डज्ञानं न तद्विरोधि; द्वितीयस्य तत्वेनाभानात्। एकरूपेण तत्तदभावाकारकस्यैव 'घटो न घट' इत्यादेर्विरुद्धत्वाद्बाधितस्यापि शाब्दत्वपक्षे तस्याप्यस्वीकाराच्च। **सदभेदेनेत्यादि।** सदभेदविशिष्टप्रपञ्च आसीदित्यर्थं प्रतिपाद्येत्यर्थः। **तन्निषेधे** प्रपञ्चनिषेधे। **व्याघातः** सत्वस्य प्रपञ्चे प्रतीतस्य व्याघातः। ननु—सदभिन्नस्य सत्वमिवाद्वितीयत्वं न विरुद्धम्; सदात्मनोभयोः संभवात्तत्राह— **न हि सदासीदित्यादि। असदासीदित्यर्थ इति।** सद्रूपमात्रस्य न

---

[1] भाना–क. ग.

SGDF
Sri Gargeshwari Digital Foundation

निषेधार्थत्वात् । विवृतं चैतद्भाष्यकारादिभिरारम्भणाधिकरणे । न च—सद्व्यतिरेकेणासत्वोक्तौ सदात्मना सत्यत्वमागच्छतीति— वाच्यम्; आगच्छतु नाम, को हि ब्रह्माभिन्नस्यासत्वसाधनाय

सत्वमुच्यते, किंतु सदभिन्नप्रपञ्चस्य । तथाच तन्निषेधेनासत्वरूपमिथ्यात्वलाभात्सत्वस्य चासीदित्यनेन लाभाद्विरोध इत्यर्थः ॥

घटादिकं स्वोत्पत्तिपूर्वं मृदेवासीदित्यादौ यथा घटाद्यभेदोपलक्षितमृदेवासीदित्यर्थस्तथा प्रकृतेऽपीदमभेदोपलक्षितं सदेवाग्र आसीदिति सदेवेत्यादेरर्थ इत्याशयेनाह—**सद्व्यतिरेकेणेति** । सदन्यत्वरूपेणेत्यर्थः । सदन्यदिति [1] शेषः । **निषेधार्थत्वात्** सदेवेत्येवकारार्थत्वादद्वितीयादिपदार्थत्वाच्च । एवंच प्रपञ्चे सत्वसंबन्धो बुध्यत एव । नेति न विरोधशङ्का; विशेष्यसङ्गतैवकारस्यान्ययोगव्यवच्छेदकत्वं च युक्तमिति सदन्यसामान्येऽग्रकालसत्वाभावो बुध्यत इति भावः । **एतत्** सदेवेत्यादि वाक्यम् । आरम्भणाधिकरण इति । 'सत्वाच्चावरस्ये' त्यादिसूत्रेष्विति शेषः । तत्र हि प्रागुत्पत्तेः कारणात्मनैव सत्वं कार्यस्य; 'सदेव सोम्येदमग्र आसीदि' त्यादाविदंशब्दगृहीतस्य कार्यस्य कारणे [2] सामानाधिकरण्यादित्यादिकमुक्तम् । **असत्वोक्तौ** अग्रकालासत्वोक्तौ अद्वितीयादिपदैः सदन्यसामान्यस्य निषेधोक्तौ च । **सदात्मना** सदभिन्नत्वेन । **ब्रह्माभिन्नस्येति** । ब्रह्माभिन्नत्वेनेति शेषः । उक्तश्रुत्येत्यादिः । तथाचोक्तश्रुत्या सदन्यत्वेन श्रुत्यन्तरेणानुमानादिना च सदाभिन्नत्वेनापि मिथ्यात्वसिद्धिः । सर्वस्य दृश्यस्य केनाचिद्रूपेणोक्तश्रुत्या मिथ्यात्वसिद्ध्यै-[3]वास्मदिष्टसिद्धिरिति भावः । नन्वग्रकालासत्वस्याग्रकालीनानिषेधप्रतियोगित्वस्य वा सदन्यसामान्ये बोधेऽपि न मिथ्यात्वसिद्धिः; व्याकृत-

---

[1] सदन्य इति–ग. [2] कारणेन–ग. [3] सिद्धौ–ग.

SGDF
Sri Gargeshwari Digital Foundation

प्रपञ्चस्य स्वकाले स्वसमानाधिकरणनिषेधप्रतियोगित्वासिद्धेरिति—चेन्न; उक्तसत्व[1]प्रतियोगित्वयोर्न प्रकृते धीः, किंतु इदमभिन्नमग्रे यदासीत्तत्सदेव एकमेवाद्वितीयमित्येवमुद्देश्यविधेयभावस्य विवक्षितत्वात्। अग्रे सदनुवादेनाखण्डसदद्वितीयविधानेनाग्रेसत्वेनानूद्यमानस्याखण्डसदद्वितीयस्यैव। तथाचावान्तरतात्पर्येणाद्वितीयादिपदैः[2] सदन्यसामान्यमिथ्यात्वबोधो न व्याहतः; सदन्यनिषेधेऽद्वितीयपदेन बोध्यमानेऽग्रकालानन्वयात्, यदग्रे इदमभिन्नमासीदित्येव कालान्वयात्। इत्थं च सद्व्यतिरेकेण नासीदित्यस्यैव निषेधार्थत्वादित्यत्र मूलवाक्येऽपि यदासत्तत्सदन्यन्नेत्यस्य सदेवासीदित्येतदर्थत्वात् तत्सदन्यशून्यमित्यस्याद्वितीयादिपदार्थत्वादित्यर्थः। एवंचाग्र आसीदिदमिति पदानि न व्यर्थानि। अग्रेऽसदेव कार्यस्य स्वरूपमिति शून्यवादस्य निरासाय तेषामनुवादत्वात्सदेकमेवाद्वितीयमित्युक्ते तच्छ्रवणमात्रेण मूढानां व्युत्पाद्यानां सन् घट इत्यादि प्रत्यक्ष[3]विरोधभ्रमेण व्यामोहात्तन्निरासार्थमवान्तरतात्पर्यविषये द्वितीयाभावेऽनन्वितार्थकस्याग्रह इत्यादेरुक्तत्वात्। न चैवमपि द्वितीयाभावस्य व्याप्यवृत्तित्वालाभान्न मिथ्यात्वसिद्धिरिति—वाच्यम्; सद्रूपे प्रतीतस्य तस्य परिच्छेदकाकाङ्क्षायां संकोचकाभावादेव सर्वकालस्यैव परिच्छेदकतया कल्पनात्। एवकारस्यावृत्त्या द्वितीयाभावायोगव्यवच्छेदबोधकत्वेन यदा यदा सद्रूपं तदा द्वितीयाभाव इति व्यापकत्वलाभाद्वा विशेष्यतावच्छेदकविशिष्टस्यैकव्यक्तिमात्रत्वे यत्र यत्र विशेष्यतावच्छेदकं तत्र तत्रायोगव्यवच्छेद इति दैशिकव्यापकत्वधियो वैयर्थ्यात्। अव्याकृतनामरूपावस्थैवाग्रशब्देन कालरूपाभिधीयत इति कालान्तरस्य तदानीमभावेऽपि न क्षतिः। यदि च इदमिति सामानाधिकरण्यं बाधायाम्, अग्र आसीदिति च न विवक्षित-

---

[1] उक्तासत्व—क. ग. [2] णाद्वितीयादेः—क. [3] प्रत्यक्षादि—क. ग.

SGDF
Sri Gargeshwari Digital Foundation

प्रवृत्तो यो बिभीयात् । अद्वैतवाक्यस्य च षड्विधतात्पर्यलिङ्ग-वत्तया बलवत्त्वेनाविद्यकद्वैतप्रतिपादकत्वं सृष्ट्यादिवाक्यानामिति श्रवणस्वरूपनिरूपणे वेदान्तकल्पलतिकायामभिहितमस्माभिः । इहाप्यभिधास्यते षड्विधतात्पर्यलिङ्गानि प्रदर्शयद्भिः । अत एकविज्ञानेन सर्वविज्ञानप्रतिज्ञयोपक्रमात् 'ऐतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसी'त्युपसंहाराच्चाद्वैतस्यैव महा-प्राकरणिकतया तदनुसारेण तद्वाक्यस्थपदानां व्याख्येयत्वाव-

मिति न कालसंसर्गधीः, तथाचाखण्डसदेव सदेवेत्यादेरर्थ इत्यैतरेयक-भाष्यरीतिराश्रीयते तदा नाम्रादिपदप्रयुक्ताशङ्केति ध्येयम् ॥

ननु—अतात्विका[1]द्वैतमद्वैतवाक्यस्य तात्विकद्वैतं द्वैतवाक्य-स्यार्थोऽस्तु; स्वतः प्रामाण्याविशेषात्, द्वैतवाक्यमध्यस्थाद्वैतवाक्यस्यो-पांशुयाजवाक्यमध्यस्थविष्ण्वादिवाक्यवत्स्तुत्यादिपरतया नेतुं शक्यत्वा-च्चेत्यत आह—**अद्वैतवाक्यस्येत्यादि । आविद्यकेति** । फलव-त्सन्निधावफलं तदङ्गमिति न्यायेन द्वैतवाक्यानामद्वैतवाक्यशेषत्वात्तदनु-सारेण कारणव्यतिरेकेण कार्यं नास्तीत्यादिज्ञापनद्वाराऽद्वैतब्रह्मण्येव सृष्ट्यादिवाक्यानां तात्पर्यम् । तदुक्तं शारीरकसंक्षेपे—

अस्यैव तत्वविनिवेदनशक्तिभाजः
संसारमूलविनिवृत्तिफलप्रसूतौ ।
सामर्थ्यमस्ति पटुभिः परिबृंहितत्वाद्वे-
दान्तभूमिगतपञ्चविधार्थवादैः ॥
सृष्टिस्थितिप्रलयसंयमनप्रवेशव्यापारजात-
कथनच्छलतः प्रवृत्तैः ।
सानुग्रहादवगतिः खलु तत्वमादे-
र्वाक्यात्परस्य घटते न ततोऽपरस्मात् ॥ इति ॥

[1] तात्विका--क. ग.

SGDF
Sri Gargeshwari Digital Foundation

धारणात् । नानार्थपदानामर्थान्तरोपस्थापकत्वसंभवेऽपि प्रकृत-वाक्यार्थानन्वयितया तत्परित्यागेन प्रकृतवाक्यार्थानुकूलपदार्थोपस्थितिपरत्वमेवास्थेयम् । तत्र न द्वितीयमद्वितीयमिति तत्पुरुषाभ्युपगमे न द्वितीयम्, किंतु प्रथमं तृतीयं चेत्यर्थः स्यात्, स च न संभवति; तयोरपि किंचिदपेक्ष्य द्वितीयत्वात्, अतो न विद्यते द्वितीयं यत्रेति बहुव्रीहिरेवादरणीयः। न च एकेनैवाद्वितीयपदेन भेदत्रयनिषेधसंभवे एकावधारणपदयोर्वैयर्थ्यमिति—वाच्यम्; विजातीयं किंचिदपेक्ष्य द्वितीयत्वावच्छिन्ननिषेधस्याद्वितीयशब्दार्थत्वात् । अयं चात्र संकोचो बलीवर्दपदसान्निधानाद्गोपद इव सजातीयस्वगतभेदनिषेधकैकावधारणपदसन्निधिप्रयुक्त एव । तदुक्तम्—

वृक्षस्य स्वगतो भेदः पत्रपुष्पफलादिभिः ।
वृक्षान्तरात्सजातीयो विजातीयः शिलादितः ॥
तथा सद्वस्तुनो भेदत्रयं प्राप्तं निवार्यते ।
एकावधारणद्वैतप्रतिषेधैस्त्रिभिः क्रमात् ॥ इति ।

अपरस्मात् अस्थूलमित्यादितः । पदानां अद्वितीयादिपदानाम् । **प्रकृतेति।** एकमेवाद्वितीयमित्येतदित्यर्थः । **वाक्यार्थेति।** अखण्डब्रह्मरूपेत्यर्थः । प्रथमादिरूपस्याद्वितीयपदार्थस्य न केवलमखण्डवाक्यार्थविरोधित्वम्, किं त्वसंभवादपि निरास इत्याह—**तत्रेत्यादि। द्वितीयत्वादिति।** तयोः प्रथमत्वादिना नाद्वितीयपदबोध्यता किंतु द्वितीयभिन्नत्वेन सा च न संभवति; द्वितीयत्वादिति भावः। **भेदत्रयेति।** भेदभेद्यमात्रस्य द्वितीयत्वादद्वितीयपदेन दृश्यमात्रनिषेधसंभव इति भावः। **अपेक्ष्येति।** विजातीयद्वितीयत्वावच्छिन्नप्रतियोगिताकनिषेधोऽर्थ इति भावः। **संकोचः** द्वितीयपदस्य विजातीयद्वितीयपरत्वम्। **एकावधारणद्वैतप्रतिषेधैरिति।**

SGDF
Sri Gurgeshwari Digital Foundation

स्वगतभेदो नानात्वरूपजीवेश्वरभेदः। सजातीयभेदोऽत्र द्रव्यत्वादिना सजातीयपृथिव्यादिभेदः । विजातीयभेदो गुणादिभेदः । अथवा जडभेदो विजातीयभेदः । चैतन्यभेदः

एकपदेन एवकारेण द्वैतार्थकद्वितियपदयुक्तेन प्रतिषेदार्थकनञा चेत्यर्थः । अत्र द्वितीयपदस्य विजातीयद्वितीयलक्षणया तच्छून्यबोधादर्थात्तादृशद्वितीयस्य भेदो निषिध्यते । 'आत्मा वा इदमेक एवाग्र आसीन्नान्यत्किंचन मिषदि'त्यत्र धातूनामनेकार्थत्वात्, मिषदिति आसीदित्यर्थ[1] मित्यैतरेयभाष्ये व्याख्यानात्तदेकवाक्यतया प्रकृते द्वितीयपदस्यान्यार्थकत्वात् । लक्षणावश्यकत्वे दित्वसङ्ख्यापूरकत्वादित्यागेनात्मान्यविजातीयत्वेन लक्षणाया एव युक्तत्वात्तादृशत्वेन निषेधे बाधकाभावादविनिगम्यत्वाच्च । विशेष्यस्य भेदस्येव विशेषणस्य भेदस्यापि शाब्द एव वा निषेधः । एकपदस्य केवलार्थकत्वेन कैवल्यस्य च स्वान्यशून्यत्वरूपतया प्रकृते संकोचेन जीवेश्वरादिरूपस्वान्यशून्यबोधकत्वाद्भेदनिषेधबोधकत्वम् । एवकारस्याप्यन्यतादात्म्यव्यवच्छेदबोधकत्वेऽपि प्रकृते पृथिव्यादिरूपसजातीयस्वान्यतादात्म्यशून्यत्वबोधकत्वेन विशेषणीभूतानां सजातीयतद्गतभेदानामुक्तरीत्या निषेधबोधकत्वम् । एवंच भेदत्रयस्य पदत्रयेण निषेधोक्तिर्ब्रह्मभिन्नसामान्यमिथ्यात्वे प्रकृतश्रुतेः[2] पर्यवसानोक्तिश्च न व्याहता । यदि च भेदत्रयमात्रस्य प्रकृते शाब्दो निषेधो भेद्यानां त्वार्थ इत्युच्यते, तदा द्वितीयाभावे श्रुतेरवान्तरतात्पर्यसङ्कतावपि भेदमात्रपरतया सङ्कोचे मानाभावः । विजातीयादिभेद्यानामपि द्वितीयादिशब्दैर्बोधनसंभवादिति ध्येयम् ॥

ननु—पृथिव्यादि न सजातीयम्; शुद्धब्रह्मणो द्रव्यत्वाद्यनङ्गीकारपक्षे तदसंभवादित्यत्राह—**अथवेति । चैतन्यभेद इति।**

---

[1] मिषदिति पदमासीदित्यर्थक. इति स्यात्. [2] प्रकृते श्रुतेः–ग.

SGDF
Sri Gangeshwari Digital Foundation

सजातीयभेदः । ज्ञानानन्दादिधर्मभेदः स्वगतभेदः । यदि च 'अस्य गोर्द्वितीयोऽन्वेष्टव्य इत्युक्ते गौरेव द्वितीयोऽन्विष्यते नाश्वो न गर्दभ' इति महाभाष्यानुसारात्समानजातीय-द्वितीयपरत्वं द्वितीयशब्दस्य, तदा अद्वितीयशब्दस्य सजातीय-भेदनिषेधपरत्वम्; विजातीयस्वगतभेदनिषेधपरत्वं तु एकाव-

---

स्वभिन्नत्वे सति चिदात्मकत्वं साजात्यं जीवादौ वर्तत इति **तन्निष्ठभेदः** सजातीयभेदः, स च स्वस्मिन्नपि प्रसक्तः, स्वस्य सर्वानुगतत्वादिति भावः । **स्वगतभेद इति ।** ज्ञानानन्दादौ स्वरूपे ब्रह्मधर्मत्वस्य कल्पितत्वात्तद्गतभेदः स्वगत इति भावः । व्यावर्तकपदान्तरयुक्तस्य यद्धर्मविशिष्टवाचकपदस्य सन्निहितं द्वितीयपदं तद्धर्मविशिष्टं द्वितीय-मभिधत्ते । तथाचास्य गोर्द्वितीय इत्यादौ व्यावर्तकेनास्येति पदेन युक्तस्य गोपदस्य सन्निहितेन द्वितीयपदेन गोरूपद्वितीयबोधनेऽपि प्रकृते व्यावर्तकपदान्तराभावान्न सजातीयद्वितीयबोधकत्वम् । अतएव 'द्वितीयगामी न हि शब्द [1]एष नः' इत्यादौ द्वितीयसामान्यपरत्वम् । सजातीयव्यक्त्यन्तराभावादपि तस्य न सजातीयपरत्वम् । यद्धर्मविशिष्ट-विषयकबोधे तात्पर्यं तद्धर्मेणैव हि साजात्यं वाच्यम्; न चात्र किंचि-द्धर्मविशिष्टतात्पर्यकं सत्पदमित्याशयेन यदि चेत्यनेनास्वारस्यं सूचितम् । जीवेशादेरिव प्रपञ्चस्यापि कल्पितं चिदात्मकत्वमादाय सजातीयत्व-संभवः । चित्स्वरूपत्वं तु न; जीवादेरप्युपहितादिरूपेण मिथ्यात्वात्, ज्ञानानन्दादेरपि सजातीयत्वम्; कल्पितभेदचिदात्मकत्वयोः सत्वात्, तथाच सजातीयनिष्ठभेदोपहितरूपेण ज्ञानानन्दादेर्जडानां च निषेध-संभवाद्रूपान्तरेण स व्यर्थः । किंच सजातीयस्वान्यत्वादिना पदत्रयस्य लक्षणैव वाच्या; द्वितीयगामीत्यादौ स्वान्यत्वेन लघुरूपेणाप्याजानिक-

---

[1] एव—ग.

SGDF
Sri Gargeshwari Digital Foundation

धारणपदयोर्यथेष्टं व्याख्येयम्। अथवा द्वितीयपदेनैव भेदत्रय-निषेधः, एकावधारणपदे तु सङ्कोचशङ्कापरिहाराय। यत्तु केन-चित्प्रलपितम्—द्वितीयशब्दः सहायवाची; 'असिद्वितीयोऽनु-ससार पाण्डवमिति प्रयोगात्, असिद्वितीयः असिसहायः' इति महाभाष्योक्तेश्च; तथाचाद्वितीयमसहायमित्यर्थोऽस्तु। एवमेकशब्दस्यापि नानार्थत्वेनाविरुद्धार्थमादायोपपत्तौ न मिथ्यात्वपर्यवसायिताऽऽस्थेया। तथा च—'एके मुख्यान्य-केवला' इत्यमरः, एकशब्दोऽयमन्यप्रधानासहायसंख्याप्रथम-समानवाचीति 'एको गोत्र' इति सूत्रे कैयटः। 'ष्णान्ता

प्रयोगाच्चादृशगुरुरूपेण शक्त्यसंभवात्। तथाच पदत्रयलक्षणापेक्षया मुख्यवृत्त्या स्वान्यत्वेन द्वितीयपदाद्बोधः, पदान्तरं तु तदसङ्कोचतात्प-र्यकमिति युक्तम्। न च पदान्तरादेव तेन रूपेण बोधोस्तु, द्वितीयपदं तु तदसङ्कोचतात्पर्यकमिति किं न स्यदिति—वाच्यम्; तथा सत्यक्षर-त्रयात्मकद्वितीयपदनञ्पदयोः स्वार्थपरत्वाभावकल्पनापातात्। एकादि-पदानां मुख्यत्वं तु न विनिगमकं 'विप्रतिषिद्धधर्मसमवाये भूयसां स्यात्सधर्मत्वमि'ति न्यायेन बहुषु मुख्यवृत्त्यबाधस्योचितत्वात्। अद्वयानन्दविज्ञानघन एवास्मीत्यादिश्रुत्यन्तरेष्वद्वयपदस्यापि मुख्यत्वा-च्चेत्याशयेनाह—अथवा द्वितीयेति। अन्यप्रधानेत्यादि। 'प्रजा-मेका रक्षत्यूर्जमेका' इत्यादावन्यार्थः, 'एकपुरुषो धनुष्मा'नित्यादौ प्रधानार्थः, 'एकहल्मध्येऽनादेशादे'रित्यादावसहायार्थः, 'एको द्व-वित्यादौ सङ्ख्यार्थः, 'एकेऽल्पप्राणा'इत्यादौ प्रथमार्थः, अल्प-प्राणा लघुप्रयत्नोच्चारणीया वर्णाः। 'तेनैकदिं'गित्यादौ समानार्थः, 'एतावेकधना'वित्यादौ साधारणार्थोऽपी'ति पदमञ्जरी। ष्णान्ते-त्यादि। अष्टानामित्यत्र 'अष्टन आ विभक्ता'वित्यात्वे कृते नान्त-

SGDF
Sri Gargeshwari Digital Foundation

षडि' ति सूत्रे महाभाष्यकारोऽपि एकशब्दोऽयं बह्वर्थः, अस्ति-संख्यार्थः, अस्त्यसहायवाची, अस्त्यन्यार्थ इत्यादि व्याख्यात-वान् । तथाच जीवादिभ्योऽन्यत्वं प्राधान्यं वा एकशब्दा-

त्वाभावात् षट्संज्ञा न स्यात्ततश्च 'षट्चतुर्भ्यश्चे' ति नुडपि न स्यादि-त्याशङ्क्य षट्संज्ञायामुपदेशवचनं शताद्यष्टनार्थमिति समाधाय, अथवा षकारनकार[1]सङ्ख्या, षट्संज्ञकेत्यर्थ इति समाधानान्तरमुक्त्वा, तर्हि एकास्ता इत्यादौ, 'षड्भ्यो लुगि' ति लुक्स्यादित्याशङ्क्य, एक-शब्दोऽयं नानार्थ इत्याद्युक्त्वा योऽन्यार्थे वर्तते तस्यैवायं प्रयोग-इति समाहितम् । **प्राधान्यं वेति** । यद्यपि प्राथम्यादि[2]कमपि तदर्थः परेणाशङ्कितम्, तथापि सर्वकार्यमूलकारणत्वेनोक्तेनैव तल्ला-भात् अविद्यादृष्टादिसहायापेक्षत्वेनासहायत्वासंभवात् अद्वितीयत्वविरोधेन सख्याद्यसंभवादेकवचनेनैव प्राप्तिसंभवाच्च सर्वलीलाविग्रहाणां नाना विधतत्तत्कार्यकारित्वेन कार्यतः साम्यासंभवात् । सर्वशरीरावच्छिन्नेश-व्यक्तेरेकत्वेनैव गुणतः सम्याभावात् तद्भिन्नत्वे सति तद्गुणजातीय-गुणवत्वस्यैव गुणतः साम्यत्वात् असहायत्वं कैवल्यम्, तच्चैक-हलमध्य इत्यादौ सङ्कोचकप्रमाणवशाद्धलन्तरायुक्तत्वादिरूपम् । प्रकृते सङ्कोचकाभावात्स्वान्यसामान्यशून्यत्वमेवेति तदर्थकमेकपदमस्मदिष्टम् । प्राथम्यं तु प्राधान्यमेव । 'तेनैकदिगि' ति सूत्रेषु सुदाम्ना पर्वतेन सहैका समाना दिगस्या इति सौदामनीत्युक्त्या समानार्थकत्वकल्पनं तु न युक्तम्; एकजातीयत्वेन समाने गौणप्रयोगसंभवात् । एकधना-वित्यत्राप्येकजातीययथेष्टविनियोगार्हत्वेन गौणप्रयोगः । तथाच सुदाम्नः सदृशदिक्सौदामनी सुदामाख्यपर्वतयुक्तदिक्सदृशदिग्युक्तेति यावत् । चैत्रमैत्रौ सदृशधनौ चैत्रो मैत्रीययथेष्टविनियोगार्हधने यथेष्टं विनि-योक्तेति यावत् । अत एवामरः प्रथमाद्यर्थं नोक्तवानित्यतश्चान्यत्वं

[1] नकारआकारान्ता–ख. ग.　　　[2] प्राधान्यादि–ग.

SGDF
Sri Gargeshwari Digital Foundation

र्थोऽस्तु । एवमन्यान्यपि श्रुतिपदानि व्याख्येयानीति, तत्पूर्वोक्तयुक्तिभिरपास्तम् । विस्तरेण च वक्ष्यते तात्पर्यनिरूपणे । तदेवं सद्रूपे ब्रह्मणि पदत्रयेण भेदत्रयनिषेधात्तद्भिन्नमिथ्यात्वे

प्राधान्यं चेति द्वयमेवाचार्यैरुक्तम् । तदुभयमपि यद्यप्यद्वितीयपदविरुद्धत्वेन सङ्ख्यातुल्यं, तथाप्येकवचनात्सा प्राप्ता । तत्तु स्रष्टृत्वादिना प्राप्तमपि न शब्दादित्यतः सा नोक्तेति ध्येयम् । **एवमन्यानीति ।** 'नेह नाने'त्यादीनि ब्रह्मणः प्रपञ्चे पृथग्भावनिषेधकानि । अथवा 'महान्तं विभुमि'त्यादिनोक्तानां धर्मादीनां नानात्वेन निषेधः । ब्रह्मणि विभुत्वादिरूपं धर्मादिकं नानासन्नास्तीत्यर्थः[1] । **पूर्वोक्तेति ।** अद्वैतब्रह्मणः प्राकरणिकतया तदनुसारेण नानाभूतस्य किंचनेति पदोपस्थापितदृश्यमात्रस्य निषेधौचित्यात्, अन्यथा विभुत्वादिधर्मादीनां निषेधे किंचनेत्यस्य संकोचापत्तेः । नानापदोक्तस्य पार्थक्यस्य निषेधे ब्रह्मण्येव पार्थक्यनिषेधाद्ब्रह्म नाना न किंत्वेकमित्यर्थः स्यान्नतु प्रपञ्चो न ब्रह्मणः पृथगित्यर्थः । ब्रह्मण्युक्तनिषेधस्तु 'यदेवेह तदमुत्रे'त्यादिपूर्ववाक्ये कठवल्ल्यां सिद्ध एव ॥

अथ—यदेवेत्याद्युक्तप्रपञ्चमात्रं 'नेह नानेत्यत्रत्येहपदेनोच्यत इति तत्र य इह नानेवेत्यत्रत्येहशब्दोक्तब्रह्मणः पार्थक्यं निषिध्यत इति—चेन्न; पूर्वोक्तेहशब्दसमानार्थकत्वे इहशब्दो हि न प्रपञ्चमात्रं वदेदित्यमुत्रेत्यप्युच्येत, य इहेत्यत्रत्येन च इहशब्देन पार्थक्यप्रतियोगितया न ब्रह्मोपस्थितिसंभव इति, प्रतियोगिविशेषानुपादानात्पार्थक्यसामान्यस्य प्रपञ्चे निषेधेऽस्मदिष्टसिद्धिः, किंच नेति पदवैयर्थ्यं च । अथ—गुणगुण्याद्यवयवावयवीत्यादिप्रयुक्तं यद्ब्रह्मणः प्रपञ्चे पार्थक्यं तन्नानाविधं किमपि नास्तीत्यर्थेन तत्सार्थक्यमिति—चेन्न; 'नानाविष्णुं मोक्षदो

---

[1] सन्नस्तीत्यर्थः—ग.

SGDF
Sri Gangeshwari Digital Foundation

नान्यदेव' इत्यादिप्रयोगेषु पार्थक्यार्थकस्य नानाशब्दस्य विनाशब्दवन्निपातत्वेन स्वार्थिकनञ्प्रत्ययान्तनञ्स्वरूपत्वेन 'विनञ्भ्या' मित्यादिसूत्रे महाभाष्याद्युक्तत्वेन च तत्र किंचनेति भामार्थस्याभेदान्वयस्याव्युत्पन्नत्वात्। न हि विष्णुं किंचन विना देव इति घटं किंचन विना पट इति च प्रयुञ्जते। यत्तु—विभुत्वादेः प्रकृतत्वात् 'एवं धर्मान् पृथक्पश्यन्' इत्यादिवाक्यशेषाच्च किंचनेति विभुत्वादिधर्मशरीरादि[1]परमिति—तन्न;

'यथोदकं दुर्गे वृष्टं पर्वतेषु विधावति ॥
एवं धर्मान् पृथक्पश्यंस्तानेवानुविधावति ॥
यथोदकं शुद्धे शुद्धमासिक्तं तादृगेव भवति ॥
एवं मुनेर्विजानत आत्मा भवती'ति वाक्ये—

ब्रह्मधर्मदृश्यमात्रस्य दृष्ट्वा तन्मात्राप्तिरित्यनेन दृश्यमात्रं निन्दित्वा जलक्षिप्तजलदृष्टान्तेन ब्रह्मैक्यज्ञानेनात्मनो ब्रह्मत्वोक्तेस्तत्रत्यधर्मपदस्य दृश्यमात्रार्थकत्वात्, पूर्वं 'पराचः कामाननुयन्ति,' ध्रुवमध्रुवेषु,' 'स्वप्नान्तं जागरितान्तं च,' 'भूतेभिर्व्यजायते'ति दृश्यमात्रस्य प्रकृतत्वात् 'ईशानो भूतभव्यस्ये'ति परत्राप्युक्तत्वात्, 'तदु नात्येति कश्चने'ति पूर्वोक्तकिंशब्दोपात्तस्य तस्य किंचनेत्यनेन ग्रहणौचित्यात्। तस्माद्यदेवेह तदमुत्रेत्यादि ब्रह्मण्येव सर्वप्रपञ्चप्रसक्तिमुक्त्वा ब्रह्माणि वक्ष्यमाणे प्रपञ्चनिषेधे सत्यप्यन्यत्र प्रपञ्चसत्वशङ्कां निरस्य एतद्वै तदिति पूर्वं ईशानो भूतभव्यस्येति पश्चाच्च सन्निहितं ब्रह्म इहेत्यनूद्य, किंचनेत्यनेनोक्तस्य दृश्यमात्रस्य निषेधः। नानेति नञ्शब्दप्रकृतिकं भेदरूपपार्थक्यार्थकम्; भेदे च प्रतियोगित्वं निषेधाधिकरणत्वेनोपस्थितस्यैव न तु निषेध्यस्यासंभवादिति ब्रह्मभिन्नं किमपि ब्रह्मणि नास्तीति कठवल्लीवाक्यार्थः। एवं बृहदारण्यकादिस्थले इह[2] नानेत्यत्रापि बोध्यम्।

---

[1] शरीरत्वादि-ग. [2] स्थनेह-ग.

SGDF
Sri Gargeshwari Digital Foundation

यदेवेहेत्यादौ इह जीवोपाधावमुत्र ईश्वरोपाधौ यदेवामुत्र ईश्वरोपाधावपि तदेव नानेव स्वल्पभेदमपि 'इवोपमायां स्वल्पत्वे' इत्यमरात्, इदमुक्तं जीवब्रह्मैक्यम्, मनसा आगमाचार्योक्तिसंस्कृतेन। एकत्वोपयोगिपदार्थ शुद्धिमाह—**नेह नानेति**। इह उक्तोपाधिसंबन्धे चैतन्ये इति भाष्यानुसारिव्याख्यानमविरुद्धम्। ननु—नानाशब्दस्य भिन्नार्थकत्वेऽपि 'न जीर्णमलवद्वासाः स्नातकः स्या'दित्यादाविव विशेषणस्य नानात्वस्य निषेधोऽस्तु 'विशेष्यं नाभिधा गच्छेत् क्षीणशक्तिर्विशेषणे' इत्युक्तेरिति—चेन्न; अप्राप्तत्वे विधेरिव बाधकाभावे निषेधस्यापि विशेष्ये संभावाद्विनिगमकाभावाच्च क्षीणशक्तित्वाभावात्। अन्यथा विशिष्टविधिनिषेधयोरुच्छेदापत्तेः बाधकाभावश्चोक्त एव। दृष्टान्तेतु वासोनिषेधे नग्नतानिषेध एव बाधकः। किंच भेदरूपस्य विशेषणस्य निषेधोऽपि त्वदनिष्टः। न हि त्वया ब्रह्मप्रपञ्चयोरत्यन्ताभेदः स्वीक्रियते। त्वदङ्गीकृतो विशेषोऽपि भेदस्यैव नामान्तरम्॥

यत्तु नेह नानास्तीत्यस्य ब्रह्मणि विनाभूतं किमपि नास्तीत्यर्थः; 'विनञ्भ्यां नानाञौ न सह' इति सूत्रेण न सहेत्यर्थकाभ्यां नानाञोर्विधानात्, तथाचाविनाभूतं[1] सर्वं तत्रास्तीति लभ्यते। न हि वह्निं विना धूमो नास्तीत्युक्ते धूममिथ्यात्वं लभ्यत इति तन्न; 'पृथग्विनान्तरेणर्ते हिरुङ्नाना च वर्जने' इत्यमरोक्तेर्वर्जनं विनाशब्दार्थः। तच्च नञर्थस्यात्यन्ताभावस्य भेदस्य वाधिकरणसंबन्धः वह्निं विना धूम इत्यादौ वह्न्यत्यन्ताभाववत्संबन्धः। नीलं विना तेजोरूपवत्, विना वायुः स्वरूपं विना किमपि नास्तीत्यादौ, नीलादिभिन्नतदात्म्यं प्रतीयते, नानाशब्दस्य तु भिन्नसंबन्ध एवार्थः। तत्रापि भेदांशमात्रं शक्यम्, अधिकरणसंबन्धस्त्वधिकरणनिष्ठसंबन्धरूपो विशे-

---

[1] विनाभूतं—ग.

SGDF
Sri Gargeshwari Digital Foundation

षणतात्वादिरूपेण वाक्यार्थः । ' अन्यथा नञ्पदस्य तत्र शक्त्यभावेन नानाञ्प्रत्यययोः स्वार्थिकत्वेन भाष्यादावुक्तत्वेन च नानापदार्थविषया तल्लाभासंभवात् । नानाविष्णुं मोक्षदो नेत्यदावपि मोक्षदो विष्णुभिन्नो नेत्यर्थः । उक्तसूत्रस्याप्यत्रैव तात्पर्यं, उक्तामरोक्तिमात्रेण नानाशब्दस्य विनाशब्दसमानार्थकत्वे पृथक्छब्दस्यापि तदापत्तेः । मन्मते त्वभावव-त्संबन्धस्य वर्जनशब्देनोक्तत्वात् । पृथक्पदस्य तद्बोधकत्वेप्युक्तरीत्या भिन्नत्वरूपेण पृथक्तागुण[1]रूपेण वाऽभाववच्छक्यम् । विनाशब्दार्थे प्रयोगाभावस्तु नानाशब्देऽपि तुल्यः; तस्य तथा प्रयोगसत्वेऽपि विनाशब्दस्येव भिन्नतादात्म्यार्थकत्वस्यापि संभवात् भिन्नात्मकं किमपि नास्तीत्यर्थे बाधकाभावात् । ननु—ब्रह्मणि निषिद्धमपि दृश्यमन्यत्र सत्वसंभवान्न मिथ्या; ' यस्मिन्द्यौः पृथिवी ' त्यादिना ब्रह्मणि प्राप्तस्य तत्र निषिद्धत्वेन मिथ्यात्वोक्त्या तु तस्यैव शास्त्रस्य विरोध इति— तन्न[2] कारणत्वान्यथानुपपत्तिप्राप्तब्रह्मसंबन्धस्योक्तशास्त्रेणानुवादाद्धर्मादि-शास्त्रस्येव तच्छास्त्रस्यापि निषेधशास्त्रेण बाध्यत्वाच्च । ननु–सर्वदृश्यानां ब्रह्मणः शरीरत्वेन विशेषणत्वाद्विशिष्टं ब्रह्माद्वितीयमित्यद्वैतश्रुत्यर्थः । अविमान[3]मद्वैतमुपासनार्थं वैराग्यार्थं वोक्तामिति वेति–चेन्न[4]; एकमेवा-द्वितीयमित्यादेः शुद्धब्रह्मप्रकरणस्थत्वात् विशिष्टाद्वैतस्याशब्दार्थत्वात् ' तमेव विदित्वेत्यादिश्रुत्या शुद्धस्यैव ज्ञेयत्वेनोक्तत्वात् इहेत्यादेरपि शुद्धब्रह्मबोधकत्वात् उपासनादेरश्रूयमाणत्वाच्च । अथाद्वितीयशब्देन दृश्यमात्रनिषेध इत्ययुक्तम्[5]; ' आत्मा वा इदमेक एवाग्र आसीन्नान्य-त्किंचन मिष ' दित्यादौ दृश्यस्य मिषत्वेन निषेधादत्रापि तथा वाच्य-त्वात् ' छागो वा मन्त्रवर्णा, दितिन्यायात्पश्वादिसामान्यशब्दस्य विशेष-परत्वत् । किंच द्वितियशब्दः समद्वितीये व्युत्पन्न इति न तस्य तद-

[1] पृथक्त्व–ग.   [2] चेन्न–ग.   [3] अविद्यमान–क. ग.   [4] क्तामिति—चेन्न–ग.   [5] इत्युक्तम्–ग.

SGDF
Sri Gargeshwari Digital Foundation

र्थत्वे सङ्कोचः । 'एक एवाद्वितीयोसावश्वमेधे क्रतुष्वपीत्या[1] दिस्मृतौ लोके च तथा प्रयोगेपि[2] 'एक एवाद्वितीयो भगवांस्तत्सदृशः परो नास्तीति श्रुतेः

ज्ञानानन्दाद्यभिन्नत्वादेकः सर्वोत्तमत्वतः ।
अद्वितीयो महाविष्णुः पूर्णत्वात्पुरुषः स्मृतः ।
भेदाभेदनिवृत्त्यर्थमेवशब्दोऽवधारकः ।

इति स्मृत्युक्तव्याख्यानमपि तत्र मानमिति—चेन्न । आत्मा वेत्यादौ धातूनामनेकार्थत्वात् ामषदित्यस्यासीदित्यर्थ इति भाष्ये व्याख्यानात् अद्वितीय इति पदोपसंहारस्य मिषदित्यस्योन्मिषदित्यर्थकतया व्याकृतं किंचनान्यदग्रे नासीदित्यर्थस्य च सम्भवेनाविरोधाच्च । अत एवासदेवेदमग्र आसी' दिति श्रुत्यन्तरे 'असद्व्यपदेशा'दित्यादिसूत्रे व्याकृतमेवासीदित्यर्थ उक्तः । द्वितीयशब्दस्य तु सङ्कोचेनैव सजातीयान्यबोधकत्वोपपत्तौ तत्र पृथग्व्युत्पत्तिकल्पने मानाभावः । सजातीये सङ्कोचोऽपि यत्र किंचित्प्रकारेण बोधे स्वतन्त्रतात्पर्यं साधारणधर्मोपादानं वा तत्रैव, यथा 'अयं राजा अद्वितीयः' 'अश्वमेधेऽद्वितीयः' इत्यादौ, प्रकृते तु न तथेति तत्र मानाभावः । सर्वोत्तमत्वादेरद्वितीय इति स्मार्तव्याख्यानं त्वविरुद्धम्; अथवा जडभेद इत्याद्युक्तपक्षे सर्वजडाधिष्ठानत्वस्यैव सर्वोत्तमत्वरूपत्वात् भेदाभेदनिवृत्तिशब्देन ब्रह्मभेदाभेदयुक्तजीवेश्वरादिनिषेधस्योक्तत्वात् विशिष्टकेवलयोर्भिन्नसत्ताकभेदाभेदयोः स्वीकारात् । उक्तस्मार्तव्याख्यानादप्येकपदादेरन्याद्यर्थकत्वमपास्तम् । यत्तु—नानाशब्दस्यानेकवाचकत्वाद्भावप्रधानत्वादनेकत्वमर्थः, तथा च ब्रह्मण्यनेकत्वं नेति नानेत्यस्यार्थ इति, तल्लक्षणापत्त्या एकवचनप्राप्तत्वसम्भवादिना च निरस्तं ज्ञेयम् । अनेकाश्रये ब्रह्मण्यनेकनिषेधे चानेकमिथ्यात्वं सिद्धमेवेत्यास्तां विस्तरः ॥

[1] वश्वमेधक्रतुष्वपीत्या—ग. [2] प्रयोगोऽपि—ग.

SGDF
Sri Gargeshwari Digital Foundation

पर्यवसितं 'एकमेवाद्वितीय'मिति वाक्यम्। एवमन्या अपि श्रुतयः स्मृतयश्च ग्रन्थविस्तरभयान्नोदाहृताः। स्वयमेव सूरिभिराकरे द्रष्टव्याः॥

इत्यद्वैतसिद्धौ सर्वाद्वैतश्रुतेरद्वैततात्पर्यकत्वनिर्णयः

एवमन्या अपीति। 'यत्र त्वस्य सर्वमात्मैवाभू' दिति श्रुतिरपि सर्वमिथ्यात्वे मानम्; अस्य प्रमातुः यत्र तत्वदर्शनकाले सर्वाभेदोपलक्षित आत्मैवाभूत् आत्मान्यन्नाभूदित्यर्थात्प्रमातृस्वरूप आत्मान्यसंबन्धिन्यात्मान्याभावसंबन्धलाभात्। अथवा सर्वमात्मेति बाधायां सामानाधिकरण्यम्; तथाच सर्वाभावोपलक्षित आत्मा यत्राभूदित्यर्थः। सर्वपदस्यात्मान्यसर्वपरत्वेनासङ्कोचलाभार्थमेवकारः। तथाचोक्तोपलक्षिताखण्डात्मार्थकस्यावान्तरतात्पर्येणात्मनि तदन्यसर्वाभावबोधनान्मिथ्यात्वपर्यवसायित्वम्। 'यस्मिन् सर्वाणि भूतान्यात्मैवाभूद्विजानत' इत्यादावपीयं रीतिः। नन्वेतद्वाक्यात्पूर्वं 'यथा सैन्धवखिल्य' इत्यादिना सैन्धवखण्डस्य समुद्र इव विज्ञानघनस्य जीवस्य ब्रह्मणि स्थितिर्मोक्षो न त्वैक्यमिति सिद्धान्त उक्तः। न ह्यत्र समुद्रो जलराशिः किंतु जलखातो वरुणो वा; पूर्ववाक्ये सर्वासामपां समुद्र एकायनमित्युक्तेः, नचायमेवा[1]पामयनम्, नचेश्वरस्थानीयाभ्यां खातवरुणाभ्यां सैन्धवखिल्यस्य जीवस्थानीयस्याभेद, न चा[2]पामित्यनेनोक्तानां मुक्तस्थानीयानामपां च[3]समुद्रजलस्थानीया बहवो मुक्ता एकस्वभावाः, वरुणवदपां खातवद्वा भगवाननन्तोऽपार इत्येवं सिद्धान्तमुक्त्वा 'अविनाशी वा अरेऽयमात्मानुच्छित्तिधर्मा' इत्यत्राविनाशीत्यनेनात्मनाशो मोक्ष

---

[1] न चाप एवा-क. ग.　　[2] न वा-ग.　　[3] मपाम्, उक्तं च-क. ग.

SGDF Sri Gargeshwari Digital Foundation

इति बौद्धमतं अनुच्छित्तिधर्मेत्यनेनाशेष[1]गुणोच्छेदो मोक्ष इति वैशेषिकमतं च निरस्य, 'यत्र हि द्वैत' मित्यादिना द्वैते सति रूपादेरीशस्य चेष्टस्य ज्ञानसंभव इत्युक्त्वा, यत्रत्वस्ये' त्यादिनाऽद्वैतमते तदसंभव उक्तः । प्रकृतश्रुतेरद्वैतमतपरत्वे नास्त्युच्छित्तिर्येषां तेऽनुच्छित्तयस्तादृशा धर्मा यस्यासावनुच्छित्तिधर्मे-त्यर्थे विरोधादनुच्छित्तिधर्मो यस्येत्यर्थे अविनाशीत्यनेन पौनरुक्त्यम्, अनुच्छित्तिपदेन वेष्ट[2]सिद्धेर्धर्मपदवैय्यर्थ्यं च। एवं 'सर्वं तं परादाद्योऽन्य-त्रात्मनः सर्वं वेदे' त्यत्रात्मनः सर्वाधारत्वोक्तिः, यथा दुन्दुभेरित्यादि यथार्द्रैद्धाग्नेरित्यादिदृष्टान्ताश्चासङ्गताः । न हि दुन्दुभ्यादौ तच्छ-ब्दादिरध्यस्तः, किंतु तन्निमित्तक इति—चेन्न । यथा सैन्धवेति वाक्ये ब्रह्मैक्यं मोक्ष इत्यस्यैव सिद्धान्तस्योक्तत्वात्, यथा सर्वासामपामित्यादौ प्राकृतलयदृष्टान्तपरवाक्ये समुद्रपदस्य जलसामान्यपरत्वेन सैन्धववा-क्येऽपि तथात्वात्, सैन्धवखिल्य उदके प्रास्त इत्येव श्रुतिपाठात्समुद्र-पदस्यैव प्रकृते विरहाच्च । न च—पूर्वं मुक्तानां[3] ब्रह्मणि स्थितौ सर्वासामपामित्यादिना दृष्टान्तस्योक्तत्वादिदानीं मुक्तस्य[4] ब्रह्मणि स्थितौ दृष्टान्तपरे सैन्धववाक्येऽप्युदकपदं समुद्रपदेन पूर्वोक्तार्थकमिति—वाच्यम्; सर्वासामित्यादौ प्राकृतलये सैन्धववाक्ये ज्ञानप्रयुक्तलये दृष्टान्तोक्त्या तयोरेकार्थकत्वानावश्यकत्वात् ॥

"यथा नद्यः स्यन्दमानास्समुद्रेऽस्तं गच्छन्ति नामरूपे विहाय ।
तथा विद्वान्नामरूपाद्विमुक्तः परात्परं पुरुषमुपैति"

इति श्रुतौ नदीदृष्टान्तोक्तेः सैन्धवदृष्टान्तप्रकृतवाक्यसमानार्थकत्वा-संभवात्तत्रत्यसमुद्रपदसमानार्थकमुदकपदमित्यस्य वक्तुमशक्यत्वात् । 'ब्रह्म वेद ब्रह्मैव भवती' त्यादिश्रुतिभिर्ब्रह्मैक्यस्य मोक्षत्वोक्तेः । 'यत्र

---

[1] नेनाशेषविशेष-क. ग. [2] पदेनैव-क. ग. [3] पूर्वमुक्तानां-क. ग.
[4] इदानीमुक्तस्य-क. ग.

SGDF
Sri Gargeshwari Digital Foundation

हीत्यादिना 'न प्रेत्य संज्ञास्ती'त्यत्रोक्ते विशेषविज्ञानाभावे हेतुकथनेनाद्वैतवादस्य स्फुटत्वात्। त्वदुक्तार्थे च द्वैतमिवेतीवशब्दवैयर्थ्यम्। मन्मते तु व्यवहारकालेऽप्याभासरूपत्वेनाल्पं द्वैतमित्यर्थस्य 'यत्र त्वस्ये'ति वाक्यार्थोपयोगः। रूपादिज्ञानाभावेपि नित्यानिर्दुःखनिरतिशयानन्दस्याद्वैतमोक्षस्यानावृतस्य परमपुरुषार्थत्वेन श्रुत्या हेयत्वोक्त्यसंभवश्च त्वन्मते स्फुटः। मन्मते अविनाशीत्यस्य न पौनरुक्त्यम्; अविक्रियार्थकत्वेन भाष्योक्तत्वात्, उच्छित्तिरत्यन्तोच्छेदो धर्मः प्रतियोगितया यस्यास्ति तदन्यस्यानुच्छित्ति[1]धर्मशब्देन बोधनात्, यथासन्निवेशे धर्मपदावैयर्थ्यात्। अथवा न विद्यते उच्छित्तिर्विशेषगुणगणोच्छेदरूपो धर्मो यत्रेति विग्रहः। तथाच 'न प्रेत्य संज्ञास्ती'त्यस्यात्मनाशेऽशेषविशेषगुणोच्छेदे वा मोक्षे तात्पर्यमिति मुह्यान्तीं मैत्रेयीं प्रत्यविनाशीत्यनेनाद्यस्यानुच्छित्तिधर्मेत्यनेनान्त्यस्य मोक्षत्वं निरस्तम्। तत्र धर्मग्रहणमुच्छेदधर्मकत्वमात्मनो न संभवति; निर्द्धर्मकत्वात्तस्येति ज्ञापनाय, तथाच 'तान्येवानुविनश्यती'त्यनेनोक्तायां तत्वज्ञानप्रयुक्तसर्वद्वैतनिवृत्तौ 'न प्रेत्य संज्ञे'त्यनेन रूपादिविशेषज्ञानाभावे चोक्ते सामान्यविज्ञानमात्ररूपस्य मोक्षत्वं लब्धम्। तस्य च पुरुषार्थत्वं न संभवति; लोके रूपादिज्ञानजन्यसुखस्यैव पुरुषार्थत्वदर्शनादित्याशङ्कायां यत्र हीत्यादिना द्वैते सति लौकिकं क्षुद्रसुखमेव रूपादिज्ञानजन्यम्, तच्च सर्वं सभयम्; 'द्वितीयाद्वै भयम्' 'उदरमन्तरं कुरुते,' 'अथ तस्य भयम्' इत्यादिश्रुतेरित्युक्तम्। आत्ममात्रस्य तु मोक्षस्य परमानन्दत्वात्परमपुरुषार्थत्वमिति यत्र त्वस्येत्यादिनोक्तम्। तस्य चानावृतस्वप्रकाशत्वान्नित्यत्वाच्च न[2] ज्ञानस्वरूपयोरुत्पत्तौ साधनापेक्षेति तत्केनेत्यादिनोक्तम्। द्वितीयाभावादेव तदा तस्य सुखस्य निर्भयत्वं सूचितम्।

---

[1] तदन्यानुच्छित्ति—क. ग. [2] स्वप्रकाशत्वान्न—ग.

SGDF Sri Gargeshwari Digital Foundation

अतएव 'आत्मैवाभूद्विजानत' इति समानार्थकश्रुत्युत्तरं 'तत्र को मोहः कश्शोक' इत्याद्युक्तम्। एवंचात्ममात्रस्य मोक्षत्वसंभवेन मोक्षद्वैताङ्गीकारः[1] श्रुत्यैवाक्षिप्त इति तदङ्गीकारिणो भ्रान्ता एव। 'सर्वं तं परादादि' त्यादिकं तु नात्मनः सर्वाधारत्वपरम्; किंतु भेददृष्टिनिन्दापरम्;

'नान्यः प्रतिबलो लोके तवार्जुन भविष्यति।

अन्यत्र भीष्मात्' इत्यादौ 'अहिंसन्नन्यत्र तीर्थेभ्यः' इत्यादिश्रुतौ चान्यत्रेत्यस्याव्ययप्रथमान्तत्वादिदर्शनात्। तीर्थेभ्यो याज्ञियेभ्योऽन्यत्र अन्यम्। दुन्दुभेरित्यादिकं तु यथा दुन्दुभेस्तदीयशब्दसामान्यस्याग्रहणकाले तदीयशब्दविशेषाग्रहणम्; तस्मिंस्तेषामध्यस्तत्वात्तथा ब्रह्मणः सद्रूपस्याग्रहणकाले न द्वैतग्रहणमिति तत्र तदध्यस्तम्। यथाऽऽर्द्रेन्धनविशिष्टाग्न्युपादानको धूमस्तादृशाग्निं विना न तिष्ठति तथा सद्रूपब्रह्म विना न द्वैतं तिष्ठतीति तत्तदुपादानकमित्यर्थकम्। तथा च 'सर्वं तमि' त्यादिवाक्यं 'इदं सर्वं यदयमात्मा' इत्यस्य प्रतिज्ञातार्थस्योपपादकम्। आर्द्रेन्धनस्योपादानत्वात्तद्विशिष्टस्योपादानत्वोक्तिर्विशिष्टस्यैव वन्हेरुपादानत्वाद्वा। यत्तु—अनुच्छित्तिधर्मा यस्येत्यर्थो न युक्तः; 'धर्मादनिच्केवलादि' त्यनेन केवलोपपदयुक्ताद्धर्मशब्दादनिच्प्रत्ययविधानादिति—तन्न; अनुच्छित्तिशब्दस्य पदान्तरायुक्तत्वेन केवलत्वानपायात्रिपदबहुव्रीहिव्यावृत्तय एव केवलग्रहणात्, अन्यथा निवृत्तिधर्मेत्यादेरसाधुत्वापातात्। 'यथाऽस्मिन्नाकाशे श्येनो वा सुपर्णो वा विपरिपत्य श्रान्तः संहत्य पक्षौ संलयायैव ध्रियते एवमेवायं पुरुष एतस्मा अन्ताय धावति यत्र सुप्तो न कंचन कामं कामयते न कंचन स्वप्नं पश्यति, ता वा अस्यैता हिता नाम नाड्यो यथा केशः सहस्रधा

---

[1] मोक्षे द्वैताङ्गीकारः--ग.

SGDF
Sri Gangeshwari Digital Foundation

भिन्नस्तावताणिम्ना तिष्ठन्ति शुक्लस्य नीलस्य पिङ्गळस्य हारितस्य लोहितस्य पूर्णाः, अथ यत्रैनं घ्नन्तीव जिनन्तीव हस्तीव विच्छाययति गर्तमिव पतति यदेव जाग्रद्भयं पश्यति तदत्राविद्यया मन्यतेऽथ यत्र देव इव राजेवाहमेवेदं सर्वोऽस्मीति मन्यते सोऽस्य परमो लोकः तद्वा अस्यैतदतिच्छन्दा अपहतपाप्माऽभयं रूपम्, तद्यथा प्रियया स्त्रिया संपरिष्वक्तो न बाह्यं किंचन वेद नान्तरम्, एवमेवायं पुरुषः प्राज्ञेनात्मना संपरिष्वक्तो न बाह्यं किंचन वेद नान्तरम्, तद्वाऽस्यैतदाप्तकाममात्मकाममकामं रूपं शोकान्तरमि'त्यादि, 'यद्वै तन्न पश्यति, पश्यन्वै तन्न पश्यति न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यतेऽविनाशित्वान्न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यत्पश्ये'दित्यादिश्रुतेरपि द्वैतं मिथ्या। 'तद्वा अस्यैत'दित्यादि 'अभयं वै जनक प्राप्तोऽसी'ति पूर्वब्राह्मणे यदुक्तमागमप्राधान्येनेह च तर्केण प्रपञ्चितं दार्ढ्याय[1] तद्वै प्रसिद्धमस्य विद्योत्कर्षदशायामहमेव सर्व इति सर्वबाधेनाखण्डात्मतत्वरूपपरब्रह्मरूपेण जाग्रद्वासनया स्वप्ने भासमानतयोक्तस्य रूपमेतत्। 'न कंचन कामं कामयते न कंचन स्वप्नं पश्यती'त्यनेनोच्यमानमतिच्छन्दा निष्काममपहतपाप्मा पापहीनमभयं द्वैतसामान्येन जाग्रद्भयं पश्यति तदत्राविद्यया मन्यत इत्यत्र भयहेतुत्वेनोक्तेन शून्यमित्यर्थः। तथाच यतः स्वभावत एतदभय[2]मतः सुषुप्तौ देहान्तःकरणादिभयवियोगसंभवात्तददर्शनमविद्यायास्तदा दर्शनेऽपि देहादिदृष्टान्तेनैव दृश्यत्वाद्वियोगसंभवज्ञानेन दृश्यमात्रादर्शनरूपमुक्तिदशापि निश्चेतुं शक्यत इति भावः। नचास्यैतदित्यत्रैतच्छब्देन सौषुप्तजीवस्यैवाभयत्वेनोक्तत्वाज्जीवस्वरूपमात्रस्याभयत्वालाभ इति—वाच्यम्; एतदभयमित्यस्याखण्डार्थत्वेन सौषुप्तत्वोपलक्षितस्याभयत्वोपलक्षिताभेदोक्त्या अवान्तरतात्पर्येण द्वैत-

---

[1] प्रपंचितार्थाय-ग.	[2] एतदुभय-ग.

SGDF
Sri Gargeshwari Digital Foundation

मिथ्यात्वलाभात् । 'स वा एष महानज आत्मा अजरोऽमृतोऽभय' इत्यादौ सौषुप्तमात्रानिर्देशाच्च । आत्मकाममित्यादि—आत्मस्वरूपमेव कामः काम्यसामान्यं यस्य तदात्मकामं आत्माकाम्य[1]बाधायां सामानाधिकरण्यमत एव अकामं कामनाशून्यमत एव शोकान्तरं शोकच्छिद्रमदुःखमित्यर्थः ॥

न बाह्यं किंचन वेद नान्तरमिति यदुक्तं तन्न दृष्टिलोपात्, किंतु दृश्यलयादित्यलुप्तदृष्टिरूप आत्मेत्याह—**यद्वै तन्न पश्यतीत्यादि**। तत्तदा सुषुप्तौ यन्न पश्यतीत्याद्युक्तं तत्पश्यन्नेव न पश्यतीत्यादिरूपम् । प्राज्ञेनात्मना संपरिष्वक्त इत्यनेनोक्तो लयो दृश्यमात्रस्येत्याशयेनाह—**न तु तद्द्वितीयमित्यादि**। ततो द्रष्टुरन्याद्विलक्षणं जडं[2] द्वितीयं विभक्तं स्थूलं यन्नास्ति[3] यद्येन चक्षुरादिना यद्रूपादिकं च पश्येत्, किंत्वविभक्तं संस्काररूपं सर्वमस्तीति शेषः। अतएव 'सुषुप्तिकाले सकले विलीने', 'स्वमपीतो भवती'त्यादिश्रुत्यन्तराणि । तथाच संस्काररूपेण द्वैतावस्थानस्य लयस्य ब्रह्मण्युक्तत्वात्संस्कारस्य चोपादान एव स्वीकारादुपादानत्वस्य च ब्रह्मण्यपरिणामिनि परिणाम्यविद्योपरागेण वाच्यत्वाज्जडयोरुपादानोपादेयत्वनिर्वाहकतादात्म्यस्य कल्पितत्वाद्विनिगमकाभावेन द्वैतसामान्यस्य कल्पितत्वसिद्धिरिति भावः। **यत्र वा अन्यदिव स्यादित्यादि** । अन्यदिवाभासत्वरूपान्यत्वयुक्तमन्यत्, अतएव स्वप्ने घ्नन्तीवेत्याद्युक्त्वा अविद्यया मन्यत इत्यग्रे आविद्यकत्वेनाभासत्वमुपपादितम् । लोकेऽपि सद्वितीयचन्द्रः[4] प्रसिद्धोऽस्ति यस्य सादृश्यं बुध्येत । तस्मादुक्तः श्रुतिसन्दर्भो द्वैतमिथ्यात्वपरः ॥

ननु—शुक्लस्येत्यादिना नाडीस्थभगवन्मूर्तीनां शुक्लत्वादिवैल-

---

[1] आत्मान्यकाम्य—**क. ग.** [2] न जडं—**ग** [3] तन्नास्ति—**क. ग.** [4] लोकेऽपि सद्वितीयचन्द्र इवेति प्रयोगः, नहि सद्वितीयचन्द्रः प्रसिद्धोऽस्ति—**क. ग.**

SGDF
Sri Gargeshwari Digital Foundation

क्षण्यमुक्तमिति तासां भेदः प्राप्तः, तद्वा अस्यैतदित्यत्रापि भगवतो रूपित्वेन रूपाद्भेदः प्राप्तः, अतस्तादृशमूर्तिभ्यस्तद्गतशुक्लादिगुणेभ्यो रूपाच्च ब्रह्मणो भेदं प्राप्तं निरस्यति---यद्वै तदित्यादि। हृदयस्य भवतीत्यत्र हृदयशब्दितं पूर्वप्रकृतब्रह्म स्वमूर्त्यादिस्वरूपं यद्वैतं न पश्यति तद्द्वितीयं सन्नास्ति द्वितीयत्वेन यन्न पश्यसि तद्द्वितीयत्वे[1] नास्तीत्यर्थः। आकांक्षया न तु तदिति व्यवहितेनापि संबन्धः। वै यस्मात्पश्यन् सर्वज्ञ एव सन् तन्नपश्यति, न हि तस्य द्रष्टुर्दृष्टेर्विपरिलोपोऽविनाशित्वात्, यत्तु जीवजडात्मकं विभक्तं पश्येत् पश्यति तत्तस्मादन्यदित्यर्थः। अद्वैतमते यद्विभक्तं तन्नास्तीत्यस्यैव पूर्णत्वेन शेषवैयर्थ्यम्। दृष्टिघ्रात्यादिना द्रष्टुर्घ्रात्रादि[2]संबन्धोक्तेः पूर्ववाक्ये श्येननीडयोः स्त्रीपुरुषयोश्च भिन्नसत्त्वयोर्दृष्टान्तत्वस्य प्राज्ञेनात्मना संपरिष्वक्त इति जीवेशभेदोक्तेश्चासङ्गतिरिति---चेन्न; द्वितीयत्वेन[3] यन्नपश्यतीत्यस्यासिद्धत्वेन तदनुवादेन निषेधासंभवात्। न तु द्वितीयमस्तीत्यस्यैव पूर्णत्वेन यद्वै तन्न पश्यतीत्यस्य वैय्यर्थ्यात्। अस्मादुक्त[4]रीत्या सन्निहितान्वयसंभवे व्यवहितान्वयस्यायुक्तत्वात्। हृदयशब्देन 'एतत्सर्वं मनः कामा येऽस्य हृदि श्रिता' इत्यादिपर्यालोचनेन तास्थ्यलक्षणया[5]हृदयस्थमनउक्तेर्ब्रह्मोक्त्यसंभवात्। (हृदयस्य संबन्धी जीवः शोकान् तीर्ण इति त्वदभिमतार्थासंभवात्।) न च---हृदयमारुणय इत्यस्योपासनापरत्वेऽपि ब्रह्मैव ते इति वाक्यशेषेण ते उदरहृदये ब्रह्मैवेति व्याख्यातेन हृदयशब्दस्य ब्रह्मणि रूढिरिति---वाच्यम्; तस्य प्रत्ययदार्ढ्यपरत्वेन रूढ्यपरत्वात्। 'स वा एष आत्मा हृदि तस्यैतदेव निरुक्तं हृदयमि'ति योगार्थस्तु रूढिमूलकलक्षणातो

---

[1] त्वेन नास्ती--क. ग. [2] द्रष्टघ्रात्रादि--क. ग. [3] द्वितीयत्वे--ग.
[4] तस्मादुक्त--ग. [5] तस्थलक्षणया--ग.

SGDF
Sri Gargeshwari Digital Foundation

दुर्बलः पश्यन् वै तन्न पश्यतीति हेतोरसिद्धेश्च । न हीशः स्वभिन्नत्वेन स्वमूर्त्यादि न पश्यतीति मानान्तरेण निश्चितम्, प्रत्युतायं हि कृष्णो यो हि[1] पृष्टः शरीरद्वयकारणमित्यादिश्रुत्या मूर्त्यादिभिन्नत्वेनेशोक्त्या विपरीतमेव निश्चितम् । अद्वैतमते च नोक्तवैय्यर्थ्यम्, न हि न तु तद्द्वितीयमित्यत्र द्वितीयसामान्यनिषेधः; तथा सति तस्य द्वैतसत्वेऽपि संभवेन न किंचन वेदेत्यस्योपपादनासंभवात्, किन्तु स्थूलद्वैतस्य निषेधः सूक्ष्मस्य स्थितिश्च प्रतिपाद्यते । दृष्टिद्रष्ट्राद्योगः संबन्धो[2] व्यावहारिक एवोक्त इति नाद्वैतविरोधः । श्येननीडाद्योः स्वसमसत्ताकभेदवत्त्वेऽपि जीवब्रह्मणोर्न तद्वत्त्वलाभः, सर्वांशसाम्यस्याविवक्षणात्प्राज्ञेनात्मनेति स्वरूपार्थकात्मपदेन तयोरभेदोक्तेश्च । यद्यपि सुषुप्तौ चाक्षुषादिवृत्त्यवच्छिन्नचिद्रूपं दृष्ट्यादिकं नास्ति, तथापि तादृशावच्छिन्नत्वयोग्यतामादाय याचकादिपदस्येव दृष्ट्यादिपदस्य प्रयोग इत्यदोषः । त्वन्मते तु दृष्ट्यादेरीशे कथमप्यसंभव इति । न हि द्रष्टुरित्यादि पश्यन्नित्यादि चानुपपन्नम् । शुक्रस्येत्यादिकं तु न शुक्रादिभगवद्रूपैः पूर्णा नाड्य इत्यर्थकम्; शुक्राद्यन्नरसपूर्णा इत्यर्थस्य मानान्तरसिद्धस्य संभवेन तादृशार्थकत्वे मानाभावात्, तस्माच्छोकोत्तीर्णत्वेन प्रकृतो जीव एव न पश्यतीत्यादौ कर्तेति नास्मदुक्तार्थे विरोध इति । **यथा श्येनो वेत्यादि श्रुत्यर्थः ॥**

'वाचारम्भणं विकारो नामधेय'मित्यादिश्रुतेरपि दृश्यं मिथ्या ॥

ननु वाचारम्भणशब्दो न मिथ्यात्वे रूढः, नापि यौगिकः; वाचा निष्पाद्यकाव्यादेर्मिथ्यात्वासंप्रतिपत्तेः, वागालम्बनमात्रमिति भाष्यव्याख्यानमयुक्तम्; वाचया[3] आरम्भणं यत्रेति व्युत्पत्त्या वागालम्बनत्वलाभेऽपि मात्रार्थालाभात्, नामधेयमित्यस्य नाममात्रार्थकत्वोक्त्या-

---

[1] योवो हि–क. ग. [2] दृष्टिद्रष्ट्रायोः संबन्धो–क ग. [3] वाचा–ग. वाचाया क.

SGDF Sri Gargeshwari Digital Foundation

तेन पौनरुक्त्यं च, 'मृत्तिकेत्येव सत्य'मित्यत्रेतिशब्दो व्यर्थः, अर्थविपर्यासे हीतिशब्दः प्रयुज्यते, उक्तं हि महाभाष्ये 'न वेति विभाषा' इत्यत्र—इतिकरणः क्रियते सोऽर्थनिर्देशार्थस्तद्यथा गौरित्याहेत्युक्ते गोशब्दः स्वार्थं त्यक्त्वा स्वस्यैव बोधकः, तथा न वेत्युक्ते प्रकरणसिद्धं स्वपरत्वं त्यक्त्वा न वेतिशब्दः स्वार्थपरः। तथाचार्थप्रकरणे इतिशब्दः शब्दपरः, शब्दप्रकरणे च व्याकरणादावर्थपरः, प्रकृते चार्थप्रकरणादेवार्थपरत्वसंभवेन नार्थपर इति व्यर्थः। किञ्च विवर्तवादे मृत्पिण्डमृन्मयादिदृष्टान्तानुपपत्तिः। न चाविद्याविशिष्टरूपेण ब्रह्मणोऽपि परिणामित्वात्तदुपपत्तिरिति वाच्यम्; शुद्धब्रह्मण एव ज्ञेयत्वेन तद्विज्ञानेन सर्वविज्ञानप्रतिज्ञानात्, अनाद्यविद्यादीन्प्रति ब्रह्मणोऽनुपादानत्वात्तज्ज्ञानेन सर्वज्ञानप्रतिज्ञाविरोधश्च, यथा सौम्य मृदा मृण्मयं ज्ञातमित्यस्यैव पूर्णत्वेन एकपिण्डसर्वपदानां वैय्यर्थ्यम्, नखनिकृन्तनस्यान्त्यावयवित्वेनानुपादानत्वान्मृत्त्वेन निश्चितेऽपि घटादौ संशयान्मृद इव घटादेरपि व्यावहारिकसत्त्वेन द्वयोरपि मिथ्यात्वान्मृत्तिकैव सत्यमित्याद्यनुपपत्तेः, शुक्त्यादिज्ञानेऽपि रूप्याद्यज्ञानादधिष्ठानीभूतब्रह्मज्ञानात्सर्वज्ञानासंभवाच्चासङ्गतिः। यत्तु—शुक्तौ ज्ञातायां रूप्यं ज्ञातं भवति, सा हि तस्य तत्त्वम्, एवं ब्रह्मज्ञानात्सर्वं ज्ञातम्, तद्धि तस्य तत्त्वमिति भामत्युक्तम्, तन्न; तथासति ब्रह्मज्ञाद्ब्रह्म[1] ज्ञातमित्यर्थे लब्धेऽपि मृद्घटादिदृष्टान्तेन कारणज्ञानात्कार्यज्ञानस्य प्रकृतस्यालाभात्। अधिष्ठानस्यारोप्यतत्त्वरूपत्वाभावाच्च। तत्त्वं हि असाधारणं स्वरूपं धर्मो वा। नचाधिष्ठानमारोप्यस्यासाधारणं स्वरूपं धर्मो वा, आरोप्यान्तरसाधारणत्वात्। अधिष्ठानमात्रस्य तद्रूपत्वे ब्रह्मशुक्त्योरानन्दशुक्तित्वादितत्वं न स्यात्। तस्माद्वाचा वागिन्द्रियमात्रेणारम्भणं यस्य तन्नामधेयं

---

[1] ब्रह्मज्ञानाद्ब्रह्म—क. ग.

SGDF
Sri Gargeshwari Digital Foundation

विकारः संस्कृतापभ्रंशरूपेण विक्रियमाणत्वात्, व्याकरणसापेक्षेण वागिन्द्रियेण निष्पाद्यं मृत्तिकेत्येव सत्यं नित्यं प्रवाहरूपेणानादीत्यर्थः। न वधेनास्य हन्यते एतत्सत्यं ब्रह्मपुरमित्यत्र सत्यपदस्य नित्ये प्रयोगात्सदृशशब्दस्य[1] प्रकृतस्य सत्यपदत्वेन सदातनार्थकत्वाच्च। एकस्य ब्रह्मणो ज्ञानेन तत्सदृशस्य सर्वस्य ज्ञाने मृत्पिण्डमृन्मया दृष्टान्ताः, प्रधानस्य तस्य ज्ञानेन तद्गुणीभूतस्य सर्वस्य ज्ञाने संस्कृतापभ्रंशदृष्टान्तः। अपभ्रंशज्ञानाद्धि यत्फलं तच्चाधिकं च सार्वत्रिकव्यवहारादिकं संस्कृतज्ञानाद्भवतीति संस्कृतं प्रधानम्। तादृशगुणप्रधानदृष्टान्ततालाभार्थं च वाचारम्भणमित्यादावपि 'यथा सौम्यैकेने' त्यादिकं 'तनूर्वर्षिष्ठे' त्यादिवदनुषञ्जनीयमिति—चेन्न; वाचारम्भणशब्दस्य हि वागालम्बनमात्रमित्यादिभाष्यव्याख्यानेऽयं भावः—'येनाश्रुतं श्रुत'मित्यादिसामानाधिकरण्यं बाधायाम्, अश्रुतमन्यत्सर्वं यदभिन्नं श्रुतस्वरूपव्यतिरेकेण नास्तीत्यर्थः, तथाचैकं सर्वस्याधिष्ठानमित्यर्थः प्रतिज्ञातः, तत्र मृत्पिण्डव्यतिरेकेण तद्विकारो यथा नास्तीत्यादि दृष्टान्ताः यथा सौम्यैकेनेत्यादिना प्रतिपाद्यन्ते। मृत्पिण्डपदं च मुख्यार्थकैकपदयोगाद्भूमिरूपपिण्डार्थकम्, पिण्डपदं च स्थौल्यविशेषबोधकं मृण्मयमात्रोपादानतायोग्यतालाभाय, मृण्मयपदं च भूमिविकारमात्रार्थकम्, तथाच भूमिविकारः सर्वो यथा भूमिं विना नास्तीत्यर्थः। भूमिविकारत्वं च साक्षादेव वृक्षादावक्षतमिति भूमेर्विभक्तपिण्डस्य नानाविकारानुपादानत्वेऽपि न क्षतिः। यद्यपि भूमिर्नाधिष्ठानं तथाप्यधिष्ठानावच्छेदकशुक्त्यादिव्यतिरेकेण रूप्यादि नास्तीति व्यवहारवत् भूमिविकारादिस्वरूपविचारदशायामाधारतावच्छेदकभूम्यादिव्यतिरेकेण तद्विकारो नास्तीति व्यवहाराच्छ्रुत्या तथोक्तम्। एवं च सर्वमृण्मयमेकमृ-

---

[1] सदाशब्दस्य—ग.

SGDF
Sri Gargeshwari Digital Foundation

त्पिण्डाभिन्नविज्ञातस्वरूपमित्यपि बाधायां सामानाधिकरण्यम् । तत्र हेतुर्मृत्तिकेत्येव सत्यमिति, मृत्तिका भूमिरिति गृह्यमाणं यत्तदव सत्यम् । मृत्तिकास्वरूपस्य सत्यत्वाभावात्तदवच्छिन्नसद्रूपस्य दृष्टान्तत्वधीदशायां मृदो विविच्याज्ञानाद्भूमित्वेन ज्ञायमानत्वेन सद्रूपलाभार्थमितिशब्दः ; मनो ब्रह्मेतीत्यादौ ज्ञायमानस्येतिशब्दार्थत्वात् । आद्यर्थको वा इतिशब्दः, 'इतिहेतुप्रकरणप्रकारादिसमाप्तिष्वित्यमरात् । तथाच भूमिविकारस्वरूपस्य विचारदशायां तत्स्वरूपमिव भूमिस्वरूपविचारदशायां सापि मिथ्या, तत्कारणपञ्चीकृतभूतान्येव सत्यानि, तेषामपि स्वरूपविचारदशायां तान्यपि मिथ्या, तत्कारणमेव सत्यमित्याद्यर्थलाभः । नखनिकृन्तनपदं चायःसामान्यपरम्, लोहमणिपदमपि सुवर्णार्थकम्, तयोर्विशेषणमेकपदं चैकजातीयार्थकम्, तदुपादानं चैकजातीयत्वेन सर्वत्र स्वविकारे उपादानत्वसंभवलाभाय, इतिशब्दस्तु तत्राप्युक्तरीत्या व्याख्येयः । 'मृत्तिकेत्येव सत्य' मित्यादौ हेतुः वाचारम्भणं विकारो नामधेयमिति, आरम्भणमसमवायिकारणजन्यत्वमुत्पत्तिर्वा वाचा वाङ्मात्रं विचारासहमिति यावत्, तथाचोत्पत्तिः सतोऽसतो वेति निरूपयितुमशक्यत्वादुत्पन्नसामान्यं विचारासहमिति भावः । तावताप्यनाद्यविद्यादिसाधारण्येन हेत्वलाभादाह—विकारो नामधेयमिति । नाशादिविकृतियुक्तं नाममात्रं विचारासहमिति यावत्, अर्थे नामाभेदासंभवात् 'अब्भक्ष्य इत्यादाविव मात्रार्थान्तर्भावेन विचारासहत्वलाभः । तथाचोत्पत्त्यादिविकृतेस्तद्युक्तस्य च संसर्गदुर्निरूपत्वादिना विचारासहत्वान्मिथ्यात्वमिति निर्विकारं ब्रह्मैव सत्यमिति दृष्टान्तोपपादकत्वेनोक्तमपि दार्ष्टान्तिकस्याप्युपपादकमिति ध्येयम् । एवं च भामत्युक्तिरपि युक्तैव, अनारोपितरूपस्यैव तत्वरूपत्वेनासाधारणस्वरूपधर्मयोरिवाधिष्ठानस्यापि तत्त्वरूपत्वाच्छुक्तिरेव रूप्यस्य तत्त्वमिति लोके व्यवहाराच्च । अत एव तत्त्वज्ञानान्निश्श्रेयसाधिगम इति भाष्ये तत्त्वमनारोपितं

SGDF
Sri Gargeshwari Digital Foundation

रूप[1]मित्युदयनाचार्याः। अत एव व्यवहारदशायां शुक्त्यादावनारोपितत्वभ्रमेण रूप्यादितादात्म्योपलक्षितत्वेन च रूप्यादेः स्वरूपतत्त्वं शुक्तिरिति व्यवहारः, शुक्त्यादेर्धर्मतत्त्वं शुक्तित्वादिरिति च व्यवहारः, विवेकदशायां तु ब्रह्मैवानारोपितत्वेन ज्ञायत इति वस्तुगत्या तदेव सर्वेषां स्वरूपतत्त्वमित्याशयेन 'ब्रह्म तत्त्वं तपो वेदा' इत्यमरेणोक्तम्। 'तत्त्वब्रह्ममार्गे सम्यक् सम्पन्न' इति जाबालश्रुतिः, 'युञ्जानः प्रथमं मनस्तत्वाये' ति श्वेताश्वतरश्रुतिः। 'भगवन् नाहमात्मवित् स्वतत्त्ववि[2]'-दिति मैत्रायणीयश्रुतिश्च। तत्त्वं परमात्मनि वाद्यभेद[3]स्वरूपे चेति हैमः। तननं तत् सम्पदादित्वात् क्विप्, तदस्यास्तीति वप्रकरणे अन्यत्रापीति वः, 'तसौ मत्वर्थ' इति भत्वान्न जस्त्वमिति बोध्यम्॥

अहो ते पाण्डित्यम्, येन स्वमपि प्रस्मरसि, तव हि तत्त्ववादित्वं नासाधारणस्वरूपधर्मवादित्वम्; किंत्वनारोपितप्रपञ्चवादित्वम्, तस्मान्नाद्वैतमते उक्तव्याख्याने उक्तदूषणावकाशः। त्वदीयव्याख्यानं त्वयुक्तम्; तथाहि—वाचापदेन वागिन्द्रियमात्रं लक्षणीयम्; अन्यथा व्याकरणानिष्पाद्यत्वालाभेनापभ्रंशालाभापत्तेः। मन्मते वाङ्मात्रलक्षणा त्वाजानकी; अर्थासत्वविवक्षायां लोके वागादिशब्दप्रयोगात्। सत्यपदस्य नित्यार्थकत्वमयुक्तम्; तस्याबाध्यरूढत्वात्। संस्कृतस्य मुख्यनित्यत्वाभावेन सदाशब्दमादाय योगासंभवेन व्याकरणनिष्पाद्यत्वरूपगौणनित्यत्वे लक्षणापत्तेश्च। सदाशब्दस्य त्वनन्तत्वमपि व्याकरणाप्रसिद्धम्, विकारशब्दस्य मुख्यविकारार्थकत्वे त्वदिष्टासिद्ध्या संस्कृतोच्चारणाशक्त्योच्चार्यमाणार्थकत्वं लक्षणयैव, नामपदस्यापिशब्दार्थकत्वं लक्षणयैव, अपभ्रंशस्य सङ्केतवत्प्रातिपदिकरूपरूढ्यर्थत्वाभावात्। तनूर्वर्षिष्ठेत्यादिवद्यथेत्यादेरनुषङ्गोऽपि

[1] अनारोपितरूप-ग. [2] त्वं तत्ववि ग. [3] भेदे-ग.

SGDF
Sri Gargeshwari Digital Foundation

न युक्तः; 'अनुषङ्गो वाक्यपरिसमाप्तिः सर्वेषु तुल्ययोगित्वात्' इत्यधिकरणे हि 'याते अग्नेऽयाशया तनूर्वर्षिष्ठा गह्वरेष्ठा, उग्रं वचोपावधीं त्वेषं वचोपावधीग्ं स्वाहा' इति मन्त्रपाठोत्तरं पठितयोः 'याते अग्ने रजाशया याते अग्ने हराशया' इति मन्त्रभागयोः पश्चात्तनूरित्यादिकमनुषञ्जनीयम्, बुद्धिविपरिवृत्तिमात्रेण साकांक्षाभ्यां ताभ्यां तत्संबन्धसंभवेनानुषङ्गस्य वाक्यपरिसमापकत्वादित्युक्तम्। तथाच पूर्ववाक्यप्रविष्टभागस्योत्तरवाक्यघटकत्वेन प्रतिसन्धानरूपस्यानुषङ्गस्योक्तस्थले संभवेऽपि न प्रकृते संभवः। प्रकृते हि 'मृत्तिकेत्येव सत्य'मित्यादेः पश्चात् यथा सौम्यैकेन मृत्तिकेत्यनेन सर्वस्तद्विकारो विज्ञातो भवतीत्यादि कल्पनीयम्, नचैतत्पूर्ववाक्ये प्रविष्टम्। किंच यथा वाचारम्भणमित्यादिना गुणप्रधानभावः श्रुत्या ज्ञापितः, तथा मृत्पिण्डतद्विकारयोः सादृश्यमपि ज्ञाप्येत। अथ मृत्पिण्डज्ञानेऽपि तद्विकाराणां घटत्वादिना ज्ञानासंभवान्मृत्त्वेन रूपेणैव घटादिज्ञानं मृत्पिण्डज्ञानादिति पर्यालोचनात्तत्सदृशज्ञानं तज्ज्ञानाधीनमिति लभ्यते, तर्हि संस्कृतज्ञानादपभ्रंशज्ञानासंभवात्संस्कृतस्य प्राकृतकार्यकारित्वतात्पर्यकं मृत्तिकेत्यनेन सर्वस्ताद्विकारो विज्ञातो भवतीति वाक्यं संभवतीति तदेव श्रुत्योच्येत, किं वाचारम्भणमित्यादिना गुणप्रधानभावज्ञापकेनेति श्रुतिस्वारस्यहानिः॥

अपि च कार्ष्णायसान्तानां सदृशदृष्टान्तानां पश्चादेव वाचारम्भणं नामधेयं विकार इतिवत् संस्कृतं सत्यमिति सामान्यत एवोच्येत, न तु[1] मृत्पिण्डादिदृष्टान्तस्यैकैकस्यान्ते विशिष्य मृत्तिकेत्याद्येकैकम्। शब्दान्तराणामपि संस्कृतानां सत्वे मृत्तिकेत्यादेरेव किमित्युपादानम्, आयसमित्येव सत्यमित्यस्यैव पूर्णत्वसंभवे कार्ष्णेति किमित्युक्तम्।

---

[1] ननु-ग.

SGDF
Sri Gangeshwari Digital Foundation

न्मते तु काष्र्णायसादिवाचककलशुशब्दान्तरसंभवेऽपि न दोषः। न हि घटादिशब्दा एव तदर्थविवक्षया[1] प्रयुज्यन्ते न कलशादिशब्दाः॥

'को भवानिति निर्देशो वाचारम्भो ह्यनर्थकः।
शिबिकादारुसङ्घातो वचनात्स्थितिसंस्थितिः॥
अनिष्यतां[2] नृपश्रेष्ठ तद्भेदे शिबिका त्वया।
एवं छत्रशलाकानां पृथग्भावो विमृश्यताम्॥
क यातं छत्रमित्येष न्यायस्त्वयि तथा मयि॥'

इत्यादिस्मृतिवाक्यानि चास्मद्व्याख्यान एव समञ्जसानि। 'यदग्ने रोहितं रूपं तेजसस्तद्रूपं यच्छुक्लं तदपां यत्कृष्णं तदन्नस्यापागादग्नेरग्नित्वं वाचारम्भणं विकारो नामधेयं त्रीणि रूपाणीत्येव सत्य'मित्यादिवाक्येषु त्रिवृत्कृताग्न्यादिस्वरूपस्यात्रिवृत्कृततेजोबन्नस्वरूपव्यतिरेकेण विचारासहत्वमग्नित्वमित्यन्तेन हेतूकृत्य वाचारम्भणामित्यादिना त्रिवृत्कृतमात्रमसत्यमित्यादिरूपेण विकारो नामधेयमिति प्रपञ्चितम्। त्वन्मते तु सर्वमसङ्गतम्; एकज्ञानात्तत्सदृशं तदधीनं च सर्वमन्यद्ज्ञायत इत्यनियतम्; न हि गोज्ञाने गवयादे राजज्ञाने प्रजादेर्वा नियमेन ज्ञानम्, अनियतज्ञाने च सदृशादेरेव किमित्युपादानम्। किञ्च संस्कृतज्ञानस्यापभ्रंशकार्यकारित्वं कथं दृष्टान्तः; न हि शुद्धस्य सगुणस्य वा ब्रह्मणो ज्ञानं घटादिज्ञानकार्यकारि, येन तत्त्वं तत्त्वदा[3]र्ष्टान्तिकं स्यात्। तथा स्वीकारेऽपि 'येनाश्रुतं श्रुत'मित्यादि न मुख्यार्थकं स्यात्। अत एव—ब्रह्मोपासना सर्वोपासनाफलदेत्येव दार्ष्टान्तिकमिति परास्तम्; तत्रापि मानाभावात् श्रुतेः पीडनाच्च। 'यावानर्थ उदपान'इत्यादि तु नोक्तार्थकम्; किन्तु सर्वसुखानां[4] ब्रह्मसुखान्तर्भावार्थकम्। सोऽपि मोक्षसुखमेव स्वर्गादिरूपमनोवृत्त्यवच्छिन्नसुखाभिन्नम्, विशिष्टकेवल-

[1] विवक्षायां—ग. [2] अनिष्यन्तां [3] तत्र दा. क. ग. [4] मुख्यानां—ग.

SGDF
Sri Gargeshwari Digital Foundation

योरभेदादित्येवंरूप इति मदिष्टसिद्धिरिति—चेन्न ; तथाऽपि तत्र दृष्टान्तवैषम्यात् । दार्ष्टान्तिके हि सर्वोपासनाफलाभिन्नफलकत्वम् ; दृष्टान्ते तु सर्वापभ्रंशादिकार्यजातीयकार्यकारित्वमिति । मन्मते तु शिक्षिकेत्याद्युक्तवाक्योत्तरम्—

वस्तु राजेति यल्लोके यच्च राजभटात्मकम् ।
तथान्यच्च नृपेत्येतन्न सत्सङ्कल्पतामयम् ॥
एकमयं हि यत् ।
विज्ञानं परमार्थोऽसौ द्वैतिनोऽतथ्यदर्शिनः ॥
एवमेवमिदं विश्वं न भेदि सकलं जगत् ।
वासुदेवाभिधानस्य स्वरूपं परमात्मनः ॥

इत्यादिविष्णुपुराणादिवाक्यसहस्रमवयवादिव्यतिरेकेणावयव्यादेर्विचारासहत्वोक्तिपूर्वकमद्वैतबोधकमुपष्टम्भकमिति । **वाचारम्भणमित्यादिश्रुत्युपपत्तिः ॥**

'इदं सर्वं यदयमात्मा' इत्यादिश्रुतिरपि मिथ्यात्वे मानम् ; बाधायां सामानाधिकरण्येन सर्वप्रपञ्चाभावोपलक्षितात्मस्वरूपबोधकतया अवान्तरतात्पर्येणात्मनि सर्वाभावबोधात् । ननु—'सर्वेषु भूतेष्वोत' मिति श्रुतेः सर्वं जलं लवणमितिवत्सर्वव्याप्तया वा, 'सहि सर्वस्य कर्ते'त्यादिश्रुतेः 'वायुर्वै [1]घृतम्' 'ब्राह्मणोऽस्य मुख'मितिवत्सर्वनिमित्तत्वेन वा, 'यस्मिन् द्यौः पृथिवीत्यादिश्रुतेः 'ब्राह्मणो वै सर्वा देवता' इतिवत्सर्वाश्रयत्वेन वा, 'न ऋते त्वत्क्रियते किञ्चने' त्यादिश्रुतेः 'यजमानः प्रस्तर' इतिवत्तत्सिद्धया वा, 'आदित्यो यूप' इत्यादिवत्सारूप्येण वा सामानाधिकरण्योपपत्तौ यः पुरुषः स स्थाणुरितिवत् यत्सर्वत्वेन प्रतीतं तदात्मन्यध्यस्तमिति पदद्वयलक्षणा

---

[1] छृत–क. ख.

SGDF
Sri Gargeshwari Digital Foundation

न युक्ता ; 'पुरुष एवेदं सर्वं', 'पुरुषेणैवेदं सर्वं व्याप्तमातृणादाकरीषा' दिति श्रुतौ—

असतश्च सतश्चैव सर्वस्य प्रभवाप्ययः ।
सर्वस्य च सदा ज्ञानात्सर्वमेनं प्रचक्षते ॥
पुरुष एवेदं भूतं भव्यं भवच्च यत् ।
इत्युच्यते तदीयत्वान्न तु सर्वस्वरूपतः ॥
सर्वं समाप्नोषि ततोऽसि सर्वः ।

इति भारते व्याख्यानात् । 'इदं सर्व' मित्यस्य 'सर्वं तं परादाद्योऽन्यत्रात्मनः सर्वं वेदे'ति पूर्वेण, 'यथा दुन्दुभे' रित्याद्युत्तरेण, 'पुरुष एवेदं सर्व' मित्यस्य 'स भूमिं विश्वतो वृत्वे'ति पूर्वेण 'उतामृतत्वस्येशान' इत्युत्तरेण विरोधात् । 'अयमेव स योऽयमात्मेदममृतमिदं ब्रह्मेदं सर्व' मिति श्रुतिर्योऽयमिदं सर्वं यदयमात्मेति प्रतिज्ञातः पूर्वं सोऽयं तेजोमयत्वादिनोक्त एव, इदममृतममृतत्वसाधनधीविषयत्वेन मैत्रेय्यै उक्तमिदं ब्रह्म ब्रह्म ते ब्रवाणीति पूर्वोक्तमिदं सर्वं चायमेवेति त्वद्भाष्ये व्याख्याता, तस्या अपि 'अस्यां पृथिव्यां तेजोमयोऽमृतमय' इत्यादिपूर्वेण, 'सर्वं खल्विदं ब्रह्मे' त्यस्य 'ज्यायान्पृथिव्या' इत्याद्युत्तरेण, "यस्मिन् सर्वाणि भूतान्यात्मैवाभूद्विजानतः" इत्यस्य 'यस्तु सर्वाणि भूतान्यात्मन्येवानुपश्यति । सर्वभूतेषु चात्मान' मिति पूर्वेण, याथातथ्यतोऽर्थान् व्यदधादित्युत्तरेण च, विरोधाच्चेति—चेन्न; सर्वपदस्य सर्वाभावोपलक्षितार्थकत्वेऽप्यात्मपदस्य स्वमुख्यार्थैकदेशाखण्डात्मनि लक्षकत्वाभावात् अखण्डात्मन एव प्रकरणित्वेना[1]तात्पर्यविषयसर्वव्याप्त्यादिलाक्षणिकार्थासंभवात्सर्वं ब्रह्मणः स्वमसाधारणं रूप-

[1] प्राकरणिकत्वेना—ग.

SGDF
Sri Gargeshwari Digital Foundation

मित्यर्थमादाय तत्सर्वमिति नोच्यते, किंतु तदीयत्वात्सर्वस्य ब्रह्मसंबन्धात्, संबन्धश्चासतश्चेत्यादिश्लोके विशिष्योक्तः, प्रभवाप्यययोर्भासकतायां च नियामकं तादात्म्यं संबन्ध इत्यर्थः; तथाच तस्य चिज्जडतादात्म्यानुपपत्तिदृक्दृश्यसंबन्धानुपपत्त्यादिन्यायैराध्यासिकत्वेनाध्यासे बाधायां वा सामानाधिकरण्यं न त्वभेद इत्यत्रोक्तव्याख्यानवाक्यतात्पर्यात् 'एतावदरे खल्वमृतत्व' मित्यादिवाक्यशेषादियुक्तस्य 'इदं सर्वं यदयमात्मे' त्यादेरखण्डात्मप्रकरणस्थस्य बाधायामेव, सगुणोपासनाप्रकरणस्थस्य 'सर्वं खल्विदं ब्रह्मे' त्यादेरध्यासेऽपि सामानाधिकरण्यसंभवेनाविरोधात्, 'सर्वं तं परादा'दित्यत्रान्यत्रेत्यस्यान्यादित्यर्थकत्वात्, यथाश्रुतार्थत्वेऽप्यात्मनि सर्वमध्यस्तमित्यर्थपर्यवसानात्, दुन्दुभ्यादिवाक्यस्य दृष्टान्तद्वारेणाद्वैतपरत्वात्, स भूमिमित्यादेरस्यां पृथिव्यामित्यादेश्च सर्वव्याप्तिप्रतिपादनद्वारेणाद्वैतपरत्वात्,' यस्तु सर्वाणी 'त्यादेरप्यात्मनि सद्रूपे सर्वं सर्वत्र स्फुरणरूप आत्मेति कथनेन व्यावृत्तसर्वमनुवृत्त आत्मनि कल्पितमिति ज्ञापनद्वारात्मैवाभूत्सर्वभूतानीत्यस्योपपादनात्, 'याथातथ्यत' इत्यस्य तथ्यमधिष्ठानत्वेनानतिक्रम्येत्यर्थात् यथा पूर्वसृष्टिस्तथेत्यर्थाद्वा विरोधाभावात् । इदं **सर्वमित्यादिश्रुत्युपपत्तिः ॥**

"तमेव विदित्वा अतिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय' 'यस्मात्परं नापरमस्ति किञ्चिद्यस्मान्नाणीयो न ज्यायोऽस्ति कश्चित्, वृक्ष इव स्तब्धो दिवि तिष्ठत्येकस्तेनेदं पूर्णं पुरुषेण सर्वम्,' 'ततो यदुत्तरतरं तदरूपमनामयं य एतद्विदुरमृतास्ते भवन्त्यथेतरे दुःखमेवापियन्ति' इति श्वेताश्वतरश्रुत्यापि दृश्यमिथ्यात्वम् । अत्र हि तमेवेत्यादिना स्वान्याविषयकज्ञानस्य मुक्तिहेतुत्वमुक्त्वा जीवेशभेदादिज्ञानं मुक्तिहेतुरिति मताभासेन विरोधनिरासाय यस्मादित्यादिकमुक्तम्, परमिति तुशब्दसमानार्थकम्, यस्मादपरं तु नास्ति परशब्देनापरज्ञानस्य

SGDF Sri Gargeshwari Digital Foundation

मुक्तिहेतुत्वव्यवच्छेदः, जीवोऽणुरीशो महानिति तयोरखण्डैक्यज्ञानं न मोक्षहेतुरिति कथमुक्तमतविरोधो नेति भ्रान्तिं निरस्यति—'यस्मान्नाणीयो न ज्यायोऽस्ति कश्चि'दिति। किञ्चिदपि वस्तुस्वरूपं यस्मादात्मनो न ज्यायो न वाणीयोऽस्ति यदात्मस्वरूपं मुमुक्षुभिर्ज्ञेयं तस्य ज्यायस्त्वमणीयस्त्वं चौपाधिकं न स्वाभाविकमिति तस्मादणु ज्यायो वा वस्तुतो नास्तीति भावः। ईशज्ञानादेव मोक्ष इति पाशुपतादयस्तान्निरस्यति—वृक्ष इवेत्यादि। तत ईशरूपाद्यदुत्तरतरमधिष्ठानतयाऽऽनन्दघनसद्रूपतया च श्रेष्ठतरम्। अस्मिन्नर्थे चोपबृंहणानि—

'सितनीलादिभेदेन यथैकं दृश्यते नभः।
भ्रान्तिदृष्टिभिरात्मापि तथैकः सन् पृथक् पृथक्॥

एकः समस्तं यदिहास्ति किञ्चि-
त्तदच्युतो नास्ति परं ततोऽन्यत्।
सोऽहं स च त्वं स च सर्वमेत-
दात्मस्वरूपं त्यज भेदमोहम्॥

इत्यादिविष्णुपुराणादिवाक्यानि। यत्तु—यस्मात्परं श्रेष्ठं नास्ति अपरं त्वस्ति तच्च किञ्चिदल्पमित्यर्थः; 'पुरुषान्न परं किञ्चित्,' 'पादोऽस्य विश्वा भूतानी'त्यादिश्रुतेः, 'वासुदेवात्परं नास्ती'त्यादिस्मृतेश्च, परमपरं च नास्तीत्यर्थे तु नञनुषङ्गापत्तिः, 'तेनेदं पूर्ण'मित्यादिविरोधश्च, विश्वस्याभावे हि किं पूर्णं स्यादिति तन्न; अस्तिक्रियानुषङ्गस्य त्रिधा वाक्यभेदस्य चापत्तेरुत्कृष्टत्वनिषेधादरज्ञेयत्वेन ज्ञेयत्वेनोक्तशुद्ध[1]प्रतीत्यननुकूलत्वादनाकांक्षिताभिधानापत्तेश्च पूर्णत्वस्योत्तरतरत्वस्य चाविद्यकस्याविद्यादशायां शुद्धब्रह्मस्तुत्यर्थमुक्तत्वेनादोषाच्च। तमेवेत्यादिश्रुत्युपपत्तिः॥

---

[1] दरज्ञेयत्वेनोक्त—क.

SGDF
Sri Gargeshwari Digital Foundation

"अन्यथागृह्णतः स्वप्नो निद्रा तत्त्वमजानतः ।
विपर्यासे तयोः क्षीणे तुरीयं पदमश्नुते ॥
अनादिमायया सुप्तो यदा जीवः प्रबुध्यते ।
अजमनिद्रमस्वप्नमद्वैतं बुध्यते तदा ॥
प्रपञ्चो यदि विद्येत निवर्तेत न संशयः ।
मायामात्रमिदं द्वैतमद्वैतं परमार्थतः ॥
विकल्पो विनिवर्तेत कल्पितो यदि केनचित् ।
उपदेशादयं वादो ज्ञाते द्वैतं न विद्यते" ॥

इति माण्डूक्योपनिषद्व्याख्यारूपगौडपादाचार्यग्रन्थस्थप्रथमप्रकरणोक्तश्लोकेभ्यः श्रुतित्वेन वैदिकप्रसिद्धेभ्यः परकीयेऽपि माण्डूक्यभाष्यादौ व्याख्यातेभ्योऽपि द्वैतमिथ्यात्वम् ।

'निवृत्तेः सर्वदुःखानामीशानः प्रभुरव्ययः ।
अद्वैतः सर्वभावानां देवस्तुर्यो विभुः स्मृतः ॥

इति श्लोके तुर्य आत्मा ज्ञातः सन् विश्वतैजसप्राज्ञरूपसर्वभावरूपाणां दुःखानां निवृत्तेरीशानः यतोऽद्वैत इत्युक्त्वा—

'न निद्रां नैव च स्वप्नं तुर्ये पश्यन्ति निश्चिताः' ।

इत्युक्तम् । तत्र कदा तुरीये निश्चिता इत्याकांक्षायामन्यथागृह्णत इत्यादिश्लोकावुक्तौ । तत्र न त्वं संसारी किंतु तत्त्वमसीति गुरुणा बोधितो मायया सुप्तो यदा प्रबुध्यते तदाद्वैतं बुध्यते । ततश्च विपर्यासे क्षीणे तुरीयं स्वप्रकाशमनुभवतीत्यर्थः । विपर्यासे नष्टे चेत्तुरीयानुभवस्तर्हि कथं स्वाभाविकमद्वैतं तत्राह —प्रपञ्चो यदीत्यादि । प्रपञ्चो यदि विद्येत यदि सन् स्यात्तदैव तत्वतो निवर्तेत, न सन्निति न तत्वतो निवर्तते किंतु मिथ्यात्वात् ज्ञाताधिष्ठानकत्वे शून्य एवेति मिथ्या द्वैतं न स्वाभाविकाद्वैतविरोधीत्यर्थः । ननु—प्रत्यक्षादिकं भवतु मिथ्या,

SGDF
Sri Gargeshwari Digital Foundation

शास्त्रादिकं तु कथं स्वबाध्यम्? तत्राह—विकल्प इति। शास्त्रतज्जन्यतत्त्वज्ञानादिरपि विकल्पो यद्यप्यविद्यादशायामुपदेशात् ज्ञानान्मोक्ष इति वेदोपदेशं निमित्तीकृत्य केनचिद्बन्धनिवृत्त्यादिकार्यहेतुत्वरूपेण कल्पितः तथापि दृश्यत्वाविशेषात्सोऽपि निवर्तेत, बाध्येतैवेत्यर्थः। ननु—ज्ञानस्य बन्धनिवर्तकत्वं वेदोपादिष्टत्वात्सत्यं तत्राह—अयं वाद इति। 'तरति शोकमात्मवि'दित्याद्युपदेशो लोकसिद्धव्यावहारिकहेतुत्वस्यानुवादः, अतो ज्ञाते द्वैतं सर्वं न विद्यते किंतु बाधितमेवेत्यर्थः। ननु—प्रपञ्च इत्यादिश्लोके भेदरूपस्य प्रपञ्चस्य भास्करादिमतप्राप्तं सत्योपाधिकृतत्वं निरस्य विकल्प इत्यादिश्लोके मायावादप्राप्तमारोपितत्वं निरस्यानादिसत्यत्वमेवोच्यते। भेदप्रपञ्चो यदि विद्यते उत्पद्येत तर्हि निवर्तेत, न च निवर्तते; मोक्षेऽपि परमं साम्यमुपैतीति भेदश्रुतेः, तस्मान्नोत्पद्यत इत्यर्थः। विदसत्तायामिति हि धातुः, उत्पत्तिरपि हि सतायोग एव, विद्लृलाभ इति वा धातुः, तथाच स्वं लभत इत्यर्थः। उत्पत्तिरपि ह्यात्मलाभ[1] एव; अस्तित्वार्थकत्वे तु यद्यदस्ति तन्निवर्तेतेति[2] व्याप्त्यभावादसङ्गतिः। ननूपाधिकृतो न चेद्भेदस्तर्हि किं स्वन्तत्रः, नेत्याह—मायामात्रमिति। ईश्वरेच्छाधीनमित्यर्थः।

'विष्णोरिच्छावशत्वात्तु मायामात्रमिति स्मृतेः।
स्वप्नमायास्वरूपेति सृष्टिरन्यैर्विकल्पिता'॥

इत्यैन्द्रजालिकत्वं मतान्तरत्वेनोक्तम् 'इच्छामात्रं प्रभोः सृष्टि'[3]रितीश्वराधीनत्वस्य गौडपादैः स्वमतत्वेन पूर्वमुक्तत्वात्, 'प्रभवः सर्वभावानां सता'मिति पूर्वं 'कल्पितो यदि केनाचि'दिति पश्चात्प्रपञ्चसत्यत्वस्य तैरुक्तत्वाच्च। निवर्तेतेति तर्कविपर्ययपर्यवसानलब्धानिवर्त्यत्वाविरुद्धार्थस्यैव मायामात्रमित्यत्र वक्तव्यत्वाच्च॥

---

[1] स्वात्मलाभ—क. [2] निवर्तत इति—ग. [3] रितीच्छाधीन—ग.

SGDF
Sri Gargeshwari Digital Foundation

अथैवम्—'अद्वैतः सर्वभावाना'मिति पूर्वं कथमुक्तम्? तत्राह—'अद्वैतं परमार्थत' इति। उक्तमिति शेषः। अद्वैत इति यदुक्तं तत्परमार्थतः परमार्थं स्वतन्त्रमपेक्ष्येत्यर्थः। सर्वभावानां मध्ये ईशोऽद्वैत इत्युक्त्या स्वातन्त्र्यमीशस्य न त्वन्यस्येति लभ्यते न त्वन्यस्य मिथ्यात्वमिति भावः। नच—सत्ये रूढत्वात्परमार्थशब्दः सत्यार्थक एवेति—वाच्यम्; मिथ्यावस्त्वपेक्षया परमत्वादेव सत्यस्य योगलभ्यत्वेन रूढ्यकल्पनात्। अत एव प्रोक्षण्यधिकरणे प्रोक्षण्यादिशब्दस्य जलादौ योग एव न रूढिरित्युक्तम्। उक्तं च वार्तिके—

'भवेतां यदि वृक्षस्य वाजिकर्णौ कथंचन।
अदृष्टां समुदायस्य शक्तिं जातु (न) कल्पयेत्[1]'॥ इति।

तथाच—

अक्षैरेव बुद्ध्यन्ते समुदायप्रसिद्धितः।
अर्थभागोपसंहारादितरा विप्रकृष्यते॥

इति रथकाराधिकरणीयवार्तिकोक्तस्य योगापेक्षया रूढिबलवत्त्वस्य क्लृप्तरूढिविषयत्वात्, स्वतन्त्रं परमार्थमिति स्मृत्युक्तपरिभाषायाः कार्यार्थत्वेन यथा नद्या इत्यादौ 'यू स्त्र्याख्यौ नदी'ति परिभाषिता ईऊइत्यन्ताः स्थली वनीत्यादिरूपा गृह्यन्ते नदीशब्देन नतु गङ्गायमुनाद्याः, कृत्रिमाकृत्रिमयोः कृत्रिमे सम्प्रत्यय इति न्यायात्, तथा सत्ये रूढस्यापि परमार्थशब्दस्य स्वतन्त्ररूपार्थग्रहणौचित्यात्। यववराहाधिकरणे शास्त्रीयरूढेर्लौकिकरूढ्यपेक्षया बलवत्त्वस्य स्थितत्वात्, योगेन परिभाषोपपादने सत्येऽपि योगसंभवस्योक्तत्वाच्च, परमार्थशब्दः स्वतन्त्रार्थकः। अथवा 'परमार्थोऽविनाशी'ति विष्णुपुराणोक्तेः सर्वभावानां मध्ये ब्रह्माविनाशीत्यर्थः। एवं 'विकल्प' इत्यादेरपि तर्कत्वात् न च निवर्तते,

---

[1] कः शक्तिं जातु कल्पयेत्—ग.

SGDF
Sri Gargeshwari Digital Foundation

तस्मान्न कल्पित इति विपर्यये पर्यवसानं कार्यम् । 'वादो ज्ञात' इत्यत्र नञ्प्रश्लेषादज्ञाते तत्त्वे द्वैतं न विद्यत इत्यर्थः । उक्तश्लोकयोरतर्कपरत्वे यदिशब्दौ लिङ्पदानि च व्यर्थानि स्युः, स्पष्टश्चायमर्थः श्रुत्यन्तरे—

'सोऽयं सत्यो ह्यनादिश्च सादिश्चेन्नाशमाप्नुयात् ।
न च नाशं प्रयात्येष न चासौ भ्रान्तिकल्पितः ॥
कल्पितश्चेन्निवर्तेत न चासौ विनिवर्तते ।
द्वैतं न विद्यत इति तस्मादज्ञानिनां मतम् ॥'

इत्यत्रेति—चेन्न; उक्तव्याख्याने हि प्रपञ्चपदस्य भेदे सङ्कोचः, विद्यत इत्यत्र विदेरुत्पत्त्यर्थकत्वेऽप्रसिद्धार्थकत्वम्, लाभार्थकत्वे लभ्यते इति व्याख्यानमयुक्तम्; विन्देतेत्यस्यैव कर्त्राख्यातस्य युक्तत्वात् । अथ—कर्माख्यातेन विद्येतेति साधु, तथाच लभ्येतेत्येव पाठ इति, तदप्ययुक्तम्; लाभमात्रस्योत्पत्तित्वाभावात्, आद्यलाभार्थकत्वे च लक्षणा, सत्तायोगमात्रमपि नोत्पत्तिः; द्विती[1]यादिक्षणेऽप्युत्पत्तिव्यवहारापत्तेः, आद्यक्षणावच्छिन्नसत्तायोगार्थकत्वे तु[2] लक्षणा, मायाशब्दस्यापि नेशेच्छाधीनमर्थः; अनिर्वाच्य एव तस्य रूढत्वात्, 'नासदासीन्नो सदासीत्तम असी'दित्यत्र सदसदन्यत्वेनोक्ताविद्यायाम्—

'तरत्यविद्यां विततां हृदि यस्मिन्निवेशिते ।
योगी माया'मित्यादिस्मृतेः 'मायां तु प्रकृति'मित्यादिश्रुतेश्च प्रयोगात्, 'अन्या माया[3] पुनः सृष्टे'ति संवरयुद्धादौ हरिवंशादौ 'स्वप्नमायागन्धर्वनगरवद्वे'ति गौतमीयपूर्वपक्षसूत्रादौ चानिर्वाच्य एव मायाशब्दप्रयोगाच्च । न हि तत्रापीशेच्छाधीनमर्थः; तथासत्यन्यत्सृष्ट[4]मित्येव हरिवंशे उक्तं स्यात्, मायापदस्याव्यावर्तकत्वात् । उक्त-

---

[1] मपि न; उत्पत्तिद्विती–ग. [2] च–ग. [3] अन्यमाया–ख. [4] अन्यसृष्ट–ग.

SGDF Sri Gargeshwari Digital Foundation

सूत्रेऽपि सिद्धान्ताविशेषापत्तेः। 'मायामात्रं तु कात्स्न्र्येनानभिव्यक्तस्वरूपत्वा'दिति शारीरकसूत्रेऽपि मायापदमुक्तार्थकम्; अन्यथोक्तहेत्वसङ्गतेः। 'विष्णोरिच्छावशत्वात्तु मायामात्रमि'ति स्मृतावपि मायापदमनिर्वाच्योपादानकत्वेनानिर्वाच्याभिन्नपरम्। अनिर्वाच्यस्याचेतनस्याप्युपादानत्वमुपपद्यते, ईश्वराधिष्ठानादित्याशयेन विष्णोरित्यादिहेतूक्तिः। अन्यथा मायाशब्दस्य त्वन्मते ईशेच्छाया एवार्थत्वेन (तदर्थत्वेन) तदात्मकत्वस्य प्रपञ्चे बाधात्तज्जन्ये लक्षणापत्तेः। इच्छामात्रमित्यादावप्युक्त एव मार्गः। वस्तुतस्तु—

'विभूतिं प्रसवं त्वन्ये मन्यन्ते सृष्टिचिन्तकाः।
स्वप्नमायास्वरूपेति सृष्टिरन्यैर्विकल्पिता॥
इच्छामात्रं प्रभोः सृष्टिरिति सृष्टौ विनिश्चिताः।
कालात्प्रसूतिं भूतानां मन्यन्ते कालचिन्तकाः॥
भोगार्थं सृष्टिरित्यन्ये क्रीडार्थमिति चापरे।
देवस्यैष स्वभावो[1]ऽयमाप्तकामस्य का स्पृहा'॥

इति श्लोकानां विभूतिं स्वीयैश्वर्यख्यापनम्। स्वप्नमायास्वरूपेति। स्वप्नस्य जाग्रद्दृष्टभ्रमरूपस्य मायाया अपि द्रव्यविशेषादौ भ्रमविशेषरूपायाः स्वरूपा अनित्यत्वयुक्तिविरुद्धत्वादिना सदृशी, न तु मिथ्या, इच्छामात्रं ईश्वरीयसत्यसङ्कल्पमात्रम्, न तु सङ्कल्पातिरिक्तेति केचित्। सृष्टिचिन्तकाः सृष्टौ विनिश्चिता इत्याभ्यां नैते तत्त्वचिन्तका इति परमतं सूचितम्। तेषामेव प्रयोजनं सृष्टेराह—भोगार्थं क्रीडार्थं वेति। स्वमतमाह—देवस्येत्यादि। सृष्टिर्देवस्यात्मनः स्वभावः स्वाभाविकाविद्यातत्परिणाम इति यावत्। स्वरूपतोऽनादित्वं प्रवाहरूपेणानादिभ्रमजनकत्वं चाविद्यादोषस्य स्वाभाविकत्वम्, तदुक्त्यैव सृष्टेर्निष्प्रयो-

[1] प्रभावो–ग.

SGDF
Sri Gargeshwari Digital Foundation

जनत्वं सूचितम् । न ह्यनाद्यविद्यामूलस्वप्नादिभ्रमस्य किंचित्प्रयोजन-मुद्दिश्य केनचित्करणीयत्वमिति बोध्यम् । भोगक्रीडाप्रयोजनकोक्त-पक्षान् दूषयति—आप्तकामस्येत्यादि । तथाचाप्तकामत्वस्य स्वाभावि-कत्वादैश्वर्यख्यापनमतं दुष्टम् । कामित्वसुखदुःखादि मिथ्येति सत्य-स्वप्नमायादितुल्यत्वमतं दुष्टम् । अत एव सत्येच्छामात्रत्वादिमतमपि तथेति भाष्यानन्दगिर्याद्यनुसारिव्याख्यानादिच्छामात्रमिति न स्वमतम्; परं तु तवैव तथा भ्रान्तिः । अहो तव पश्यतोहरचोरत्वं यत्प्रतिश्लोकं युक्तिजालेन दृश्यमिथ्यात्वं प्रतिपादयद्वैतथ्याख्यं प्रकरणं कुर्वतां गौड-पादभगवतां दृश्यसत्यत्वं सम्मतमिति ब्रूषे । तथाहि—

'आदावन्ते च यन्नास्ति वर्तमानेऽपि तत्तथा ।
वितथैः सदृशाः सन्तो वितथा इव लक्षिताः ॥
सप्रयोजनता तेषां स्वप्ने विप्रतिपद्यते ।
तस्मादाद्यन्तवत्त्वेन मिथ्यैव खलु ते स्मृताः ॥
कल्पयत्यात्मनात्मानमात्मा देवः स्वमायया ।
स एव बुध्यते भेदानिति वेदान्तनिश्चयः ॥
अव्यक्ता एव येऽन्तस्तु स्फुटा एव च ये बहिः ।
कल्पिता एव ते सर्वे विशेषस्त्विन्द्रियान्तरे ॥'

इत्यादि श्लोका वैतथ्यप्रकरणस्थाः । यत्तु—'प्रभवः सर्व-भावानां सता'मिति दृश्यसत्त्वसाधकमुक्तम्, तन्न; सतामित्यस्यानभि-व्यक्तनामरूपात्मकानामित्यर्थकत्वात्, असत्कार्यवादनिरासाय तथोक्त-त्वात् । स्पष्टं चैतद्भाष्यादौ । कल्पितो यदीत्याद्युत्तरवाक्यं तु न तेऽनु-कूलम्; विकल्पपदेनोक्तस्य शास्त्राचार्यादिकल्पनस्य यदिशब्देनानावश्य-कत्वद्योतनात्, ईश्वरादेराचार्यादिनैरपेक्ष्येण तपसा ज्ञानाप्तेर्वा भाष्या-दावु[1]क्तत्वात्, हिरण्यगर्भस्यापि बृहदारण्यकभाष्ये तथोक्तत्वात् ।

[1] वासिष्ठादावु-ग.

SGDF
Sri Gargeshwari Digital Foundation

यद्यपि कल्पित इत्याद्यर्थस्य भाष्योक्तत्वात्प्रपञ्चो यदीत्यादेस्तूक्तोऽर्थ-स्त्वत्प्रतिकूलः, अथवा यदिशब्दस्य निमित्ततावोधकत्वात्तस्याश्च स्वान्वयव्यतिरेकव्यापकान्वयव्यतिरेकशालित्वरूपत्वात् यथा 'यदि रथन्तरसामा सोमः स्यादैन्द्रवायवाग्रान् ग्रहान् गृह्णीया'दित्यादौ रथन्तरस्यान्वयव्यापकान्वयत्वमैन्द्रवायवाग्रत्वे पाठादेव प्राप्तमतो व्यति-रेकव्यापकव्यतिरेकत्वे तात्पर्यमिति कल्प्यते तथा सत्त्वस्यान्व-यव्यापकान्वयकत्वं निवर्त्यत्वे बाधितमतो यत्र शुक्तिरूप्यादौ सत्त्वाभावस्तत्रानिवर्त्यत्वमिति व्यतिरेकव्यापकव्यतिरेककत्वपरत्वं कल्प्यते, एवं च तर्कपरत्वानुसारेण मायामात्रमित्यत्र त्वदीयार्थवर्णन-मनवकाशम्, अत एव 'यदि क्षुधा तदा भुङ्क्ष्वे' त्यादौ लोकेऽपि क्षुधाद्यभावव्यापकत्वमभोजनादौ बुध्यते, परमार्थपदं तु यदि स्वतन्त्ररूढम्, तथापि तस्याधिष्ठानसापेक्षत्वरूपपारतन्त्र्याभावरूपत्वेन सर्वभावानां मध्येऽयमद्वैत इत्युक्तेः[1] सर्वभावानां मध्येऽयमधिष्ठान-निरपेक्ष इत्यर्थादेतदन्यत्सर्वमधिष्ठानसापेक्षमित्यर्थलाभात्तवानिष्टम् । ज्ञानानिवर्त्यत्वादिरूपं वा स्वातन्त्र्यम्, यद्धि निवर्तते तन्निवर्तकाभावा-धीनस्थितिकत्वात्परतन्त्रम् । अन्यादृशमेव स्वातन्त्र्यं प्रकृते ग्राह्यमित्यत्र तु न विनिगमकम् । अत एव परमार्थस्तु भूपालेत्यादि—'एकमयं हि यत् 'विज्ञानं परमार्थोऽसौ द्वैतिनोऽतथ्यदर्शिन' इति विष्णु-पुराणे मिथ्याप्रतिद्वन्द्विशुद्धचित्स्वरूपस्य परमार्थशब्दार्थत्व[2]मुक्तम् । 'तत्याज भेदं परमार्थदृष्टि' रित्युपसंहारे च भेदमात्रस्य परमार्थप्रति-द्वन्द्वित्वमुक्तम् । लोकेऽपि सत्यत्वेन ज्ञाते परमार्थपदप्रयोगः । परमा-र्थोऽविनाशीति तु वाक्यं परमार्थस्याविनाशित्वं प्रतिपाद्यानात्मनि परमार्थपदप्रयोगो भ्रान्त्यैव लोकानामिति सूचकम् । अत एव परमार्थो

[1] इत्युक्ते—ग.   [2] र्थकत्व—क.

SGDF
Sri Gargeshwari Digital Foundation

न भेदवानिति पश्चादद्वितीयत्वं परमार्थस्य प्रतिपादितम् । अविनाशिनः परमार्थशब्दार्थत्वमुक्तवाक्यं बोधयतीति त्वयुक्तम् ; परमार्थपदस्य पूर्वत्वेनोद्देश्यबोधकत्वात्पूर्ववाक्यानां तथासत्यननुकूलत्वाच्च, अविनाशित्वेन ज्ञाते परमार्थपदाप्रयोगाच्च । अविनाशित्वेन परमार्थपदार्थतास्वीकारेऽपि दृश्यत्वेनैव तत्त्वधीनिवर्त्यत्वात्, 'विद्वान्नामरूपाद्विमुक्तः' इति श्रुतेश्च शुद्धचिदेवानाशिनीति सैव तथा । एवं च 'वादो ज्ञात' इत्यत्र नञ्कल्पने मानाभावाद्विरोधाच्चास्मदुक्तार्थ एव श्रेयान् । 'सोऽयं सत्य' इत्यादिवाक्यं तु न श्रुतिः; अप्रसिद्धत्वात्, प्रसिद्धत्वेऽपि द्वैतं न विद्यत इति हेतोर्विनिवर्तेत इत्यन्तमज्ञानिनां मतामित्यर्थो बोध्यः । किंच—

तन्वां[1] स्वस्वामिसंबन्धः प्रपञ्चोऽस्य शरीरिणः ।
वस्तुतोऽसौ न चैवास्ति परमस्य वशे यतः ।
तत्त्वादिकस्तथाप्येष ह्यभिमानात्प्रदृश्यते ॥
अतः स विद्यत इत्यङ्गीकारो भवेद्यदि ।
तथापि भगवद्ध्यानात्स निवर्तेदसंशयः ॥

इत्यादिनोक्तश्लोकयोस्त्वदाचार्यैर्माण्डूक्यभाष्ये व्याख्यातत्वात् अहमिदं ममेदमित्यादिस्वस्वामिभावरूपः प्रपञ्चो जीवस्य यद्यपि विद्येत, तथापि भगवत्प्रसादान्निवर्तेत । अद्वैतं महाद्भिर्द्वितीयेन प्रकारेणाज्ञातं परब्रह्मादि द्वैतं द्विधा ज्ञातमज्ञैः, तत्र हेतुः परमार्थतः परमेश्वरान्मायामात्रं तदिच्छाकृतं तदिच्छयैव निवर्तत इति । अतो विकल्पः शरीरादिसंबन्धः केनचिदज्ञानादिना कारणेन कल्पितोऽप्युपदेशान्निवर्तते । अतो ब्रह्मणि ज्ञाते सति द्वैतमन्यथाज्ञातं[2] निवर्तत इत्ययं वादः सतामिति भाष्ये त्वदीयानां व्याख्यानाच्च देहादिसंबन्ध आत्म-

---

[1] तत्त्वं–ग. [2] ज्ञानं–ग.

SGDF
Sri Gargeshwari Digital Foundation

नोऽज्ञानकल्पित इति त्वयाप्युच्यते । तथाचात्मनि देहादिसंबन्धो देहादिर्वाऽज्ञानकल्पित इत्यनयोर्विनिगमकाभाव इत्यस्य एतद्ग्रन्थादावेव विस्तरेणास्माभिरुक्तत्वाद्देहादिमिथ्यात्वं त्वन्मते बलादापततीति कथं तव भेदसामान्यस्य सत्यतोक्तिः? देहादिमद्भिन्नभेदस्य देहादिरूपस्य मिथ्यात्वावश्यकत्वात् कथं वा त्वद्याख्या त्वद्भाष्यादिविरुद्धेति व्यक्तमेव भ्रान्तप्रतारकोऽसि । **श्रीगौडपादभगवतां श्लोकोपपत्तिः ॥**

'सत्यं ज्ञानमनन्त' मित्यादिश्रुतावनन्तपदादपि दृश्यमात्रं मिथ्या। नन्वन्तपदं न पारीच्छिन्ने[1] व्युत्पन्नम्; येन परिच्छिन्नशून्यबोधकनञ्पदेन बहुव्रीहिणा दृश्यमात्रमिथ्यात्वलाभः, किंतु परिच्छेदे, तथाच यथा गगनादेर्देशकालापरिच्छेदस्वीकारेऽपि देशकालयोर्न मिथ्यात्वलाभः, तथा ब्रह्मणो देशनिष्ठात्यन्ताभावं कालनिष्ठध्वंसप्रागभावौ वस्तुनिष्ठभेदं च प्रति प्रतियोगित्वरूपाणां देशकालवस्तुपरिच्छेदानामभावेऽपि न दृश्यमिथ्यात्वासिद्धिः । यथा ब्रह्मणो जीवनिष्ठभेदाप्रतियोगित्वेऽपि जीवस्य स्वरूपेण न मिथ्यात्वम्; किं त्वौपाधिकरूपेण, तावतैव विरुद्धांशत्यागेनात्यन्तिकाभेदनिर्वाहात्, तथा प्रपञ्चनिष्ठभेदाप्रतियोगित्वेऽपि प्रपञ्चो न स्वरूपेण मिथ्या; किंतु औपाधिकरूपेण । किंचापरिच्छेदो न भेदाभावः; तथासति परिच्छिन्नाद्भेदाभावे ब्रह्मणोऽपरिच्छिन्नशब्दार्थत्वायोगात्, कालापरिच्छिन्नेऽपि परमाण्वादौ देशादिपरिच्छेदवद्देशकालापरिच्छिन्ने गगनादौ पृथिव्यादिभेदमात्रेण परिच्छेदस्याव्यवहारात्, अनन्तपदेन त्वयैव परिच्छिन्नभेदस्योक्तत्वेन विरोधात्, भिन्न इत्यर्थे परिच्छिन्न इत्यप्रयोगाच्च । तस्माद्देशकालगुणपरिच्छेदशून्य एवानन्तशब्दार्थ इति–चेन्न; जीवस्वरूपस्य ब्रह्मस्वरूपाविरुद्धत्वेन ब्रह्मैक्यसंभवात्, तद्भेद-

---

[1] नन्वनन्तपदं नापरिच्छन्ने–ग.

SGDF
Sri Gangeshwari Digital Foundation

मात्रनिषेधात्तदमिथ्यात्वेऽपि दृश्यस्वरूपाणां परिणामित्वादिना ब्रह्मस्वरूपविरुद्धत्वेनैक्यासंभवात्, ब्रह्मणि तद्भेदनिषेधे[1] भेदव्याप्यानां[2] दृश्यस्वरूपाणामपि निषेधस्यार्थिकत्वात्, भेदसामान्यस्येव दृश्यसामान्यस्यापि मिथ्यात्वसिद्धेः, व्यापकनिषेधे व्याप्यनिषेधस्यावश्यकत्वात्[3]। गगनादौ तु देशादिनिष्ठाभावप्रतियोगित्वनिषेधेऽपि न देशादिनिषेधः; उक्तप्रतियोगित्वस्य देशादिसंबन्धिषु वस्त्वन्तरेष्वसत्त्वेन देशादिव्यापकत्वस्यैवाभावात्, भेदप्रतियोगित्वस्येव भेद्यदृश्यसामान्यस्यापि निषेधमादाय दृश्यभेदप्रतियोगित्वनिषेधस्य पर्यवसानसंभवेन बाधकाभावाद्विनिगम्यत्वाच्च दृश्यमात्रस्यैव निषेधसंभवात्। न च—भेदत्वेनैव भेदोऽनन्तपदेन निषिध्यत इति न दृश्यनिषेधपर्यवसानमिति—वाच्यम्; देशकालवस्तुघटितत्वेनैव परिच्छेदानां त्रैविध्यव्यवहारात्प्रपञ्चस्यापि वस्तुगत्या परिच्छेदशून्यत्वेनानन्तत्वापत्त्या स्वसमानसत्ताकपरिच्छेदविशिष्टत्वानां दृश्येष्वेव प्रसिद्धानामन्त[4]पदार्थतया तच्छून्यमनन्तपदबोध्यमिति तत्तद्दृश्यसमसत्ताकानां भेदादिप्रतियोगित्वानां तादृशत्वेनैव निषेध्यत्वात्। किञ्चिद्वस्तुनिष्ठतादात्म्यावच्छिन्नप्रतियोगिताकाभावस्यैव[5] भेदत्वेन सामान्यतस्तादात्म्यत्वस्यानुगतस्याभावेन दृश्यतादात्म्यमादायैव प्रकृते निषेधात्। तादात्म्यत्वस्य भेदत्वस्य वातिरिक्तत्वेऽपि दृश्यमात्र एव स्वाश्रयभिन्नभेदत्वसत्त्वात्तन्निषेधः सिध्यत्येव। अधिकरणमेव भेद इति मते तु सुतराम्। किंचापरिच्छेद इत्यादिकं तु न युक्तम्; भेदप्रतियोगित्वरूपपरिच्छेदाभावेऽपि परिच्छिन्नभेदानुयोगित्वसंभवात्, मिथ्यात्वाभावोपलक्षिते सत्यपदस्येव भेदोपलक्षिते भिन्नार्थकपदस्य लक्षणया प्रयोगसंभवाच्च। गगनादिकं

---

[1] तद्भेदमात्रनिषेधे–ग. [2] भेदे व्याप्यानां–क. [3] व्यापकनिषेधस्यावश्य-कत्वात्–ग. [4] मनन्त–ग. [5] भावत्वस्यैव–ग.

SGDF
Sri Gangeshwari Digital Foundation

देशकालापरिच्छिन्नमिति तु भ्रमः ; गुणादौ संयोगादिना तस्याभावात्। अथ—तत्रापि संबन्धान्तरेण तत्सत्वात्केनचित्संबन्धेन तत्संबन्धिनि न तदभाव इति मते तथा वाच्यम्, तथा च भेदप्रतियोगित्वरूपपरिच्छेदस्य तत्र कुतो न धीः? अनन्तपदेन मया परिच्छिन्नभिन्नमुच्यत इत्यपि भ्रमः। भेदप्रतियोगित्वशून्यस्यैव बहुव्रीहिणा तत्पदेनोच्यमानत्वात्। भिन्न इत्यर्थे तु परिछिन्नपदं प्रयुज्यत एव; एकहायन्यादिद्रव्यमारुण्यादिना इतरभिन्नमित्यर्थे तत्तेन परिच्छिन्नमित्यस्यामूर्तस्य मूर्तभेदकत्वेन क्रियाकारकत्वमित्यर्थे तस्य तत्परिच्छेदकत्वेन क्रियां प्रति कारकत्वमित्यस्य च वार्तिकादौ व्यवहारस्य स्पष्टत्वात्॥

'तस्मादन्तः[1] परिच्छित्तिः सा चाभावीयतैव हि।
निषेध्यं प्रतियोगित्वमभावीयमतोऽखिलम्'॥

अति अदि बन्धन इति धातुसिद्धान्तपदस्य बन्धनार्थकतया बन्धनस्य च किञ्चिद्देशकालसंसर्गविरोधिस्वरूपतया संसर्गाभावप्रतियोगित्वरूपत्वमिव किञ्चिद्वस्त्वैक्यरूपमिलनाविरोधितया भेदप्रतियोगित्वरूपत्वं संभवतीति तदप्यन्तपदार्थः प्रकृते निषिध्यते। अत एव—

'अनन्तः केशवे शेषे पुमान्निरवधौ त्रिषु'।

इति मेदिनी। संसर्गाभाववत इव भेदवतोऽपि प्रतियोगिनं प्रत्यवधित्वात्। अत एव काश्यादेरसीवरणास्थानाद्यवधिकत्वव्यवहारः। यत्तु—देशकालगुणापरिच्छिन्नमनन्तशब्दार्थ इत्युक्तम्—तन्न; गुणापरिच्छेदोऽसङ्ख्यगुणकत्वं देशकालापरिच्छिन्नगुणकत्वं वा, नाद्यः; 'सत्यं ज्ञान'मित्यादिनिर्गुणप्रकरणे तस्य प्रतिपादनासंभवात्, 'केवलो निर्गुण' इत्यादिश्रुतिविरोधात्। अत एव नान्त्यः 'मय्यनन्तगुणेऽनन्ते गुण[2]तोऽनन्तविग्रह' इत्यादौ गुणानन्त्यस्य पृथगुक्तिवैयर्थ्यात्, देश-

---

[1] तस्मादतः—ग.　[2] नन्तगुण—ग.

SGDF
Sri Gargeshwari Digital Foundation

कालपरिच्छिन्ने परिच्छेदा[1]व्यवहारस्य त्वयैवोक्तत्वेन गुणतः परिच्छेदस्य सुतरामव्यवहार्यत्वाच्च । 'पृथिव्येतावती'त्यादिश्रुतौ देशकाला[2]परिच्छिन्नेऽपि पृथिव्यादौ गुणतः परिच्छेदो व्यवह्रियत इत्युक्तिस्तु मौढ्यात्, पृथिव्यादेर्देशादिपरिच्छेदात् । तस्माद्गुणानन्त्यस्यानन्तपदार्थत्वे मानाभावादुक्तरूपमेवानन्त्यम् । **अनन्तश्रुत्युपपत्तिः ॥**

'तदेतन्मधु दध्यङ्ङाथर्वणोऽश्विभ्यामुवाच 'रूपं रूपं प्रतिरूपो बभूव तदस्य रूपं प्रतिचक्षणाय इन्द्रो मायाभिः पुरुरूप ईयते युक्ता ह्यस्य हरयः शतादशेत्ययं वै हरयोऽयं वै दश च सहस्राणि बहूनि चानन्तानि तदेतद्ब्रह्मापूर्वमनपरमनन्तरमबाह्यमयमात्मा ब्रह्म सर्वानुभू'रिति श्रुत्यापि दृश्यं मिथ्या । यत्कक्ष्यं मधु पूर्वमुक्तं तदिदं, किं तत्? रूपमित्यादि सर्वानुभूरित्यन्तं यद्रूपं रूपं प्रति प्रतिरूपो रूपान्तरम्, नानारूपमिति यावत् । किमर्थं नानारूपत्वं तत्राह—तन्नानारूपमस्यात्मनः प्रतिचक्षणाय प्रतिख्यापनाय, प्रज्ञानघनस्य हि निरुपाधिकस्वभावस्य नानारूपत्वेनैव संसारिरूपेणाचार्यादिज्ञेयब्रह्मरूपेण वा प्रतिख्यापनं नान्यथा, अतोऽयं नानारूपत्वादिन्द्रः परमेश्वर एकरूपोऽपि मायाभिर्मिथ्याभूतैरभिन्नः पुरुरूपः ईयते ज्ञायते । कुतो नानारूपा माया? तत्राह—हि यस्मादस्यात्मनो रथिस्थानीयस्य हरयोऽश्वा इन्द्रियरूपा रथस्थानीये शरीरे विषयरूपदेशप्राप्तये आगन्तुकतया युक्ताः संबद्धाः । तथाहि काठकश्रुतिः—

'आत्मानं रथिनं विद्धि शरीरं रथमेव तु ।
बुद्धिं तु सारथिं विद्धि मनःप्रग्रहमेव च ।
इन्द्रियाणि हयानाहुर्विषयांस्तेषु गोचरान् । इति ।

'ततश्च हयादीनामागन्तुकत्वादयमात्मैव हरयोऽयमेव च वक्ष्यमाण-

---

[1] परिच्छेद–ग. [2] देशकाल–क.

SGDF
Sri Gargeshwari Digital Foundation

दशादिरूपा विषया नात्मान्यदस्ति तत्तस्माद्धर्याध्युपाधिशून्यत्वादेतदात्मस्वरूपं ब्रह्मेत्याद्येतावन्मधुस्वरूपं प्रत्यग्ब्रह्मणोरैक्य'मिति भाष्यवार्तिकानुसारिव्याख्यानात् ॥

ननु—मायाभिर्विचित्रशक्तिभिर्मत्स्याद्यनेकरूपत्वमिन्द्र इत्यादावुच्यते, 'रूपं रूपं प्रतिरूपो बभूवे'त्यत्रापि बिम्बभूतेश्वरीयरूपाणां प्रतिरूपशब्दितप्रतिबिम्बभूतजीवोपास्यानां रूपं रूपमित्यनेनोक्तत्वात्, तेषामेव पुरुरूपेत्यत्र रूपपदेन प्रत्यभिज्ञानात्, 'अयं वै हरय' इत्यत्रापि हरिशब्देन विष्णुरूपाणां दशत्वादिनोक्तत्वात्। अन्यथा अद्वैतमते चिन्मात्रस्यैव नानारूपाधिष्ठानत्वेनेन्द्रपदास्वारस्यात्। मायां तु प्रकृतिं विद्यादि'त्यत्रापि मायया संनिरुद्ध इति पूर्वोक्ता या माया सा प्रकृतिः प्रधानमित्यर्थो न तु या प्रकृतिः सा माया मिथ्येति पूर्वोक्तमायाशब्दार्थस्य जिज्ञासितत्वात्, प्राथम्येन मायाया एवोद्देश्यत्वात्प्रकृतिशब्दस्य प्रधाने प्रसिद्धत्वान्मायाशब्दस्य सत्ये मन्त्रौषधादावपि प्रयोगाच्चेति—चेन्न। 'पुनः स पक्षीभूत्वा पुरः पुरुष आविश' दित्यनेन हि यत्पुरावेशनमुक्तम्, 'रूपं रूप'मित्यादिना प्रतिलिङ्गशरीरं प्रतिबिम्बीभवनरूपत्वेन तदेव व्याख्यातं जिज्ञासितत्वान्न तु जीवोपास्यमत्स्यादिरूपमुक्तम्; अजिज्ञासिताभिधानापत्तेस्तस्याप्रकान्तत्वात्। पुरुरूपपदेन प्रक्रमिष्यमाणस्य तस्य ग्रहणमपि न युक्तम्; न हि जीवान्प्रति मत्स्यादिरूपं बिम्बम्; किंत्वीश्वरः, तस्य च नोक्तिसंभवः; रूपं रूपमिति वीप्साया असङ्गतेः। शरीरेश्वरयोरत्यन्ताभेद स्तु बाधितो दूषितश्च। अथ—प्रतिरूपः प्रतिबिम्बभूतो जीवः रूपं रूपं बभूव प्राप्तवान् सेवत इति यावत्, भू—प्राप्तावित्यस्य छान्दसं पदम्, तथाप्यध्यात्मप्रकरणे उपास्यरूपोक्त्यसङ्गतिः। लिङ्गशरीरप्रतिबिम्बत्वोक्त्या तु जीवस्य विवेचनं सङ्गतम्। मायाशब्दस्य च शक्तिपरत्वे लक्षणापत्तिः। 'माया प्रज्ञा वयुन'मिति नैघण्टुकोक्त्या ज्ञाने

SGDF
Sri Gargeshwari Digital Foundation

यौगिकस्यापि तस्य मिथ्यारूढत्वात् । मिथ्याभूतस्य कारणे मन्त्रादावपि प्रयोगो लक्षणयैव । अस्येत्यस्याव्यवहितेन्द्रपरामर्शकत्वे षष्ठ्यर्थासङ्गतिः, व्यवहितजीवपरामर्शकत्वे स एव दोषः । अवतार्यावतारभावस्य षष्ठ्यर्थत्वेऽपि 'अयं वै हरय'इत्यादि 'इन्द्र' इत्यादि च व्यर्थ्यम् । न हीदमुपासनापरम्, निर्गुणप्रकरणस्येदं वै तन्मध्वित्यादौ स्फुटत्वात्, युक्ता ह्यस्येत्यादावस्मदुक्तार्थस्य श्रुत्यन्तरसंवादस्योक्तत्वात् ॥

'वायुर्यथैको भुवनं प्रविष्टो रूपं रूपं प्रतिरूपो बभूव ।
एकस्तथा सर्वभूतान्तरात्मा रूपं रूपं प्रतिरूपो बहिश्च ॥'

'सूर्यो यथे'त्यादि 'न लिप्यते लोकदुःखेन बाह्य' इत्यादिश्रुतौ मदुक्तार्थस्य स्फुटत्वात् । न ह्यत्र प्रतिरूपो जीवोऽणुत्वेन [1]तदङ्गीकृतो मत्स्यादिरूपोपासक इत्युच्यते; बहिष्ट्वस्य सर्वभूतान्तरात्मत्वस्यैकत्वस्य दुःखालेपस्य चान्वयापत्तेः, किंतु प्रतिदेहं प्रवेशेन विविच्यमानजीवानुवादेन तस्य बहिष्ट्वादिकमज्ञातं ज्ञाप्यते । न च—'रूपं रूप'मित्यनेनोक्तेषु मत्स्यादिदेहेषु प्रविष्ट ईशः प्रतिरूपपदेनोच्यत इति—वाच्यम्; 'स एष इह प्रविष्ट'इत्यादिवाजसनेयाद्युक्तप्रतिरूपशब्दितजीवप्रत्यभिज्ञाविरोधात्, न लिप्यत इत्यप्रसक्तप्रतिषेधापत्तेः, प्रतिरूपबहिरनुवादेन एकपदेनाद्वितीयस्वरूपविधानविरोधात्, 'भूतानीन्द्रियाणि विराजं देवताः कोशांश्च सृष्ट्वा प्रविश्यामूढो मूढ इव व्यवहरन्नास्ते माययैवे'ति तापनीये 'स एष इह प्रविष्ट आनखाग्रेभ्यः प्राणन्नेव प्राणो भवति वदन् वाक् पश्यंश्चक्षु'रित्यत्र चोक्तप्रविष्टजीवप्रत्यभिज्ञाविरोधाच्च । 'रूपं रूपं [2]मघवानो भवती'त्यादिमन्त्रस्तु ईशस्तुतिपरो न त्वद्वैतात्मपरप्रकृतवाक्यसमानार्थकः । 'मायां तु प्रकृति'मित्यादेस्तु या प्रकृतिः सा माया मिथ्येत्येवार्थः; माया च तमोरूपानुभूतेः 'तदेतज्जडं मोहात्मकमनन्तं तुच्छमिदं रूप'मित्यादि 'तुच्छयेनाभ्वपिहितं

[1] त्वदङ्गीकृतो–ग. [2] मघवा बोभवती–ग.

SGDF Sri Gangeshwari Digital Foundation

यदासीदनृतेन हि प्रत्यूढा' इत्यादिश्रुतिभ्यः। अतो मिथ्याप्रकृतिकत्वेन[1] जगन्मिथ्येत्युक्तवाक्यादपि सिद्ध्यति। यद्यपि मायाशब्दः प्रथमस्तथापि तदर्थो न जिज्ञासितः; मिथ्यारूपत्वेन लोके ज्ञातत्वात्, अतस्तमुद्दिश्य प्रधानत्वरूपविशेषो नोक्तवाक्येन बोध्यते, किंतु 'मायया संनिरुद्ध' इति पूर्ववाक्ये बन्धस्योक्तो मायारूपो हेतुः प्रकृतिर्न तु निमित्तमिति मायामित्यादिनोच्यते। अन्यथा मिथ्यानिमित्तकस्यापि मिथ्यात्वासम्प्रतिपत्त्या प्रपञ्चमिथ्यात्वासिद्धेः। तदेतन्मधु इत्यादिश्रुत्यर्थः॥

'अतोऽन्यदार्त'मित्यादिश्रुत्यापि दृश्यमात्रं मिथ्या; आत्मान्यस्य सर्वस्य नाशित्वरूपार्तत्वबोधनेन तेन हेतुना मिथ्यात्वानुमाने तात्पर्यात्, धूमोऽस्तीत्यादेर्वह्न्यनुमानतात्पर्यवत्। अथवाऽऽर्तत्वं पीड्यमानत्वम्, तथाचान्यत्सर्वमत आर्तमेतज्ज्ञाननिवर्त्यमित्यर्थः, 'स्वात्मबन्धहरः सर्वदा द्वैतरहित आनन्दरूपः सर्वाधिष्ठानं सन्मात्र' इति तापनीयादिश्रुतेः। अथवात एतत्संबन्धादन्यदार्तं पीडितं वितथीकृतं दृक्संबन्धाद्दृश्यं मिथ्या; संबन्धानिरूपणादिति भावः। ननु— 'ब्राह्मणादन्यमानये'त्युक्ते यथा सजातीयशूद्रादिरानीयते 'समानामितरच्छ्येनेने'त्यादिश्रुतौ प्रकृतमितरदङ्गजातं[2] श्येनयागेन समं बुध्यते न तु काष्ठादि, तथा जीवरूपं सजातीयं प्रकृतं चान्यशब्दार्थः, तस्य च नाशित्वासंभवादार्तं दुःखीत्यर्थ इति—चेन्न; 'एष त आत्मा,' 'नान्योऽतोस्ति श्रोते'त्यादिभिर्जीवैक्यापन्नब्रह्मण एव प्रकृतत्वेनातःशब्देन तस्यैवोक्तत्वात्, अतोऽन्यदित्यनेन जीवस्य ब्रह्मान्यत्वोक्तेरसंभवात्, दृष्टान्ते तु बाधकाभावात्, सङ्कोचावश्यकत्वाच्च शूद्रादिप्रकृतमात्रपरत्वमितरपदस्य युक्तम्। अथान्यपदेनात्मान्यत्वेन मनस एव बोधनात्तस्य दुःखित्वं प्रतिपाद्यतामात्मनोऽतिदुःख[3]तालाभायेति—चेन्न;

[1] मिथ्याप्रकृतितत्वेन–ग. [2] व्रातं–क. [3] त्मनो निर्दुःख–ग.

SGDF
Sri Gangeshwari Digital Foundation

ईशाभेदेनैव तल्लाभादन्यपदसङ्कोचे मानाभावात्, 'हविरार्तिमार्छे'-दित्यादौ नाशस्याप्यत्यर्थत्वात्। अतोऽन्यदार्तमिति श्रुत्यर्थः॥

श्रुतिस्मृत्यादिषु दृश्यमसदवस्त्वपरमार्थं मिथ्या अतात्त्विकम-विद्यमानं स्वप्नसमं मायामयमित्यादिनिर्देशादपि दृश्यं मिथ्या। तत्र सच्छब्दस्य साध्वादिरूपनानार्थकत्वेऽपि 'अद्वयमात्मा सन्मात्र' इत्यादि[1] 'असदन्य'दित्यन्ततापनीयादौ तस्याद्वयादिपदयोगात्सत्यार्थकत्वेनास-च्छब्दस्य मिथ्यार्थकत्वम्। न हि साधुत्वसंसृष्टस्याद्वयत्वादिसंभवः॥

'तस्मादिदं जगदशेषमसत्स्वरूपं
स्वप्नाभमस्तधिषणं पुरुदुःखदुःखम्॥
त्वय्येव नित्यसुखबोधतनावनन्ते
मायात उद्यदपि यत्सदिवाव[2]भाति॥

इति भागवते मायिकत्वेनासदपि सदधिष्ठानत्वेन सदिव भातीत्युक्तत्वात्॥

"सत्त्वं स्वातन्त्र्यमुद्दिष्टं तच्च कृष्णो न चापरः।
अस्वातन्त्र्यात्तदन्येषामसत्त्वं विद्धि भारत॥

इति भारते तु स्वातन्त्र्यं तत्त्वज्ञानाभावप्रयुक्तास्थितिकत्वरूपपारतन्त्र्य-शून्यत्वं सत्यत्वपर्यवसितम्, बिम्बप्रतिबिम्बत्वाभ्यां कृष्णजीवयोः साधु-त्वासाधुत्वे इत्यर्थो वेति तद्दृष्टान्तेनान्यत्रासच्छब्दस्यान्यादृशास्वात-न्त्र्यार्थकत्वकल्पनं भ्रान्तिः;

सत्ये साधौ विद्यमाने प्रशस्तेऽभ्यर्हिते च सत्।

इत्यमरे, 'सन् साधौ धीरशस्तयोः। मान्ये सत्ये विद्यमाने त्रिषु साध्वुभयोः स्त्रियाम्' इति मेदिन्यादौ च स्वातन्त्र्यस्य सत्यत्वादिभिन्न-स्यार्थस्यानुक्तेस्तदर्थकत्वे मानाभावात्। नन्ववस्तुपदं परिणाम्यर्थकम्, अपरमार्थपदं च नाश्यर्थकम्॥

---

[1] सन्मात्रमित्यादि--ग. [2] सदिवावि--ख.

SGDF Sri Gargeshwari Digital Foundation

यत्तु कालान्तरेणापि नान्यसंज्ञामुपैति वै ।
परिणामादिसंभूतां तद्वस्तु नृप तच्च किम् ॥
परमार्थोऽविनाशीति प्राज्ञैरभ्युपगम्यते ।

इति वैष्णवात् । मिथ्येति च वृथेत्यर्थकम्; 'मिथ्यैष व्यवसायस्त' इति प्रयोगात् । दुष्टेत्यर्थकं वा; 'मिथ्योपपदात्कृञोऽभ्यास' इति सूत्रे 'पदं मिथ्या कारयते स्वरादिदुष्टमसकृदुच्चारयतीत्यर्थ' इति काशिकोक्तौ 'एतेन मिथ्याशब्दस्यार्थमाचष्ट' इति न्यासे व्याख्यानात् । अतात्विकेति च विकारीत्यर्थकम्;

तद्वदेव स्थितं यत्तु तात्विकं तत्प्रचक्षते ।

इति कौर्मात् । अविद्यमानेति जीवसंबन्धित्वेनाविद्यमानेत्यर्थकम्; 'अविद्यमानं जीवस्य प्रतिभाती'ति स्कान्दात् । स्वप्नादिसमेति चानित्यत्वादिमदित्यर्थः;

अनित्यत्वविकारित्वपारतन्त्र्यादिरूपतः ।
स्वप्नादिसाम्यं जगतो न तु बोधनिवर्त्यता ॥

इति वचनात् । मायामयेति च प्राकृतेत्यर्थः;

त्रिगुणा प्रकृतिर्माया तज्जत्वाद्विश्वमीदृशम् ।
अनाद्यनन्तकालेषु मायेत्याहुर्विपश्चितः ॥

इति स्मृतेरिति चेन्न; तद्वस्त्वित्यस्य तदेव वस्त्वित्यर्थाद्वस्तुत्वस्यापरिणामित्वव्याप्यताया लाभेन व्यापकस्यापरिणामित्वस्वाभाव्येनावस्तु[1]त्वस्य लाभेऽपि वस्तुत्वस्यापरिणामित्वस्वरूपत्वालाभात् । 'परमार्थं न पृच्छसि' परमार्थो न भेदवान्, 'परमार्थोऽविनाशी'त्यादि 'विज्ञानं परमार्थोऽसौ द्वैतिनोऽतथ्यदर्शिन' इत्यन्तेनाद्वैतचिन्मात्ररूपपरमार्थनिरूपणस्यैव प्रकृतत्वेन प्राधान्येनापरिणाम्युक्तेरनुपयोगात् ।

[1] त्वस्याभावेनावस्तु—ग.

SGDF
Sri Gargeshwari Digital Foundation

'ज्योतींषि विष्णुर्भुवनानि विष्णु'रित्यादिना ब्रह्मणः सार्वात्म्यमुक्त्वा- 'ज्ञानस्वरूपो भगवान् यतोऽसावेष मूर्तिः[1] न तु वस्तुभूत' इत्यत्र ज्ञानरूपत्वेन तदन्यरूपस्यावस्तुत्वोक्तेः। न हि परिणामित्वरूपावस्तुत्वे उक्तहेतुसंभवः । 'तस्मान्न विज्ञानमृतेऽस्ति किंचि'दित्युपसंहाराच्च 'परमार्थोऽविनाशी'त्यत्रापि परमार्थमुद्दिश्यानाशित्वविधिर्न त्वनाश्युद्देशेन परमार्थसंज्ञाविधिः। 'परमार्थस्तु भूपाल संक्षेपाच्छ्रूयता'मित्यादिना पश्चादेव परमार्थप्रतिपादनप्रतिज्ञानेन पूर्वं नाशित्वाद्यभावप्रतिपादनमात्रस्य परमार्थे कृतत्वात्परमार्थसारभूतं यत्तदद्वैतमशेषतः 'तत्याज भेदं परमार्थ- दृष्टि'रित्युपसंहारे परमार्थस्याद्वितत्वेनोक्तेः परमार्थसारेत्यस्य कर्मधारयत्वा- दन्यपरमार्थत्वशङ्काविरहात्। मिथ्यापदं तु वितथे रूढम्; मृषा मिथ्या च वितथे इत्यमरात्। मिथ्यैष व्यवसाय इत्यत्रापि निश्चय एष वितथ इत्यर्थात्पदं स्वरादिदुष्टमित्यस्यापि स्वरादिदोषेण पदमाभासीकृतमित्य- र्थात् । अन्यथा दुष्टजलादौ मिथ्याजलादिव्यवहारापत्तेर्वृथाद्यर्थकत्वे मानाभावाच्च। अतत्त्वेत्यस्यापि मृषार्थत्वमेव; तत्त्वशब्दस्य सत्यरूढत्वस्य वाचारम्भणश्रुतिव्याख्याने पूर्वमुक्तत्वात्। तद्वदेवेत्यादावेवकारस्यानुषङ्गा- त्तद्वदेव स्थितं यत्तदेव तात्त्विकमित्यर्थादविकारित्वव्याप्यत्वस्य तत्त्व- रूपतायामुक्तत्वेनाविरोधात्। तद्वदिति वत्यर्थस्त्वविवक्षितः; अन्यथा भेदघटितसादृश्ये सत्यपरिणामित्वस्याप्यसंभवात् ॥

अविद्यमानोऽप्यवभासतेऽर्थो
ध्यातुर्धिया स्वप्नमनोरथौ यथा ।
अर्थे ह्यविद्यमानेऽपि संसृतिर्न निवर्तते ।
छायाप्रत्याह्वया भासा ह्यसन्तोऽप्यर्थकारिणः ॥

इत्यादौ चाविद्यमानासदादिपदं प्रतिपन्नोपाधावविद्यमानरूपमिथ्यातात्प- र्यकम्; स्वभावकालीनविद्यमानसामान्यस्य भेदबोधनान्न तु जीवसंब-

[1] सावशेष—ग.

SGDF
Sri Gargeshwari Digital Foundation

न्धित्वेनाविद्यमानबोधकम् ; लक्षणापत्तेः । अत एवाविद्यमानं जीवस्य प्रतिभातीति जीवस्य मूढस्याविद्यमानमेव भाति, अमूढस्य तु तत्त्वमपीत्यर्थकम् । अत एवासन्त इत्यनेन मिथ्याभूतमर्थक्रियाकारि दृष्टान्तत्वेनोक्तम् । अत एव च स्वप्नादिसाम्यं मिथ्यात्वेन ; तत्त्वनित्यत्वादिना तस्य प्रत्यक्षादिसिद्धत्वेन तदुक्तिवैयर्थ्यात् । अनित्यत्वेत्यादिवचनं त्वप्रामाणिकम् ; प्रामाणिकत्वेऽपि पारतन्त्र्यमुक्तरूपम् । बोधपदं च व्यवहारकालीनजाग्रद्बोधपरम् ; अत एव 'वैधर्म्याच्च न स्वप्नादिवत्' । इति सूत्रे तथोक्तम्--'इन्द्रजालमिव मायामयं स्वप्न इव मिथ्यादर्शनं कदळीगर्भ इवासारं नट इव क्षणवेशं चित्रभित्तिरिव मिथ्यामनोरम' मिति । मैत्रायण्यादिश्रुतौ तु मिथ्यादर्शनविषयत्वेन स्वप्नसादृश्यं स्फुटम् । तेन च ज्ञानमिथ्यात्वे लब्धेऽपि ज्ञेयमिथ्यात्वलाभायेन्द्रजालदृष्टान्तेन मिथ्याप्रकृतिकत्वं मायामयशब्देनोक्तम् । प्राकृतं तु प्रकृतेन मायामयशब्दार्थः ; इन्द्रजालदृष्टान्तासङ्गतेः । न हि प्रपञ्चे प्राकृतत्वसाध्यताकाले इन्द्रजाले प्राकृतत्वं सिद्धम् । मिथ्याप्रकृतिकत्वस्य प्रपञ्चे साध्यताकाले तु तदिन्द्रजाले सिद्धम् ; मिथ्यात्वेनानुभूयमानस्य शुक्तिरूप्यादेर्मिथ्याभूताज्ञानोपादानकत्वेन क्लृप्तत्वात् । मायाशब्दो लोके मिथ्यारूढ इति तूक्तमेव । अत एव 'सेयं माया भगवतो यन्नयेन विरुध्यत' इति भागवतादौ युक्तिविरुद्धस्य मायात्वमुक्तम् । भगवत इति षष्ठ्यर्थस्तु नियम्यत्वादिः । युक्तिविरुद्धस्यापि सत्यत्वे शुक्तिरूप्यादेरपि तदापत्तिः[1] । त्रिगुणेत्यादौ तु मिथ्यास्वरूप[2]मायाशब्दरूढ्यर्थस्य मिथ्याप्रकृतिकत्वेन जगत्युपपादनं कृतम् । या मूलप्रकृतिः सा मिथ्या तदुपादानकत्वात्कार्यमात्रं मिथ्येत्यर्थात् । न तु प्रकृतौ मायाशब्दरूढिरुक्ता ; लोकक्लृप्तमिथ्यारूढ्यैव तस्यां श्रौतप्रयोगसंभवात्, रूढ्यन्तरकल्पने मानाभावात् । मायाविद्याभेदमते त्वविद्याख्या-

---

[1] तदापत्तेः–ग. [2] मिथ्यात्वरूप-क. ग.

SGDF
Sri Gargeshwari Digital Foundation

वृत्तरूपेण मायापदप्रयोगो नायुक्तः[1], यथा हि ज्ञानमात्रस्य विद्या-ज्ञानादिपदमुख्यार्थत्वेऽपि तत्त्वज्ञानमात्रवृत्तिना मुख्यज्ञानत्वादिना 'उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिन' इत्यादौ लाक्षणिकः प्रयोग आजानिकस्तथा सर्वमिथ्यामूलत्वश्रेष्ठत्वादिना भगवदुपाधिमात्रवृत्तिरूपेण मायापदस्य तादृशप्रयोगसंभवात् । अत एव 'जीवेशावाभासेन करोति माया चाविद्या च स्वयमेव भवती' त्यादिश्रुतिरपि व्याख्याता । न हि धार्मिक एव मनुष्य इत्यादिप्रयोगानुरोधेन धार्मिकादौ मनुष्यादिपदस्य रूढिः कल्प्यते । अतएव—

ऋतेऽर्थं यत्प्रतीयेत न प्रतीयेत चात्मनि ।
तद्विद्यादात्मनो मायां यथाभासो यथा तमः ॥

इति भागवतम् । अर्थस्य प्रतीयमानस्य स्वस्याभावेऽपि यत्प्रतीयते, स्वाधिकरणे वर्तमानाभावप्रतियोगीति यावत्, तन्मायापदार्थं विद्यात्, तस्य चात्मैवावच्छिन्नानवच्छिन्नरूपेणाधिष्ठानम्, अन्यस्य सर्वस्यापि कल्पित-त्वादित्याशयेन—**आत्मन इत्युक्तम्** । नन्वेवम्—स्वप्रकाशस्याधिष्ठानस्य सर्वदा भानात्कथं तत्रारोपस्तत्राह—**न प्रतीयेत चात्मनीति** । आत्मनि परमानन्दरूपेण प्रतीयत इति यत्तदपि माया, पूर्णानन्दस्वप्रकाशस्फुरण-रूपप्रतीत्यभावत्ववत् भावरूपमज्ञानं जगदुपादानमपि तादृशमायेति यावत् । तथा च स्वप्रकाशेऽप्यप्रकाशस्य कल्पितत्वात्तन्मूलकोऽन्यस्य सर्वस्यारोप इति भावः । अर्थाभावे प्रतीयमानत्वे दृष्टान्तमाह—**यथाभास इति** । यथा शुक्त्यादौ रूप्याद्याभास इत्यर्थः । प्रकाश-स्वरूपे तदभावत्वेन कल्प्यमानत्वे दृष्टान्तमाह—**यथा तम इति** । यथा मध्यान्हसूर्यालोके तदभावत्वेनोलूकैः कल्प्यमानं तम इत्यर्थः ॥

किंच तार्किकधुरन्धरगौतमसूत्रैरपि प्रपञ्चो मिथ्या ; तथाहि—'एकस्मिन्भेदाभावाद्भेदशब्दप्रयोगानुपपत्तेरप्रश्नः (१), बुद्ध्या विवेचनात्तु

---

[1] न युक्तः-ख.

SGDF
Sri Gangeshwari Digital Foundation

भावानां याथार्थ्यानुपलब्धिस्तन्त्वपकर्षणे पटसद्भावानुपलब्धिवत् (२), स्वप्नविषयाभिमानवदयं प्रमाणप्रमेयाभिमानः (३), मायागन्धर्वनगरमृग-तृष्णावद्वा (४), मिथ्योपलब्धेर्विनाशः[1] स्वप्नविषयोपलब्धिप्रणाशवत्प्रबोधे (५), बुद्धेश्चैवं निमित्तसद्भावोपलम्भात् (६), तत्त्वप्रधानभेदाच्च मिथ्याबु-द्धेर्द्वैविध्योपपत्तिः (७), दोषनिमित्तानां तत्त्वज्ञानादहङ्कारनिवृत्तिः(८), दोषनिमित्तं रूपादयो विषयाः सङ्कल्पकृताः (९), तन्निमित्तं त्ववयव्यभि-मानः (१०), विद्याऽविद्याद्वैविध्यात्संशयः (११)', इति तत्त्वनिर्णय-नामकचतुर्थाध्यायसूत्राणि गौतमीयानि । अथ पूर्वपक्षसूत्राणीमानि 'आरम्भवादरूपतत्सिद्धान्तविरुद्धत्वादिति चेन्न बुद्ध्या विवेचना'दित्या-दिना 'यदग्ने रोहितं रूपं तेजसस्तद्रूपम्, अपागादग्नेरग्नित्व'मित्यादि-श्रुत्युक्तस्य तर्कस्योक्तत्वात् । अत एवोक्तसूत्रार्थस्फोटकाचार्यैः श्रुत्यर्थ-त्वेनोक्तः ॥

" प्रदिदर्शयिषुर्वसनस्य यथा
वितथत्वमयास्यति तन्तुगुणम् ।
अपकृष्य तु तन्तुसमं त्रितयं
ज्वलनप्रमुखस्य तथोक्तवती " ॥ इति ।

यदग्नेरित्यादिश्रुतिरिति शेषः । मायेत्यादिना 'इन्द्रजालमिव मायामयं स्वप्न इव मिथ्यादर्शन'मित्यादिश्रुत्युक्तस्य, मिथ्येत्यादिना 'यत्र हि द्वैतमिव भवती'त्यादि श्रुत्युक्तस्य, सङ्कल्पकृता इत्यादिना 'एतत्सर्वं मन एवे'त्यादि श्रुत्युक्तस्य तर्कस्यापरिहार्यस्योक्तत्वात्, आरम्भादि-प्रक्रियाया अवैदिकनिरासमात्राभिप्रायेणोक्तत्वाच्च । अन्यथा चतुर्था-ध्यायान्ते तादृशप्रक्रियाया हेयत्वमद्वैतमतस्य च ग्राह्यत्वं सूत्रभाष्ययो-र्नोच्येत । तथाहि—'तदर्थं यमनियमाभ्यामात्मसंस्कारो योगाच्चात्म-विध्युपायैः (१) । तस्यापवर्गस्याधिगमाय यमनियमाभ्यामात्मसंस्कारः

[1] मिथ्योपलब्धे विनाशः—ग.

SGDF
Sri Gargeshwari Digital Foundation

कर्तव्यः, यमः समानमाश्रमिणां धर्मसाधनम्, नियमः प्रतिविशिष्ट- मात्मसंस्कारः पुनरधर्महानं धर्मोपचयश्च योगशास्त्राच्चाध्यात्मविधिः प्रति- पत्तव्यः, स पुनस्तपः प्राणायामः प्रत्याहारो ध्यानं धारणेति, इन्द्रिय- विषयेषु च प्रसङ्ख्यानाभ्यासो रागद्वेषनिघातार्थः। उपायस्तु योगाचार- विधानमिति, ज्ञानग्रहणाभ्यासस्तद्विद्यैश्च सह संवादः (२) तदर्थमिति प्रकृतं ज्ञायतेऽनेनेति ज्ञानमात्मविद्याशास्त्रम्, तस्य ग्रहणमध्ययनधारणे, अभ्यासः सततं तत्क्रिया, अध्ययनानुबन्धश्रवणाचिन्तनानि, तद्विद्यै- श्च सह संवाद इति प्रज्ञापरिपाकार्थम्, प्रज्ञापरिपाकस्तु संशयच्छेदनं विज्ञा[1]तार्थावबोधोऽ[2]ध्यवसितार्थाभ्यनुज्ञानमिति, समायवादः[3] संवाद- स्तद्विद्यैश्च सह संवाद इत्यविविक्तार्थं वचनं तद्विभजते—तं शिष्यगुरु- सब्रह्मचारिविशिष्टश्रेयोर्थिभिरनुसूयिभिरभ्युपेयात् (३), एतन्निगदव्याख्या- नेनैव नीतार्थमिति। यदि च मन्येत पक्षप्रतिपक्षपरिग्रहः प्रतिकूलः परस्येति, प्रतिपक्षहीनमपि वा प्रयोजनार्थमर्थित्वे (४)। तमभ्युपेयादिति वर्तते परतः प्रज्ञामुपादित्समानस्तत्वबुभुत्साप्रज्ञापनेन स्वपक्षमनवस्थापयन् स्वदर्शनं परिशोधयेत्, अन्योन्यप्रत्यनीकानि च प्रवादुकानां दर्शनानि स्वपक्षरागेण चैके न्यायमतिवर्तन्ते[4]। तत्र तत्त्वाध्यवसायसंरक्षणार्थं जल्पवितण्डे[5] बीजप्ररोहरक्षणार्थं[6] कण्टकशाखावरणवत् (५)। अनुत्पन्न- तत्त्वज्ञानानामप्रहीणदोषाणां तदर्थं घटमानानामेतदिति, विद्यानिर्वेदादि- भिश्च परेणावज्ञायमानस्य ताभ्यां विगृह्य कथनम् (६)। ताभ्यां जल्प- वितण्डाभ्यां विगृह्येति विजिगीषया न तत्त्वबुभुत्सयेति। तदेतद्विद्या- पालनार्थं न लाभपूजाख्यात्यर्थमि'ति। एवमन्या अपि श्रुतिस्मृतिपुराणेति- हासादिकोटयो दृश्यमात्रमिथ्यात्वबोधिकाः सत्योऽपि ग्रन्थगौरवभिया न लिख्यन्त इति। तस्मान्मूढमतिर्नैव[7] श्रद्धेयोऽयं प्रलापकृत्॥

---

[1] नविज्ञा–ग. [2] बोधा–ग. [3] समयवादः–ग. [4] मतिवदन्ते–क.
[5] विदण्डे–क. ग. [6] संरक्षणार्थं–ग. [7] मतिनैव–ग.

SGDF
Sri Gurgeshwari Digital Foundation

अथ ज्ञाननिवर्त्यत्वान्यथानुपपत्तिः.

'तरति शोकमात्मवित्' 'तथा विद्वान्नामरूपाद्विमुक्तः'
'भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः ।
क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे' ॥

इत्यादिश्रुतिस्मृतिबोधितज्ञाननिवर्त्यत्वान्यथानुपपत्तिरपि बन्धमिथ्यात्वे प्रमाणम्; सत्यत्वे ब्रह्मवदनिवर्त्यत्वापत्तेः। तथाहि—शुक्तिरूप्यरज्जुसर्पादौ ज्ञाननिवर्त्ये[1] न तावत्तत्तद्रूपवत्त्वं ज्ञाननिवर्त्यतावच्छेदकम्; अननुगमात्, किंतु सर्वानुगतं मिथ्यात्वमेवाज्ञानकल्पितत्वापरपर्यायमवच्छेदकम्। एवं ज्ञानस्यापि तन्निवर्तकत्वे न

तर्कैः सारस्वतै रत्नैश्चन्द्रिकाचन्द्रभूषणैः ॥
श्रुतिस्मृतिमहातर्ककोटिभिर्जगती मृषा ॥

इत्यद्वैतसिद्धिव्याख्यायां गुरुचन्द्रिकायां सर्वाद्वैतश्रुतेरद्वैततात्पर्यकत्वनिर्णयः ॥

अथ ज्ञाननिवर्त्यत्वान्यथानुपपत्तिः.

तरति शोकमात्मविदिति । तरति अतिक्रामति अत्यन्तं नाशयतीति यावत् । शोकं भीहेतुं द्वैतमिति यावत् । भिद्यते नाश्यते । हृदयग्रन्थिः अहङ्कारः । छिद्यन्ते कारणीभूताज्ञानोच्छेदान्नोत्पाद्यन्ते,[2] **श्रुतिबोधितेति** । आत्मविदित्यादीनां हेतुगर्भविशेषणत्वात् ज्ञानात्पूर्वं शोकाद्यनिवृत्तेर्लोकसिद्धत्वेन ज्ञानकाले तदुक्त्या च ज्ञानस्य तद्धेतुतालाभाच्च दृश्यस्य ज्ञाननिवर्त्यत्वं श्रुतिबोधितमिति भावः । **बन्धमिथ्यात्वे** दृश्यमात्रमिथ्यात्वे । **अज्ञानकल्पितत्वेति** । अज्ञानरूपदोष-

---

[1] निवर्त्यत्वे [2] नोत्पद्यन्ते—ग.

SGDF
Sri Gargeshwari Digital Foundation

शुक्त्यादिविषयत्वमवच्छेदकम्; अननुगमात्, किंतु सर्वानुगतमधिष्ठानप्रमात्वमेव। तथाच यत्र ज्ञानस्याधिष्ठानप्रमात्वेन निवर्तकता तत्र मिथ्यात्वेनैव निवर्त्यतेति नियमः सिध्यति। एतादृशनियमानभ्युपगमे चानन्तानियमकल्पनागौरवरूपो बाधकस्तर्कः। तथाहि—यन्निष्ठा यदाकारा प्रमारूपान्तःकरणवृत्तिरुदेति, तन्निष्ठं तदाकारमज्ञानं नाशयतीति नियमस्य सिद्धत्वात्, उपादाननाशस्य चोपादेयनिवर्तकत्वात् शुक्त्यादिज्ञानेन तत्तदाकाराज्ञाननाशे तदुपादेयानां रजतादीनां निवृत्तिरौचित्यावर्जितैवेति नियमान्तराकल्पनेन लाघवमनुकूलस्तर्कोऽस्मत्पक्षे। अज्ञानोपादेयत्वं च शुक्तिरजतादीनामन्वयव्यतिरेकासिद्धमग्रे स्थास्यति। एवं स्थिते

प्रयुक्तधीविषयत्वयोग्यत्वं स्वाश्रयनिष्ठाभावप्रतियोगितारूपमित्यर्थः। **अधिष्ठानप्रमात्वमिति।** मिथ्यानिष्ठप्रतियोगितया नाशं प्रति स्वविषयविषयाज्ञानतत्प्रयुक्तान्यतरत्वसंबन्धेन प्रमात्वेन हेतुतेति भावः॥

ननु—दृश्यनिष्ठप्रतियोगितया नाशं प्रति प्रमात्वेन हेतुत्वमस्तु; यन्निष्ठेत्यादिवक्ष्यमाणनियममूलहेतुत्वानां मयापि स्वीकारान्न घटादिप्रमया पटाद्यज्ञाननाशः। तथाचाकाशादेरज्ञानानुपादानकत्वेऽपि व्यावहारिकदृश्यनाशे मूलाज्ञाननिवृत्तेर्हेतुत्वकल्पनादाकाशादेरात्मज्ञाननिवर्त्यत्वस्य श्रौतस्योपपत्तिः। शुक्त्यादिप्रमाया अपि शुक्त्याद्यज्ञाननिवृत्तौ शुक्तिरूप्यादिनिवृत्तिं प्रति विशिष्य हेतुत्वेन क्लृप्तायां हेतुत्वम्, न तु शुक्तिरूप्यादेरज्ञानप्रयुक्तत्वादज्ञाननाशनाश्यत्वम्; येन तत्र क्लृप्तसामान्यहेतुत्वेनैवाकाशादिनाशसिद्धिः, शुक्तिरूप्यादेर्भास्करादिमते सत्य एव मिथ्यात्वादानन्दतीर्थादिमते तुच्छत्वादज्ञानाप्रयुक्तत्वात्। एवं चाकाशादेरज्ञानप्रयुक्तत्वासिद्ध्या मिथ्यात्वासिद्धिरित्यत आह—**एतादृशनियमानभ्युपगम इति। नियमान्तराकल्पनेनेति। शुक्ति**रूप्यादिनिवृत्तौ शुक्त्यज्ञानादिनाशस्य विशिष्य हेतुत्वकल्पनामूलक-

SGDF Sri Gargeshwari Digital Foundation

कृत्स्नस्यापि प्रपञ्चस्यात्मप्रमानिवर्त्यत्वे तदज्ञानकल्पितत्वमेव तत्रावच्छेदकं कल्प्यते, न त्वननुगतमाकाशत्वादि; न वा ब्रह्मभिन्नत्वं सद्भिन्नत्वं वा सर्वानुगतमपि, तुच्छेऽतिप्रसक्तेः, तद्वारकविशेषणप्रक्षेपे तु सदसद्विलक्षणत्वरूपमिथ्यात्वमेव निवर्त्यताप्रयोजकं पर्यवसितम्; अन्यथा नियमान्तरकल्पनागौरवा-

---

नियमाकल्पनेनेत्यर्थः । **आत्मप्रमानिवर्त्यत्वे** आत्मप्रमाजन्येनात्माज्ञाननाशेन निवर्त्यत्वे । **तदज्ञानकल्पितत्वं** तदज्ञानप्रयुक्तत्वम् । सामान्यतो मिथ्याभूतप्रतियेगिकनाशे प्रमात्वेनोक्तहेतुत्वेऽपि प्रमाविशेषस्यैव मिथ्याविशेषनिवर्तकत्वाय यन्निष्ठत्याद्युक्तनियममूलहेतुत्वविशेषस्येव स्वविशिष्टे प्रयोज्यनाशे प्रयोजकनाशस्यापि हेतुत्वस्य क्लृप्तत्वादात्माज्ञाननाशात्प्रपञ्चनाशनिर्वाहाय प्रपञ्चस्योक्तप्रयुक्तत्वं कल्प्यते । जीवेशभेदादेरनादेरप्यज्ञानप्रयुक्तत्वान्नाशोत्पत्तिः । प्रयोजकीभूतदण्डादेर्नाशेऽपि घटाद्यनाशात्स्वविशिष्टत्वस्य नाश्यतावच्छेदके निवेशः । निमित्तनाशोपादाननाशोभयसाधारण्येनैकहेतुत्वलाभायोपादानत्वादि विहाय प्रयोजकत्वनिवेशः । तच्च निमित्तोपादानसाधारणोऽखण्डधर्मविशेषः । स्व(प्रतियोगिप्रयुक्त)प्रतियोगिकत्वसंबन्धेन नाशविशिष्टं नाशं प्रत्युक्तप्रयुक्तत्वसंबन्धेन नाशो हेतुः प्रतियोगितासंबन्धेन कार्यत्वमिति भावः । **तत्रावच्छेदकं कल्प्यत इति**। अवच्छेदकत्वेन क्लृप्तं तत्र कल्प्यत इत्यर्थः । **आकाशत्वादीति**। अनन्तकार्यकारणत्वमूलकानन्तनियमापत्तेरिति शेषः। **तुच्छ इति** । शुक्तिरूप्यादौ चेति शेषः । **अतिप्रसक्तेरिति**। तुच्छस्यानिवर्त्यत्वाच्छुक्तिरूप्यादेर्मूलाज्ञाननाशानाश्यत्वादुक्तरूपं मूलाज्ञाननाश्यत्वाति[1]प्रसक्तमिति भावः । **निवर्त्यताप्रयोजकं** प्रमाणमात्रनिवर्त्यतावच्छेदकम् । **अन्यथेति** । आकाशादौ सत्यत्वा[2]ङ्गीकारेणाज्ञानप्रयुक्तत्वमस्वीकृत्य स्वकालीनदृश्यत्वरूपव्यावहारिकदृश्यत्वस्य मूलाज्ञाननाशं प्रति नाश्यतावच्छेदकत्वस्वीकारे इत्यर्थः । **नियमान्तरेति**।

---

[1] नाश्यत्वादिति–ग. [2] सत्वा–क.

SGDF Sri Gargeshwari Digital Foundation

पत्तेः। तथाच शुक्त्यादिज्ञानस्य येन रूपेण निवर्तकत्वम्, तेन रूपेणात्मज्ञानस्य निवर्तकत्वम्। रूप्यादौ येन रूपेण निवर्त्यत्वम्, प्रपञ्चे तद्रूपं विनानुपपद्यमानं स्वोपपादकतया तत्र तत्कल्पयतीति सिद्धं मिथ्यात्वम्। ननु—भवेदेतदेवम्; यद्यात्मज्ञानस्य प्रपञ्चे निवर्त्ये शुक्त्यादिज्ञानसाधारणमधिष्ठान-प्रमात्वमेवावच्छेदकमित्यत्र किंचिन्मानं भवेत्; रूपान्तरेणापि निवर्तकत्वसंभवात्, श्रुतिस्तु द्वैतप्रपञ्चस्याद्वितीयात्मज्ञानं निवर्तक-मित्येतावन्मात्रे प्रमाणम्, न त्ववच्छेदकविशेषेऽपि। न च ज्ञान-निवर्त्यतामात्रान्मिथ्यात्वसिद्धिः; सेतुदर्शनादिनिवर्त्यदुरितादिषु व्यभिचारात्। तत्र विहितक्रियात्वादिना निवर्तकत्वान्न व्यभि-चार इति-चेत्, प्रकृतेऽपि रूपान्तरं नावच्छेदकमिति कुतो निर-णायि। ज्ञानस्य हि स्वप्रागभावं प्रति प्रतियोगित्वेन निवर्तकता, पूर्वज्ञानादिकं प्रति तूत्तरवर्तिविरोधिगुणत्वेन, संस्कारं प्रति फल-

---

उक्तनाश्यताकल्पनमूलकनियमेत्यर्थः। **येन रूपेण निवर्तकत्वमिति**। येन प्रमात्वेन धर्मेण येन स्वसमानविषयका-ज्ञानतत्प्रयुक्तान्यतरत्वसंबन्धेन **निवर्तकत्वं** मिथ्यामात्रनिवर्तकत्वं येन प्रयोजकीभूताज्ञाननाशद्वारा रूप्यादिनिवर्तकत्वं चेत्यर्थः। **येन रूपेण निवर्त्यत्वमिति**। येन मिथ्यात्वेन प्रमासामान्यनिवर्त्यत्वं येनाज्ञानप्रयुक्तत्वेन धर्मेणाज्ञानरूपप्रयोजकनाशनाश्यत्वं चेत्यर्थः। **तद्रूपं विनेति**। उक्तसंबन्धं विना तेन संबन्धेनोक्तद्वारं च निवर्तकत्वमनुपपन्नं; मिथ्यात्वं विना प्रमासामान्यनिवर्त्यत्वमज्ञानप्रयु-क्तत्वं विना तेन रूपेणोक्तनाश्यत्वं चानुपपन्नमित्यर्थः। **अधिष्ठान-प्रमात्वमेवेति**। उक्तान्यतरत्वसंबन्धेन प्रमात्वेन प्रयोजकीभूताज्ञान-नाशद्वारा निवर्तकत्वं न प्रपञ्चेऽस्ति; येन तत्रोक्तसंबन्धो मिथ्यात्वं वा

SGDF
Sri Gurgeshwari Digital Foundation

त्वेन, रागादिकं प्रति विषयदोषदर्शनत्वेन, विषं प्रति गरुडध्यानत्वेन, सेत्वादिदर्शनस्य दुरितं प्रति विहितक्रियात्वेन। एवं च मिथ्यात्वं विनापि ज्ञाननिवर्त्यत्वदर्शनान्न तन्मिथ्यात्वस्य साधकम्। उदाहृतेष्वपि सत्यत्वासम्प्रतिपत्त्या मिथ्यात्वमेवास्तीति चेत्, अस्तु वा मास्तु; ज्ञाननिवर्त्यत्वमात्रं तु न तस्य साधकमिति ब्रूमः। हेत्वन्तरेण सिद्धौ चैतदुपन्यासो व्यर्थः। शुक्तिरूप्यादौ कथमिति चेच्छृणु। अधिष्ठानज्ञानत्वेन तत्र ज्ञानस्य निवर्तकत्वात्। अधिष्ठानज्ञानत्वं हि अज्ञाननाशकज्ञानत्वं वा, अज्ञानसमानविषयकप्रमात्वं वेति तेन रूपेण निवर्तकत्वे तन्निवर्त्यस्य तज्ज्ञानसमानविषयकाज्ञानोपादानकत्वरूपमिथ्यात्वं सिद्ध्यतीति युक्तं शुक्त्यादिज्ञानसमानविषयकाज्ञानोपादानकत्वेन रजतादेर्मिथ्यात्वम्। सेत्वादिदर्शनादिनिवर्त्यदुरितादेस्तु न निवर्तकज्ञानसमानविषयकाज्ञानोपादानकत्वमिति न मिथ्यात्वम्। एवं चात्मज्ञानस्यापि विहितक्रियात्वेन निवर्तकत्वसंभवादधिष्ठानज्ञानत्वेन च निवर्तकत्वे मानाभावान्नात्माज्ञानोपादानकत्वरूपमिथ्यात्वसिद्धिः प्रपञ्चस्येति प्राप्तम्। अत्रोच्यते—आत्म-

---

कल्प्यमिति[1] भावः। **दोषदर्शनत्वेनेति**। रम्यत्वसंस्कारस्यारम्यत्वरूपदोषसंस्कार एव नाशको विरोधिसंस्कारत्वात् तद्द्वारोक्तदोषनिश्चयोपि तथेति भावः। **एवास्तीति**। अस्त्येवेत्यर्थः। तथाच मिथ्यात्वं विनेत्युक्तमसिद्धमिति भावः। **हेत्वन्तरेण** दृश्यत्वादिना। **अज्ञाननाशकेति**। तदुपादानाज्ञाननाशकेत्यर्थः। **तेन रूपेणेति**। तद्रूपव्याप्ये[2]त्यर्थः। यद्यपि विहितक्रियात्वेनेति परेणोक्तम्, तथापि प्रतियोगित्वादिनापि निवर्तकत्वशङ्कासंभवत्तामपि निरस्यति—**तत्रेत्यादि**।

---

[1] कल्पनीयमिति—**ग.** [2] व्याप्यत्वे-**ग.**

SGDF
Sri Gargeshwari Digital Foundation

ज्ञानस्याप्यधिष्ठानज्ञानत्वेनैव प्रपञ्चं प्रति निवर्तकत्वम्, प्रकारान्तरासंभवात्। तथाहि—प्रतियोगित्वं तावन्न निवर्तकतावच्छेदकम्; प्रपञ्चस्य भावरूपत्वात्, ज्ञानस्य प्रागभावनिवृत्तिरूपत्वेन प्रतियोगित्वेन प्रागभावनिवर्तकत्वासिद्धेश्च। नाप्युत्तरगुणत्वम्; आकाशादेरात्मविशेषगुणत्वाभावात्, इच्छादेरपि प्रपञ्चनिवर्तकत्वापाताच्च। नापि फलत्वम्; संस्कारस्य स्मरणजनकत्ववदाकाशादेरात्मज्ञानजनकत्वाभावात्, संस्कारस्य स्मृत्यनाश्यत्वेनोदाहरणासिद्धेश्च। विषयदोषदर्शनस्य तु रागादि निवर्तकत्वं रागादिकारणीभूतबलवदनिष्टाननुबन्धीष्टसाधनत्वभ्रमरूपतत्कारणनिवर्तकत्वेनेति न प्रकृतोदाहरणादतिरिच्यते, शुक्तिरूप्यतुल्यत्वात्। गरुडध्यानं तु न प्रत्युदाहरणम्; ध्यानस्य रागादेरिव ज्ञानत्वानभ्युपगमात्, ज्ञानस्येच्छानधीनत्वेन तदधीनध्यानापेक्षया[1] वैलक्षण्यात्। स्पष्टं चैतदाकरे। ज्ञानत्वेऽपि तस्य सेतुदर्शनपक्षान्नातिरेकः; शास्त्रविहितत्वाविशेषात्। केवलं सेत्वादिदर्शनवद्विहितक्रियात्वमवशिष्यते। तच्च न संभवति; ज्ञानस्य कर्तुमकर्तुमशक्यत्वेन विधेयत्वायोगात्। विस्तरेण च ज्ञाने विधिराकरेषु निराकृतः, निराकरिष्यते चेहापि। सेतु-

रूपत्वादिति। आकाशादेरधिकवृत्तित्वादिना न ज्ञानप्रागभावत्वमित्यपि बोध्यम्। ननु—दृष्टिसृष्टिपक्षे आकाशादेर्मनःपरिणामत्वात्तादात्म्येन पृथिव्याद्यसंबन्धत्वेनानधिकवृत्तित्वात् ज्ञानप्रागभावत्वमस्तु; भावस्यापि तस्य स्वध्वंसरूपज्ञानप्रागभावत्वे बाधकाभावात्तत्राह—ज्ञानस्येति। असिद्धेरिति। ज्ञानस्य स्वनिवर्तकत्वासंभवोऽपि बोध्यः। जनकत्वाभावादिति। मनआदेर्जनकत्वेऽप्यसंस्कारत्वात्। न हि जनकमात्रं फलनाश्यमिति शेषः। दोषदर्शनस्य बहुविधदुःखप्रयोजकत्वादिदर्शनस्य। आकरेषु

[1] ज्ञानापेक्षया.

SGDF Sri Gangeshwari Digital Foundation

दर्शने कथमिति चेत्? विशिष्टाकारेण विधेयत्वोपपत्तेः[1]। न हि सेतुदर्शनमात्रस्य दुरितनाशकत्वम्; तत्रत्यम्लेच्छानामपि दुरितनाशप्रसङ्गात्, किंतु परराष्ट्रादुपस्थानादिपूर्वकव्रतकलापविशिष्टस्य; तथाच छत्रपादुकादिवर्जनदोषोद्घोषणदूरदेशगामित्वभिक्षाभोजित्वादिनियमानां कृतिसाध्यत्वात्तद्विशिष्टं सेतुदर्शनमपि कृतिसाध्यमिति विशिष्टरूपेण विधानोपपत्तिः। आत्मज्ञाने तु नास्ति किंचिद्विशेषणमपि कृतिसाध्यम्, येन तद्विशिष्टत्वेनापि विधेयत्वं स्यात्, कर्मसमुच्चयस्य निराकरिष्यमाणत्वात्, बन्धस्याज्ञानमात्रहेतुकत्वेन ज्ञानातिरिक्तनिवर्तकानपेक्षणाच्च। बन्धस्याज्ञानहेतुकत्वं च 'मायां तु प्रकृतिं विद्यात्', 'अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तवः' इत्यादिश्रुतिस्मृतिन्यायसिद्धम्। वक्ष्यते चाग्रे। अज्ञाननिवर्तकज्ञानस्य चोत्पत्तिमन्तरेणान्यापेक्षा नास्तीति शुक्त्यादिज्ञाने दृष्टम्। तथाचोक्तं वार्तिककृद्भिः—

तत्त्वमस्यादिवाक्योत्थसम्यग्धीजन्ममात्रतः।
अविद्या सह कार्येण नासीदस्ति भविष्यति ॥ इति ॥

समन्वयसूत्रभाष्यादिषु। **विशेषणमपि कृतिसाध्यमिति**। श्रवणादेरङ्गत्वे मानाभावादिति भावः। **बन्धस्य** मनआदेः। **अज्ञानमात्रहेतुत्वेन**[2] अज्ञानात्मकमात्रपरिणामिकत्वात्। **निवर्तकानपेक्षणात्** निवृत्तिजनकानपेक्षणात्। असंभावनादिरूपदोषाभावस्य प्रतिबन्धकाभावत्वेनात्मनिश्चयनिष्ठायां निवर्तकशक्तौ व्याप्यत्वेनापेक्षायामपि न जनकत्वम्। अदृष्टं न निवृत्तौ कारणम्; सुखदुःखतज्जनकेष्वेव तस्य तत्त्वादिति द्रव्यवर्धमानादौ स्पष्टम्। कालस्य हेतुत्वे तु मानस्याभावः, भावे वा ज्ञानमपि काल इति तदन्यमात्रवृत्तिरूपावच्छिन्नस्यैव

---

[1] पपात्तिः. [2] हेतुकत्वेन—क. ग.

SGDF
Sri Gargeshwari Digital Foundation

प्रत्यग्याथात्म्यधीरेव प्रत्यगज्ञानहानिकृत् ।
सा चात्मोत्पत्तितो नान्यद्ध्वान्तध्वस्तावपेक्षते ॥ इति च ॥

अत एव 'यत्र हि द्वैतमिव भवति तदितर इतरं पश्यति, यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येत्' इत्यादिश्रुतिः,

या निशा सर्वभूतानां तस्यां जागर्ति संयमी ।
यस्यां जाग्रति भूतानि सा निशा पश्यतो मुनेः ॥

इत्यादिस्मृतिश्चाविद्यावस्थायां संसारोपलम्भं विद्यावस्थायां च तदनुपलम्भं दर्शयति । तस्मादधिष्ठानप्रमात्वेनात्मज्ञाननिवर्त्यत्वाच्छुक्तिरूप्यादिष्विव बन्धेऽपि मिथ्यात्वं सिद्धम् ।

प्रकृते व्यवच्छेदान्न दोषः । साधारणकारणं हि निवृत्तौ प्रतियोग्यपीति तन्न व्यवच्छिद्यते । [1]यत्तु 'तदा विद्वान्नामरूपाद्विमुक्त' इति श्रुतेः कालोऽप्यज्ञानकार्यनिवर्तक इति—तच्चित्रम्; यथा नद्य इत्यादि तथा विद्वानित्यन्तस्यैव मुण्डकपाठत्वात्, श्रुत्यन्तरे तदापदसत्त्वेऽपि तेन ज्ञानसामग्रीकालस्यैवोक्तत्वेन तद्धेतुत्वालाभात्। **इत्यादिश्रुतिस्मृतीति।** आदिना व्यवहरन्नास्ते, माययैव मायया ह्यन्यदिव, तम आसीत्, मायामयमिदं द्वैतम्, विभेदजनकेऽज्ञाने इत्यादिश्रुतिस्मृतयो बोध्याः । **दर्शयतीति ।** यद्यन्यदपेक्ष्येत, तदा विद्यासत्त्वेऽपि तद्विलम्बेन कार्यं विलम्बेत; विद्यासत्त्वे कार्याविलम्बे तु तदन्यहेतुत्वे न मानमिति भावः । **तस्मादिति ।** शुक्तिरूप्यादेर्ज्ञाननिवर्त्यत्वं वदता त्वयापि शुक्त्यादिप्रमात्वेन तन्निवर्तकता न वाच्या; गौरवात्, किं तूक्तरीत्या प्रयोजकीभूताज्ञाननाशद्वारा प्रमामात्रस्य; तथाचात्माज्ञाने प्रपञ्चप्रयोजकत्वस्य श्रुत्यादिना लाघवाच्च सिद्धेरात्मज्ञाने प्रपञ्चनिवर्तकत्वं लोकसिद्धत्वादुक्तदोषाच्च न विधिविषयः । शुक्तिरूप्यादेर्ज्ञाननिवर्त्यत्वं

---

[1] न हि प्रकृते कालादिकं विधेयम्, न वानुष्ठातुं योग्यम्; येन तद्विशिष्टतया ज्ञानं कृतिसाध्यमिति भावः । यत्तु—ग.

SGDF
Sri Gargeshwari Digital Foundation

यत्त्वीश्वरज्ञानेन सत्यं घटादि निवर्तेत इति प्रत्युदाहरणम्, तन्न; ईश्वरज्ञानस्य तार्किकमतेऽप्युपादानगोचरापरोक्षज्ञानत्वेनैव कारणत्वात्, अभावस्य च निरुपादानत्वात्, अभावं प्रति कारणत्वे मानाभावात्, सोपादानत्वे तु समवेतत्वेन तस्यापि भावत्वापत्तेः, अत्यन्ताभावादिवच्च तदजन्यत्वेऽपि ध्वंसस्य तद्विषयत्वोपपत्तेः। न च तादृगीश्वरज्ञाने सम्प्रतिपत्तिरप्यन्येषामिति न काप्यनुपपत्तिः। यथा च शुक्त्यादिज्ञानस्य

तु शुक्त्यादिप्रमया तदज्ञानतत्प्रयुक्तं नष्टमित्यनुभवाद्दोषादिनिमित्तसत्त्वेऽपि तन्नाशस्य जायमानत्वेन निमित्तनाशनाश्यत्वेनान्यथा सिद्धयितुमशक्यत्वादिति भावः। **तद्विषयत्वोपपत्तेरिति।** किंचिद्विषयकत्वे नियामकाभावेन न बाधकाभावाच्छ्रुत्यादिना सर्वविषयकत्वमिति भावः।

अन्येषाम् औपनिषदादीनाम्। ईक्षणाकाशाद्योः पाठात्क्रमलाभेऽपि न हेतुतद्वत्त्वम्, घटादौ तु कर्तुरेव हेतुत्वे न मानम्, नतरां तज्ज्ञानादिहेतुत्वे इति तद्दृष्टान्तेनापि न तत्सिद्धिः। यत्तु-सोपादानं प्रत्युपादानज्ञानादिसत्त्वरूपकर्तृत्वेनेव[1] कार्यमात्रं प्रत्युपादानाघटितरूपेणेशज्ञानादेर्हेतुत्वमिति—तत्तुच्छम्; उक्तकर्तृत्वविशिष्टस्य हि हेतुत्वग्राहकं मानं बाधकाभावाद्विशेषणस्योक्तज्ञानादेरपि हेतुत्वं गृह्णाति; विशिष्टे प्रवर्तमानस्य[2] विशेषणेऽपि प्रवृत्तेरौत्सर्गिकत्वात्। तथाचोपादानघटितरूपेणैव ज्ञानादेर्हेतुत्वे मानम्, न त्वन्यरूपेणेति भावः॥

ननु—यथा सेतुदर्शनमुक्तविशिष्टरूपेण विधेयम्, तथात्मप्रमाप्यध्ययनादिनियमाद्दृष्टादिविशिष्टतया विधेया; अन्यथा अनधीतवेदान्तादिजन्यापि सा निवर्तिका स्यात्तत्राह—**यथा च शुक्त्यादीति।**

---

[1] मत्त्वरूपकर्तृत्वेनैव-ग. [2] प्रवृत्तमानस्य-ग.

SGDF
Sri Gangeshwari Digital Foundation

रूप्यादिनिवर्तकत्वमप्रामाण्यज्ञानाविरहमपेक्ष्यैव, एवमात्मज्ञानस्यापि श्रवणादिनिर्वृत्तासंभावनादिनिवृत्तिरूपाप्रामाण्यज्ञानविरहापेक्षत्वमिति न किंचिदप्याधिकं कल्पितम्। आत्मज्ञानस्य सर्वसुकृतसाध्यत्वं शुक्त्यादिज्ञानापेक्षया विलक्षणमिति तु दृष्टान्तदार्ष्टान्तिकयोर्वैधर्म्यमात्रोद्भावनात् वैधर्म्यसमा जातिः

निवृत्तिरूपेति। निवृत्तिप्रयोज्येत्यर्थः। वाक्यार्थेऽसंभावितत्वज्ञानेन[1] प्रपञ्चसत्यत्वदेहात्म[2]संस्काररूपविपरीतभावनया च दोषेण बाधितविषयकत्वरूपाप्रमात्वं वाक्यार्थज्ञाने ज्ञाप्यते; तादृशभ्रमोपादानाज्ञानावृतत्वात्, तन्नाज्ञाननिवर्तकम्; अनावृतप्रमात्वाश्रयस्यैव शुक्त्यादिज्ञानस्य तत्त्वेन क्लृप्तत्वात्। तथाचाध्ययनश्रवणादिनियमादृष्टादेरुक्तप्रमात्वाज्ञाननिवृत्तौ तादृशाज्ञानशून्यप्रमाप्रतिबन्धकपापनिवृत्तौ वा जनकत्वम्। असंभावनादिनिवृत्तौ श्रवणादेर्जनकत्वमनावृतप्रमात्वमात्रेण ज्ञानस्य निवर्तकत्वं क्लृप्तमिति न विधेयम्। न चाध्ययनश्रवणादिनियमविशिष्टरूपेण विधेयत्वावकाशः; साङ्गप्रधानस्य हि कृतिसाध्यता प्रयोगविधिना बोध्यते। न चाध्ययनश्रवणादिनियमो ज्ञानाङ्गम्; येन तद्विशिष्टं ज्ञानं कृतिसाध्यतया बोध्येत, उक्तफलविशिष्टज्ञानादिस्वतन्त्रफलकत्वेन प्रधानत्वात्। न च विधेयजन्यफलजन्यफलं प्रत्येव नियमादृष्टं हेतुरिति नियमः; येन ज्ञानफलहेतुत्वं नियमादृष्टस्योच्येत, पुरुषार्थनियमस्थले व्यभिचारस्योक्तत्वादिति भावः॥

ननु—लोके शुक्त्यादिप्रमा पापनाशनिरपेक्षैवाज्ञानकार्यनिवर्तिकेति, कल्पित[3]त्वस्योक्तनिरपेक्षप्रमानिवर्त्यत्वव्याप्यत्वात्तदभावात्प्रपञ्चे कल्पितत्वाभावस्तत्राह—**आत्मज्ञानस्येति।** साध्यत्वं पापनाशद्वारा जन्यत्वम्। **वैधर्म्यमात्रेति।** अधिष्ठानप्रमात्वेन निवर्तकत्वं शुक्त्यादा-

---

[1] ज्ञानेन प्रपञ्चसत्यत्वज्ञानेन—**ग.** [2] देहासत्त्व—**क.** देहात्मत्व—**ग.**
[3] निवर्तके कल्पित—**क. ख.**

SGDF
Sri Gargeshwari Digital Foundation

वात्मनि च ज्ञानयोस्तुल्यम् । शुक्त्यादिज्ञानं प्रति काचादिदोषः आत्मज्ञानं प्रति तु पापविशेषः प्रतिबन्धकः । तयोर्वैधर्म्यमात्रमप्रयोजकम् । अन्यथा काचादीनां मिथो वैधर्म्यमपि दोषः स्यात्, अत उक्तव्याप्यत्वमेवासिद्धमिति भावः । एतेन—गरुडादिध्यानस्य संस्कारसापेक्षस्य निवर्त्यविषादिकमिव श्रवणादिजन्यसंस्कारापेक्षात्मधीनिवर्त्यमपि सत्यमित्यपास्तम्; असंभावनादि[1]विषये लोके प्रमायाश्चा[2]संभावनादिदोषनिवृत्तये संस्कारापेक्षणेऽप्यधिष्ठानप्रमात्वेनैवात्मज्ञानस्य निवर्तकत्वादिति भावः ॥

ननु—लोके निवृत्तिनिवर्त्ययोः सत्ता समा, न हि रूप्यस्य निवृत्तिः शुक्तिस्वरूपा; तथासति शुक्तिरूप्यभेदाभेदयोरिव तयोरविरोधः स्यात्, एवमज्ञानाज्ञेययोर्दोषाधिष्ठानयोः सत्ता समैव; तथा च निवृत्त्यधिष्ठानरूप[3]ब्रह्मेवाज्ञानं सत्यं स्यादिति—चेन्न; अधिकरणस्य ध्वंसत्वमतेऽपि यद्यपि प्रतियोगिकालेऽपि ध्वंसस्तथापि नाशकत्वाभिमतसामग्र्युपहितस्यैवाधिकरणस्य ध्वंसव्यवहारनियामकत्वान्नातिप्रसङ्गः, तथाधिष्ठानस्य कल्पितध्वंसत्वेऽपि ज्ञानत्वोपहितस्यैव ध्वंसव्यवहारविषयत्वान्न सः । अज्ञेयाधिष्ठाने तु नान्यसमसत्ते; चिद्रूपत्वात्प्रातिभासिकस्यापि दोषस्योक्तत्वाच्च । यत्तु—यथानादिभावस्याज्ञानस्य निवृत्तिरदृष्टापि श्रुतिबलात्कल्प्यते, तथा सत्यस्यापि तस्य ज्ञाननाश्यत्वं तत एवेति—तन्न; न हि तस्य लोके श्रुत्यादिज्ञाननाश्यता न दृष्टा, न वा विदुषा तन्नाशो नानुभूयते; येन श्रुतिबलादेव तन्नाशकल्पना, न वा संस्काराद्यन्यस्य ज्ञाननाश्यस्य सत्यता युक्ता; मिथ्यात्वादिना ज्ञाननाश्यताया उक्तत्वात्, श्रुत्यापि हि लोकसिद्धमेवाज्ञानस्य ज्ञाननिवर्त्यत्वमुक्तं तत्त्वपूर्वम्,[4] अत एवाज्ञानसमान-

---

[1] असंभावितादि–ख. ग. [2] प्रमाया इवा-ग. [3] रूपं–ग. [4] न त्वपूर्वम्–ग.

SGDF
Sri Gargeshwari Digital Foundation

अज्ञानस्य च समानाधिकरणसमानाकारज्ञाननिवर्त्यत्वम्। जीवन्मुक्तौ च प्रारब्धकर्मप्रतिबन्धेन बन्धनाशविलम्ब इत्यादि सर्व-

---

विषयज्ञानत्वेन ज्ञाननिवर्त्योऽपि[1] प्रपञ्चोऽज्ञानवदज्ञानानुपादानक इत्यपास्तम्। अज्ञाननिवृत्तिद्वारा ज्ञाननिवर्त्यत्वस्याज्ञानप्रयुक्तत्वव्याप्यत्वात्, अन्यथा लोकाक्लृप्तहेतुत्वकल्पनागौरवात्॥

ननु—ज्ञानमज्ञानात्मकस्यैव निवर्तकमित्यत्र ज्ञानं वृत्तिः, तत्प्रतिबिम्बितचिद्वा, नाद्यः; तस्या अज्ञप्तित्वात्, नान्त्यः; मुक्तानन्दस्य ज्ञप्त्यभावापत्त्या तस्याप्यज्ञप्तित्वात्, साक्षिभास्यसुखादौ तदभावाच्चेत्यत्राह—**अज्ञानस्य चेति**। यद्यप्यनावृतचिदेव ज्ञप्तिः, तथाप्यनावृतत्वप्रयोजकतया वृत्तावपि ज्ञानपदप्रयोगात्तामादायोक्तनियम इति भावः। ननु—लोकेऽधिष्ठानतत्त्वे साक्षात्कृते कर्मादिना न भ्रमानुवृत्तिरिति जीवन्मुक्तावनुवृत्तं जगत्सत्यम्, तत्राह—**जीवदिति**। यथा सोपाधिकभ्रमे नोक्तनियमः; उपाधिना प्रतिबन्धस्य दृष्टत्वात्, तथा निरुपाधिकभ्रमेऽपि भुज्यमानकर्मणा प्रतिबन्धस्य दृष्टत्वात्। न हि शतादिवर्षावच्छिन्नभोगहेतुत्वेन श्रुत्युक्तं कर्म दशादिवर्षमात्रावच्छिन्नभोगेऽपि हेतुरिति कल्पना युक्ता; अनन्तहेतुत्वापत्तेः, अज्ञानकार्यनाशे भुज्यमानकर्मत्वेन प्रतिबन्धकत्वस्य तदपेक्षया लघुत्वात्, ज्ञानमेवाज्ञानतत्प्रयुक्तनाश इति पक्षे प्रारब्धभोगकालीनत्वेन श्रुत्यादिसिद्धं यत्तदन्यज्ञानमेव तथेति कल्पनस्य ततोऽपि लघुत्वाच्च। ज्ञानस्याज्ञाननाशस्य वानु[2]भूयमानत्वान्नोक्तकर्मप्रतिबध्यता। तच्च ज्ञानं सत्यं मिथ्या वा। आद्ये, तदुपादानकत्वेन मिथ्यात्वं न सिध्येत्। नान्त्यः; शुक्त्याद्यज्ञानस्य सत्यत्वात्। न हि शुक्त्यादौ ज्ञाते तदज्ञानं मिथ्येति धीः; प्रत्युत तदज्ञानमासीदिति सत्यत्वधीरेव। एवं ज्ञानेनाज्ञानकार्यस्य

---

[1] त्वेन निवर्त्योऽपि—क. ग. [2] चानु—क.

SGDF Sri Gargeshwari Digital Foundation

मुपरिष्टादुपपादयिष्यते । सत्यस्य ज्ञाननिवर्त्यत्वे त्वाश्रयविषयोभयसंबन्धित्वादिनातिप्रसङ्गो विवरणकारैर्वर्णितः ।

न नाशः; न हि रूप्यादेर्ज्ञाननाश्यत्वमनुभूयते, नापि प्रतिपन्नोपाधौ निषेधः; 'क्षीयन्ते चास्ये'त्यादि श्रुत्यादिविरोधात्तत्राह—**इत्यादि सर्वमिति ।** बाधकाले ज्ञाननिवर्त्यत्वरूपमिथ्यात्वस्य रूप्यतदुपादानाज्ञानादौ प्रतीतेः, शुक्त्यज्ञानतत्प्रयुक्तं शुक्तिज्ञानान्नष्टमित्याद्यनुभवात्, स्वप्रकाशचित्प्रकाशरूपाज्ञानस्यानुपपन्नत्वाच्च । अत एव ऋतेऽर्थमित्यादिनानुपपन्नस्य मायाशब्दितमिथ्यात्वमुक्तम् । आसीदिति धीस्तु रूप्यादाविवाज्ञानेऽप्यनृते नायुक्तेत्याद्यग्रे उपपादनीयमित्यर्थः । **आश्रयविषयेत्यादि ।** ज्ञानेन सत्यस्य निवृत्तिश्चेत्कीदृशस्य ज्ञाननाश्यत्वनियमः किं ज्ञानस्याश्रयेणाप्यथविषयेण अथोभयेन संबद्धस्य, नाद्यः; आत्मज्ञानेन धर्माद्यनाशात् । न द्वितीयः; नीलपीतावयविनो नीलत्वेन ज्ञानात्पीतिमानिवृत्तेः । न तृतीयः; देहज्ञानेन देहात्मतादात्म्यानिवृत्तेः । मिथ्याभूतस्यैव ज्ञाननाश्यत्वपक्षे तु ज्ञानात्तत्समानाश्रयविषयकाज्ञानस्यैव निवृत्तिः । तथा च[1] स्वप्रतियोग्यज्ञानप्रयुक्तस्यैव निवृत्तिरिति भावः । यत्तु—ईशप्रसादादेव बन्धनाशः; 'यस्य प्रसादात्परमार्तिरूपादस्मात्संसारान्मुच्यते नापरेणे'त्यादिश्रुतेः 'मत्प्रसादात्तरिष्यसी'त्यादिस्मृतेश्च । ज्ञानं तु प्रसादद्वारा हेतुः । तदुक्तम्—

'यथा दृष्ट्या प्रसन्नः सन् राजा बन्धापनोदकृत् ।
एवं दृष्टः स भगवान् कुर्याद्बन्धविभेदनम् ॥'

इति । 'दृष्ट्वैव तं मुच्यत' इति श्रुताववधारणं त्वयोगव्यवच्छेदपरम्, मोक्षहेतुप्रसादेऽन्ययोगव्यवच्छेदपरं वा । अत एव—

'एवं ज्ञाते तु भगवाननादिः पुरुषोत्तमः ।

---

[1] तया च—क. ग.

SGDF
Sri Gurgeshwari Digital Foundation

तस्मादधिष्ठानज्ञानत्वेन ज्ञाननिवर्त्यत्वं मिथ्यात्वे प्रमाणमिति सिद्धम्।

इत्यद्वैतसिद्धौ ज्ञाननिवर्त्यत्वान्यथानुपपत्तिः.

प्रसीदत्यच्युतस्तस्मिन् प्रसन्ने क्लेशसंक्षयः ॥'

इति विष्णुपुराणमित्यत्राह—**तस्मादिति**। अधिष्ठानप्रमात्वेन मिथ्यानिवर्तकत्वस्य लोके क्लृप्तस्य 'तरति शोकमि'त्यादिशास्त्रोक्तत्वादित्यर्थः। न हि ज्ञानं प्रसादहेतुत्वेन लोके क्लृप्तम्, किंतु सेवा; तथाच 'यस्य प्रसादा'दित्यादेरीश्वरसेवाजन्यप्रसादो ज्ञानद्वारा मोक्षप्रयोजक इत्यर्थः; 'यस्य देवे परा भक्ति'रित्यादिश्रुतेः। 'यथा दृष्टये'त्यादेस्तु प्रसन्नो राजा पश्चाद्दृष्टो यथा मोचकस्तथेश इत्यर्थः। न हि राजा बद्धं प्रति दृष्टिमात्रेण प्रसन्नः, प्रत्युत सापराधं[1] बद्धं प्रति भूयो निग्राहकः। 'तमेवे'त्यादिश्रुत्या शुद्धात्मज्ञानस्य सर्वद्वैतनिवर्तकत्वेन प्रसादहेतुत्वासंभवाच्च। 'दृष्ट्वैवे'वेत्यादेः प्रसादेऽन्ययोगव्यवच्छेदपरत्वोक्तिः शोभते; अदृष्ट्वा न मुच्यते इत्यस्यैव प्रतीतेः प्रसादस्याश्रुतत्वाच्च। एवं 'ज्ञाते त्वि'त्यादिविष्णुपुराणे तु ज्ञानं न तत्त्वदर्शनम्; किंतु सर्वत्र विष्णुरूपत्वदर्शनरूपं समत्वम्—

'यतितव्यं समत्वे च निर्वाणमपि चेच्छता।
देवा मनुष्याः पशवः पक्षिवृक्षसरीसृपाः॥
रूपमेतदनन्तस्य विष्णोर्भिन्नमिव स्थितम्।
एतद्विजानता सर्वं जगत्स्थावरजङ्गमम्॥
द्रष्टव्यमात्मवद्विष्णुर्यतोऽयं विश्वरूपधृत्।'

---

[1] अपराधं–क. ग.

SGDF
Sri Gargeshwari Digital Foundation

इति पूर्ववाक्यात्। अत एवात्मतुल्यत्वस्य रागद्वेषविषयत्वायोग्यत्वरूपस्य ज्ञानं तत्फलमुक्तम्। अत एव च—

'सर्वत्र दैत्याः समतामुपेत समत्वमाराधनमच्युतस्य।
तस्मिन् प्रसन्ने किमिहास्त्यलभ्यं धर्मार्थकामैरलमल्पकास्ते'॥

'समाश्रिताद्ब्रह्मतरोरनन्तान्निस्संशयं प्राप्स्यथ वै महत्फल'मित्यत्र विष्णुपुराण एव समत्वरूपाराधनजन्यप्रसादस्य तर्वाश्रयणदृष्टान्तेन परम्परया मोक्षफलप्रयोजकत्वमुक्तम्। न हि सफलतर्वाश्रयणस्याव्यवधानेन फलप्रापकत्वनियमः; किंतु लोष्टादिव्यापारव्यवधानेनेति भावः॥

'तस्योपनिषत्, सत्यस्य सत्यमिति प्राणा वै सत्यं तेषामेष सत्यः। अथ नामधेयम्, सत्यस्य सत्यमिति प्राणा वै सत्यं तेषामेष सत्य' इति बृहदारण्यकोक्तिभ्यां ब्रह्मसत्तातोऽपकृष्टत्वेन प्रपञ्चसत्ताप्रतीत्यापि प्रपञ्चो मिथ्या। न च—राजराजो देवदेवो मन्मथमन्मथ इत्यादौ देवत्वादीनामिव प्रपञ्चसत्यत्वस्यापकृष्टत्वं न तु बाध्यवृत्तित्वमिति—वाच्यम्; देवत्वादिजातेर्हि नापकृष्टत्वं संभवतीति आराध्याद्यपेक्षयोत्कृष्टमाराध्यत्वादिकं बुध्यते। तथाच तद्व्यवहारकालाबाध्यत्वरूपप्रपञ्चसत्वापेक्षयोत्कृष्टं सत्त्वं त्रिकालाबाध्यत्वमेव। सर्वाराध्यत्वरूपत्वस्येव सर्वकालाबाध्यत्वरूपत्वस्यैवोत्कर्षस्योत्कृष्यमाणस्वरूपघटकत्वात्। अविनाशिवृत्तित्वादिकं तु तदाश्रयोत्कर्षमात्रपर्यवसन्नम्। किञ्च देवदेवेत्यादौ न निर्धारणम्; समासत्वात्। 'सत्यस्य सत्य'मित्यत्र तु सत्यब्रह्मभेदेन प्रतीयमानानां मध्ये ब्रह्मैव सत्यमित्यर्थसंभवान्निर्धारणम्। अत एव 'क्षत्रियो मनुष्येषु शूरतम' इत्यादौ क्षत्रियगतमनुष्यत्वं मनुष्याणामिव ब्रह्मगतसत्त्वं प्राणानां निर्धारणोपपादकं 'प्राणा वै सत्य'मित्यनेनोक्तम्। एक ब्रह्मरूपसत्तासंबन्धः प्रतीतिविषयो लाघवात्सर्वत्रेति ज्ञापयितुमेकवचनम्। अन्यथा सत्यमिति प्राणाः सत्या इति एष तत्सत्यमिति च ब्रूयात्। लाघवेन समासस्यौत्सर्गिकत्वेन विशेष्यविशेषणयोरेकविभक्ति-

SGDF
Sri Gargeshwari Digital Foundation

कत्वस्य च युक्तत्वात् । तथाच क्षत्रियस्यैव शूरतमत्वमिव ब्रह्मण एव सत्यत्वं शब्दार्थः । अथ न निर्धारणमित्यत्र तुष्यसि, तुष्य; तथापि देवदेवेत्यादावाराध्यत्वमिव प्रकृतेऽधिष्ठानत्वं षष्ठ्यर्थः; रूप्यादेः सत्यं शुक्त्यादीत्यादौ तथा प्रतीतेः । शुक्तिरूप्यमित्यादाविवारोप्यत्वं तु न तदर्थः; त्वयाप्यनङ्गीकारात् । ब्रह्मणः सत्यस्वरूपत्वस्य लोके सन्दिग्धत्वेन तस्यैव लोकसिद्धव्यावहारिकप्रपञ्चसत्वानुवादेन श्रुतिप्रतिपाद्यत्वेन तद्विरोधाच्च ॥

'सत्यं ज्ञान'मिति सत्यस्वरूपस्य ब्रह्मलक्षणस्योक्त्यापि दृश्यं मिथ्या; अन्यथा तत्रातिव्याप्तेः । ननु— बृहदारण्यके 'तस्य ह वा एतस्य ब्रह्मणो नाम सत्य'मिति, 'तानि ह वा एतानि त्रीण्यक्षराणि सत्ताय[1]मिति 'तद्यत्सत्तदमृतमथ यत्तन्मर्त्यमथ यद्यन्तेनोभे यच्छती'त्यनेनामृतमर्त्यशब्दितमुक्तामुक्तनियन्तृत्वं सत्यत्वं ब्रह्मणीत्युक्तेः प्रपञ्चसत्यत्वेऽपि न दोषः;

'सत्ये प्रतिष्ठितः कृष्णः सत्यमस्मिन् प्रतिष्ठितम् ।
सत्तासत्ते च गोविन्दस्तस्मात्सत्यं सतां मते ॥

इति भारतोक्तेश्च! न च—रूढ्यर्थं योगत्यागः; 'यदाजिमीयुस्तदाज्यानामाज्यत्व'मित्यादाविव निरवकाशश्रौतयोगबाधायोगात् । 'शास्त्रस्था वा तन्निमित्तत्वात्' इति जैमिनिसूत्रे यवमयश्चरुरित्यादौ प्रियङ्ग्वादिकं दीर्घशूकादिकं वा यवशब्दार्थ इति संशये, 'यदान्या ओषधयो म्लायन्ते अथैते मोदमानास्तिष्ठन्ती'त्यादिवाक्यशेषेण दीर्घशूकादिकमेव, न तु पृथग्जनप्रसिद्ध्यान्यत् । शास्त्रार्थसन्देहे शास्त्रस्था प्रसिद्धिर्हि निर्णायिका; तस्या लोकप्रसिद्ध्यपेक्षया बलवत्त्वेन

---

[1] सत्ताया—ग.

SGDF
Sri Gargeshwari Digital Foundation

शास्त्रार्थनिर्णयस्य तन्निमित्तकत्वादिति हि स्थितम् । उक्तं च स्मृतिपादवार्तिके—

गौणं लाक्षणिकं वापि वाक्यभेदेन वा स्वयम् ।
वेदोऽयमाश्रयत्यर्थं को नु तं प्रतिकूलयेत् ॥ इति ॥

गौणं श्येनादिशब्दस्य यागविशेषादिरूपं 'यथा वै श्येनो निपत्यादत्ते एवमयं द्विषन्तं भ्रातृव्य'मित्यर्थवादोक्तम् । लाक्षणिकं तु पुरोडाशानलङ्कुरु' इत्यादौ पुरोडाशशब्दस्य धानाः, करम्भः, पुरोडाशः, परीवापः, पयस्या, इति सवनीयहविःपञ्चकरूपम् । वाक्यभेदेन 'आश्ववालः प्रस्तर' इत्यादौ काशानामश्ववालशब्दवाच्यत्वं प्रस्तरकार्ये विधानं चेति वाक्यभेदेनेति—चेन्न; बृहदारण्यके तस्येत्यादेरुन्मत्तप्रलापत्वात् । छान्दोग्ये हि तस्येत्यादिवाक्यम्; तच्च ब्रह्मनाऽस्तुतिद्वारा दहरब्रह्मण उपास्यस्य स्तुतिपरत्वेन सावकाशत्वान्न योगव्यवस्थापकम्! उक्तं हि भाष्ये—सद्ब्रह्माऽमृतवाचकत्वात् सकारोऽमृतः तिकारो मर्त्यस्तयोरन्तरत्वात्,[1] यमिति नियामकम्, एवं ब्रह्मनामाक्षरस्याप्यमृतत्वं नियन्तृत्वं च किमुत ब्रह्मण इत्युपास्यं ब्रह्म स्तूयत' इति । तिकारो मर्त्य इत्यनेनापि सकारस्य न हि निन्दान्यायेन स्तुतिर्बोध्या । तथाच 'एकमेवाद्वितीयं तत्सत्यं स आत्मे'त्यादिना सर्वद्वैतनिषेधपूर्वकं ब्रह्मण एव सत्यशब्देनोक्तत्वात्, तादृशस्यैव दहरब्रह्मस्वरूपत्वेन तत्र रूढसत्यशब्दस्तुत्यर्थमुक्तवाक्यस्योक्तत्वात्, 'सद्भाव एष भवतो मयोक्तो ज्ञानं यथा सत्यमसत्यमन्य' दित्यादि विष्णुपुराणाच्च, शास्त्रप्रसिद्ध्या ब्रह्मण एव सत्यशब्दरूढिविषयत्वात्, 'सत्यं ज्ञान'मित्यादिवाक्यमबाध्यत्वोपलक्षितस्वरूपलक्षणपरमेव । 'सत्ये प्रतिष्ठित' इत्यादेस्तु सत्ये स्वस्वरूपे प्रतिष्ठितः

[1] रन्तत्वा–ख. रन्त्यत्वा–ग.

SGDF
Sri Gurgeshwari Digital Foundation

'स्वे महिम्नी' ति श्रुतेः। सत्यमस्मिन्नैक्येन प्रतिष्ठितं काष्ठां प्राप्तम्; 'सत्यस्य सत्यमि' ति श्रुतेः । सत्तासत्ते व्यावहारिकं सत्यमनृतं च गोविन्दः; 'सत्यं चानृतं च सत्यमभव' दिति श्रुतेः । सत्तासत्ते मुक्तामुक्तौ गोविन्दाधीनावित्यर्थस्तु न युक्तः; आधुनिकलक्षणापत्तेः। तस्मात्सर्वापेक्षया सत्यत्वात्सर्वाधिष्ठानत्वाच्च कृष्णः सत्य इति व्याख्यानम्। यत्त्वन्यानधीनसत्यत्वं लक्षणमपरिच्छिन्नानन्दत्वादिवदिति, तन्न; आनन्दस्वरूपस्येव सत्यस्वरूपस्यैवास्मन्मते लक्षणत्वसंभवात्। त्वद्रीत्या धर्मस्य लक्षणत्वेऽपि सत्यादिपदलक्षणायां मानाभावेन ब्रह्मण्येव सत्यत्वानन्दत्वादिस्वीकारौचित्याच्च। 'विमुक्तश्च विमुच्यत' इति श्रुत्यर्थापत्तिरपि तत्र मानम्। न चासत्सङ्गात्सतां दोषस्येव संसारस्य सत्यत्वेऽप्यस्वाभाविकत्वात्सज्जनः सज्जनो जात इत्यस्येवोक्तश्रुतेरुपपत्तिरिति—वाच्यम्; पूर्वं दौर्जन्यत्यागेन सज्जनत्ववत्संसारित्वत्यागेन पूर्वं विमुक्तत्वासंभवाद्विमुक्तपदस्य स्वभावतोऽसंसारिलाक्षणिकत्वं वाच्यम्। तत्र च मानाभावात्, 'ब्रह्म वा इदमग्र आसीत्तदात्मानमेवावेदहं ब्रह्मास्मीति, ब्रह्मैवसन् ब्रह्माप्येति'—

निर्वाणमय एवायमात्मा ज्ञानमयोऽमलः।
दुःखाज्ञानमला धर्माः प्रकृतेस्तु न चात्मनः॥

इति श्रुतिस्मृतिभ्यश्च। धृतराष्ट्र उवाच—

सनत्सुजात यदिदं शृणोमि
मृत्युर्हि नास्तीति तवोपदेशः।
देवासुरा आचरन् ब्रह्मचर्य-
ममृत्यवे तत्कतरन्नु सत्यम्॥

सनत्सुजात उवाच—

अमृत्युं कर्मणा केचित् मृत्युर्नास्तीति चापरे।
शृणु मे ब्रुवतो राजन् यथैतन्मा विशङ्किथाः॥

SGDF
Sri Gargeshwari Digital Foundation

उभे सत्ये क्षत्रियाद्यप्रवृत्ते
मोहो मृत्युः सम्मतोऽयं कवीनाम् ।
प्रमादं मृत्युमहं ब्रवीमि
सदाप्रमादममृतत्त्वं ब्रवीमि ॥

प्रमादाद्वा असुराः पराभव-
न्नप्रमादाद्ब्रह्मभूताः सुराश्च ।
न वै मृत्युर्व्याघ्र इवात्ति जन्तू-
न्नाप्यस्य रूपमुपलभ्यते[1] ॥

इति भारतोक्तिरपि मानम् । मृत्युर्नास्तीति तवोपदेशं देवासुरा अमृत्यवे ब्रह्मचर्यमाचरन्निति च यदिदं शृणोमि तत्तयोर्मध्ये कतरत्सत्यम्? उभयं न हि सत्यम्; विरोधात् । मृत्योर्नास्तित्वे तदभावाय ब्रह्मचर्यं न युक्तम् । अस्तित्वे तु न नास्तित्वमिति भावः । केचिद्वेदोक्तेन कर्मणाऽमृत्युर्मोक्षो भवतीत्याहुः । अपरे स्वात्मव्यतिरेकेण द्वितीयमपश्यन्तो मृत्युर्नास्तीत्याहुः । तत्राद्यपक्षो मृत्योस्तात्त्विकत्वपक्षस्वीकारेणेति स न युक्त इत्याशयेनाह--उभे इति । उभे सत्ये प्रवृत्ते सत्यतया प्रवृत्ते, नच विरोधः; यतो मृत्युः संसारः सत्य इति मूढानां संमतम्; कवीनां तु मृत्युर्मोहो मिथ्याज्ञानमनात्मन्यात्माभिमान इत्यादि संमतम् । तथाच मिथ्याज्ञानं भ्रम इत्यमृत्युरेव सत्यः, तेषां कवीनां मध्येऽहं प्रमादं स्वाभाविक[2]ब्रह्मभावात्प्रच्यवरूपामनवधानतां ब्रह्मात्मैक्यरूपावधानविरोधिस्वरूपमुक्तमोहस्यापि मूलं भावरूपमज्ञानं मृत्युं ब्रवीमि । अप्रमादमुक्तप्रमादशून्यमात्मस्वरूपं सदातनमुक्तप्रमादस्य मिथ्यात्वादमृतत्वं ब्रवीमि । 'परं ज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यते' 'नीहारेण प्रावृता जल्प्या' इत्यादिश्रुतेः । तथा च मृत्युरूपः

---

[1] लक्ष्यते-ग. [2] स्वाभाविकं ब्र-ग.

SGDF
Sri Gangeshwari Digital Foundation

अथ दृष्टिसृष्ट्युपपत्तिः.

शुक्तिरूप्यस्वप्नादिवद्दृष्टिसृष्ट्यन्यथानुपपत्त्यापि जगतो मिथ्यात्वसिद्धिः। अथ केयं दृष्टिसृष्टिः? (१) दृष्टिरेव सृष्टि-

---

संसारो ज्ञानाभेदादवधानरूपज्ञाननिवर्त्यत्वरूपविरोधित्वात्प्रमादात्मकसंसारवति सदा तदभावोक्तेश्च मिथ्येति भावः। प्रमादाप्रमादयोर्मृत्युत्वममृत्युत्वे मानमाह—**प्रमादादीति**। देहात्मधीरूपेण परिणतादज्ञानादसुरा विरोचनादयः पराभूताः 'अनुपलभ्यात्मान' मित्यादि 'पराभविष्यन्ती' त्यन्तश्रुतेः। अप्रमादात्प्रमादात्मकद्वैतविरोधि स्वस्वरूपं निर्णीय सुरा ब्रह्मभूताः 'तं देवा आत्मानमुपासते तस्मात्तेषां सर्वे लोका आप्ता' इति श्रुतेः। अथवा असुषु रमन्त इत्यसुरा मूढाः, स्वस्मिन् ब्रह्माभिन्ने रमन्त इति सुरा ब्रह्मविदः। तदुक्तम्—

'आत्मन्येव रतिर्येषां स्वस्मिन् ब्रह्मणि चामले ते सुरा' इति। मृत्युर्यमो व्याघ्र इव साक्षान्नात्ति किं त्वज्ञानतत्कार्यद्वारा दुःखदातृत्वेनात्तीव अस्य व्याघ्र इवादतो यमस्य रूपं नोपलभ्यते न प्रामाणिकम्। तथा चाज्ञानतत्कार्यस्य साक्षाद्दुःखदत्वेनोपलम्भात्तदेव मृत्युरज्ञानकार्यकर्मफलव्यवस्थापकत्वाद्यमोऽपि मृत्युरुपचर्यते। अत एव 'न चेदिहावेदीर्महती विनष्टिरि'ति श्रुतिरज्ञानं मृत्युपर्याय[1]विनष्टिशब्देनाह। 'मृत्युर्वै तमो ज्योतिरमृतम्' इति च श्रुतिः। यत्तु मोहोऽज्ञानहेतुकः प्रमादोऽस्वाभाविक इति व्याख्यानं तन्न शोभते; आधुनिकलक्षणापत्तेः। 'सत्यस्य सत्य'मित्यादिश्रुत्यादिना मिथ्यात्वसिद्धिः॥

इति ज्ञाननिवर्त्यत्वान्यथानुपपत्तिः॥

---

[1] पर्यायं-ग.

SGDF
Sri Gargeshwari Digital Foundation

रीति वा, (२) दृष्टिव्यतिरिक्तसृष्ट्यभावो वा, (३) दृष्टि व्यतिरेकेण सृज्याभावो वा, (४) दृष्टिसामग्रीजन्यत्वं वा, (५) दृष्टिसमानकालीनसृष्टिर्वा, (६) दृष्टिसमानसत्ताकसृष्टिर्वा, (७) सदसद्विलक्षणत्वं वा, (८) त्रिविधसत्त्वबहिर्भूतत्वे सत्यसद्विलक्षणत्वं वा, (९) अज्ञातसत्त्वाभावो वा, (१०) ज्ञातैकसत्त्वं वा। आद्ये वृत्तिरूपा चैतन्यरूपा वा दृष्टिरभिमता। प्रथमे चरमवृत्तिविषयब्रह्मणोऽपि दृष्टिसृष्ट्यापत्तिः। द्वितीये सर्वदापि सृष्ट्यापत्तिः। न द्वितीयः; चैत्रेण सृष्टो मया दृष्ट इति वैलक्षण्येन व्यवहारानुपपत्तेः। न तृतीयः; ज्ञातो घटो न ज्ञानमित्यनुभवविरोधात्। न चतुर्थः; एकसामग्रीप्रसूतत्वेन घटादेर्दृष्ट्यभिन्नत्वेनानन्तरोक्तदोषात्। न पञ्चमः; शाब्दादिज्ञानसमकालोत्पन्नघटादौ सिद्धसाधनात्तद्वदन्यत्रार्थान्तरतापत्तेश्च। न षष्ठः; उभयसत्त्वेऽप्युपपत्तेः सिद्धसाधनात्। न सप्तमः; अस्यैव मिथ्यात्वरूपत्वेन तत्साधनायैव तदुपन्यासानुपपत्तेः। नाष्टमः; त्रिविधसत्त्वमध्ये प्रातिभासिकसत्त्वस्याप्यन्तर्भावेन दृष्टिसृष्टिपक्षे तद्वति जगति तद्बहिर्भावानुपपत्तेः। न नवमः; तुच्छसाधारण्यात्। न दशमः; सुखादौ सिद्धसाधनात्तद्वदन्यत्रार्थान्तराच्चेति---चेन्न; दोषप्रयुक्तत्वनिबन्धनस्य ज्ञातैक-

---

अथ दृष्टिसृष्ट्युपपत्तिः.

दृष्ट्यभिन्नत्व इति। दृष्टिभिन्नत्वे मानाभावात्सिद्धे इत्यादिः। न चोक्तदोष एव भेदे मानमिति---वाच्यम्; एकसामग्रीजत्वस्या[1]भेदव्याप्यतयोक्तदोषवारणाय सामग्रीभेदस्यावश्यकत्वात्। **तद्बहिर्भावेति।** तच्छून्यत्वेत्यर्थः। **दोषेत्यादि।** दोषत्वं तावदन्यतमत्वं

---

[1] जन्यत्व-ग.

SGDF
Sri Gargeshwari Digital Foundation

सत्त्वस्याज्ञातसत्त्वाभावस्य वा, प्रतिपन्नोपाधिदृष्टिजन्यज्ञातैकसत्त्वस्य वा, द्रष्ट्रन्तरावेद्यत्वे सति ज्ञातैकसत्त्वस्य वा विवक्षितत्वात् । तथा च न सुखाद्यंशे सिद्धसाधनम्, तद्वदन्यत्रार्थान्तरं वा । ननु—

'जीव ईशो विशुद्धा चित्तथा जीवेशयोर्भिदा ।
अविद्या तच्चितोर्योगः षडस्माकमनादयः ॥'

इति प्राचां वचनेन बौद्धं प्रति प्रत्यभिज्ञानादिना विश्वस्य स्थायित्वप्रतिपादकेन च सूत्रभाष्यविवरणादिग्रन्थेन विरोध इति—चेन्न ; अनाद्यतिरिक्तसृष्टिविषय एव दृष्टिसृष्टिस्वीकारात्, कारणात्मना स्थायित्वस्वीकाराच्च । तावतैव बौद्धाभिमतक्षणिकत्वनिराकरणोपपत्तेर्नाकरविरोधः, प्रत्युताकरेषु बहुशो दृष्टिसृष्टि-

---

अतो नाननुगमः । भ्रमत्वजातिमद्धीविषयत्वं वा दोषप्रयुक्तत्वम्, भ्रमत्वावच्छिन्नजनकतावच्छेदकजातिरविद्यात्वं वा दोषत्वं ग्राह्यम् । तथाच दोषप्रयुक्तत्वे सति ज्ञातैकसत्त्वं लक्षणम् । परमते सत्यस्य भ्रमाङ्गीकारेण सिद्धसाधनाद्धूमप्रागभाववदवैयर्थ्याच्च विशेष्यदळम् । स्वज्ञानव्याप्यत्वं तदर्थः । व्याप्यत्वव्यापकत्वे कालिके न ग्राह्ये । ज्ञानमज्ञानशून्यचिद्रूपमपेक्ष्य लाघवादाह—**अज्ञातसत्त्वाभावस्येति** । स्वीयेनाज्ञानाभावेन व्याप्यत्वस्येत्यर्थः । निबन्धनस्येत्यन्तमनुषज्यते । तस्य च पूर्वत्रेवात्रापि दोषप्रयुक्तवृत्तेरित्यर्थः । पुरुषान्तरवेद्ये च नाज्ञानम्; मानाभावात् । यत्र हि यं पुरुषं प्रति प्रकाशप्रसक्तिस्तत्र तस्याज्ञानं युक्तं[1] तत्तत्पुरुषीयाज्ञानाभावव्याप्यत्वं तत्पुरुषं प्रति दृष्टिसृष्टिरिति बोध्यम् । परोक्षविषयसङ्गूहायासत्त्वापादकाज्ञानमेव लक्षणद्वयेऽपि निवेश्यम् । **प्रतिपन्नेत्यादि** । स्वप्रतिपत्तिविशेष्य-

---

[1] न प्रयुक्तं–ग.

SGDF
Sri Gangeshwari Digital Foundation

रुपपादितैव। नन्वेवं—प्रतीतिमात्रशरीरत्वेन नियतकारणाजन्यत्वे श्रुतिषु स्वर्गाद्यर्थं ज्योतिष्टोमादिविधेर्ब्रह्मसाक्षात्कारार्थं श्रवणादिविधेराकाशादेर्वाय्वादिहेतुत्वस्य चोक्तिरयुक्तेति—चेन्न; स्वाप्नकार्यकारणभावबोधकवाक्यवदुपपत्तेः। न चैवं वेदान्तवाक्यस्य तन्मीमांसायाश्च स्वप्नवाक्यतन्मीमांसातुल्यतापत्तिः; विषयबाधाबाधाभ्यां विशेषोपपत्तेः। अत एव—तृप्त्यर्थं भोजने परप्रत्यायनार्थं शब्दादौ च प्रवृत्तेरयोगेन स्वक्रियाव्याघात इति—निरस्तम्; स्वाप्नव्यवहारवदुपपत्तेः। अथैवं—घटादेः स्वज्ञानात्पूर्वमसत्त्वेन प्रतिकर्मव्यवस्थानुपपत्तिः; अधिष्ठानस्यापि शुक्तीदमंशस्य रूप्यादिवत् इदं रजतमिति ज्ञानात्प्रागसत्त्वेन सम्प्रयोगादिहेतुत्रयजन्यत्वरूपाध्यासतटस्थलक्षणस्य सत्यस्य वस्तुनो मिथ्यावस्तुसंभेदावभास इत्यस्य स्वरूपलक्षणस्य चायोग इति—चेन्न; प्रतिकर्मव्यवस्थायाः सम्प्रयोगा-

---

दृष्टिजन्यवृत्तेर्ज्ञातैकसत्त्वस्येत्यर्थः। अधिष्ठानसामान्यांशदृष्टेरारोप्यमात्रहेतुत्वादुक्तदृष्टिजन्यत्वं जन्यमात्रस्याक्षतम्। द्रष्ट्रन्तरेत्यादि। दृष्टिसृष्टिपक्षे पुरुषान्तरीयसुखादि न ज्ञायते, किंतु पुरुषान्तरीयत्वेन स्वस्मिन्नेव कल्प्यत इति भावः। सृष्टिविषये सृज्यमान एव या दृष्टिः सा अनाद्यन्यत्र, न त्वनादौ स्वीक्रियते। अनादौ मिथ्यात्वसिद्धिस्तु दृश्यत्वादिनैव न तु दृष्टिसृष्ट्येति भावः। विषयबाधेति। यत्तु—स्वप्नाविशेषे बाधाभावोऽप्यनुपपन्न इति—तन्न; दोषप्रयुक्ताप्रयुक्तत्वाभ्यां बाधाबाधयोरुपपत्तेः, अन्यथा 'अहमेवेदं सर्वोऽस्मी'ति श्रुत्युक्तस्वप्न[1]तत्त्वविद्याया अपि बाधापत्तेः। उक्तं च शाबरभाष्ये—'यस्य दुष्टं करणं यत्र च मिथ्येति प्रत्ययस्तद्भ्रान्तिः, अन्यत्समीचीन'मिति। सत्यस्य वस्तुनः

---

[1] स्वाप्न—ग.

SGDF
Sri Gurgeshwari Digital Foundation

दिहेतुत्रयजन्यत्वरूपाध्यासतटस्थलक्षणस्य च मन्दाधिकारिविषयत्वात् । सत्यस्य वस्तुनो मिथ्यावस्तुसंभेदावभास इति स्वरूपलक्षणं तु दृष्टिसृष्टिपक्षेऽप्यविरुद्धम् । न हीदमंशावच्छिन्नं चैतन्यं न वस्तु; न वा मिथ्यारूप्यस्य तेन सह न संभेदावभासः । न च—इदं रूप्यमिति ज्ञानकाले शुक्तित्वादेरभावेनाध्यासस्य तदज्ञानकार्यत्वादिप्रक्रियाविरोध इति—वाच्यम्; इदं रूप्यमिति ज्ञानकाले शुक्तित्वस्याभावेऽपि तदज्ञानस्थित्यविरोधात् । न हि सत्ताकाल इव सत्ताविरहकालेऽप्यज्ञानं विरुध्यते । न च–इदं रूप्यं नेदं रूप्यमिति ज्ञानयोर्भिन्नविषयत्वेन बाध्यबाधकभावानुपपत्तिरिति–वाच्यम्; भिन्नविषयत्वेऽपि विषययोः सारू-

---

इदमवच्छिन्नचितः । **मन्दाधिकारीति ।** अधिकारिभेदकल्पिता हि प्रक्रियाभेदाः शास्त्राचार्यैरनूदिता इति भावः । **यद्यपीदं रजत**मित्यादावधिष्ठानरूपेदमाकारा वृत्तिः पूर्वं संभवति, **सृष्टदृष्टिपक्ष** इव पूर्वजातायास्तस्या रूप्याकारवृत्तिकालानुवृत्तिसंभवात्; **तथापीदं** रूप्यमित्याकारैकैव विशिष्टगोचरा[1] वृत्तिर्लाघवात्, **अधिष्ठानज्ञानहेतु**त्वपक्षे तु वृत्तिद्वयस्वीकारादेव न दोषः । **चैतन्यं न वस्त्विति ।** उपाधेर्मिथ्यात्वेऽप्युपहितस्य स्वरूपं सत्यमिति भावः । **स्थित्यविरोधादिति ।** भाविनि सृष्टदृष्टिपक्षे ज्ञानविषयत्वस्येवाज्ञानविषयतावच्छेदकत्वस्यापि स्वीकाराद्दृष्टिसृष्टिपक्षे आद्यस्यास्वीकारेऽपि द्वितीयाविरोधादिति भावः । **सत्ताकाल इति ।** दृष्टिसृष्टिपक्ष इत्यादिः । **सत्ताकाले** ज्ञानाज्ञानयोर्विरोधेऽपि तत्पूर्वकाले तज्ज्ञानाभावात्तदज्ञानं न **विरुद्धम्**; पक्षान्तर इव भाव्यवच्छेदेनाज्ञानानुभवसंभवात्तादृशज्ञानस्य कार्यान्यथानुपपत्तिकल्प्यत्वाच्चेति भावः । **भिन्नविषयत्वेऽपीत्यादि ।** पूर्वज्ञाने

---

[1] विशिष्टागोचरा–ग.

SGDF
Sri Gangeshwari Digital Foundation

प्यात् स्वप्नबाध्यबाधकयोरिव बाध्यबाधकभावोपपत्तेः। न च रूप्यादिबाधस्यापि दृष्टिसृष्टित्वे तेन रूप्यादेर्मिथ्यात्वासिद्धिरिति—वाच्यम्; बाध्यान्यूनसत्ताकत्वमेव बाधकत्वे प्रयोजकम्, न त्वधिकसत्ताकत्वमित्यस्योपपादितत्वेन व्यावहारिकेण व्यावहारिकबाधवत् प्रातिभासिकेन प्रातिभासिकबाधाविरोधात्। न च—सुषुप्तिप्रलयादौ जीवब्रह्मविभागस्याप्रतीतत्वेनाविद्यमानतया प्रतिसुषुप्ति प्रतिप्रलयं च मुक्तस्य पुनरावृत्त्यापत्तिरिति—वाच्यम्; जीवब्रह्मविभागादेरनादित्वेन दृष्टिसृष्टित्वानभ्युपगमस्योक्तत्वात्। न च सुषुप्तं प्रति संस्कारादेरप्यभावेन तस्य पुनः

रूप्यमिदमात्मकम्, द्वितीयज्ञाने तु प्रतियोगितासंबन्धेनाभावगतं ज्ञायते; यथाज्ञानं सृष्टिस्वीकारात्। अतो भिन्नविषयकत्वेऽपि स्वप्नवत्सारूप्यादुक्तरूप्ययोः रूप्यत्वरूपानादिधर्मवत्तया ज्ञायमानत्वाद्बाध्यबाधकत्वोपपत्तेरित्यर्थः। अथवा सारूप्याद्विरोधिधीविषयत्वेन समानत्वादित्यर्थः। यथा सृष्टदृष्टिपक्षे बाध्यप्रतियोगिकाभावधीर्बाधिका तथा दृष्टिसृष्टौ तत्तत्प्रतियोगिकाभावधीस्तत्र [1] बाधिका। न चापूर्वकल्पनेति वाच्यम्; अनादिशक्तिविशेषस्य बाधकतावच्छेदकत्वात्। एवं च रूप्यत्वादेः प्रतिरूप्यं दृष्टिभेदेऽपि [2] न क्षतिरिति ध्येयम्। **व्यावहारिकेण** द्वैतभावेन [3]। **व्यावहारिकबाधवत्** पूर्वोक्तव्यावहारिकद्वैतबाधवत्। **उक्तत्वादिति**। वस्तुत ईशस्येव तस्माज्जीवे भेदस्यापि स्थूलमनःपरिणामत्वमेव; सुषुप्त्यन्यदशायामेव तस्य दृश्यत्वात्। अज्ञानोपाधेर्विद्यमानत्वादेव सुषुप्तिप्रळययोर्न मुक्ततापत्तिरिति ध्येयम्। **संस्कारादेरिति**। अज्ञायमानकार्यानङ्गीकारेण तादृशसंस्काराद्यसंभव [4]

---

[1] स्तत्र तत्र–ग. [2] सृष्टिभेदेऽपि–ग. [3] द्वैताभावेन–ग. [4] संस्कारावेद्यसंभव–ग.

SGDF
Sri Gangeshwari Digital Foundation

प्रबोधायोगः; कारणात्मना संस्कारादेः सत्त्वात्। न च—मोक्षस्य दृगन्यत्वेन स्वाप्नमोक्षवत् दृष्टिसृष्ट्यापत्तिः; मोक्षस्य ब्रह्मस्वरूपत्वेन दृग्भिन्नत्वासिद्धेः। न च—चैतन्यमात्ररूपा दृष्टिर्न सृष्टिः, किंतु वृत्तिविशिष्टचैतन्यरूपा वा, वृत्तिरूपा वा दृष्टिः सृष्टिरिति वाच्यम्, तथा च तस्या अपि दृष्ट्यन्तरं सृष्टिरित्यनवस्थेति—वाच्यम्; चैतन्यमात्रस्य

इति भावः। **कारणात्मनेति**। कारणीभूताज्ञानगतसूक्ष्मावस्थारूपेणेत्यर्थः। तादृशरूपस्य तु न दृष्टिसृष्टिः। अत एव धर्माधर्मयोरपीश्वरप्रसादकोपरूपयोर्विहितनिषिद्धक्रियोत्तरं परोक्षतया दृश्यमानयोः संस्काररूपेण पश्चादवस्थानान्न दोषः। अथवा—कारणीभूतसाक्षिवीक्ष्यमाणसूक्ष्मावस्थारूपेणेत्यर्थः। तथा च यथाज्ञानाकारा निर्विकल्पकवृत्तिस्तथा संस्काराकारापि सुषुप्तौ स्वीक्रियते, अनुपपत्तेस्तुल्यत्वात्। एकस्या एव साक्षिसुखाज्ञानसंस्काराकारत्वकल्पनान्न गौरवम्। एवमंशे प्रसादकोपाकारवृत्त्युत्तरं प्रसादसं[1]स्काराकारा वृत्तिर्वाच्या, ईशतत्प्रसादकोपानां साक्षिनिष्ठतत्तन्मनोनिष्ठानामेव साक्षिणा दृश्यत्वात्तत्संस्काराणामपि तत्तन्मनोनिष्ठानामेव दृष्टिसृष्टेस्तत्तन्निष्ठभोगजनकत्वोपपत्तिः। नचाहं सुखीतिवदहं तत्तत्संस्कारवानित्यादिव्यवहारापत्तिरिति—वाच्यम्; संस्काराकारवृत्तिविशेषस्यैव तादृशव्यवहारदृष्टिसृष्टिप्रयोजकत्वात्। नहि दृष्टिसृष्टिपक्षेऽपि सर्वापि वृत्तिर्व्यवह्रियते। उपेक्षात्वकल्पनाच्च न ततः स्मृतिरित्यादि बोध्यम्। अथवा सौषुप्तसंस्काराणामिव प्रसादकोपसंस्काराणामपि साक्षिण्येव निर्विकल्पिका वृत्तिर्न तु मनस्तादात्म्यविषयिकेति नोक्तव्यवहाराः[2]। तेषामिव तेषामपि स्वपरिणामिमनःप्रवाहे स्वकार्यजनकत्वम्। वस्तुतः श्रुत्यादिसिद्धप्रसादकोपयोः

---

[1] कोपसं—ग. [2] व्यवहारः—ग.

SGDF
Sri Gangeshwari Digital Foundation

दृष्टित्वे यद्यपि तत्समानसत्ताकतया घटादेः सदातनत्वापत्तिः, तथापि वृत्त्युपहितचैतन्यमेव दृष्टिशब्दार्थः। वृत्तावपि वृत्तिरेव स्वस्वरूपा चैतन्योपाधिरिति नानवस्था। अत एव— दोषाज्ञानादृष्टदेहेन्द्रियादीनामभावे न भ्रम इति तेषामपि दृष्टिसृष्टित्वेऽनवस्थेति—निरस्तम्; स्वाप्नभ्रमवद्देहेन्द्रियादिनैरपेक्ष्येणाप्युपपत्तेः। अन्वयव्यतिरेकानुविधानं च तद्वदेव। न च— दृष्टिसृष्टेरपि दृष्टिसृष्टित्वेन घटादेरदृष्टिसृष्टित्वापत्तिरिति—

स्वोपलक्षिततत्तन्मनःप्रवाहसंबन्धेन भोगहेतुत्वसंभवात्तत्संस्कारानभ्युपगमेऽपि न क्षतिः। एवं सुषुप्तावपि प्रपञ्चसंस्कारे मानाभावः, 'असदेवेदमग्र आसी'दित्यादि श्रुतिरपि दृष्टिविशेषानुवादिका; मनःप्रवाहघटकतया मनःसंस्कारमात्रकल्पनात्। तत्संबन्धेन पूर्वपूर्वप्र[1]पञ्चस्याविद्याविशेषाणां वा प्रबोधे तत्तन्मनःपरिणामहेतुत्वसंभवादिति ध्येयम्। **सदातनत्वेति**। अनाद्यनन्तत्वेत्यर्थः। **स्वस्वरूपेति**। स्वच्छे सुखादौ चित्प्रतिबिम्बसंभवाद्वृत्त्यन्तरानभ्युपगमः, तदभ्युपगमेऽपि [2]परस्परविषयकवृत्तिद्वयस्वीकारान्नानवस्थादि। यदि तु तत्तद्दृश्यावच्छिन्ना चिदेव[3] तत्तद्दृश्यसत्तेति न सदातनत्वापत्तिरिति विभाव्यते, तथाप्यविद्यावृत्त्यनभ्युपगमेऽपि चाक्षुषत्वादिधर्मविशिष्टविषयत्वविशिष्टस्यैव घटादेरुत्पत्तिर्वाच्या; घटं पश्यामीत्याद्यनुभवस्यान्यथानुपपत्तेः। अत एव स्वप्ने तथा स्वीक्रियत इति भावः। **अदृष्टिसृष्टित्वापत्तिरिति**। दृष्टिसृष्टेस्तत्त्वेन मिथ्यात्वे घटादौ तदभावसिद्धिरिति भावः॥

तत्र तत्सिद्धावपि घटादेः स्वसमसत्ताकदृष्टिसिद्धिरव्याहता; यथा ज्ञानस्य ज्ञेयत्वेऽपि तद्विषयस्य नाज्ञेयत्वम्, तथा दृष्टिसृष्टेः स्वसमसत्ताकदृष्टिसिद्धावपि तद्विषयघटादेरपि स्वसमसत्ताकदृष्टि-

---

[1] पूर्वप्र—ग. [2] वृत्त्यन्तरानभ्युपगमेऽपि—ग. [3] च्छिन्नचिदेव—ग.

SGDF Sri Gangeshwari Digital Foundation

वाच्यम्; ज्ञानस्य ज्ञेयत्वेऽपि विषयस्याज्ञेयत्वाभाववत् दृष्टिसृष्टेर्दृष्टिसृष्टित्वेऽपि घटादेर्दृष्टिसृष्टित्वोपपत्तेः। नन्वैक्यप्रत्यभिज्ञाविरोधः; पूर्वकालप्रतीतस्येदानीमभावात्, न चैषा भ्रान्तिः; दीपादौ परिणाम[1]भेदस्येवेह बाधकस्याभावात्, तदभावेऽपि भ्रान्तित्वे घटादेरप्येकस्मिन् क्षणे भेदस्यात्मनोऽपि प्रतिक्षणं भेदस्य प्रसङ्ग इति—चेन्न; 'नेह नाने'त्यादिश्रुतिभिः प्रपञ्चस्य मिथ्यात्वेऽवधृते रज्जुसर्पादिवत्प्रतिभासमात्रशरीरत्वमेव प्रतिभासकालातिरिक्तकालसत्त्वे बाधकम्, अतो भिन्नकालानामात्मभिन्नानां प्रत्यभिज्ञा भ्रान्तिः। आत्मन्येकप्रतीतिरेककालावच्छेदेन घटादौ चैक्यप्रत्यभिज्ञा न भ्रान्तिः। एककालावच्छिन्नघटादावात्मनि चाभेदे बाधकाभावात्। पुरुषान्तरप्रतीतेन सहैककालावच्छेदेनापि घटादौ प्रत्यभिज्ञानं भ्रम एव; प्रतिभासस्य भेदात्। यथा एकस्यामेव रज्वां मन्दान्धकारवर्तिन्यां दशानां युगपत्सर्पभ्रमेण पलायमानानां परस्परसंवादेनैक एव सर्पः सर्वैरनुभूयत इति प्रत्यभिज्ञा भ्रमः; अन्यभ्रमसिद्धस्यान्येन ज्ञातुमशक्यत्वात्। नन्वत्र कथमभेदभ्रमः? तत्कारणस्य सादृश्यादेः कस्याप्यभावादिति—चेन्न; स्वप्नाभेदभ्रमवत् दृष्टिसृष्टिसिद्धसादृश्यादिसंभवात्। न चैवमभेद एवोत्पद्यतामिति—वाच्यम्; इष्टापत्तेः, रज्जुसर्पादिवदुत्पन्नस्यैव ग्रहणनियमात्। न च क्वचिदुत्पद्यते क्वचिन्नेत्यत्र नियामकाभावः; मायाया विचित्रशक्तिकत्वाभ्युपगमात्।

रव्याहतेत्याह—ज्ञानस्येत्यादिना। अन्यभ्रमसिद्धस्य अन्यदीयाज्ञानावस्थोपादानकस्य। विचित्रशक्तिकत्वेति। विचित्रका-

---

[1] परिमाण.

SGDF
Sri Gargeshwari Digital Foundation

न च—'सोऽयं देवदत्त' इति दृष्टान्तेन तत्त्वमस्यादिवाक्ये जहदजहल्लक्षणयैक्यपरत्वोक्त्ययोग इति वाच्यम्; यद्यपि धर्मवद्धर्म्यभेदोऽपि बाधित एवेति जहदजहल्लक्षणापि न युज्यते; तथापि यदा धर्माभेदो बाधान्न गृहीतः, किंतु धर्म्यभेद एव, तदा सोऽयमित्यादौ जहदजहल्लक्षणासंभवेन दृष्टान्तत्वोपपत्तिः। न चाभेदस्यापि दृष्टिसृष्टित्वेन तज्ज्ञानस्य बाधकत्वायोगः; आत्माभेदस्यात्मरूपत्वेन दृष्टिसृष्टित्वाभावात्, अन्यूनसत्ताकत्वमात्रेण बाधकत्वोपपत्तेश्च। न च—साक्षात्कारस्यापि दृष्टिसृष्टित्वेन प्रमाणजन्यत्वाभावात्तत्त्वज्ञानत्वाभावेन ततो मुक्तिर्न स्यादिति—वाच्यम्; अबाधितविषयत्वेनैव तत्त्वज्ञानत्वोपपत्तेः, तस्य च दृष्टिसृष्टित्वेऽप्यक्षतेः। न च 'ध्रुवा द्यौर्ध्रुवा पृथिवी ध्रुवासः पर्वता इमे ध्रुवं विश्वमिदं जग'दित्यादिश्रुतिविरोधः; अनित्यतावादिभिरपि ध्रुवेत्यस्यान्यथानयने आवश्यके दृष्टिसृष्टिप्रतिपादकश्रुत्यनुरोधेन आकल्पं सन्तानाविच्छेदपरत्वस्यैव

र्यानुकूलविचित्राज्ञानावस्थावत्त्वेत्यर्थः। जगदिति। 'ध्रुवो राजा विशामय'मिति शेषः। अन्यथानयन इति। नित्यरूपमुख्यार्थभिन्नक[1]त्ववचन इत्यर्थः। सन्तानाविच्छेदेति। सृष्टदृष्टिपक्षे यावत्कालं पृथिव्यादि तिष्ठति तावदित्यादिः। सुषुप्तौ संस्कारानङ्गीकारे तु तदन्यकाल इत्यप्यादिः। एवं च सङ्ग्रामोद्यतस्य राज्ञः सन्नाहने पुरोधसा कर्तव्ये विनियुक्त 'आ त्वा हर्षमन्तरेधी'त्यादिसूक्तान्तर्गतस्य राजस्थैर्याशासने विनियुक्तस्य 'ध्रुवे'त्यादेर्यथा पृथिव्यादि स्थिरं तथा त्वं राजा स्थिरो भवेत्यर्थ इति माधवीयभाष्याद्युक्तिर्न विरुध्यते; सन्तान[2]विच्छेदस्यैव

---

[1] भिन्नार्थक—ग.　　　[2] सन्ताना—ग.

SGDF
Sri Gargeshwari Digital Foundation

युक्तत्वात्, अन्यथा 'ध्रुवो राजे'त्यादावगतेः। दृष्टिसृष्टौ च 'एवमेवास्मादात्मनः सर्वे प्राणाः सर्वे लोकाः सर्वे वेदाः सर्वाणि भूतानि सर्व एत आत्मानो व्युच्चरन्ती'ति श्रुतिः सुप्तोत्थित-जीवात्प्राणादिसृष्टिं प्रतिपादयन्ती प्रमाणम्। न च सुषुप्तौ प्राणादिपञ्चकस्य[1] सत्त्वात्किमर्थं पुनः सृष्टिरिति वाच्यम्; 'न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यत्पश्येदि'त्यादिना सुषुप्तौ सकलकार्यप्रपञ्चलयश्रवणात्। न च सुषुप्तौ हिता नाम नाड्य इति नाडीसत्त्वप्रतिपादकवाक्यविरोधः; केन क्रमेण सुषुप्तौ भवतीत्यपेक्षायां 'हिता नाम नाड्यो हृदयात्पुरीततमभि-प्रतिष्ठन्ते ताभिः प्रत्यवसृप्य पुरीतति शेते' इत्यादिना सुषु-प्त्यव्यवहितकाले क्रमोक्तये नाडीसत्त्वं प्रतिपाद्यते, न तु

स्थैर्यरूपत्वादिति भावः। अगतेरिति। राजत्वाश्रयस्य देहस्य मरण-पर्यन्तं नाविच्छेदः; बाल्ययौवनादिषु ह्रासवृद्ध्यादिना विच्छेदात्। अतश्चैत्रत्वाद्याश्रयदेहसन्तान[2]विच्छेद एव स्थैर्यम्। चैत्रत्वादिकं तु कारणीभूताज्ञानावस्थाविशेषरूपत्वादनादित्वेन सुप्तिकालसत्त्वेऽपि देह-सन्तानवृत्तीति भावः। काल इति। नाडीसत्त्वमित्यत्रान्वेति। 'यदा सुषुप्तो भवति, न कस्यचन वेद, हिता नाम नाड्यो द्वासप्ततिः सहस्राणि ताभिः प्रत्यवसृप्य पुरीतति शेते, स यथा कुमारो महाराजो वा महाब्राह्मणो वाऽतिघ्नीमानन्दस्य गत्वा शयीत, एवमेवैष एतच्छेते' इति वाक्ये 'यदा सुषुप्तः शेते' तदा एष एवमेतच्छेते। एतदिति पूर्ववाक्योक्तमाकाशशब्दितब्रह्माधारकार्थकं शयनक्रियाविशेषणम्। कीदृशं शयनं तत्राह—यथेत्यादि शयीतेत्यन्तम्। गत्वा शयीतेति मुखं व्यादाय स्वपितीत्यादाविव शयित्वा गच्छेदित्यर्थः; अन्यथा शयनोत्तर-

[1] प्राणादिप्रपञ्चस्य. [2] सन्ताना—ग.

SGDF
Sri Gargeshwari Digital Foundation

सुषुप्तिकालेऽपि, वाक्यान्तरविरोधात्; प्राक् सत्त्वमात्रेण च क्रमाभिधानपर्याप्तेः। ननु—'यत्रैष एतत्सुप्तोऽभू'दिति यच्छब्देन सुप्ताधारत्वेनोक्तस्य ब्रह्मण एव 'अस्मादात्मन' इत्यनेन परामर्शात्तत्कर्तृकैव प्राणादिसृष्टिर्न तु सुप्तोत्थितजीवकर्तृका; अन्यथाऽग्न्यूर्णनाभ्यादेस्तन्तुविस्फुलिङ्गादिजननोक्तिरत्रापि वाक्ये सर्वलोकसृष्ट्युक्तिश्चालीकार्था स्यात्, न हि दृष्टिसृष्टिपक्षे अग्न्यूर्णनाभ्यादेस्तन्त्वादिजनकत्वं सर्वलोकसृष्टिर्वास्तीति—चेत्, न; यत्रेत्यस्य कालपरत्वेन यच्छब्देन ब्रह्मणो निर्देशाभावात्। न च यत्रेत्यस्य ब्रह्मरूपाधिकरणपरत्वं कालपरत्वं वेत्यत्र विनिगमनाविरहः; अनन्तरवाक्ये 'क्वैष तदाभू'दित्यत्र क्व तदेति पदद्व-

---

मेवानन्दप्राप्तेर्यथाश्रुतासङ्गतेः। तथा च यथा कुमारादिः शयित्वानन्दातिशयं गच्छति एवमस्य विज्ञानमयस्य शयित्वानन्दातिशयरूपब्रह्मप्राप्तिरूपं शयनमित्यर्थे दृष्टान्तदार्ष्टान्तिकयोः पर्यवसानम्। आनन्दातिशयप्राप्तिरूपशयनात्पूर्वं शयनं विवेचयन्ती श्रुतिराकाङ्क्षितं क्रममाह—**हिता नामेत्यादि**। एवं च पुरीतदाधारिका सुषुप्तिरिति प्रलापो वाक्यार्थाज्ञानादेव; पुरीतत्प्राप्त्युत्तरं मनआद्युपाधिलयेन मनआद्युपाधिकृतभेदाभावरूपब्रह्मप्राप्तेरेव सुषुप्तित्वस्य श्रुतिसिद्धत्वात्। अत एव 'तदभावो नाडीषु तच्छ्रुतेरात्मनि चे'ति सूत्रे नाडीपुरीतद्ब्रह्मणां सुषुप्तौ क्रमसमुच्चयः सिद्धान्तितः। **वाक्यान्तरेति**। 'न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्त'मित्यादिवाक्येत्यर्थः। **सर्वलोकसृष्टिः** सर्वलोककर्मिकैका सृष्टिः। **अनन्तरवाक्येति**। गार्ग्यं प्रति ब्रह्म ज्ञापयन्नजातशत्रुर्गार्ग्यस्य ब्रह्मस्वरूपप्रश्नेऽप्यसामर्थ्यात्स्वयमेव प्रश्नपूर्वकं ब्रह्मोक्तवान् 'यत्रैष एतत्सुप्तोऽभूद्य एष विज्ञानमयः पुरुषः क्वैष तदाभूत्कुत एतदागा'दिति प्रश्नः 'यत्रैष एतत्सुप्तोऽभूद्य एष विज्ञानमयः पुरुष-

SGDF
Sri Gargeshwari Digital Foundation

योपादानस्यैव विनिगमकत्वात्, यत्रेत्यनेन देशनिर्देशे क्वेति देशप्रश्नानुपपत्तेः, कालानिर्देशे च तदेति प्रतिनिर्देशानुपपत्तेः

स्तदेषां प्राणानां विज्ञानेन विज्ञानमादाय य एषोऽन्तर्हृदय आकाशस्तस्मिं छेते ' इति प्रत्युत्तरम् । तत्र क्वेत्यनेन देशस्यैव प्रश्नः, अन्यथाकाशरूपदेशोत्तरासङ्गतेः । तथाच यत्रेति कालस्यैव निर्देश इति भावः । ननु—यत्रेति क्वेत्यस्य विशेषणं तत्राह—**कालानिर्देश इति** । यच्छब्देन कालानिर्देशे प्रश्नवाक्ये तदेति निर्देशो न स्यात्; यच्छब्देनोद्दिष्टस्यैव तच्छब्देन प्रतिनिर्देशौचित्यात्, प्रसिद्धार्थकत्वस्य प्रकृते तच्छब्दस्यासंभवादित्याशयेनाह—**कालानिर्देश इत्यादि** ॥

ननु–तथाप्याकाशशब्दितं ब्रह्मैवैतस्मादात्मन इत्यत्रोक्तमिति–चेन्न; 'एवमेवैष एतच्छेत' इत्यत्राव्यवहितपूर्ववाक्ये जीवस्यैव प्राधान्येनोक्तत्वेन तत्पदबोध्यत्वौचित्यात् 'पुरत्रये क्रीडति यस्तु जीवस्ततस्तु जातं सकलं विचित्र'मित्यादिश्रुत्यन्तराच्च । तत्र यतः[1] क्रीडति भुङ्क्ते अतः कारणा[2]द्द्रष्टुरेवोपादानत्वादिति ज्ञापयितुं क्रीडतीत्यन्तम् । अत एव 'तस्माद्वा एतस्मादात्मन आकाश' इत्यादौ एतस्मादात्मन इति सार्थकम्; ब्रह्माभिन्नजीवकारणत्वपरत्वात् । अत एव च वाक्यान्तरे ब्रह्महेतुत्वोक्तिर्ब्रह्माभिन्नजीवपरा । अत एव च 'असतोऽधि मनोऽसृज्यत मनः प्रजापतिमसृजत्तच्चेदं मनस्येव प्रतिष्ठितं यदिदं किंचे' इत्यादिश्रुतिर्जगतो मनःपरिणामत्वमाह । 'एतत्सर्वं मन एवे'ति श्रुतिव्याख्याने—

शुक्लं कृष्णमणु स्थूलमिति धीः कर्मणो वशात् ।
द्वैताधिकारमापन्ना वैश्वरूप्यं नियच्छति ॥

---

[1] यः–ग. [2] कारणं–ग.

SGDF
Sri Gargeshwari Digital Foundation

धीर्विपर्ययरूपेयं यतः शुभ्रादिरूपिणी ।
मन एवेत्यतः प्राज्ञाः सर्वं रूपं प्रचक्षते ॥

इति वार्तिकामृतमपि तथाह । यतो धीः मनःपरिणामोऽतस्तद्विषयोऽपि सुषुप्तौ मनोऽभावे दृश्यदर्शनयोरभावात्सुप्तोत्थितस्य मनोन्वये कार्यमात्रान्वयाच्च । गौडपादीयभाष्यतदानन्दगिर्यादौ चायमर्थः प्रपञ्चितः । शारीरकसंक्षेपे च—

तस्माद्ब्रह्माऽविद्यया जीवभावं प्राप्यासित्वा तावके तु स्वरूपे ।
त्वच्चित्तेन स्पन्दितं जीवजातमाकाशादि क्ष्मावसानं च पश्येः ॥

विद्याविद्ये बद्धमुक्तौ त्वदन्यावाकाशादि क्ष्मावसानं च विश्वम् ।
स्वाविद्योत्थस्वान्तविस्पन्दितं तद्विज्ञातव्यं माग्रहीरन्यथैतत् ॥

वासिष्ठेऽपि—

मनोमयमिदं विश्वं यन्नाम परिदृश्यते ।

इत्यादिप्रपञ्चः । तस्मादविद्योपाधिकस्य जीवस्य मनउपादानत्वं[1] मनउपाधिकस्य तस्यैवेतरकार्यमात्रोपादानत्वमिति सर्वमानसिद्धान्तसिद्धम् । 'आकाशाद्वायु' रित्यादिश्रुतिस्तु कश्चिद्वाय्वादिराकाशादिजन्यत्वेन दृश्यमान आकाशादिजन्य इत्यभिप्राया । अत एव छान्दोग्ये तेजआदिसृष्टिरुक्ता । वियदादिसृष्टिक्रमपरसूत्राण्यपि दृष्टिविशेषाभिप्रायकाणि । अत एव सृष्टौ श्रुतितात्पर्यमभ्युपेत्यवादत्वं तेषामाकरे उक्तम् अद्वैतब्रह्मण्येव तत्तात्पर्याच्च । अत एव 'कुत एतदागा' दिति संसारित्वरूपागमनं जीवस्य किमुपादानाभिन्नकर्तृकमिति प्रश्नस्य अस्मादात्मन इति जीवरूपोपादानाभिन्नकर्तृकमित्यर्थकमुत्तरं श्लिष्टम् । आत्मपदस्य

---

[1] दानकत्व—ग.

SGDF
Sri Gargeshwari Digital Foundation

भाष्यकारादिभिश्च स्थूलाधिकारिणं प्रति तथा व्याख्यानात्, ऊर्णनाभ्यादेस्तन्त्वादिजन्मोत्पत्तिस्तु लौकिकभ्रमसिद्धकार्यकारणभावप्रसिद्धिमनुरुद्ध्य । सर्वलोकादिसृष्टिश्च तत्तद्दृष्टिव्यक्तिमभिप्रेत्य; यदा यत्पश्यति तत्समकालं तत्सृजतीत्यत्र तात्पर्यात् । न चाविद्यासहकृतजीवकारणकत्वे जगद्वैचित्र्यानुपपत्तिः; जगदुपादानस्याज्ञानस्य विचित्रशक्तिकत्वात् । उपपत्त्यन्तरं चात्र

चेश्वरपरत्वे प्रसिद्धिविरोधः; 'क्षेत्रज्ञ आत्मा पुरुष' इति प्रत्यगात्मन्येव तत्प्रसिद्धेः । **स्थूलाधिकारिणमिति** । उक्तं हि शारीरकसंक्षेपे--

तत्त्वावेदकमानदृष्टिरधमा तत्त्वक्षतिर्मध्यमा
तत्त्वप्रच्युतिविभ्रमक्षतिकरी तत्रान्त्यदृष्टिर्मता ।
जीवैकत्वमुमुक्षुभेदगतितो व्यामिश्रदृष्टिर्द्विधा
भिन्ना तत्र च पूर्वपूर्वविलयादूर्ध्वोऽर्ध्वलब्धिर्भवेत् ॥ इति ।

प्रत्यक्षादिमानानां तत्त्वावेदकत्वदृष्टिराद्या, तेषां व्यावहारिकमानत्वदृष्टिर्द्वितीया, तत्त्वप्रच्युतेर्व्यावहारिकमानत्वस्य प्रत्यक्षादौ शुक्तिरूप्यादिबुद्धाविव विभ्रमत्वदृष्ट्या क्षतिकरी जन्यदृश्यमात्रे प्रातीतिकत्वदृष्टिपर्यवसिता तृतीया, सापि जीवैकत्वे मुमुक्षुभेदाद्भमनाद्विविधा व्यावहारिकत्वाभावभ्रमत्वाविषयकत्वेन व्यामिश्रा दृष्टिः । पूर्वपूर्वविलयादिति । मुमुक्षुभेददृष्टेः पश्चादुक्तावप्यार्थिकं पूर्वत्वं बोध्यम् । उपपत्त्यन्तरमिति । अज्ञायमानतादशायां पृथिव्यादावनन्तसंयोगादिकमिन्द्रियतत्क्रियासंयोगादिकं तस्य प्रत्यक्षहेतुत्वं प्रातीतिकव्यावहारिकयोर्मिथो व्यावृत्तरूपेणान्यत्र हेतुत्वादिकं च न कल्प्यते । ज्ञानहेतुत्वस्थले विषयस्यैव हेतुत्वं जन्यज्ञानाकल्पनं चेति लाघवम् । 'घटं पश्यामी'त्यादिप्रत्यये च घटाभिन्नचाक्षुषादिर्विषयो घटादावेव

SGDF
Sri Gargeshwari Digital Foundation

सिद्धान्तबिन्दुकल्पलतिकादावस्माभिरभिहितम् । वासिष्ठवार्तिकामृतादावाकरे च स्पष्टमेवोक्तम् । यथा—

अविद्यायोनयो भावाः सर्वेऽमी बुद्बुदा इव ।
क्षणमुद्भूय गच्छन्ति ज्ञानैकजलधौ लयम् ॥

इत्यादि । तस्माद्ब्रह्मातिरिक्तं कृत्स्नं द्वैतजातं ज्ञानज्ञेयरूपमाविद्यकमेवेति प्रातीतिकसत्त्वं सर्वस्येति सिद्धम् ॥

रज्जुसर्पादिवद्विश्वं नाज्ञातं सदिति स्थितम् ।
प्रबुद्धदृष्टिसृष्टित्वात्सुषुप्तौ च लयश्रुतेः ॥

इत्यद्वैतसिद्धौ दृष्टिसृष्ट्युपपत्तिः.

अथ एकजीवाज्ञानकल्पितत्वोपपत्तिः ॥

स च द्रष्टैक एव; तन्नानात्वे मानाभावात् । ननु—कथमेक एव जीवः? प्रतिशरीरं 'अहं सुखी अहं दुःखी अहं संसारी अहमस्वाप्स' मित्याद्यनुभवविरोधादिति—चेन्न; अविद्यावशाद्ब्रह्मैवैकं संसरति । स एव जीवः । तस्यैव प्रतिशरीरमहमित्यादिबुद्धिः । स्वाप्नशरीरे 'अयं सुखी अयं दुःखीत्येव

चाक्षुषत्वादिधर्मस्वीकारादित्यादिरूपमिति शेषः । द्वैतजातम् जातं द्वैतम् ॥

तर्कैः सारस्वतै रत्नैश्चन्द्रिकाचन्द्रभूषणैः ।
दुरन्तध्वान्तनाशाय दृष्टिसृष्ट्युपपादनम् ॥

इत्यद्वैतसिद्धिव्याख्यायां गुरुचन्द्रिकायां दृष्टिसृष्ट्युपपत्तिः ॥

SGDF
Sri Gargeshwari Digital Foundation

यत्र बुद्धिर्न त्वहं सुखीत्यादि' तत्तु निर्जीवम्। यत्र त्वहमित्यादि तत्सजीवम्। जाग्रच्छरीरान्तरे अहमिति प्रतीत्यवच्छेदके सजीवतोक्तिर्न द्वितीयेन जीवेन सजीवत्वमित्याभिप्रेत्य; तत्र मानाभावात्। बन्धमोक्षादिव्यवस्थानुपपत्तिस्तत्र मानमिति चेन्न; बन्धमोक्षगुरुशिष्यादिव्यवस्थायाः स्वप्नवद्यावदविद्यमुपपत्तेः। न चैवं तस्मिन्नेकस्मिन्नेव जीवे सुप्ते समस्तजगदप्रतीत्यापातः; समष्ट्यभिमानिनो मुख्यजीवस्यासुप्तत्वात्। तस्मिन् लयकाले प्रसुप्ते जगदप्रतीतेः। अन्तःकरणावच्छिन्ने जीवाभासे तु सुप्ते तमेव प्रति जगदप्रतीतिः, न त्वन्यानपि प्रति; तदुपाधीनामप्रलीनत्वात्। संस्कारस्य कारणात्मना स्थितेर्न सुप्तस्य पुनरुत्थानानुपपत्तिरित्युक्तम्। एतेन—मम कल्पकत्वे तव मोक्षार्थं प्रवृत्त्ययोगः; तव कल्पकत्वे त्वत्कल्पितास्मदादिबोधार्थं तव शब्दप्रयोगाद्यनुपपत्तिः, न च स्वप्नवत्पर्यनुयोगायोगः; एवमपर्यनुयोज्यत्वे निर्मर्यादतया कथानधिकारप्रसङ्गादिति— निरस्तम्; चैत्रमैत्रादिसर्वाभिमानिनो जीवस्य कल्पकत्वेन तव ममेत्यादिविकल्पानुपपत्तेः। नापि स्वक्रियादिविरोधः; स्वक्रियायाः कल्पितत्वादिनिश्चयविरहकालीनत्वेन पर्यनुयोगायोगात्।

अथ एकजीवाज्ञानकल्पितत्वोपपत्तिः॥

निर्जीवम् जीवावच्छेदकमनःसुखाद्यनवच्छेदकम्। **सजीवम्** उक्तान्यत्। **समष्ट्यभिमानिनः** तत्तन्मनोवच्छिन्नानां तत्तद्देहाद्यभिमानानामाश्रयस्य। **लयकाले** प्रळयकाले। **तमेव**—तन्मनोवच्छिन्नमेव **तदुपाधीनां** तत्तन्मनसाम्। **कल्पकत्वेन** मनस्तत्परिणाममात्रद्रष्टृत्वेन। **स्वक्रियेति**। उक्तशब्दप्रयोगादीत्यर्थः। **कल्पितत्वादीत्यादिना**-

SGDF
Sri Gargeshwari Digital Foundation

अथ ब्रह्मण एव जीवत्वेन तस्यैव बन्धमोक्षाविति तस्य नित्यमुक्तत्वादिश्रुतिविरोधः, न; मुक्तेः स्वस्वरूपत्वेन बन्धस्य चाविद्यकत्वेन तदविरोधः। न हि मृगतृष्णिकाकल्पितोदकेन स्वभावशुष्का मरुभूमिरार्द्रा भवति। एतेन—कल्पितस्य जीवस्य कल्पकं प्रति प्रत्यक्त्वायोगः; तेन कल्पकेन प्रत्यक्त्वेनाज्ञानात्, अन्यस्यानुभवितुरभावात्, तथानुभवापलापे एकजीवाद्वैतश्रुत्यादेरप्यासिद्धिरिति–निरस्तम्; अनेकशरीरे एकजीववादस्याङ्गीकारात्। न च—तर्हि तमेव प्रति प्रत्यक्त्वपराक्त्वयोरयोगः मैत्रं प्रति त्वमितिधीविषयस्य चैत्रस्य तमेव प्रति अहमितिधीविषयत्वायोगश्चेति—वाच्यम्; भिन्नभिन्नान्तःकरणाभेदाध्यासेन तत्तदन्तःकरणमादाय प्रत्यक्त्वपराक्त्वाह[1]मित्यादिबुद्धिविषयत्वव्यवस्थोपपत्तेः। न च चैत्रसुखदुःखादीनां मैत्रेणानुसन्धानापत्तिः; अन्तःकरणावच्छिन्नेनाविद्यावच्छिन्नेन वा। नाद्यः; तत्र परस्परं भेदात्। न

एकजीवेन सर्वप्रमात्रादि कल्पितमित्यादि ग्रहणम्। तथाच जीवभेदज्ञानादेकबोधनार्थमपरस्य प्रवृत्तिः (एकजीवकल्पितं सर्वमिति निश्चयेऽपि मनोवच्छिन्नानां भिन्नत्वात्। एकस्य बोधनार्थमपरस्य प्रवृत्तिः) युक्ता; न ह्येकमनोवाच्छिन्नेनापरमनोवच्छिन्नं कल्पितम्। न चैकस्य मोक्षार्थं प्रवृत्तिं जानतोऽपरस्य तदर्थं प्रवृत्तिर्न स्यादिति—वाच्यम्; परप्रवृत्त्या मोक्षावश्यम्भावानिश्चयान्मुमुक्षुवत् प्रतारकाणामपि दृष्टत्वात्, विवेकिनां मोक्षार्थं प्रवृत्तेरेव रोचमानत्वात्सांसारिकप्रवृत्तेर्दुःखबहुत्वनिश्चयादिति भावः। **तथानुभवेति**। नानाशरीरेषु जीवस्य प्रत्यक्त्वेनानुभवेत्यर्थः। **श्रुत्यादेरीति**। तदनुभवस्याप्यपलापसंभवादिति शेषः।

---

[1] प्रत्यक्त्वपराक्त्वमह.

SGDF
Sri Gargeshwari Digital Foundation

द्वितीयः; इष्टापत्तेः। अत एव—चैत्रस्य शुक्तिसाक्षात्कारेण रजतभ्रमनिवृत्तावन्येषामपि तन्निवृत्तिः स्यादिति—निरस्तम्; अन्तःकरणभेदेन व्यवस्थोपपत्तेः। नन्वेवम्—मुक्तावपि चैत्राद्यन्यतमान्तःकरणावच्छेदेन साक्षात्कारे उत्पन्ने तदवच्छेदेनैव संसारनिवृत्तिः स्यात्, न तु तदितरान्तःकरणावच्छेदेनेति—चेन्न; तत्साक्षात्कारस्य सविलासमूलाज्ञाननिवृत्तिरूपतया तत्कालेऽन्तःकरणस्याभावेन वैषम्यात्। ननु—श्रुतिषु 'अविद्यायामन्तरे वर्तमाना' इत्यादावविद्या, 'रमणीयचरणा' इत्यादौ कर्मबन्धः, 'सति सम्पद्य न विदु'रित्यादौ सति सुषुप्तिः, 'वेदान्तविज्ञानसुनिश्चितार्था' इत्यादौ तत्त्वज्ञानं 'परामृतात्परिमुच्यन्ति सर्वे' इत्यादौ मुक्तिश्च चेतनधर्मः कथमनेकेषूच्यत इति—

वैषम्यादिति। पल्लवाज्ञान[1]तत्तन्मनोऽवच्छिन्नत्वेन तत्तन्मनःपरिणामज्ञानेन निवृत्तिः, मूलाज्ञानस्य त्वनवच्छिन्नत्वेन किंचिन्मनःपारिणामज्ञानेन निवृत्तौ सर्वदृश्यनिवृत्त्या मनोन्तरमेव दुर्लभम्, दूरतस्तत्र संसारापत्तिः, प्रारब्धकर्मसत्त्वे तु मनोऽन्तरे संसार इष्टस्तत्त्वज्ञानावच्छेदकमनसीवेति भावः॥

यत्तु—सर्वाभिमानिनो हिरण्यगर्भस्य जीवस्य स्वीकारे तस्य कल्पान्ते मुक्त्यापत्तिः[2] तदन्यजीवस्वीकारे तु नानाजीववादापत्तिः, तत्तन्मनोवच्छिन्नानां तु चित्त्वे नानाजीवत्वापत्तिः, अचित्त्वे जगदान्ध्यापत्तिरिति—तन्न; सकलस्थूलसूक्ष्मसमष्ट्यभिमानाश्रयस्यैकस्यैव जीवस्योक्तत्वेन हिरण्यगर्भस्य च सूक्ष्मसमष्टिमात्राभिमानिनो जीवत्वाभावात्, कल्पान्ते तन्मुक्त्यस्वीकाराच्च। सगुणब्रह्माहङ्ग्रहोपासनाया ब्रह्मलोकप्राप्तिजनकमदृष्टं चित्तैकाग्र्यं च फलम्, तस्य च सर्वमुक्ति

[1] ज्ञानस्य–ग. [2] मुक्तथा सर्वमुक्तथापत्तिः–ग.

SGDF
Sri Gargeshwari Digital Foundation

चेन्न; 'अनादिमायया सुप्तो यदा जीवः प्रबुध्यते' इत्यादिश्रुतिष्वेकवचनप्राप्तैकत्वविरोधेनोदाहृतश्रुतीनामनेकत्वपरत्वाभावात्। सार्वजनीनभ्रमसिद्धतदनुवादेनाविरोधात्। न चोदाहृतश्रुति-

---

जनकधीप्रयोजकवैलक्षण्यं स्वीक्रियते, न तु कस्यचिदेव क्रममुक्तिप्रयोजकवैलक्षण्यम्। तथाच कदाचित्कुत्रचिन्मनसि तत्त्वधीः सर्वमुक्तिप्रयोजिका श्रवणादिना तादृशादृष्टादिना च मिळित्वा प्रयुज्यते; वामदेवमुक्तत्वादिश्रुतेरिव 'ब्रह्मणा सहे'त्यादेरुपासनास्तावकत्वेन कल्पान्ते मुक्तिबोधकत्वाभावात्, उक्तलाघवानुगृहीतैकजीवश्रुत्यनुरोधात्, मनोवच्छिन्नानां (चित्त्वे नानाजीवत्वे हस्तपादाद्यवच्छिन्नानां) चित्त्वेनापि तेषां तदापत्तेः। यदपि बन्धतत्त्वज्ञानमोक्षावच्छेदकत्वेन मनसां जीवभेदकत्वमिति, तदपि न; अविद्यातन्नाशयोर्बन्धमोक्षयोर्मनोऽनवच्छिन्नत्वात्। ज्ञानावच्छेदकभेदस्तु न जीवभेदप्रयोजकः; हस्तादिरूपावच्छेदकभेदस्यापि तत्त्वापत्तेर्मानाभावाच्च। **एकवचनेति**। 'साक्षी चेतेत्यादिवाक्यशेषाद्देवपदं पुरत्रये क्रीडकपरम्। अज्ञानावृतवास्तवस्वरूपकत्वेन गूढ इति भावः। **इत्यादिश्रुतीत्यादिपदेन** 'पुरत्रये क्रीडति यस्तु जीवः' 'प्रविश्यामूढो मूढ इव व्यवहरन्नास्ते,' 'स एष इह प्रविष्ट आनखाग्रेभ्यः,' 'मायया सन्निरुद्धः' इत्यादिश्रुतिः, 'देही कर्मानुगोऽवशः,' 'विहाय जीर्णान्यन्यानि गृह्णाति नवानी'त्यादिस्मृतिश्च ग्राह्या। **अनेकत्वपरत्वेति**। जीवानेकत्वपरत्वेत्यर्थः। **तदनुवादेन** जीवानेकत्वानुवादेन। वस्तुतोऽविद्यान्तरे वर्तमानत्वमविद्याप्रयुक्तसुखदुःखाभिमानत्वम्। अत एव 'पण्डितं मन्यमाना' इत्यादि शेषः। तथाचाविद्यान्तरे वर्तमानत्वं रमणीयचरणत्वं सति लीनोपाधिकत्वं चैतत्त्रयं मनोवच्छिन्नस्यैव। 'सति सम्पद्य न विदुः सति सम्पद्यामह' इति वेत्तृत्वाभावस्तु तादृशस्मर्तृत्वाभावरूपः, अन्यथा सम्पद्यमाना

SGDF
Sri Gargeshwari Digital Foundation

विरोधेन 'इति सृष्टौ विनिश्चिता' इति पूर्वेण 'स पूज्यः सर्वभूताना' मित्युत्तरेण च विरोधेनेदमेकवचनं 'यदा नीतिपरो राजा' 'स्वर्गकामो यजेते' त्यादिवन्नैकत्वपरमित्येव किं न स्यादिति—वाच्यम्; प्रत्यक्त्वपराक्त्वमहमित्यादिव्यवहारप्रयोजकान्तःकरणाभेदाध्यासबलाद्बहुत्वस्य प्राप्तत्वेन पूर्वोत्तरवाक्योदाहृतश्रुत्यादीनामतत्परत्वात्। न च—मुक्तबहुत्वं नान्यतः प्राप्तमिति—वाच्यम्; जीवबहुत्वस्य प्राप्तत्वेन मुक्त्यंश एवाप्राप्तत्वपर्यवसानात्। न चैकस्यैव जीवस्य सर्वकल्पकत्वे जीवस्य कारणत्वं निषिध्य ईश्वरकारणत्वविधायकैः श्रुत्यादिभिर्विरोधः, अविद्याचिन्मात्राश्रयत्वोपपादने निरासिष्यमाणत्वात्। न चैवम्—सर्वज्ञत्वसर्वकर्तृत्वादिबोधकश्रुतीनां निर्विषयत्वम्; शुद्धचैतन्ये सत्त्व[1]स्यैवाभावात्, ईश्वरस्य च जीवभिन्नस्याभावात्, जीवे सार्वज्ञ्यस्यानुभवबाधितत्वादिति—वाच्यम्;

इत्युच्येत। तथा च मनोवच्छिन्नताकाल एव साक्षिणस्तदुक्तिः। एवं सुनिश्चितार्थत्वं मनोऽवच्छिन्नस्य परिमुक्तिरपि दुःखादिशून्यत्वरूपा दुःखादिशून्यशुद्धाभेदविवक्षया तस्यैवेति तस्यैव नानात्वमुक्तवाक्यैरुक्तम्, न तु जीवस्याविद्योपहितस्येति ध्येयम्। गौडपादीये 'अनादिमायये' त्यादिवाक्ये स्वर्गकाम इति यजेतेत्याख्यातैकवचनस्योपादेयकर्त्रैक्यपरत्वेऽपि स्वर्गकाम इत्युद्देशवाचकपदोत्तरं सुबेकवचनमविवक्षितार्थकमेव। अत एव पुंस्त्वस्याविवक्षितत्वात् स्त्रिया अप्यधिकारः षष्ठे उक्तः॥

अतत्परत्वात्। एकत्वश्रुत्यादिकं तु तत्परम्; एकत्वस्या-

---

[1] सर्वज्ञत्व.

SGDF
Sri Gangeshwari Digital Foundation

समष्ट्यभिमानिनो जीवस्य सर्वज्ञत्वसर्वकर्तृत्वादिस्वीकारात्। न चानुभवविरोधः; अन्तःकरणाभेदाध्यासबलात्तदननुभवतद्विपरीतानुभवयोरुपपत्तेः। सर्वाभिमानिनस्तु सार्वज्ञ्यानुभवोऽस्त्येव। अत एव 'तान्यहं वेद सर्वाणि न त्वं वेत्थ परंतपे' त्याद्युपपद्यते। नच—'आचार्यवान् पुरुषो वेदे'तिश्रुतेरुपदेशं विना जीवस्य तत्त्वज्ञानमनुपपन्नम्, उपदेष्टव्यादन्यस्य चैतन्यस्याभावाच्च नोपदेशो युज्यत इति—वाच्यम्; स्वप्न इवोपदेष्टुः कल्पितस्य संभवात्। ननूपदेष्टृत्वं न कल्पितमात्रस्य, किंतु तत्त्ववित्त्वेन कल्पितस्य, तथा चोपदेशात्प्राक्तत्त्वज्ञाने तदैव मोक्षापत्तिः, उपदेशवैयर्थ्यं च, न चैवं स्वप्नेऽपि तुल्यम्; तदा हि शब्दविशेषवक्तृत्वेनैव गुरुकल्पना, न तूपदेशसाध्यज्ञानविषयविशेषवित्त्वेनेति विशेषादिति—चेन्न; अत्रापि तद्वदेव वाक्यविशेषवक्तृत्वेनैव तत्कल्पनसंभवात्। ननु—तर्हि 'यदेव भगवान् वेद तदेव मे ब्रूही'त्यादिश्रुतिः 'उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिन' इत्यादिस्मृतिश्चायुक्ता स्यादिति—चेन्न; सामान्यतो मोक्षोपयोगिज्ञानविषयवित्त्वेनाज्ञाततत्त्ववित्त्वेन तत्त्वमस्यादिवाक्यवक्तृत्वेन वा कल्पितस्य उपदेष्टृत्वसंभवेनोदा-

---

प्राप्तत्वात्, लाघवानुग्रहाच्च। समष्ट्यभिमानिन इति। तत्तन्मनोवच्छिन्नतत्तदभिमानवतोऽविद्योपहितस्येत्यर्थः। सर्वाभिमानिन इति। स्वकल्पितसर्वात्मकत्वसर्वज्ञत्वादिविशिष्टेश्वराभेदोपासनाधीनसर्वाभिमान—युक्तस्येत्यर्थः। उपपद्यत इति। तादृशाभिमानयुक्तप्रमात्रैव तथोक्तमिति भावः। ननु—भेदस्यापि तादृशज्ञानविषयत्वसंभावनाया भेदवादिनोऽपि तत्त्वमस्यादिवाक्यवक्तृत्वसंभावनायाश्च संभवाद्विशिष्य तत्त्वज्ञत्वेनैव

SGDF Sri Gangeshwari Digital Foundation

हृतवाक्यात्त्विरोधात्। अन्यथा तवापि मते तत्त्ववित्त्वेन प्रमित एवाचार्यत्वेनानुसरणीय इति प्रथमत एव तत्त्वज्ञाने तत्काल-मोक्षापत्त्युपदेशवैयर्थ्यादिकं च स्यात्। एतेन—'स्वाध्याय-प्रवचनाभ्यां न प्रमदितव्य'मित्यादिविधिरपि भावितत्त्वज्ञानि-कल्पकचेतनं प्रत्येव, नच तस्य शिष्यः स्वाज्ञानकल्पित इति ज्ञानत[1]स्तन्मोक्षार्थं प्रवचने प्रवृत्तिर्युक्ता; नच स्वप्नवत् कल्पि-तत्वाज्ञानात्प्रवृत्तिः; तत्त्वविदस्तदज्ञानानुपपत्तेरिति–निरस्तम्; स्वप्नगुरुवत् कल्पितत्वेन गुरोरपर्यनुयोज्यत्वात्। न च—तत्त्व-ज्ञानहेतुत्वेन वेदस्य मीमांस्यत्ववत् गुरोरपि पर्यनुयोज्यत्वमिति–वाच्यम्; तर्केण वेद इव तत्तद्रूपकल्पनया गुरावपि तत्परि-हारात्। न च—कथास्वपि सदुत्तरापरिस्फूर्तावहं त्वत्कल्पितो न पर्यनुयोज्य इत्युत्तरं स्यादिति—वाच्यम्; कथायाः कल्पि-तत्वानिश्चयकालीनत्वेन समयबन्धविशेषनिबन्धनत्वेन च तादृ-

---

गुरुः कल्प्यः; तत्राह—**अन्यथा तवापीति**। तथाच भेदवादिमते स्वसिद्धान्तश्रवणाद्यथा नाद्वैते तत्संभावना, तथैवाद्वैतमतेऽपि भेदे न तत्संभावना। यथा च तव भेदानिर्णयेऽपि भेदनिर्णयवानिति कल्पना, तथैवाद्वैतानिर्णयेऽपि ममाद्वैतनिर्णयवानिति कल्पना। अन्यथा तत्त्व-निर्णयात्पूर्वं तत्र मोक्षसाधनत्वेन ज्ञानासंभवादिच्छापि न स्यात्। यथा तवेदानीं भेदानिश्चयसत्त्वेऽपि विचारादियुक्तशास्त्रजन्यं भेदज्ञानमेव मोक्षहेतुः, तथा ममापि तादृशमद्वैतज्ञानमेव तथेति भावः। **भावि-तत्त्वज्ञानिकल्पकचेतनमिति**। सर्वमोक्षकारणतत्त्वज्ञानयुक्तो [2]भावी शिष्यशास्त्रादिकल्पकश्चेतनः तमित्यर्थः। **प्रवचने**—अध्यापने। **समयबन्धेति**। नियमबन्धेत्यर्थः। तादृशतादृशाक्षेपपर्यनुयोगघटित-

---

[1] जानत. [2] भाविशिष्य–ग.

SGDF
Sri Gargeshwari Digital Foundation

गुत्तरानवकाशात् । तस्माच्छिष्यवद्गुरोरपि कल्पितत्वात्स्वप्नवत्सर्वव्यवस्थोपपत्तिः । अथ—कल्पको न निश्चिताद्वैतः; शास्त्रप्रणयनवैयर्थ्यात्. नाप्यनिश्चिताद्वैतः; शास्त्रस्य प्रमामूलकत्वाभावप्रसङ्गादिति—चेन्न; प्रमामूलकत्वाभावेऽप्यबाधितविषयत्वेन शास्त्रप्रामाण्योपपत्तेरन्त्यपक्षाभ्युपगमात् । न चामुकः स इत्यनिश्चये बह्वायाससाध्यमोक्षार्थप्रवृत्त्ययोगः; प्रतिशरीरमहमहमिकया बद्धोऽहमिति निश्चयस्य स्वानुभवसाक्षिकत्वेन प्रवृत्तिसंभवात्, एकेनैव जीवेन चैत्रमैत्रादिशरीराणां सजीवत्वसंभवस्य प्रागेवोक्तत्वात् । किंच चैत्रमैत्रादिषु कोऽसाविति प्रश्नस्य किं केनचित् क्रोडीकृतं चैतन्यं विषयः, किं वा निरस्तसमस्तभेदम् । नाद्यः; तस्य कल्पितत्वेनाकल्पकत्वात् । न द्वितीयः; तस्यैकत्वेन तदनिश्चयासिद्धेः । शुद्धचित एकत्वेन वस्तुतोऽसंसारित्वेऽप्यावरणविक्षेपशक्तिद्वयशालिस्वाश्रिताविद्यावशात्संसारित्वकल्पकत्वमोक्षार्थयतमानत्वाद्युपपत्तिः । ननु—अनादौ संसारे कस्यचित्तत्त्वज्ञानं मुक्तिश्चाभून्न वा, आद्ये इदानीं

कथाया एव तत्त्वनिर्णयहेतुत्वेन साम्प्रदायिकत्वमिति भावः । **प्रमामूलकत्वेति** । निश्चयमूलकत्वेत्यर्थः । **अन्त्यपक्ष इति** । आद्यपक्षेऽपि न दोषः; चैत्रो ब्रह्मेत्यादिवाक्यजन्यानिर्विकल्पकानिश्चयस्य मोक्षजनकत्वेन विजातीयनिश्चयस्यैव मोक्षजनकत्वादतादृश[1]निश्चयेन शास्त्रप्रणयनसंम्भवात् । मोक्षजनकज्ञानमूलकत्वं तु शास्त्रे नापेक्षत[2] इति ध्येयम् । **केनचित्**—मनआदिना । **क्रोडीकृतम्**—विशिष्टं प्रमातृस्वरूपम् । **एकत्वेनेति** । न च—तत्तन्मनउपहितेषु क इत्यनिश्चय इति—वाच्यम्; अविद्योपहितस्यैव मनउपहितत्वेन सर्वमनउपहितानां कल्प-

---

[1] त्वात्तादृश—ग. [2] शास्त्रेणापेक्षत—ग.

SGDF
Sri Gargeshwari Digital Foundation

संसारोपलब्धिर्न स्यात्; जीवस्यैकत्वात्, अन्त्ये सम्प्रदायासंभवेन तत्त्वज्ञानासंभव इति—चेन्न; न ह्यसाम्प्रदायिकत्वमुत्पत्तिविरोधि; अपूर्वजातीयानुत्पत्तिप्रसङ्गात्। किंतु कारणासत्त्वम्, तन्नेदानीम्; उपदेष्टृत्वादिकारणस्य कल्पनासुदृढस्य सत्त्वात्। जीवैक्यस्य प्रमाणसिद्धत्वे संसारोपलम्भ एवातः पूर्वं तत्त्वज्ञानानुत्पत्तौ प्रमाणम्। न च—तत्त्ववित्त्वेन श्रुत्यादिसिद्धानां शुकवामदेवादीनां मुक्तिर्माभूत्, मम तु भविष्यतीति कथं श्रद्दध्यादिति—वाच्यम्; शास्त्रप्रामाण्यदार्ढ्यादिति गृहाण। अन्यथा तेषां महानुभावानां मुक्तत्वेऽपि मम भविष्यति न वेति शङ्कापिशाच्या प्रवृत्तिप्रतिबन्धापत्तेः। ननु—तर्हि श्रुतिप्रामाण्यबलादेव तत्सिद्धो[1]जीवभेदः; पूर्वमपि केषांचिन्मोक्षश्चाभ्युपे-

---

कत्वनिश्चयात्। सम्प्रदायेति। अनादितत्त्वज्ञानप्रवाहेत्यर्थः। अपूर्वजातीयेति। पूर्वानुपलब्धचैत्रत्वादिजातीयेत्यर्थः॥

ननु—कर्मणां तत्तज्जातीयापूर्वाणां तत्फलानां च प्रवाहरूपेणानादित्वान्न पूर्वानुपलब्धजातीयमुत्पद्यत इति—चेत्, भ्रान्तेनोपादिष्टोऽसि; न हि यद्यज्जातीयमिदानीं जायते तज्जातीयोपधायक कर्मपूर्वमपि केनचित्तादृशं कर्मानुष्ठितमित्यत्र मानमस्ति, येन कर्मादीनामुक्तानादित्वनियमः स्यात्। आस्तां वा तथा, तथापि चैत्रत्वादिकं न विहिताक्रियाकार्यतावच्छेदकम्; चैत्रशरीरकामोऽमुकं कुर्यादित्यादिविध्यभावात्, किंतु ब्राह्मणादिदेहजनककर्मव्याप्यदृष्टकारणकार्यतावच्छेदकम्। न च दृष्टकारणप्रयोज्यजातीयानामप्युक्तानादित्वनियमः; मानाभावात्। आस्तां वा सोऽपि, तथापि तत्त्वज्ञानस्य तादृशानादित्वमिष्टमेव; अधीतवाक्यात्तत्प्रवाहानादित्वसंभवात्! असंभावनादिशून्यज्ञानत्वम-

---

[1] सिद्धो. [2] तज्जातीयोपधायकं—ग.

SGDF
Sri Gargeshwari Digital Foundation

यताम् । श्रूयते हि 'तद्यो यो देवानां प्रत्यबुध्यत स एव तदभवत्तथर्षीणां तथा मनुष्याणाम्' 'अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्यः' 'नित्यो नित्यानां चेतनश्चेतनाना'मित्यादि । स्मर्यते च—

'बहवो ज्ञानतपसा पूता मद्भावमाश्रिताः ।
इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः' ॥

इत्यादीति—चेन्न ; उक्तवाक्यानां सार्वलौकिकभ्रमसिद्धभेदानुवादकत्वेन तत्परत्वाभावात्, जीवैक्यबोधकवाक्यानां च मानान्तराप्राप्तस्वार्थपरत्वात्, स्वप्नन्यायेन भेदस्य कल्पितत्वोपपत्तेश्च, ज्ञानस्तुतिपराणि वाक्यानि नात्मभेदं प्रमातुं शक्नुवन्ति ; तात्पर्यवद्वाक्याविरोधेनातात्पर्यवद्वाक्यानां गुणवादत्वोपपत्तेः ॥

अतीतानागताश्चैव यावन्तः सहिताः क्षणाः ।
ततोऽप्यनन्तगुणिता जीवानां राशयः पृथक् ॥

इत्यादिस्मृतिरपि जीवोपाधिभेदानुवादकतया व्याख्येया । तस्मादविद्योपाधिको जीव एक एवेति सिद्धम् ॥

इत्यद्वैतसिद्धौ एकजीवाज्ञानकल्पितत्वोपपत्तिः

नावृत[1]प्रमात्वं वा न कार्यतावच्छेदकम् । न चासंभावनानिवृत्त्यादिकमेवानादीति—वाच्यम् ; तद्धटप्रागभावत्वनिवृत्तेरप्यनादित्वापातात् । न च—विजातीयतत्त्वज्ञानस्यैव हेतुत्वेन तदनादीति—वाच्यम् ; एकजीववादे तद्व्यक्तित्वस्यैव विजातीयत्वरूपत्वात् ॥

तर्कैः सारस्वतै रत्नैश्चन्द्रिकाचन्द्रभूषणैः ।
दुरन्तध्वान्तनाशार्थमेकजीवोपपादनम् ॥

इत्येकजीवाज्ञानकल्पितत्वोपपत्तिः.

---

[1] वृतत्व–ग.

SGDF
Sri Gargeshwari Digital Foundation

अथाज्ञानवादेऽविद्यालक्षणोपपत्तिः.

अथ—केयमविद्या ? न तावदनादिभावरूपत्वे सति ज्ञाननिवर्त्या सा ; सादिशुक्त्याद्यवच्छिन्नचैतन्यावारकाज्ञानेऽव्याप्तेः, तस्यानादित्वाभावात् । अभावोपादानाज्ञाने च भावत्वाभावात्तत्राव्याप्तिः, अभावस्य भावोपादानकत्वे असत्यस्यापि सत्योपादानकत्वं स्यात्, अज्ञानानुपादानकत्वे तस्य ज्ञानान्निवृत्तिर्न स्यादिति ; अत्र ब्रूमः, रूप्योपादानाज्ञानमप्यनादिचैतन्याश्रितत्वादनाद्येव, उदीच्यं शुक्त्यादिकं तु तदवच्छेदकमिति न तत्राव्याप्तिः । भावत्वं चात्राभावविलक्षणत्वमात्रं विवक्षितम्, अतः आरोपिताभावोपादानाज्ञानेऽप्यभावविलक्षणत्वस्वीकारान्नाव्याप्तिः । न च—सजातीयोपादानकत्वनियमः, अन्यथा असत्यस्यापि सत्यमुपादानं स्यादिति—वाच्यम् ; सर्वथा साजात्ये सर्वथा वैजात्ये वोपादानोपादेयभावादर्शनेन तथा साजात्यस्य वैजात्यस्य वा आपादयितुमशक्यत्वात् । न हि कार्याकारकारणाकारतोऽप्यभेदे कार्यकारणभावः ; सत्यस्य त्वसत्योपादानत्वे सत्यस्य निवृत्त्यसंभवेन तदुपादेयस्यासत्यस्यापि निवृत्तिर्न स्यात्, उपादाननिवृत्तिमन्तरेणोपादेयानिवृत्तेः, अतो न सत्यमसत्यस्योपादानम् ; सत्यस्यापरिणामित्वाच्च । विव-

---

अथाज्ञानवादेऽविद्यालक्षणोपपत्तिः.

सत्योपादानकत्वं स्यादिति । तथाचेति शेषः । तदवच्छेदकमिति । अनाद्यत्यन्ताभावस्य तार्किकादिमते यथा तत्तत्कालादिरवच्छेदक इति शेषः । न सत्यमिति । निमित्तनाशादिनैवासत्यस्य नाश इति तु न युक्तम् ; । दृश्यमात्रे ज्ञाननिवर्त्यत्वस्य श्रुत्यनुभवादिसिद्धत्वेनोपादानाज्ञानस्य नाशावश्यकत्वात् । सत्यस्यापरिणामित्वा-

SGDF
Sri Gargeshwari Digital Foundation

तदधिष्ठानत्वं त्वभ्युपेयत एव। न च—ब्रह्माज्ञाने ब्रह्मणो वृत्त्यव्याप्यत्वपक्षेऽव्याप्तिः, तस्य ज्ञानानिवर्त्यत्वादिति—वाच्यम्; स्वरूपसदुपाधिमत्तद्विषयकज्ञाननिवर्त्यत्वस्य तन्मतेऽपि भावात्। उपपादितं चैतत् दृश्यत्वहेतूपपादने। अथौपाधिकभ्रमोपादानाज्ञाने ब्रह्मसाक्षात्कारानन्तरविद्यमानजीवन्मुक्ताज्ञाने च ज्ञाननिवर्त्यत्वाभावादव्याप्तिः; तयोर्ज्ञाननिवर्त्यत्वे उपाधिकालजीवन्मुक्तिकालयोरेव ज्ञानप्रागभाववत्तान्निवृत्त्यापत्तिरिति—चेन्न; उपाधिप्रारब्धकर्मणोः प्रतिबन्धकयोरभावविलम्बेन निवृत्तिविलम्बेऽपि तयोर्ज्ञाननिवर्त्यत्वानपायात्। न हि क्वचिदविलम्बेन जनकस्य क्वचित्प्रतिबन्धेन विलम्बे जनकताऽपैति। न च तर्हि ज्ञातेऽपि तत्राज्ञात इति व्यवहारापत्तिः; तादृग्व्यवहारे आवरणशक्तिमदज्ञानस्य कारणत्वेन तदावरणशक्त्यभावादेवेदृग्व्यवहारानापत्तेः। यथा चैतत्तथोपपादयिष्यते। न चाविद्याचैतन्यसंबन्धेऽतिव्याप्तिः; साक्षाज्ज्ञाननिवर्त्यत्वस्य विवक्षितत्वात्, तस्याप्यविद्यात्मकत्वाद्वा। न च विशेषणान्तरवैयर्थ्यम्; अनादिपदस्योत्तरज्ञानानिवर्त्ये पूर्वज्ञाने भावपदस्य ज्ञानप्रागभावे ज्ञानजन्यकार्यप्रागभावे चातिव्याप्तिवारकत्वेन

दिति। परिच्छिन्नत्वस्य मिथ्यात्वव्याप्यत्वाद्दुग्धादिसत्यत्वस्य विप्रतिपन्नत्वात्। 'परमार्थोऽविनाशी'ति, "यत्तु कालान्तरेणापि नान्यसंज्ञामुपैति वै। परिणामादिसंभूतां तद्ब्रह्मस्त्वि"त्यादिस्मृतेश्चेति शेषः। **स्वरूपसदुपाधिमत्तद्विषयकेति।** उपाध्यविषयकत्वे सत्युपहितब्रह्मविषयकेत्यर्थः। **कारणत्वेन** विषयत्वेन। **यथा चैतदिति।** शक्तेरज्ञानान्यत्वेऽपि न तस्यामतिव्याप्तिः; निवर्त्यशक्तिमत्त्वस्यैव लक्षणत्वसंभवादित्याद्युपपादनमिति भावः। **अविद्यात्मकत्वादिति।** अविद्या-

SGDF
Sri Gangeshwari Digital Foundation

सार्थकत्वात् । ज्ञानत्वेन साक्षात्तन्निवर्त्यत्वं तु भवति लक्षणान्तरम् । नन्वसंभवः; कल्पितत्वेन दोषजन्यधीमात्रशरीरस्याज्ञानस्य ज्ञाननिवर्त्यस्याऽभावविलक्षणस्य च रूप्यवदनादित्वायोगादिति—चेन्न; कल्पितत्वमात्रं हि न दोषजन्यधीमात्रशरीरत्वे सादित्वे वा तन्त्रम्, किंतु प्रतिभासकल्पकसमानकालीनकल्पकवत्त्वम्, सादिकल्पकवत्त्वम्, विद्याऽनिवृत्त्यप्रयुक्तनिवृत्तिप्रतियोगित्वम्, प्रागभावप्रतियोगित्वं वा तन्त्रम् । न च तत्प्रकृतेऽस्ति । ज्ञाननिवर्त्यत्वसमानाधिकरणाभावविलक्षणत्वेनाविद्यायाः सादित्वसाधने 'अजामेकाम्' 'अनादिमायये'त्यादिशास्त्रविरोधः, अनादित्वसाधकेन ज्ञाननिवर्त्यत्वे सति भाव-

---

चिदुभयमेव तत्संबन्धो नातिरिक्त इत्यर्थः । **प्रतिभासकल्पकसमानकालीनकल्पकवत्त्वं** स्वविषयकजन्यधीकालत्वव्याप्यस्वद्रष्टृकत्वम् । अविद्याविषयकाविद्यावृत्तेः प्रळयादिकालेऽनङ्गीकारान्नाविद्यायां तदिति भावः । **सादिकल्पकेति ।** अविद्योपहितचिद्रूपोऽविद्याकल्पकोऽनादिः, शुक्तिरूप्यादेस्त्वधिष्ठानज्ञानवान् कल्पकः सादिः । अथवा सादिकल्पनायां[1] विषयत्वमर्थः अविद्यायास्तु कल्पना स्वोपहितचिद्रूपा न वृत्तिरूपेत्यनादिरिति भावः । प्रलयादावप्यन्यैदेव वा अविद्यावृत्तेरविद्याविषयिण्याः स्वीकारमतेऽप्याह---**विद्याऽनिवृत्तीत्यादि ।** विद्याया अनिवृत्तिः संबन्धस्तदप्रयुक्ता निवृत्तिर्नाज्ञानस्य, किंतु तत्कार्यस्य । जीवेशभेदादिनिवृत्तिरपि तत्प्रयुक्तेति भावः । यदि च सापि तदप्रयुक्ता तदाप्याह—**प्रागभावेति ।** कल्पितत्वेनाज्ञाने प्रागभावप्रतियोगित्वाद्यनुमेयमिति तु न युक्तम्; व्याप्तिग्राहकतर्काभावात् । प्रागभावानङ्गीकारे कार्यत्वादि तथा बोध्यम् । **प्रकृते** अज्ञाने । **अनादित्वसाधकेनेति ।** ज्ञानजन्य-

---

[1] कल्पनायाः—ग.

SGDF Sri Gargeshwari Digital Foundation

विलक्षणत्वेन सत्प्रतिपक्षश्च, भावत्वस्योपाधित्वं च। न चाभावविलक्षणाविद्यादौ भावविलक्षणत्वमसंभवि, परस्परविरोधादिति वाच्यम्; भावत्वाभावत्वयोर्बाधकसत्त्वेन तृतीयप्रकारत्वसिद्धौ पर[1]स्परविरहव्यापकत्वरूपविरोधासिद्धेः, परस्परविरहव्याप्यत्वरूपस्तु विरोधो नैकविरहेणापरमाक्षिपति। न हि गोत्वविरहोऽश्वत्वमाक्षिपतीत्युक्तम्। न चात्मवदनादेरभावविलक्षणस्यानिवर्त्यत्वम्; आत्मत्वस्यैवोपाधित्वात्। न चात्यन्ताभावान्योन्याभावयोः साध्याव्याप्तिः; अधिकरणातिरिक्तस्यानिवर्त्यस्यात्यन्ताभावादेरनभ्युपगमात्। न च तुच्छे साध्याव्याप्तिः; अभावविलक्षणत्वरूपसाधनावच्छिन्नसाध्यव्यापकत्वोप-

---

कार्यस्य प्रागभावेऽनादित्वव्याप्यतया गृहीतेनेत्यादिः। अजामेकामित्यादिकं प्रकृतिपरम्, अनादिमाययेत्यादि चेश्वरेच्छापरम्, अतो न शास्त्रविरोध इति तु न युक्तम्; मन्मते दृश्यमात्रस्यैव ज्ञाननिवर्त्यत्वेन प्रकृत्यादावपि सादित्वस्य त्वयानुमेयतापत्तेः। **बाधकसत्त्वेनेति।** विनाशिभावस्य सादित्वनियमो भावत्वे उपादानत्वादिकमभावत्वे बाधकमिति भावः। वस्तुतो भावत्वाभावत्वे सदसद्रूपत्वे। आद्ये बाध्यत्वादि द्वितीये जनकत्वादि बाधकम्। अत एवाभावविलक्षणत्वस्य तुच्छव्यावृत्तत्वं वक्ष्यते। अभावत्वधर्माश्रयविलक्षणत्वं तु तुच्छेऽप्यस्तीति तदसङ्गतिः। अत एव च सद्विलक्षणयोरज्ञानभ्रमयोरित्यादि वक्ष्यते। यत्तु—तृतीयप्रकारसिद्धौ सत्यां विरोधासिद्धिः, तस्यां च सत्यां सेत्यन्योन्याश्रय इति—तन्न; तृतीयप्रकारसिद्धेर्बाधकसत्त्वाधीनत्वेन विरोधासिद्ध्यनपेक्षत्वात्, अन्यथा कर्मादावपि द्रव्यगुणापेक्षया तृतीयप्रकारासिद्धिर्न स्यादिति भावः। **अनादेरभावविलक्षणस्येति।**

---

[1] परस्परविरहरूपत्वपर.

SGDF
Sri Gargeshwari Digital Foundation

पत्तेः। किंच सादित्वमनादित्वं वा न निवर्त्यत्वानिवर्त्यत्वयोः प्रयोजकम्; ध्वंसप्रागभावयोस्तदभावात्। नापि भावत्वविशेषितं तत्तथा; अभावे तदसत्त्वेन भिन्नभिन्नप्रयोजककल्पनापत्तेः, भावनिवृत्त्यनिवृत्तयोरेव तयोः प्रयोजकत्वे च भावविलक्षणाविद्यादौ ताभ्यां तयोरनापादनात्। तस्मान्नाशसामग्रीसन्निपातासन्निपातावेव निवर्त्यत्वानिवर्त्यत्वयोः प्रयोजकाविति मन्तव्यम्। तौ च फलबलकल्प्याविति न कोऽपि दोषः। अपि च यद्यविद्यादेरभावविलक्षणत्वसमानाधिकरणानादित्वेनात्मवदनिवर्त्यत्वं साध्यते, तर्हि भावविलक्षणत्वेन प्रागभाववन्निवर्त्यत्वमेव किं न साध्यते? न च ध्वंसात्यन्तान्योन्याभावेषु व्यभिचारः; अधिकरणातिरेके तेषामपि निवर्त्यत्वाभ्युपगमात्। न चाज्ञानस्य यावत्स्वविषयधीरूपसाक्षिसत्त्वमनुवृत्तिनियमेन निवृत्त्ययोग इति वाच्यम्; दुःखशुक्तिरूप्यादेः स्वभासके साक्षिणि सत्येव निवृत्त्यभ्युपगमेन साक्षिभास्यानां यावत्साक्षिसत्त्वमवस्थाननियमानभ्युपगमात्। किंच केवलचिन्मात्रं न साक्षि किंत्वविद्यावृत्त्युपहितम्; तथाचास्थिराविद्यावृत्त्युपहितस्य साक्षिणोऽप्यस्थिरत्वेन तत्सत्त्वपर्यन्तमवस्थानेऽप्याविद्यादेर्निवृत्तिरुपपद्यते। न च वृत्त्यनुपधानदशायामविद्यादेः शुक्तिरूप्यवदसत्त्वापत्तिः; सादिपदार्थ एवैतादृङ्नियमात्, धारावाहिकाविद्यावृत्तिपरम्पराया अतिसूक्ष्माया अभ्युपगमाच्चेति शिवम्॥

अनादित्वे सत्यसद्विलक्षणत्वं हेतुः, प्रागभाववारणाय विशेष्यम्, अभावमात्रं तु तुच्छत्वान्नासद्विलक्षणम्, अभावस्य तुच्छत्वानङ्गीकारेऽपि तुच्छवारणायैव विशेष्यमिति भावः। साक्षिणि अविद्योपहितचिति। वृत्त्युपहितस्य साक्षित्वमतेऽप्याह—किंचेति। धारावाहिकेति।

SGDF
Sri Gangeshwari Digital Foundation

यद्वा भ्रमोपादानत्वमज्ञानलक्षणम्। इदं च लक्षणं विश्वभ्रमोपादानमायाधिष्ठानं ब्रह्मेति पक्षे, न तु ब्रह्ममात्रोपादानत्वपक्षे, ब्रह्मसहिताविद्योपादानत्वपक्षे वा; अतो ब्रह्मणि नातिव्याप्तिः, इतरत्र तु पक्षे परिणामित्वेनाचेतनत्वेन वा भ्रमोपादानं विशेषणीयमिति न दोषः; न वा अभा-

सर्वदोत्पद्यमानेत्यर्थः। अविद्याविषयिकाया एकस्या एव वृत्तेः स्वीकारे तु संस्कारानुपपत्तिः, संस्कारोत्पत्तिपूर्वमेका वृत्तिरिति स्वीकारे संस्कारोत्पत्तिकालेऽनाद्यविद्यादेरसत्त्वापत्तिः, यावत्कालमेकवृत्तिस्वीकारे न दोषस्तावत्कालमध्ये एकैव वृत्तिरिति स्वीक्रियते, नाशकविशेषकल्पनान्नोत्तरवृत्तिमात्रेण तन्निवृत्तिः; अन्यथानन्तवृत्तिकल्पने गौरवादिति ध्येयम्॥

यत्त्वधिकरणातिरिक्तस्येत्याद्ययुक्तम्; नेतीत्यादिश्रुत्या शुद्धचिद्बोधने[1]नाधिकरणस्वरूपाभावबोधने तस्या बोधकत्वासिद्धिरिति तन्न; यतो नेतीत्यादिश्रुतिर्मिथ्यात्वबोधिका न तु चिन्मात्रबोधिका। यत्तु— प्रतीतिसत्त्वे सुखादेर्निवृत्त्यसंभवः; प्रतीतिनाशकस्यैव तन्नाशकत्वात्, वृत्त्युपहितचितः सुखादिसाक्षित्वे सुखादिधीर्व्यावहारिकप्रमा न स्यात्; अविद्यावृत्तेर्दोषजन्यत्वात्, वृत्त्यभावकाले चाविद्यादि न स्यात्; सादिपदार्थ एव तथा नियम इत्यत्र तु न मानमिति—तन्न; प्रतीतिनाशकासत्त्वे निमित्तनाशादेरपि नाशकत्वात्, विषयसंबन्धनाशादेव सुखादिनाशसंभवात्। सुखाद्याकारवृत्तिस्तु प्रमैव; अविद्यारूपदोषजन्यत्वेऽप्यागन्तुकदोषाजन्यत्वात्। वृत्त्यभावकालेऽप्यविद्यादि तिष्ठत्येव; निमित्तनाशादिरूपनाशकाभावादविद्यादेरनादित्वेनानिमित्तकत्वादिति भावः॥

ब्रह्मणः परिणामित्ववादिनं प्रत्यप्याह—अचेतनत्वेनेति।

[1] चिद्बोधने-ख.

SGDF
Sri Gargeshwari Digital Foundation

वारोपनिवर्तकप्रमानिवर्त्येऽव्याप्तिः ; तस्यापि भ्रमोपादानत्वात् । ननु—भ्रमे भावविलक्षणाज्ञानोपादानकत्वं न घटते; भ्रमस्य भावविलक्षणत्वे उपादेयत्वायोगात्, भावत्वे च भावोपादानकत्वनियमादिति—चेन्न ; अज्ञानस्य भ्रमस्य च भावविलक्षणत्वेऽप्युपादानोपादेयभावोपपत्तेः । न हि भावत्वमुपादानत्वे उपादेयत्वे वा प्रयोजकम् ; आत्मनि तददर्शनात्, किंत्वन्वयिकारणत्वमुपादानत्वे तन्त्रम् ; सादित्वमुपादेयत्वे, तदुभयं च न भावत्वनियतम् । अत उपादानोपादेयभावोऽपि न भावत्वनियतः । न चैवं ध्वंसस्याप्युपादेयत्वापत्तिः ; इष्टापत्तेः । न चैवं—ज्ञानप्रागभावस्यैव भ्रमोपादानत्वमस्तु, किमभावविलक्षणाज्ञानोपादानकल्पनेनेति—वाच्यम् ; प्रागभावस्य प्रतियोगिमात्रजनकत्वनियमेन भ्रमं प्रति जनकत्वस्याप्यसिद्धेः, तद्विशेषरूपोपादानत्वस्यैव दूरनिरस्तत्वात् । अतः सद्विलक्षणयोरज्ञानभ्रमयोर्युक्त उपादानोपादेयभावः । भ्रमस्य च सद्विलक्षणत्वमुक्तं वक्ष्यते च । न चैवमज्ञानानुविद्धतया भ्रमस्य प्रतीत्यापत्तिः, मृदनुविद्धतया घटस्येवेति—वाच्यम् ; यद्यदुपा-

---

निवर्त्य इति—अज्ञान इति शेषः । **तस्यापीति** । अभावविलक्षणस्याप्यज्ञानस्याभावोपादानत्वसंभवस्योक्तत्वेनेत्यादिः । **आत्मनीति** । शुद्धात्मनोऽनुपादानत्वपक्षे शुद्धे इत्यादिः । **अन्वयिकारणत्वं**—कार्यात्मककारणत्वम् । **ज्ञानप्रागभावस्य**—भ्रमनिवृत्तिस्वरूपयोग्यप्रमाप्रागभावस्य । **निरस्तत्वादिति** । प्रागभावे मानाभावः, भावे वा परोक्षप्रमानिवर्त्यभ्रमस्यो[1]पादानत्वं मनोनिष्ठे प्रमाप्रागभावे न संभवति । प्रत्यक्षप्रमा यत्र विषये कदापि न जायते, तत्र तत्प्रागभावस्या-

---

[1] भ्रमत्वस्यो–ग.

SGDF
Sri Gargeshwari Digital Foundation

दानकं तत्तदनुविद्धतयैव प्रतीयत इति व्याप्त्यसिद्धेः। न हि घटोपादानकं रूपं घट इति प्रतीयते; प्रकृतिद्व्यणुकाद्यनुविद्धतया प्रतीतेः परैरप्यनभ्युपगमात्, केनचिद्धर्मेण तदनुवेधस्तु प्रकृतेऽपीष्ट एव। न च यावन्ति ज्ञानानि तावन्त्यज्ञानानीति पक्षे भ्रमापूर्वकप्रमानिवर्त्येऽज्ञानेऽव्याप्तिः; भ्रमोपादानतायोग्यत्वस्य विवक्षितत्वात्, सहकारिवैकल्यात्कार्यानुदयेऽपि योग्यता-

---

लीकत्वेन भ्रमोपादानत्वासंभवः। यत्र विषये प्रत्यक्षप्रमा जनिष्यते, तत्रापि भ्रमोपादानत्वेन सिद्धस्य प्रतियोगिज्ञानसापेक्षधर्मिकत्वकल्पने गौरवान्नाभावत्वम्। भावरूपस्यापि तस्य प्रमाप्रागभावत्वमविरुद्धम्; जन्यभावमात्रस्य स्वध्वंसप्रागभावत्वादित्यपि बोध्यम्। यत्तूत्पन्नपुनरुत्पत्तिवारणाय प्रागभावस्याभावरूपस्य कल्पनमिति तत्तुच्छम्; अभावरूपत्वे मानभावात्, गौरवस्योक्तत्वात्, सामग्र्युत्तरक्षणत्वं कार्येण व्याप्यं[1] न तु तदुत्पत्त्येति पुनरुत्पत्त्यापादनासंभवाच्च॥

एव प्रतीयते—प्रतीयत एव। ननु—'शुक्लो घटः' 'मृद्धट' इत्यादिशुक्लत्वमृत्त्वादिना रूपप्रकृत्यादितादात्म्यं घटे प्रतीयत एवेत्यत आह—**केनेति**। यथा शुक्लत्वादिना रूपाद्यनुवेधस्तथा जडत्वादिनाऽज्ञानानुवेधः। अज्ञानत्वेनाननुवेधस्तु भ्रमस्य भ्रमत्वाज्ञानात् बाधकाले तु नेदं रूप्यं रूप्यतया यदभात्तदज्ञानमित्यनुभूयत एव। किंच विशेषदर्शिनामज्ञानं सर्वकार्यमिति धीरस्त्येव; अत एव—

यत्तु दृष्टिपथः प्राप्तं तन्मायैवास्तु तुच्छकम्, ।

इति भाष्योदाहृतं साङ्ख्यवाक्यम्। अविशेषदर्शिनां तु मृद्धट इत्याद[2] धीर्नास्तीति भावः। **योग्यतेति**। कारणतावच्छेदकीभूताज्ञानत्वजातीत्यर्थः।

---

[1] व्याप्यत्वं—**ग.** [2] इत्यपि—**ग.**

SGDF
Sri Gangeshwari Digital Foundation

नपायात्। अथ योग्यतावच्छेदकरूपापरिचये कथं तद्ग्रहणम्? प्रथमलक्षणस्यैव योग्यतावच्छेदकत्वात्। एकमेवाज्ञानमिति पक्षे तु तत्र भ्रमोपादानत्वमक्षतमेव। न चैवं शुक्तिज्ञानेनैवाज्ञाननाशे मोक्षापत्तिः, तस्यावस्थाविशेषनाशकत्वाङ्गीकारात्। व्युत्पादितं चैतदस्माभिः सिद्धान्तबिन्दौ। ज्ञानत्वेन रूपेण साक्षाज्ज्ञाननिवर्त्यत्वं वा तल्लक्षणमिति च प्रागुक्तमेव। तस्मान्नाविद्यालक्षणासंभव इति सर्वमवदातम्॥

इत्यद्वैतसिद्धावविद्यालक्षणोपपत्तिः

अवच्छेदकरूपेति। व्याप्येत्यर्थः। लक्षणस्येति। साक्ष्यादिना तद्ग्रहणं बोध्यम्। अवस्थाविशेषानङ्गीकारपक्षेऽप्याह—व्युत्पादितमिति। प्रमाविरहविशिष्टाज्ञानं न भातीत्यादिव्यवहारनियामकमित्यादिनेति शेषः। नव्यमते उत्तरज्ञानादेरपि ज्ञानत्वादिना निवर्तकत्वादाह—साक्षादिति। समानविषयकत्वसंबन्धेनेत्यर्थः। ज्ञानस्य स्वप्रागभावं प्रति प्रतियोगित्वेन[1] नाशकत्वमिति तत्रातिव्याप्तिर्दूरापस्ता। वस्तुतो ज्ञानत्वेन[2] प्रमात्वेन; पूर्वं प्रामा[3]त्वेनाज्ञाननिवर्तकत्वस्योक्तत्वात्। तथाच साक्षादित्यपि न देयम्; अज्ञानप्रयुक्तनाशस्य प्रमात्वेन ज्ञानजन्यत्वाभावादेवाज्ञानप्रयुक्तवारणादिति ध्येयम्॥

'तर्कैः सारस्वतै रत्नैश्चन्द्रिकाचन्द्रभूषणैः।
दुरन्तध्वान्तनाशार्थमविद्यालक्षणोदयः॥

इत्यविद्यालक्षणोपपत्तिः

---

[1] स्वप्रागभावप्रतियोगित्वेन—ग. [2] वस्तुज्ञानत्वेन—ग. [3] पूर्वप्रमा—ग.

SGDF Sri Gangeshwari Digital Foundation

अथ अज्ञानप्रत्यक्षोपपत्तिः

तत्र चाज्ञाने 'अहमज्ञो मामन्यं च न जानामी'ति प्रत्यक्षम्, 'त्वदुक्तमर्थं न जानामी'ति विशेषतः प्रत्यक्षम्, 'एतावन्तं कालं सुखमहमस्वाप्सं न किंचिदवेदिष'मिति परामर्शसिद्धं सौषुप्तप्रत्यक्षं च प्रमामणम्। न चाहमर्थस्याज्ञानानाश्रयत्वेन कथमयं प्रत्ययो भावरूपाज्ञानपक्षे उपपद्यत इति—वाच्यम्; अज्ञानाश्रयीभूतचैतन्ये अन्तःकरणतादात्म्याध्यासेनैकाश्रयत्वसंबन्धेनोपपत्तेः। अत एव—जडे आवरणकृत्याभावात् 'घटं न जानामी'त्यादिप्रतीतेर्ज्ञानाभावविषयत्वे प्रकृतेऽपि तथास्त्विति-निरस्तम्; तत्तदवच्छिन्नचैतन्यस्यैवाज्ञानाश्रयत्वेन तत्रापि तद्व्यवहारोपपत्तेः। न च साक्षिवेद्ये सुखदुःखाज्ञानादौ प्रातिभासिके च भावरूपाज्ञानाभावेन तत्र न जानामीति प्रतीतिः कथमुपपद्यत इति—वाच्यम्; स्वस्मिन्विद्यमाने साक्षिवेद्ये सुखादौ स्वभ्रमसिद्धे रूप्यादौ च 'न जानामी'ति व्यवहारासंभवात्, परसुखादौ 'न जानामी'ति व्यवहारस्य परोक्षज्ञाननि-

---

अथ अज्ञानप्रत्यक्षोपपत्तिः

उपपत्तेरिति। शुद्धचितोऽज्ञानाश्रयत्वविषयकप्रत्ययान्तराभावादयं प्रत्ययोऽहमर्थेऽज्ञानवत्त्वाप्रकारकत्वेन[1] न निर्णेतुं शक्यत इति न युक्तम्; 'पूर्वसिद्धतमसो हि पश्चिमो नाश्रय' इत्यादियुक्तेरज्ञानाश्रयकोटौ चिदन्यनिवेशे गौरवाच्च तथा निर्णयात्, सौषुप्तस्य तादृशप्रत्ययान्तरस्य सत्त्वाच्च। **स्वस्मिन्निति** विद्यमानत्वान्वयि। **परसुखादा-वित्यादिना** अतीतानागतस्य स्वसुखस्य स्वभ्रमसिद्धशुक्तिरूप्यादेश्च

---

[1] वत्त्वाविषयकत्वेन—ग.

SGDF
Sri Gargeshwari Digital Foundation

वर्त्येन प्रमातृगताज्ञानेनैवोपपत्तेः। अत एव परोक्षज्ञानेन प्रमातृगताज्ञाने नाशितेऽपि विषयगताज्ञानसत्त्वेन 'न जानामी'ति व्यवहारापत्तिरिति—निरस्तम्; प्रमातृगताज्ञानकार्यस्य 'न जानामी'ति व्यवहारस्य विषयगताज्ञानेनापादयितुमशक्यत्वात्। ननु—भावरूपाज्ञानविषयत्वेनाभिमतस्य 'अहमज्ञ' इति प्रत्ययस्य 'मयि ज्ञानं नास्ती'ति ज्ञानाभावविषयात्प्रत्ययात् 'अघटं भूतल'मिति प्रत्ययस्य 'घटो नास्ती'ति प्रत्ययादिव विशेषणविशेष्यभावव्यत्यासं विना इच्छाद्वेषाभावज्ञानयोरिव विषयभेदाप्रतीतिरिति—चेत्, सत्यम्; धर्मिप्रतियोगिज्ञानाज्ञानाभ्यां ज्ञानसामान्याभावज्ञानस्य व्याहतत्वेन 'मयि ज्ञानं नास्ती'त्य-

---

सङ्ग्रहः। **प्रमातृगतेति**। न जानामीत्यत्र हि ज्ञानसामान्यविरोध्य[1]-ज्ञानं विषयः, तच्च न विषय[2]गतम्; तस्य[3] परोक्षज्ञानाविरोधित्वात्। अत एव प्रत्यक्षधीविरोध्यज्ञानविषयको न भातीति व्यवहारो विषयगताज्ञानमात्रेण भवत्येव। न च—विषयगताज्ञानस्य प्रमातरि निरूपकत्वसंबन्धसत्त्वोक्तनैव न जानामीति धीरिति—वाच्यम्; परोक्षज्ञानेनापरोक्षभ्रमोपादानाज्ञाननिवृत्त्यसंभवात्। न च—परोक्षं नाज्ञाननिवर्तकम्, किंतु भ्रमविषये मिथ्यात्वनिश्चायकमिति—वाच्यम्; अपरोक्षेऽपि तथापत्तेः, परोक्षज्ञाने सति न जानामीति व्यवहारापत्तेः, ज्ञानादज्ञानं नष्टमित्यनुभवस्य परोक्षस्थलेऽपि तुल्यत्वाच्च। **ज्ञानाभावविषयात्** ज्ञानाभावविषयकत्वेनाभिमतात्। तेन सत्यमित्यग्रिमस्य न विरोधः। **इच्छेत्यादि**। इच्छामि न द्वेष्मीति ज्ञानयोर्यथा भिन्नो विषयः प्रतीयते तथा प्रकृते नेत्यर्थः। नन्ववच्छेदकत्वं नानतिरिक्त-

---

[1] परोक्षापरोक्षसाधारणज्ञानमात्रविरोध्य–ख. [2] तच्च प्रमातरि न तु. विषय–ग. [3] विषयताज्ञानस्य–ख.

SGDF
Sri Gangeshwari Digital Foundation

स्यापि भावरूपाज्ञानविषयत्वेन विषयभेदाप्रतीतेर्युक्तत्वात् । तथाहि—'मयि ज्ञानं नास्ती'ति प्रतीतिः 'वायौ रूपं नास्ती'ति प्रतीतिवद्यावद्विशेषाभावान्यसामान्याभावविषया, सामान्यावच्छिन्नप्रतियोगिताकयावद्विशेषाभावविषया वा अभ्युपेया । तथाच तत्कारणीभूतधर्मिप्रतियोगिज्ञानाज्ञानाभ्यां कथं न व्याघातः? यत्किंचिद्विशेषाभावस्य सामान्यावच्छिन्नप्रतियोगिताकत्वाभावात्, अभावज्ञाने प्रतियोग्यंशे प्रकारीभूतधर्मस्यैव प्रतियोगितावच्छेदकत्वात्। अन्यथा सामान्याभावसिद्धिर्न स्यात्। यावद्विशेषाभावान्यसामान्याभावानभ्युपगमेऽप्ययं दोषः । यत्किंचिद्विशेषाभावस्य सामान्यावच्छिन्नप्रतियोगिताकत्वे घटवृ-

---

त्तित्वादिकम्; [1]'कम्बुग्रीवादिमान्नास्ति' 'प्रमेयघटो नास्ती' त्यादेरपि प्रमात्वापत्तेः, किंत्वखण्डो धर्मविशेषः, स च सामान्यधर्मस्य किंचिद्विशेषाभावप्रतियोगितां प्रत्यप्यस्तु, तत्राह—**अभावज्ञान इति । धर्मस्यैवेति** । अन्यथा घटो नास्तीत्यादौ पटत्वाद्यवच्छिन्नप्रतियोगित्वस्यापि भानापत्तेरिति भावः । ननु—प्रतियोग्यंशे प्रकारीभूतं तद्व्यापकं वा अवच्छेदकतयाऽभावबुद्धौ भाति ; अत एव कम्बुग्रीवादिमान्नास्तीत्यादावपि घटत्वादेरवच्छेदकतया भानात्प्रमात्वमेव, पूर्वस्यावच्छेदकत्वासंभवे सत्येवोत्तरस्य तथा भानान्नातिप्रसङ्ग इत्यत आह—**अन्यथेति।** सामान्यावच्छिन्नप्रतियोगिताकत्वबुद्धौ विशेषाभावस्यापि भाने इत्यर्थः । तादृशबुद्धिमात्रे तथा संभवादिति शेषः । **अयं** प्रतियोग्यंशे प्रकारान्यस्यावच्छेदकत्वासंभवरूपः । न च प्रतियोग्यंशेऽपि सामान्यधर्मः प्रकार इति—वाच्यम्; तथा सति विनिगमकाभावेन सामान्यधर्माश्रयाणां

---

[1] वृत्तित्वाद–ग.

SGDF Sri Gargeshwari Digital Foundation

त्यपि भूतले 'निर्घटं भूतल' मिति प्रतीतिः स्यात्' 'वायौ रूपं नास्ति' 'पुरो देशे रजतं नास्ती' त्याद्याप्तवाक्यजन्यप्रतीत्यनन्तरमपि तत्तत्संशयनिवृत्तिर्न स्यात्; एकविशेषाभावबोधनेऽपि विशेषान्तरमादाय संशयोपपत्तेः। अथ—अभावबोधे

सर्वेषामेव प्रतियोगितया भानापत्त्या विशेषाभावभानोक्तिविरोधादिति भावः। प्रतीतिः प्रमा॥

संशयोपपत्तेरिति। नच—रूपत्वावच्छिन्नप्रतियोगिताकत्वविषयकाभावधीत्वेन विशेषाभावधीरपि सामान्यसंशयविरोधिनीति—वाच्यम्; घटत्वेन पटो नास्त्यत्रेति ज्ञानस्य घटवदिदमिति ज्ञाने विरोधित्वापत्त्याऽभावांशे प्रकारता येन रूपेण तदवच्छिन्नप्रतियोगिताकत्वधीत्वेनैव तद्रूपविशिष्टवत्ताधीविरोधित्वस्य त्वया वाच्यत्वात्। यत्तु—'अपशवो वान्ये गोऽश्वेभ्य' इत्यस्येव वायौ न रूपमित्यस्यापि सामान्यरूपेण विशेषाभावपरत्वधीकाले विशेषान्तरसंशयाविरोधित्वेऽपि तस्य सकलरूपाभावपरत्वधीकाले तज्जन्यज्ञानं सकलरूपसंशयविरोध्येवेति—तन्न; विपरीतव्युत्पन्नस्य घटः कर्मत्वमित्यादिवाक्याद्बोधविशेषस्यैवोक्त[1]वाक्याद्विशेषाभावबोधेऽपि सद्व्युत्पन्नस्य तदभावात्सद्व्युत्पन्नमधिकृत्यैव प्रकृतोक्तेः प्रवृत्तत्वात् प्रतियोग्यंशे प्रकारस्यैवावच्छेदकतया शाब्दबोधे भानस्य व्युत्पत्तिसिद्धत्वात्। अपशव इत्यत्र तु पशुपदेन प्रशस्तपशुत्वेन बोध्यत इति गौण्या वृत्तेर्व्युत्पादनप्रस्तावे तत्सिद्धिपेटिकायां स्थितम्। पशुत्वेन प्रशस्तपशुभेदबोधने तु गौण्या व्युत्पादनं व्यर्थम्; पशुत्वसामान्यस्यैव तदाश्रयविशेषे प्रतियोगिनि प्रकारत्वसंभवात्। प्रशस्तपशुत्वस्य प्रतियोग्यंशे प्रकारत्वे तु तस्यैव प्रतियोगितावच्छेदकतया भानम्। न हि शुद्धपशुत्वं त्वत्कुलधर्मः, येन तत्र भक्तोऽसि॥

---

[1] विशेषस्यैवोक्त—ग.

SGDF
Sri Gargeshwari Digital Foundation

प्रकारीभूतधर्मस्यावच्छेदकत्वं पूर्वानुपस्थितमपि संसर्गमर्यादया शाब्दबोधे अन्यत्र च भासते, न ह्यवच्छेदकत्वस्य स्वरूपसंबन्धविशेषस्य ग्रहे अन्या सामग्री क्लृप्ता; तथाच तत्तद्विशेषाभावानां तत्तद्विशेषावच्छिन्नप्रतियोगिताकत्वात्सामान्यावच्छिन्नप्रतियोगिताकत्वं यावद्विशेषाभावकूटे वा व्यासज्यवृत्ति तदतिरिक्तसामान्याभावे वा प्रत्येकविश्रान्तमिति तादृगभावप्रतीतेर्यावद्विशेषप्रतीतिविरोधित्वात्कुतो विशेषसंशयादिरिति चेत्, सत्यम्; प्रकृतेऽपि ज्ञानत्वसामान्यावच्छिन्नप्रतियोगिताकाभावप्रतीतिर्यावज्ज्ञानविशेषविरोधिनीति कथं तत्तत्कारणत्वाभिमतज्ञा-

---

संशयनिवर्तकत्वमुक्तवाक्यस्य व्युत्पादयन् तद्दृष्टान्तेन न जानामीत्यस्यापि ज्ञानसामान्याभावविषयकत्वावश्यकत्वेन विरोधमाह—**अथेत्यादिना व्याहन्यत इत्यन्तेन । अवच्छेदकत्वमिति ।** प्रतियोग्यंशे प्रकारस्यैवाभावांशेऽप्यवच्छिन्नप्रातियोगिताकत्वसंसर्गेण प्रकारता, न तु संसर्गमध्येऽवच्छेदकीभूतधर्मस्य निवेशः; तथा च प्रतियोग्यंशे प्रकारादन्यस्यावच्छेदकत्वभानं दूरापास्तमिति साम्प्रदायिकमतं ज्ञापयितुमवच्छेदकाविशेषितमवच्छेदकत्वं संसर्गत्वेनोक्तम्। **अवच्छेदकत्वं** प्रतियोगितावच्छेदकत्वम् । **अवच्छेदकत्वस्य** प्रतियोगितावच्छेदकत्वस्य । तेन प्रतियोगित्वस्यापि स्वरूपसंबन्धस्यानुपस्थितस्य संसर्गतया भानोक्तिर्लभ्यते । **अन्येति ।** अवच्छेदकस्य ग्रहे तु प्रतियोग्यंशे प्रकारतया भासकसामग्र्येव सामग्रीत्वेन क्लृप्तेति भावः । **ज्ञानविशेषविरोधिनीति ।** ज्ञानादिमति तदभावज्ञानानुदयात्तार्किकादिमते स्वरूपसत् ज्ञानादिकं स्वाभावधीविरोधि, तस्य साक्षिभास्यत्वमते तु ज्ञानादि विद्यमानं स्वाश्रये ज्ञायत एवेत्युभयथापि ज्ञानादिसत्वे तत्सामान्याभावधीर्विरुध्यत इति भावः । ननु—रूपाद्यभावबुद्धे रूपादिमत्त्वबुद्धिप्रतिबध्यत्वेपि न

SGDF
Sri Gargeshwari Digital Foundation

नविशेषे सति सा न व्याहन्यते। तथाच क्लृप्ताभावप्रतीतिवैलक्षण्येऽवश्यकल्प्ये लाघवाद्विषयस्यैवाभाववैलक्षण्यं कल्पयितुमुचितम्;

जानामीति बुद्धे(र्ज्ञानादिमत्त्वधीप्रतिबध्यत्वम्। न च तथापि न जानामीति बुद्धे)[1]र्न ज्ञानादिमत्त्वधीप्रतिबध्यत्वम्। न च--तथापि न जानामीति बुद्धेर्भ्रमत्वापत्तिरिति--वाच्यम्; इष्टत्वात्तत्राह-**तथा चेति**। न जानामीति बुद्धाविति शेषः। **वैलक्षण्ये** स्वविषयीभूताभावप्रतियोगिमत्ताधीप्रतिबध्यत्वशून्यत्वे। **लाघवादिति**। अहमर्थान्यांशे ज्ञानाभाववत्ताबुद्धित्वेन ज्ञानवत्ताधीप्रतिबध्यत्वं त्वयावश्यं वाच्यम्, अन्यथा घटो ज्ञानाभाववानिति बुद्धेरपि घटो ज्ञानवानिति धीविरोधित्वं न स्यात्; तथाच लाघवाद्धर्मितावच्छेदकत्वसंबन्धेन ज्ञानतदभाववत्ताबुद्ध्योः प्रतिबध्यप्रतिबन्धकभावकल्पनाज्जानामीति धीकालीनायां न जानामीति बुद्धौ भ्रमत्वस्य दोषजन्यत्वस्य च कल्पनागौरवाच्च तस्यां ज्ञानाभावत्वं न प्रकारः; किंत्वहमर्थसमानाधिकरणाभावरूपाज्ञानांशे ज्ञानविरोधित्वमिति स्वीकृत्याभावाविषयकत्वं कल्प्यताम्। न च--घटो न जानाति न जानामी'ति प्रतीत्योर्वैरूप्यं दोष इति--वाच्यम्; इदमसुरं बलिरसुर' इति बुद्ध्योरिव तस्यादोषत्वादिति भावः॥

ननु--व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावस्त्वयापि स्वीक्रियते, अन्यथा पारमार्थिकत्वेन दृश्याभावघटितमिथ्यात्वलक्षणोक्तिर्विरुध्येत; तथाच प्रतियोग्यंशे प्रकारस्यैवावच्छेदकत्वे मिथ्यात्वानुमानं भ्रमः स्यादिति--चेत्, भ्रान्तोऽसि; न हि परमार्थः प्रपञ्चो ब्रह्मणि नास्तीत्यादि मिथ्यात्वानुमानस्याकारः; येन भ्रमत्वं स्यात्, किंतु पारमार्थिकत्वावच्छिन्नप्रतियोगिताकस्वसमानाधिकरणाभावप्रतियोगितावान् प्रपञ्च इत्याकारः। न च-पारमार्थिकत्वेन प्रपञ्चो नास्तीत्या-

---

[1] अयं कुण्डलितः पाठः ग-पुस्तके न दृश्यते.

SGDF
Sri Gargeshwari Digital Foundation

विषयावैलक्षण्ये प्रतीतिवैलक्षण्यायोगात् । विषयाज्ञानमनुभूय च पुरुषस्तन्निवृत्त्यर्थं विचारे प्रवर्तत इति सर्वानुभवसिद्धम् । तद्यदि ज्ञानविशेषाभावो 'न जानामी'ति प्रतीतेर्विषयः, तदा ज्ञातेऽपि तथा प्रतीत्यापातः; तद्विचारार्थं च प्रवृत्तिः स्यात् । सामान्याभावे च बाधकमुक्तमेव । तस्मादभावविल-

---

दिबुद्धेः प्रतियोगिनि पारमार्थिकत्वभ्रमत्वादभावांशे तदवच्छिन्नप्रतियोगिताकत्वभ्रमत्वमपि स्यादिति—वाच्यम्; उक्तप्रतियोगिताकत्वांशे बाधकाभावादबाधितप्रतीत्याव्यधिकरणरूपेणावच्छिन्नप्रतियोगिताकाभावसिद्धेः । न चैवं—विशेषाभावांशे सामान्यावच्छिन्नप्रतियोगिताकत्वमपि धीबलात्स्वीकृत्य प्रतियोग्यंशे प्रकारस्यैवावच्छेदकत्वमिति नियमस्त्यज्यतामिति- वाच्यम्; वन्हित्वेन द्रव्यं नास्तीत्यादाविव द्रव्यत्वेन वन्हिर्नास्तीत्यत्रापि प्रतियोग्यंशे प्रकारवन्हित्वस्यैवावच्छेदकतया भानसंभवेन वन्ह्यादिमात्रनिष्ठप्रतियोगितावच्छेदकत्वस्य द्रव्यत्वादावक्लृप्तस्य भाने मानाभावेन धीबलाभावात् । न ह्यवच्छेदकतया भासमानस्यैव प्रतियोग्यंशे प्रकारत्वमिति नियमः; प्रमेयघटो नास्तीत्यादौ प्रमेयत्वादेरनवच्छेदकस्यापि प्रतियोगिनि प्रकारत्वमिति मिश्रादिभिरुक्तत्वात्, 'प्रतियोगिताश्च विशिष्योपादेया' इत्यादिदीधित्यादिग्रन्थेषु पारिभाषिकावच्छेदकत्वविशिष्टतत्तद्व्यक्तीनां तत्तद्व्यक्तित्वैर्भेदकूटानिवेशस्योक्तत्वाच्च। न च–घटो न पट इत्यादिधीकालेऽपि पटत्वेन घटो नास्तीति बुद्ध्युदयान्नोक्तनियम इति—वाच्यम्; उक्तधीकालेऽपि घटत्वपटत्वयोः 'एकत्र द्वयमिति' न्यायेन भानसंभवेनोक्तबुद्धिसंभवात् ॥

विषयाज्ञानं—विषयविशेषिताज्ञानम् । **ज्ञानविशेषाभावः**—विषयविशेषितज्ञानविशेषस्याभावः । **ज्ञातेऽपीति** । विषय इति शेषः । विषयज्ञानं विना विषयविशिष्टज्ञानस्य ज्ञानासंभवादिति भावः ।

SGDF
Sri Gangeshwari Digital Foundation

क्षणमेवाज्ञानं 'मयि ज्ञानं नास्ति' 'अहमज्ञ' इत्यादिधीविषय इति सिद्धम् । नन्वभावविलक्षणमप्यज्ञानं 'न जानामी'ति ज्ञानविरोधित्वेनैव भासते, मोहादिपदेऽपि प्रळयादिपदवत्तद्नुल्लेखमात्रम्; उक्तं च विवरणे—'अज्ञानमिति द्वयसापेक्षज्ञानपर्युदासेनाभिधानादि'ति । अन्यथा ज्ञानस्याज्ञानविरोधित्वमप्रामाणिकं स्यात्; तथाच विरोधानिरूपकज्ञानस्य ज्ञानाज्ञानाभ्यां तवापि कथं न व्याघातः? एवं निर्विषयाज्ञानाप्रतीतेर्विषयज्ञानाज्ञानयोरपि व्याघात आपादनीयः; तथाच—

द्वयसापेक्षज्ञानपर्युदासेनेति । अज्ञानं भावरूपं स्वाश्रयविषयमित्युक्त्वा ज्ञानस्य न स्वविषयाश्रितत्वमत्रास्याज्ञान[1]मिति विषयाश्रयभेदानुभवादित्याशङ्क्य नोक्तानुभवेऽस्येति अज्ञानाश्रयभानम्; किंत्वस्यात्र यज्ज्ञानं तद्विरोधित्वेनाज्ञानभानमित्याशयेनोक्तमज्ञानमिति । द्वयेत्यादि आश्रयविषयरूपद्वयसापेक्षं यज्ज्ञानं तत्पर्युदासेनाज्ञानमित्यभिधानादित्यर्थः । तवापीति । प्रमाणवृत्त्यभावकाले न जानामीति धीर्वाच्या; अन्यथाऽविद्यावृत्त्यादिकाले सा न स्यात् । तथाच प्रमाणवृत्तिसामान्यविरोधित्वेनाज्ञानविषयकोक्तधीकालेऽज्ञानाकारायाः प्रमाणवृत्तेरावश्यकत्वात् तादृशस्मृतेः सर्वत्रासंभवात्, संभवेऽपि तस्या विशेषणधीविधया हेतुत्वेऽपि ज्ञानविरोधित्वप्रकारकप्रमाणवृत्तेरवश्यं वाच्यत्वात्, अन्यथा अज्ञानमात्रस्य साक्षिभास्यत्वेन ज्ञानविरोधित्वेन भानासंभवाद्व्याघात इति भावः । ननु—ज्ञानविरोधित्वेनाप्यज्ञानं साक्षिणा भास्यतां तत्राह—अन्यथा ज्ञानस्येति । अज्ञाने ज्ञानविरोधित्वप्रकारकवृत्तिं विना तत्र तदसिद्धेः सावश्यं वाच्या । तस्याः सत्त्वे च तद्घटितज्ञानसामान्यविरोधित्वं न संभवतीति भावः ॥

---

[1] मात्रस्याज्ञाना–ग.

SGDF
Sri Gargeshwari Digital Foundation

यत्रोभयोः समो दोषः परिहारोऽपि वा समः ।
नैकः पर्यनुयोक्तव्यस्तादृगर्थविचारणे ॥

इति न्यायेनोभयपरिहरणीयस्य व्याघातस्य ज्ञानाभावपक्ष एवा-

यद्यपि भावरूपाज्ञानस्यापि प्रमाणरूपविषयनिष्ठता, तद्वृत्तिकार्योपादानत्वात् । अत्रास्याज्ञानमित्यत्र त्वस्येति निरूपितत्वं षष्ठ्या निर्दिश्यते, तत्पुरुषीयज्ञाननिवर्त्यत्वनियामकस्य तत्पुरुषनिरूपितत्वस्याज्ञानेऽवश्यं वाच्यत्वात् । तथा च न ज्ञानविरोधित्वं न जानामीति धीविषयः ; किं त्वखण्डोऽज्ञानत्वाख्यो धर्मः । विवरणोक्तिस्तु संभवप्राचुर्येणाज्ञानाकारप्रमाणवृत्तिसत्त्वेऽत्रास्याज्ञानं स्थितमित्यादिबुद्धिमादाय बोध्या । अत एवाभिधानादित्यनेन परोक्षत्वं सूचितम् । एवं चातीतमेतद्विषयाश्रितमज्ञानमेतद्विषयकप्रमाविरोध्यज्ञानसामान्यं स्वविषयाश्रयविषयकप्रमाविरोधि वेत्यनुमानेऽपि न दोषः । न हि तदज्ञानस्याज्ञानसामान्यस्य वा स्थितिकाले उक्तानुमानम् ; येन विरोधः, तथाच न जानामीति प्रत्यक्षे तद्विषयकत्वेन कारणतावच्छेदकत्वेन च सिद्धमखण्डमज्ञानत्वं भातीत्यस्मन्मते न दोषः । न च न जानामीति वाक्येनोक्तप्रत्यक्षाभिलापासंभवः ; उक्तवाक्यप्रत्यक्षयोर्भिन्नविषयकत्वादिति—वाच्यम् ; लक्षणयोक्तवाक्यस्योक्तप्रत्यक्षसमानविषयकत्वात्, अन्यथा पापत्वादेर्नीलत्वादिव्याप्यजातेश्च ज्ञान[1] स्याधर्मानुद्भूतरूपादिशब्दैरभिलापासंभवात् । न चैवमप्यज्ञानविषयस्य ज्ञानाज्ञानाभ्यां व्याघात इति—वाच्यम् ; ज्ञानादिष्विवाज्ञानेऽपि विशेषणतया विषयस्य साक्षिभास्यत्वसंभवात् । विषयत्वविशिष्टे विद्यमानेऽनावृतसाक्षिसंबन्धरूपस्य साक्षिभास्यत्वस्य माध्वैरपि स्वीकारेण तत्र संशयाद्ययोग्यत्वस्य सर्ववादिसम्मतत्वात्, तथापि न जानामीति प्रत्यक्षे प्रमाविरोधित्वेनाज्ञानभानेऽपि

---

[1] ज्ञात—ग.

SGDF
Sri Gargeshwari Digital Foundation

पादनमनुचितमिति—चेन्न; प्रमाणवृत्तिनिवर्त्त्यस्यापि भावरूपाज्ञानस्य साक्षिवेद्यस्य विरोधिनिरूपकज्ञानतद्व्यावर्तकविषयग्राहकेण साक्षिणा तत्साधकेन तदनाशाद्व्याहत्यनुपपत्तेः। अज्ञानग्रहे विषयगोचरप्रमापेक्षायां व्याहतिः स्यादेव, सा च नास्ति। तदुक्तं विवरणे—'सर्वं वस्तु ज्ञाततया अज्ञाततया वा साक्षिचैतन्यस्य विषय एवे'ति। न चैवं—ज्ञानाभावपक्षेऽपि विषयादिज्ञानं साक्षिरूपम्, 'न जानामी'ति धीस्तु प्रमाणवृत्त्यभावविषयेति न व्याहतिरिति—वाच्यम्; भावरूपाज्ञानस्य साक्षात्साक्षिवेद्यत्वेन तदवच्छेदकविषयादेस्तद्द्वारा साक्षिवेद्यत्वसंभवेऽप्यभावस्यानुपलब्धिगम्यत्वेन साक्षात्साक्षिवेद्यत्वाभावान्न तद्द्वारा तदवच्छेदकविषयादेः साक्षिवेद्यत्वमिति वैषम्यात्। यद्यपि ज्ञानं साक्षिवेद्यम्, तद्द्वारा तदवच्छेदको विषयश्च साक्षिवेद्यः, तथापि ज्ञानाभावो न साक्षिवेद्यः; तस्यानुपलब्धत्वात्।

न क्षतिरित्याशयेन समाधत्ते—**न प्रमाणवृत्तिनिवर्त्त्यस्येत्यादि**। **तद्व्यावर्तकेति**। अज्ञानविशेषणे[1]त्यर्थः। **तत्साधकेनेति**। प्रमाविरोधित्वसविषयकत्वविशिष्टाज्ञानस्यानावृतसंबन्धवत्त्वरूपं साधकत्वं साक्षिणोऽज्ञाननाशकत्वेऽनुपपन्नमिति भावः। **अज्ञानग्रहे** अज्ञानं विषयीकर्तुम्। **साक्षात्साक्षिवेद्यत्वाभावादिति**। सविषयकत्वाविशिष्टस्य सर्वस्यानावृतसाक्षिसंबन्धतया क्लृप्तत्वेन ज्ञानादिविषयीभूतस्याभावस्य साक्षिवेद्यत्वेऽप्यतादृशाभावस्य तदभावादित्यर्थः। ननु यथा ज्ञानं प्रति विशेषणतया तद्विषयः साक्षिवेद्यः, तथा विशेष्यतयाभावोऽपीत्यत्राह—**यद्यपीति**। **अनुपलब्धत्वादिति**। घटादौ ज्ञानाभावस्यानुपलब्ध्यैव धीः। न हि स्वमनोभिन्नदेशावच्छिन्नतयाज्ञानस्य[2]

---

[1] विशेषणे—ग. [2] ज्ञानाभावस्य—ग.

SGDF Sri Gargeshwari Digital Foundation

उत्पन्नं च ज्ञानं साक्षात्साक्षिवेद्यम्। तस्मिंश्चोत्पन्ने तद्विषयोऽपि स्फुरतीति कुतो ज्ञानाभावोऽपि? अज्ञानविशेषणतया त्वनुत्पन्नमपि ज्ञानं साक्षिवेद्यमिति न दोषसाम्यम्। न चावच्छेदकस्य

साक्षिवेद्यत्वं संभवति। यादृशस्य हि तार्किकादिमते मानसप्रत्यक्षविषयता तादृशस्यैव त्वया साक्षिवेद्यता वाच्या; अन्यथाऽनुभवविरोधात्, घटादौ ज्ञानाभावं साक्षात्करोमीत्यापत्तेश्च। तथाच ज्ञानाभावस्यानुपलब्धत्वेन क्लृप्तत्वादात्मन्यपि तस्य तथात्वमिति भावः। ननु— साक्षिवेद्यत्वेन ज्ञानं क्लृप्तम्, तदधिकरणे तदभावोऽपि तथा कल्प्यताम्; तथाच ज्ञानतदभावयोः साक्षात्साक्षिवेद्यत्वेन न दोषस्तत्राह— **उत्पन्नमिति**। विद्यमानमित्यर्थः। **अभावोऽपीति**। साक्षात्साक्षिवेद्य इत्यनुषज्यते। तथाच ज्ञानतदभावयोरेकतरस्य सत्त्वेऽन्यतरस्यासत्त्वादविद्यमाने च साक्षिणस्तादात्म्यरूपसाक्षाद्वेद्यत्वासंभवान्न तयोः साक्षात्साक्षिवेद्यत्वमिति भावः। **अनुत्पन्नं**—अविद्यमानम्। विषयस्येव ज्ञानस्याप्यविद्यमानस्याज्ञानविशेषणतया भानसंभवः। प्रमिणोमीत्यादौ प्रमाविशेषणतया प्रमात्वादेरिवाज्ञानविशेषणतया प्रमाविरोधस्यापि भानसंभवात्। अविद्यमानत्वं च प्रमायामिव[1] प्रमात्वघटकाज्ञातत्वेऽपि सममिति भावः। अहं जानामीति धीसत्त्वेऽहं न जानामीति ज्ञानाभाववदहं प्रमावानिति भ्रमकालेऽहं प्रमाभाववानिति बुध्यभावादहमर्थे प्रमोपलब्ध्यभावरूपानुपलब्धेरहमेवार्थे[2] प्रमाभावबुद्धिहेतुत्वावश्यकत्वात् प्रमाभावस्य साक्षिवेद्यत्वे मानाभावः। न चानुपलब्धेः प्रतियोगिज्ञानसहकारेणैवाभावप्रमापकत्वात्प्रकृते च तदनुपपत्तेः साक्षिवेद्यत्वं तस्योच्यत इति— वाच्यम्; साक्षिणोऽप्यविद्यावृत्त्यवच्छिन्नस्य जन्यत्वात्। जन्याभावप्रत्यक्षे च प्रतियोगिज्ञानस्य हेतुत्वात्तथाप्यनुपपत्तेः। न हि न

[1] प्रमाया इव—ख. [2] अहमर्थे—ग.

SGDF
Sri Gargeshwari Digital Foundation

विषयादेः प्रागज्ञाने कथं तद्विशिष्टाज्ञानज्ञानम्? विशेषणज्ञानाधीनत्वाद्विशिष्टज्ञानस्येति—वाच्यम्; विशेषणज्ञानस्य विशिष्टज्ञानजनकत्वे मानाभावात्, प्रतियोगित्वाभावत्वयोः पूर्वानुपस्थितयोरपि तार्किकैरभावबोधे प्रकारीभूय भानाभ्युपगमात्, तथाहि—विशेषणतावच्छेदकप्रकारकज्ञानं विना कथं विशिष्टवैशिष्ट्यबुद्धिरिति—चेन्न; विशिष्टवैशिष्ट्यबुद्धित्वेन विशेषणतावच्छेदकप्रकारकज्ञानत्वेन च कार्यकारणभावे मानाभावात्, प्रत्यक्षत्वादिरूपेण पृथक् पृथक् क्लृप्तकार्यकारणभावे-

---

जानामीति प्रत्यक्षकाले प्रमारूपप्रतियोगिस्मृतिनियमः; तथा सति हि त्वन्मते प्रतियोगिस्मृतिव्यक्तीनां तदा कल्पनायां महागौरवादित्यपि बोध्यम्। **अज्ञानज्ञानम्**—अज्ञानाकाराविद्यावृत्त्यवच्छिन्नचिद्रूपम्। अविद्योपहितचिन्मात्रस्य साक्षित्वे तु नायं दोषः; जन्यविशिष्टबुद्धावेव विशेषणधीहेतुत्वात्। विशिष्टबुद्धित्वेनैव जन्यत्वेऽपि विशिष्टबुद्धेः स्वाव्यवहितप्राक्क्षणाः यावन्तस्तत्तदव[1]च्छेदेन स्वाश्रये विद्यमानस्याभावस्याप्रतियागित्वस्य[2] कारणतात्वेन व्यभिचारासंभवात्। यद्धीप्राक्कालः प्रसिद्धः, तदवच्छेदेन तद्धीमति विशेषणधीविरहो हि व्यभिचारः; न च नित्यसाक्षिणः प्राक्कालोऽस्तीति ध्येयम्। **प्रत्यक्षत्वादीति।** रक्तदण्डवानित्यादिप्रत्यक्षस्थले रक्तत्वादिनिष्ठलौकिकविषयतासंबन्धेन प्रत्यक्षं प्रति लौकिकसन्निकर्षस्य तन्निष्ठस्य हेतुत्वात्, तन्निष्ठलौकिकान्यप्रकारताकप्रत्यक्षे लौकिकान्यसन्निकर्षस्य हेतुत्वात्, तादृशतादृशविषयताकानुमित्यादौ तादृशतादृशपरामर्शादेर्हेतुत्वात्, रक्तदण्डत्वाद्यवच्छिन्नविषयताकधीत्वं न कार्यतावच्छेदकम्; बाधाभावादिसहकृतेन्द्रियसन्निकर्षादिना दण्डादौ रक्तत्वाद्यवच्छिन्नप्रकारताकस्य पुरुषादौ दण्डत्वाद्यवच्छिन्नप्रकारताकस्य चोत्पत्तिसंभवेन नीलघटत्वादिवदर्थ-

---

[1] तदव—ग. [2] वच्छेदेन विद्यमानाभावप्रतियोगित्वस्य—ग.

SGDF
Sri Gargeshwari Digital Foundation

नैवोपपत्तेर्विशिष्टवैशिष्ट्यबुद्धित्वस्यार्थसमाजसिद्धत्वात्, इह च सामग्रीतुल्यत्वेन 'विशेष्ये विशेषणं तत्र च विशेषणान्तर'मिति

समाजग्रस्तत्वात्। रक्तदण्डत्वाद्यवच्छिन्नप्रकारताकस्य च सधर्मितावच्छेदकस्योक्तकारणेनोत्पत्तिसंभवात्, दण्डो रक्तो न वेति सन्देहेऽपि रक्तदण्डवानिति बुद्धौ जायमानायां 'विशेष्ये विशेषणं तत्रापि विशेषणान्तर'मित्यस्या इव 'विशिष्टस्य वैशिष्ट्य'मित्यस्या अपि विषयताया वक्तुं शक्यत्वात्, द्वितीयायां मानाभावात्, पक्षधरमिश्रादिभिरस्वीकारात्, विशेषणस्य स्वविशेष्यान्विते विशेषणत्वस्थल एव विशिष्टवैशिष्ट्यव्यवहारसंभवाच्चेति भावः। उक्तहेतुत्वमङ्गीकृत्याप्याह—**इह चेति**। विशेषणतावच्छेदकप्रकारकनिश्चयासंभवस्थले चेत्यर्थः। **सामग्रीतुल्यत्वेनेति**। यावन्ति विशिष्टवैशिष्ट्यबुद्धौ कारणानि तावत्तां विशेष्ये विशेषणमित्यादिबुद्ध्युपधायकत्वसंभवेनेत्यर्थः। **न्यायेनेति**। सर्वेषां विशेषणतावच्छेदकानामिति शेषः। अथवा—**इह चेति**। विशेषणतावच्छेदकांशे धर्मितावच्छेदकं यत्र नास्ति तादृशस्थले चेत्यर्थः। विशिष्टस्य वैशिष्ट्यं विशेष्ये विशेषणं तत्रापि च विशेषणान्तरमित्येतयोरिति शेषः। घटवदिति बुद्धेरुक्तद्वैविध्येऽपि विशेषणतावच्छेदकनिश्चयो न तत्र हेतुः, किंतु रक्तदण्डवदित्यादिबुद्धेर्विशिष्टवैशिष्ट्यधीरूपत्वेन तत्र; अन्यथा दण्डो रक्तो न वेति धीकालेऽपि तदापत्तेः। तथाच ज्ञानविरोधित्वसविषयक[1]त्वविशिष्टाज्ञान[2]वैशिष्ट्यबुद्धावपि न विषयादिनिश्चयो हेतुः। न हि तयोरेकांशेऽपरस्य धर्मितावच्छेदकत्वमित्यत्र मानमस्ति, न वा ज्ञानविरोधित्वेनाज्ञानस्य प्रत्यक्षे भाननियमस्वीकारेऽज्ञानत्वाख्याखण्डधर्म[3]भाने मानमस्ति; येन स एव धर्मितावच्छेदको

---

[1] समानविषयक—ग. [2] नस्य—ग. [3] धर्मस्य धर्मितावच्छेदकत्वनियमः; मानाभावादिति भावः—ग.

SGDF
Sri Gargeshwari Digital Foundation

न्यायेन विशिष्टवैशिष्ट्यज्ञानसंभवात् । अन्यथा तार्किकाणामपीश्वरस्य भ्रान्तिज्ञत्वं न स्यात् । भ्रमविषयस्य स्वातन्त्र्येण ग्रहे भ्रान्तत्वापत्त्या भ्रमावच्छेदकतयैव तद्ग्रहणं वाच्यम्; तथाच क्व प्राक्तदवच्छेदकग्रहानियमः । ग्रहणसामग्रीतुल्यत्वं च प्रकृ-

---

ज्ञानविरोधित्वाद्यंशे स्यात् । **विशेष्ये इत्यादि** । अज्ञाने विरोधो विशेषणम्, तत्रापि ज्ञानम्, रक्तदण्डं न जानामीत्यादावप्यज्ञाने दण्डादिः, तत्रापि रक्तत्वादिरिति[1]भावः । **विशिष्टेति** । विरोधदण्डादि-विशिष्टाज्ञानस्वरूपेत्यर्थः । एवं च विशिष्टवैशिष्ट्येत्यपि सार्थकम्; अन्यथा न्यायेन ज्ञानसंभवादित्येवोच्येत । ननु—ससंबन्धिकस्य प्रत्यक्षं विशिष्टस्य वैशिष्ट्यमिति रीत्यैव, अन्यथा रक्तदण्डो नास्तीत्यभावप्रत्यक्षेऽपि तद्रीतिनियमः सर्वसम्मतो न स्यात्; तत्राह— **अन्यथेति** । उक्तप्रत्यक्षस्योक्तरीतिनियम इत्यर्थः । **भ्रमविषयस्य** भ्रमविशेष्यविशेषणयोः । **स्वातन्त्र्येण** विशिष्टस्य वैशिष्ट्यमिति रीत्या ग्रहे रजतेदं ज्ञानवानयमिति ग्रहे । **भ्रमावच्छेदकतया**— भ्रमांशे विशेषणतया । **तद्ग्रहणं** भ्रमविशेष्यविशेषणयोर्ग्रहणम् । **तथाचेति** । उक्तप्रत्यक्षे उक्तरीत्यनियमे चेत्यर्थः । **तदवच्छेदकेति** । न जानामीति प्रत्यक्षे विशेषणतावच्छेदकज्ञानादित्यर्थः[2] । न चेदंरजतयोर्भ्रमे विशेषणतया भानेऽपि तयोरेकविषयतावच्छिन्नस्यापरविषयत्वस्याभानेन भ्रमज्ञत्वं समूहालम्बनज्ञानज्ञत्व[3]साधारणमिति—वाच्यम्; विशिष्टस्य वैशिष्ट्यमिति रीतावपि तदभानस्य तुल्यत्वात् । अथ रजतस्य विशेषणत्वेन स्वविशेष्येदमंशे विशेष्ये ज्ञानेऽपि विशेषणत्वात् ज्ञानस्य चेदंविषयताविशिष्टत्वेन विशेष्यत्वादिदंविषयतावच्छिन्नविषयतासंबन्धेन रजतस्य ज्ञाने भानम्, तर्हि रजतस्येदमंशे विशेषणत्वं विनापि तद्बोध्यम् । **ग्रहणसामग्रीतुल्यत्वमिति** । विशिष्टस्य वैशि-

---

[1] रक्तत्वादिविशेषणमिति–ग. [2] ज्ञानदीत्यार्थः–ग. [3] ज्ञत्वं–ग.

SGDF Sri Gargeshwari Digital Foundation

तेऽपि समम्। ननु–श्रवणादिसाध्यमोक्षहेतुब्रह्मज्ञानप्रागभावस्य सत्त्वेन तज्ज्ञानं त्वयापि वाच्यम्; तथाच तत्रापि व्याहतिस्तु-ल्येति–चेन्न; श्रवणादिसाध्यमोक्षहेतुब्रह्मज्ञानरूपस्य प्रतियोगिनो ज्ञानाज्ञानाभ्यां व्याहत्यभावात्, न हि श्रवणादिसाध्यत्वमोक्ष-हेतुत्वादिप्रकारकब्रह्मज्ञानज्ञानं ब्रह्मज्ञानमपि सत् श्रवणादिसाध्यं, मोक्षहेतुर्वा; येन तस्मिन् सति तादृग्ज्ञानप्रागभावो व्याह-न्येत। नन्वेवं—'न जानामी'ति धियो ज्ञानाभावविषय-त्वेऽपि न प्रतियोगिज्ञानादिना व्याहतिः; सामान्यतो विषय-प्रतियोगिज्ञानेऽपि विशेषतस्तदभावसंभवात्, अन्यथा प्राग-भावधीर्न स्यात्; तत्प्रतियोगिविशेषस्य सामान्यधर्मं विना

ष्टयमिति रीत्यसंभवेऽपि ग्रहणस्य सामग्रीसमग्रता तत्तद्विषयावगाहित्व-रूपा अपलापानर्हत्वेन तुल्या, यथा विशिष्टस्य वैशिष्ट्यमिति बोधे नापलपनीया, तथा विशेष्ये विशेषणमित्यादिरीत्या भ्रमस्य ज्ञानेऽपीति यावत्। **प्रकृतेऽपि** अज्ञानप्रत्यक्षेऽपि। **सममिति**। उक्तसमग्रता नाप-लापार्हेत्यर्थः। यथाश्रुते ईशज्ञानस्य नित्यस्य कारणकूटरूपसामग्र्युक्तिर-सङ्गतेति ध्येयम्। न जानामीति प्रत्यक्षे विशेष्ये विशेषणमिति रीत्या ज्ञानाभावविषयकत्वं न संभवति; अभावप्रत्यक्षे विशिष्टस्य वैशिष्ट्य-मिति रीतेः सर्वसम्मतत्वादित्यवधेयम्। मन्मते विशिष्टस्य वैशिष्ट्य-मिति रीत्या भ्रमविषयज्ञानेऽपि नेशस्य भ्रान्तत्वम्; [1]विशेषादर्शनस्यैव भ्रमस्य भ्रान्तत्वरूपत्वात्, अन्यथा विशेषदर्शिनः सोपाधिकभ्रममादाय भ्रान्तत्वव्यवहारापत्तेरतस्तार्किकाणामित्युक्तम्। **विशेषतस्तदभावेति**। ज्ञानत्वावच्छिन्नतया ज्ञानविशेषीयतया च भासमानप्रतियोगिताका-

---

[1] विशेषादर्शनकालीनस्यैव–ग.

SGDF
Sri Gargeshwari Digital Foundation

विशेषतो ज्ञातुमशक्यत्वादिति—चेन्न; विशेषज्ञानाभावे हि विशेषज्ञानत्वावच्छिन्नं प्रतियोगीति तस्य ज्ञाने स विशेषोऽपि ज्ञात एवेति विशेषज्ञानाभावव्याघातात् । यत्किंचिद्विशेषाभावश्च न सामान्यावच्छिन्नप्रतियोगिताक इत्युक्तम् । प्रतियोगितावच्छेदकप्रकारकज्ञानाभावेन प्रागभावप्रतीतिरसिद्धैव । ननु—प्रतियोगितावच्छेदकप्रकारकज्ञानं नाभावज्ञाने कारणम्, किंत्वभावज्ञाने भासमानप्रतियोगिवृत्तिधर्मप्रकारकं ज्ञानम्; सामान्यलक्षणाप्रत्यासत्त्यभ्युपगमे तु प्रतियोगिविषयत्वमपि तस्याधिकम्, इतरथा तु तदेव, इष्टवृत्तिसामान्यधर्मप्रकारकज्ञानमिवासिद्धव्यक्तिविषयेच्छाकृत्योः । न च—प्रतियोगितानवच्छेदकधर्मेण कथं प्रतियोगिता गृह्यतामिति—वाच्यम्; विशेषावच्छिन्नाया व्याप्तेरिव सामान्येन ग्रहणसंभवात् । तथाहि 'इदमभिधेयवत्, प्रमेया'दित्यनुमाने 'यत्र प्रमेयं तत्राभिधेय'मिति व्याप्तिग्रहणसमये वृत्तिमत्प्रमेयत्वावच्छेदेनैव सामानाधिकरण्यरूपव्याप्तिसत्त्वेऽपि तस्याः प्रमेयत्वरूपेणैव ग्रहणम्, न तु वृत्तिमत्प्रमेयत्वेन; गौरवात्, वृत्तिमत्त्वविशेषणस्य व्यभिचारावारकत्वेन वैयर्थ्याच्च; अवृत्तिषु साध्यसामानाधिकरण्यरूपव्याप्त्यभाववत् साध्याभावसामानाधिकरण्यरूपव्यभिचारस्याप्यभावात्, व्यर्थविशेषणत्वरहितत्वे सति व्यभिचारिव्यावृत्तत्वमात्रेणैव व्याप्यतावच्छेदकत्वसंभवाच्च । तथाच यथा वृत्तिमत्प्रमेयगतापि व्याप्तिः प्रमेयत्वेनैव गृह्यते तथा तत्तन्नीलादि-

---

भावेत्यर्थः । विशेषतः तद्व्यक्तित्वेन । प्रतियोगितावच्छेदकेति । तत्तद्व्यक्तित्वरूपेत्यादिः । प्रतियोगिविषयत्वं प्रागभावप्रतियोगिविषयकत्वम् । तदेवेति । अभावज्ञाने कारणमित्यनुषज्यते । संभवात्—

SGDF
Sri Gargeshwari Digital Foundation

व्यक्तिगता प्रतियोगिता नीलत्वादिरूपेण गृह्यत इति न काचिदनुपपत्तिः। एवं च 'इहेदानीं घटो नास्ती'ति प्रतीतिरिव घटोपादानगततत्प्रागभावविषया 'मयि ज्ञानं नास्ती'ति प्रतीतिरपि प्रमातृगततत्प्रागभावविषयेति न काप्यनुपपत्तिरिति—चेन्न; अभावज्ञाने प्रतियोग्यंशे भासमानस्य धर्मस्यैव प्रतियोगितावच्छेदकतया यत्किञ्चिद्विशेषाभावस्य सामान्यावच्छिन्नप्रतियोगिताकत्वे घटवत्यपि भूतले 'निर्घटं भूतल'मिति घटज्ञानवत्यपि स्वस्मिन् 'मयि घटज्ञानं नास्ती'ति च प्रतीतेरापत्तेः पूर्वोक्तदोषात्। यत्किञ्चिद्घटज्ञानं घटाभावज्ञाने प्रतिबन्धकमिति तु ज्ञानज्ञानेऽपि तुल्यम्, उदाहृतव्याप्तिग्रहणे तु बाधकाभावात्सामान्यावच्छेदेऽपि न दोषः। अथैवं प्रागभावप्रतीतिरेव न स्यात्, न स्यादेव; 'घटो भविष्यती'ति प्रतीतेः धात्वर्थभविष्यत्ताविषयत्वेन प्रागभावाविषयत्वात्। अन्यथा दिनान्तरोत्पत्स्यमानघटे एतद्दिनवृत्तिप्रागभावप्रतियोगित्वेन 'अद्य घटो भविष्यती'ति धीप्रसङ्गः। भविष्यत्त्वं च प्रतियोगितद्ध्वंसानाधारकालसंबन्धित्वम्। ध्वंसत्वं च प्रागभावानङ्गीकर्तृमते कादाचित्काभावत्वमेव। तदङ्गीकर्तृमतेऽपि प्रतियोग्यजनक-

---

धीसंभवात्। तत्प्रागभावेति। प्रमाप्रागभावेत्यर्थः। घटवतीति। सामान्यधर्मस्यैव प्रतियोगितावच्छेदकतया भासमानस्य प्रतियोग्यंशेऽपि प्रकारत्वावश्यकत्वादित्यादिः। सामान्यावच्छेदेऽपीत्यपिकारेण गगनादाववर्तमानाया व्याप्तेः प्रमेयत्वं नावच्छेदकमतिप्रसक्तत्वात्, वृत्तिमत्त्वावच्छेदेनैव ग्रहणसंभवेन व्यर्थविशेषणत्वाभावात्, वृत्तिमत्प्रमेयत्वावच्छिन्नत्वस्य व्याप्तौ सत्त्वे ग्रहणेऽप्यदोषात्, असत्त्वे ग्रहणस्यापि भ्रमत्वादित्यादि सूचितम्। कादाचित्काभावत्वमिति। कालत्वाव्याप-

SGDF Sri Gargeshwari Digital Foundation

कादाचित्काभावत्वम् । जनकत्वं च स्वरूपसंबन्धविशेषः । न प्रागभावघटितः; प्रागभावस्याजनकत्वापत्तेः, अन्यथात्माश्रयात् । अतः प्रागभावमङ्गीकुर्वतोऽपि तत्प्रत्यक्षत्वं दुर्लभम्, तमनङ्गीकुर्वतस्तु न कापि हानिः । 'इहेदानीं घटो नास्ती'ति प्रतीतिस्तु सामान्यधर्मावच्छिन्नप्रतियोगिताकतत्कालावच्छिन्नयावद्विशेषाभावविषया; समयविशेषस्याप्यभावावच्छेदकत्वात् । अन्यथा 'आद्यक्षणे घटो नीरूप' इत्यादिप्रतीतिर्न स्यात् । अथास्मिन् पक्षे सामान्याभावो न सिद्ध्येदिति—चेत्; प्रागभावाभ्युपगमेऽपि तुल्यमेतत्, सामान्याभावप्रागभावयोः सुन्दोपसुन्दयोरिव परस्परपराहतत्वात् । तथाहि प्रागभावसिद्धौ विशेषाभावस्यापि सामान्यावच्छिन्नप्रतियोगिताकत्वान्न तावन्मात्रप्रमाणकसामान्याभावसिद्धिः, सामान्याभावसिद्धौ च

काभावत्वमित्यर्थः । अखण्डोपाधिरूपं वा न तु प्रागभावप्रतियोग्यभावत्वरूपत्वमिति शेषः । **प्रागभावघटितः** कार्यस्य प्रागभाववत्कालत्वरूपप्राक्कालत्वघटितः । **आत्माश्रयेति** । प्रतियोगिजनकत्वेन च प्रागभावः कल्प्यते । उक्तजनकत्वं च प्रागभावकल्पनात्पूर्वं ज्ञातुमशक्यम्; प्रागभावघटितत्वादतः प्रागभावज्ञप्तिः स्वाधीनेति ज्ञप्तावात्माश्रयेत्यर्थः । **अन्यथेति**—प्रतियोगिमत्यत्यन्ताभावानङ्गीकार इत्यर्थः । **न स्यादिति** । प्रागभावस्यैव नीरूप इति धीविषयत्वे रूपवत्यपि पाकेन जनिष्यमाणरूपप्रागभावमादाय सा स्यादिति शेषः । यद्यपि सामान्याभावोऽप्युक्तधीविषयः संभवति, तथापि विशेषाभावकूटोक्तिरथेत्यादिग्रन्थावतारणायेति बोध्यम् । **तावन्मात्रप्रमाणकेति** । उक्तप्रतियोगिताकत्वधीमात्रप्रमाणकेत्यर्थः । ननु—विशेषाभावप्रतियोगितापि सामान्यरूपेण वाच्या; अन्यथा इदानीं कपाले घटो नास्तीति

SGDF Sri Gargeshwari Digital Foundation

विशेषाभावस्य सामान्यावच्छिन्नप्रतियोगिताकत्वाभावात्, कादाचित्काभावस्य च सामान्याभावत्वायोगात्, न सामान्यधर्मावच्छिन्नप्रतियोगिताकविशेषप्रतीतिमात्रशरणप्रागभावसिद्धिरिति न तदुभयमपि विपश्चितां चेतसि चमत्कारमावहति ।
ननु—यावद्विशेषाभावनिश्चयेऽपि 'रूपं वायुवृत्ति न वा वायू रूपवान्न वे'ति रूपाभावसन्देहात् निश्चिते च संशयायोगाद्यावद्विशेषाभावान्यसामान्याभावासिद्धिः, अत[1] एतावन्त्येव रूपाणीति निश्चयदशायामेतादृशसंशयस्याननुभूयमानत्वेन तदनिश्चयदशायामेवैतादृशः संशयो वाच्यः, तथा च 'रूपत्वं पार्थिवाप्यतैजसरूपत्रितयातिरिक्तवृत्ति भविष्यती'त्यधिकसंभावनया निश्चितेष्वेव संशयः, उक्तसंभावनाविरहसहकृतनिश्चयस्यैव प्रतिबन्धक-

---

प्रतीतौ तद्धटाभावस्य घटत्वावच्छिन्नप्रतियोगिताकत्वेन भानं न स्यात्, न च—तत्र घटसामान्याभावो भातीति—वाच्यम्; सामान्याभावस्य कालानवच्छिन्नस्यैव सर्वत्र भानात्तत्राह—**कादाचित्काभावस्येति** । कालावच्छिन्नतया भासमानस्येत्यर्थः । **सामान्याभावत्वायोगात्** सामान्यावच्छिन्नप्रतियोगिताकत्वाभावात् । सामान्याभावानभ्युपगमे यावद्विशेषाभावेषूक्तप्रतियोगिताकत्वमुक्तधीविषय इत्युक्तम् । तदभ्युपगमेऽपि कदाचित्संसृष्टव्यक्तित्वावच्छिन्नप्रतियोगिताको विशेषाभाव एवोक्तधीविषय इति भावः । अथवा **कादाचित्काभावस्य** कदाचिदेव विद्यमानस्वरूपकाभावस्य । ध्वंसप्रागभावत्वेनाभिमतस्य **सामान्याभावत्वाभावात्** सामान्यावच्छिन्नप्रतियोगिताकत्वाभावात् । तत्र हेतुः प्रतियोगिताकत्वाभावादित्यन्तः । चकारोऽप्यर्थकः, विशेषात्यन्ताभावस्येव कादाचित्काभावस्यापि प्रतियोगिता न सामान्यरूपा[2]वच्छिन्नेति

---

[1] अथ. [2] सामान्यस्वरूपा.

SGDF
Sri Gargeshwari Digital Foundation

त्वादिति—चेन्न; एवं प्रतिबन्धककल्पने मानाभावादुक्तसंभावनाविरहदशायामप्येतादृशसंशयदर्शनाच्च। ननु—यथा यावद्विशेषाभावेभ्योऽतिरिक्तं सामान्याभावो रूपस्य संशयकोटिः, तथा रूपसामान्यमपि यावद्विशेषेभ्योऽतिरिक्तं संशयकोटिर्नाभ्युपगन्तुं शक्यते, तथा च कथं रूपस्य संशयकोटित्वम्? सर्वरूपाभावनिश्चयात्। यदि तु नीलपीताद्यभावत्वेन निश्चयेऽपि रूपाभावत्वेनानिश्चयाद्रूपासंशय इति ब्रूषे, तदा किं सामान्याभावेन; रूपत्वावच्छिन्नप्रतियोगिताकाभावत्वेन संशयसंभवात्, धर्मिकल्पनातो धर्मकल्पनाया लघुत्वेन यावद्विशेषाभावानामेव रूपत्वावच्छिन्नप्रतियोगिताकत्वकल्पनात्, अतो न यत्किंचिदभावमादाय 'घटो नीरूप' इति प्रतीतिप्रसङ्ग इति—चेन्न; यावद्विशेषाभावेषु यद्रूपत्वावच्छिन्नप्रतियोगिताकत्वं तत्प्रत्येकं विश्रान्तम्, व्यासज्यवृत्ति वा। आद्ये यत्किंचिदभावमादाय 'घटो नीरूप' इति प्रतीति प्रसङ्गः। द्वितीये तत्तद्रूपत्वावच्छिन्नप्रतियोगिताकत्वस्याव्यासज्यवृत्तिस्वभावत्वेन तद्व्यतिरिक्तं रूपत्वावच्छिन्नप्रतियोगिताकत्वं व्यासज्यवृत्ति कल्पनीयम्। तद्वरं रूपत्वावच्छिन्नप्रतियोगिताक एक एवाभावः कल्प्यते। ममैकोऽभावः रूपत्वावच्छिन्नप्रतियोगिताकत्वं चेति वस्तुद्वयं कल्प्यम्, तव तु रूपत्वावच्छिन्नप्रतियोगिताकत्वं तस्य च व्यासज्यवृत्तित्वेन बहुष्वभावेषु प्रत्येकं संबन्धा इति बहुकल्पनम्। 'धर्मिकल्पनातो धर्मकल्पनाया लघुत्व' मिति न्यायस्तु कल्पनीयाधिक्यापेक्षः। किंच घटद्वये यावद्विशेषाभावसत्त्वेऽपि

यावत्। विशेषप्रतीतीति। विप्रतीतीत्यर्थः। विरहदशायामिति। विशेषाभावकूटनिश्चयेऽपीति शेषः। प्रत्येकं संबन्धा इति। प्रत्ये

SGDF Sri Gargeshwari Digital Foundation

रूपसामान्याभावबुद्ध्यनुदयात् ऐकाधिकरण्यावच्छेदेनाप्यभावा विशेषणीयाः ; तथाचातिगौरवम् । अपि च व्यासज्यवृत्तिधर्मग्रहे यावदाश्रयग्रहस्तद्भेदग्रहश्च हेतुः ; अगृहीतेषु भिन्नतया वागृहीतेषु वस्त्रादिषु द्वित्वादिबुद्ध्यनुदयात् । तथाच यावदभावतद्भेदाग्रहे प्रथमत एव नीरूप इति धीर्न स्यात् ; व्यासज्यवृत्तिसामान्यधर्मावच्छिन्नप्रतियोगिताकत्वस्याग्रहणात् । अतः सामान्याभावस्य प्रामाणिकत्वात्कथं तत्पराहतिरिति—चेत्, अत्र ब्रूमः—एवं तर्हि सामान्यप्रकारेण विशेषाभावाप्रतीतेर्ज्ञानविशेषप्रागभावो न जानामीति धियो ज्ञानत्वावच्छिन्नप्रतियोगिताको न विषय इति सिद्धं नः समीहितम् । न हि प्रागभावोऽपि कश्चित्सामान्याभावोऽस्ति ; येन तत्प्रतियोगिता सामान्यधर्मेणावच्छिद्येत ; विशेषाभावप्रतियोगिता तु तत्तद्घटत्वादिना विशेषेणावच्छिद्यते । न च तेन तेन रूपेण भविष्यद्घटादि ज्ञातुं शक्यम् ; तज्जन्मानन्तरं तु तत्तद्रूपेण तज्ज्ञानसंभवेऽपि न प्रागभावधीः प्रत्यक्षा स्यात् ; तदानीं प्रागभावासत्त्वात्, प्रत्यक्षस्य विषयजन्यत्वात् । सामान्यप्रकारकज्ञानं च न विशेषाभावज्ञाने हेतुरित्युक्तम् ; प्रतियोगितावच्छेदकप्रकारकप्रतियोगिज्ञानस्याभावत्वप्रकारकाभावज्ञाने हेतुत्वात्, तस्यानुमानगम्य-

---

कावृत्तेः समुदायवृत्तित्वासंभवात्समवायवद्बहुष्वेकस्य संबन्धत्वासंभवाच्च नानापर्याप्तिसंबन्धा वाच्या इत्यर्थः । समवायस्य प्रत्येकानुयोगिकत्वेन नानात्वं पर्याप्तेस्तु तदभावेनैकत्वमित्याशयेन त्वग्रे सामान्याभावं खण्डयिष्यति । **अवच्छेदेन** —विशिष्टत्वेन । **विशेषणीया इति** । अन्यथा पृथिव्यां सर्वं नीलरूपमितिवत् पृथिव्यां रूपं नास्तीत्यपि स्यादिति शेषः । इदंत्वादिनाभावप्रत्यक्षवारणायाह —**अभावत्वप्रकारकेति** । **अभावज्ञाने** अभावप्रत्यक्षे । **हेतुत्वादिति** । अन्यथा नेत्येवा-

SGDF Sri Gargeshwari Digital Foundation

त्वेऽपि 'न जानामी'ति धियः अपरोक्षायास्तद्विषयत्वायोगात्। अव्यभिचारिलिङ्गाद्यभावात्तदनुमानमपि दूरनिरस्तमेव। ननु— 'इदं माभू'दितीच्छाविषयतया तत्सिद्धिः, न; प्रागभावस्य स्वरूपतोऽसाध्यत्वेन प्रतियोगिजनकविघटनेन तत्संबन्धस्येवात्यन्ताभावसंबन्धस्यापि साध्यत्वात्तेनैवान्यथासिद्धेः। अथोत्पन्नस्य द्वितीयक्षणे पुनरुत्पत्त्यभावात्तत्पूर्वक्षणे सामग्र्यभावो वाच्यः; स च प्रागभावाभावादेव, अन्यहेतूनां सत्त्वादिति— चेन्न; सामयिकात्यन्ताभावेनैवान्यथासिद्धेः, उत्पन्नस्यैव स्वोत्पत्तिविरोधित्वाच्च। अपि च सामग्री कार्यसत्त्वे प्रयोजिका न तु तस्याद्यकालसंबन्धरूपोत्पत्तावपि। आद्यकालसंबन्धो हि स्वसमानकालीनपदार्थध्वंसानाधारकालाधारत्वम्। तत्र सामग्री कार्यस्य कालाधारत्वांशमात्रे प्रयोजिका न तु विशेषणांशेऽपि; तस्य तादृक्पदार्थध्वंससामग्रीविरहादेव सिद्धेः। पाकजरूपादिभेदोऽप्यग्निसंयोगभेदात् पूर्वरूपादिध्वंसभेदाद्वा, न तु प्रागभाव-

---

कारकस्यापि प्रत्यक्षस्य दुर्वारत्वादिति शेषः। **साध्यत्वात्**-क्षेमसाधारणसाध्यत्वात्। **सामयिकेति**। समयविशेषावच्छिन्नेत्यर्थः। **उत्पन्नस्येति**। वस्तुतो द्रव्यत्वाद्यवच्छिन्नं प्रति कारणकूटस्याधिकरणीभूतो द्रव्यादिशून्यो यः क्षणस्तदुत्तरक्षणत्वं द्रव्याद्युत्पत्तिव्याप्यमित्येव द्रव्यादेः स्वोत्पत्तिविरोधित्वमिति ध्येयम्। ननु पाकजानां रूपरसगन्धस्पर्शानां भेदः कारणभेदं विनाऽनुपपन्नः कारणान्तराणां पाकादीनामभेदान्नानाप्रागभावरूपकारणं रूपादौ कल्पयतीत्यत आह—**पाकजेति**। **न तु प्रागभावेति**। तयोः क्लृप्तत्वादित्यादिः। यद्यपि रूपाद्यत्यन्ताभावस्य रूपादिहेतुत्वं संभवति, तथापि रूपव्यक्तीनामेकेन तेजःसंयोगादिना जायमानानां मिथो भेदाय तत्तद्ध्वंसहेतुत्वमुक्तम्। एकस्य पूर्वरूपध्वंस-

SGDF
Sri Gargeshwari Digital Foundation

भेदात्, प्रतियोगिभेदं विना प्रागभावभेदायोगाच्च। नाप्युपादानत्वव्यवस्था तत्र मानम्; तन्तुत्वादिनैव तत्सिद्धेः। अन्यथा प्रागभावस्य संबन्धिविशेषोऽपि कुतः सिद्ध्येत्? न च तदत्यन्ताभाववतः कथं तदुपादानत्वम्? संबन्धान्तरेण त्वयाप्यभ्युपगमात्समयावच्छेदतदनवच्छेदाभ्यां वैलक्षण्याभ्युपगमाच्चेत्यलमतिविस्तरेण। एवं सामान्याभावोऽपि गौरवपराहत एव। तथाहि सामान्यावच्छिन्नप्रतियोगिताकत्वं अभावः तस्य च तत्तदधिकरणसंबन्धा इति त्रयं वा कल्प्यताम्, क्लृप्ततत्तदधिकरणसंबन्धानामेकाधिकरणवृत्तित्वावच्छेदेन सिद्धानामभावानां सामान्यावच्छिन्नप्रतियोगिताकत्वं तस्य च व्यासज्यवृत्तित्वमिति द्वयं वा कल्प्यताम्। तत्रोत्तरः पक्ष एव प्रेक्षावद्भ्यो

स्याश्रये बहूनामुत्तररूपाणामुत्पत्तिस्थले तु तेजस्संयोगादीनामेव बहूनां हेतुत्वं कल्प्यत इति भावः। **भेदं** भेदसिद्धिम्। **भेदायोगात्** भेदसिद्ध्ययोगात्। वस्तुतः कारणाभेदेऽपि प्रमाणसिद्धे कार्यभेदे न क्षतिरिति बोध्यम्। **वैलक्षण्येति**। प्रतियोग्यधिकरणानधिकरणवृत्तित्वेत्यर्थः। **त्रयमिति**। तत्तदधिकरणसंबन्धसमुदायत्वेन संबन्धानामेकत्वात्त्रित्वं बोध्यम्। **रोचत इति**। यद्यपि समवायः प्रत्यधिकरणव्यक्ति विशिष्टप्रमानियामकत्वेन प्रत्यधिकरणव्यक्तिकं भिन्नः, तथापि पर्याप्तिः प्रत्येकाधिकरणव्यक्तौ विशिष्टबुद्ध्यनियामकत्वेन न प्रत्येकाधिकरणं भिन्ना। तथाच प्रत्येकानतिरिक्तसमुदायानुयोगिकपर्याप्तेः प्रत्येकानुयोगिकत्वेऽपि समुदितत्वावच्छिन्नाया एकस्या एव तस्याः स्वीकारात् सामान्यावच्छिन्नप्रातियोगिताकत्वस्य सर्वविशेषाभावेष्वेकैव पर्याप्तिः, सामान्याभावस्य तु स्वाधिकरणेषु प्रत्येकं नानाविशेषणता अतिरिक्ताः कल्प्याः। स्वरूपसंबन्धस्य निरस्तत्वादित्यन्त्यपक्ष एव रोचत इति भावः॥

SGDF
Sri Gangeshwari Digital Foundation

रोचते ; आद्यक्षणे 'घटो नीरूप' इति प्रतीतेः सर्वसिद्धत्वात्, यावदाश्रयतद्भेदग्रहस्य द्वित्वादिग्रहे हेतुत्वेऽप्युक्तप्रतियोगिताग्रहे हेतुत्वानभ्युपगमात्, कार्योन्नेयधर्माणां यथाकार्यमुन्नयनात्।

यत्तूक्तप्रतियोगितानिरूपकत्वमव्यासज्यवृत्तिस्वभावतत्तदभावस्वरूपत्वान्न व्यासज्यवृत्तिकं संभवतीति दीधितावुक्तम्, तन्न युक्तम्; बौद्धाधिकारशिरोमणौ विषयतादेः स्वरूपसंबन्धत्वनिरासेनाभावस्वरूपस्य स्वस्मिन्संबन्धत्वासंभवादतिरिक्तसामान्याभावस्वीकारेऽपि तदतिरेकस्योक्तनिरूपकत्वेऽवश्यं वाच्यत्वात्। यदप्यैकाधिकरण्यावच्छिन्नत्वेनाभावा 'रूपं नास्ती'त्यादिधीविषया वाच्याः; अन्यथा पृथिव्यां यावन्ति नीलरूपाणीत्यादिवत् पृथिव्यां न रूपमित्यादिकमपि वाक्यं योग्यं स्यादिति, तदपि न युक्तम्; यावन्नीलत्वावच्छिन्नाधेयतायाः पृथिव्यनिरूपितत्वात्, नीलत्वाद्यवच्छिन्नाधेयत्वस्यैव पृथिवीनिरूपितत्वेन यावन्नीलेषु दृष्टान्ते बोधात्, दार्ष्टान्तिके तादृशप्रत्ययादर्शनेन रूपत्वाद्यवच्छिन्नप्रतियोगिताकत्वावच्छिन्नाधेयताबोध्यं[1] प्रत्येव पृथिव्यां रूपं नेत्यादिवाक्ये[2] साकांक्षत्वस्य कल्पनात्[3]। **सिद्धत्वादिति।** तथाच सामान्यरूपेणात्यन्ताभावे समयविशेषावच्छिन्नवृत्तिके न विवादः; नञः स्वसमभिव्याहृतपदार्थतावच्छेदकरूपेणात्यन्ताभावबोधकत्वस्य व्युत्पन्नत्वेन नीरूपमित्यादिवाक्यस्य तदावश्यकत्वात्, अन्यथा निर्घटं सघटमित्याद्यापत्तेः। एवं च सामान्यरूपेण विशेषस्य प्रागभावादिः समया[4]वच्छिन्नत्वेनेह कपाले इदानीं घटो नास्तीत्यादौ विषय इति यत्परेणोक्तं तदपास्तमिति भावः। **ग्रहे** निरूपकत्वग्रहे। **अनभ्युपगमादिति।** न चोक्तप्रतियोगिताकत्वान्यव्यासज्यवृत्तिप्रत्य-

---

[1] बोधं-**ग.** [2] वाक्यस्य-**ग.** [3] साकाङ्क्षत्वकल्पनात्-**ग.** [4] समवाया-**ग.**

SGDF
Sri Gargeshwari Digital Foundation

नचैवमतिलाघवात् क्लृप्तानामधिकरणानामेवाभावधीहेतुत्वमस्तु, किं विशेषाभावैरपीति—वाच्यम् ; अस्माकमिष्टापत्तेः, घटाभावो नेत्यादावतिरिक्ताभावस्य त्वयाप्यनभ्युपगमेन भावस्याप्यभावत्वप्रकारकप्रमाहेतुत्वस्योभयवादिसिद्धत्वात् । यदपि कश्चिदाह—प्रतियोगितावच्छेदकभेदस्याभावभेदानियामकत्वाद्विशेषाभावान्यसामान्याभावसिद्धिः ; अन्यथा अभावभेदासिद्धेः, प्रतियोगिभेदस्याभावभेदकत्वे एकघटप्रतियोगिकस्य प्रागभावादिचतुष्टयस्याभेदप्रसङ्गात्, अवच्छेदकभेदात्तु तद्भेदे न कोऽपि दोषः ; क्वचित्तादात्म्यस्य क्वचित्संसर्गस्य क्वचित्पूर्वापरकालीनतद्घटत्वादेश्च भेदादिति, तन्न ; संसर्गप्रतियोगिविशेषणसाधारणस्यैकस्यावच्छेदकत्वस्य दुर्वचत्वात्, तादात्म्यादेश्च प्रतियोगितावच्छेदकत्वे मानाभावात् । भेदसिद्धिस्तु भाववदभावस्यापि विरुद्धधर्माध्यासादेव । अवच्छेदकभेदस्याभावभेदनियामकत्वं

क्षत्वेन कार्यत्वे गौरवमिति—वाच्यम् ; अनन्तसामान्याभावकल्पनापेक्षया प्रतियोगितानिरूपकत्वान्यत्वनिवेशस्यैव लघुत्वात्, व्यासज्यवृत्तिकत्वस्यानुगतस्य दुर्वचत्वेन शक्तिविशेषस्यैवावच्छेदककोटौ निवेशेनोक्तान्यत्वानिवेशाच्च । **संसर्गस्य**—संयोगादेः । **तद्घटत्वेति** । तद्व्यक्तित्वेत्यर्थः । तत्परिचायकमाह—**पूर्वापरकालीनेति** । **साधारणस्येति** । विशेषणस्य न्यूनाधिकावृत्तेर्नावच्छेदकत्वम् ; संसर्गस्य तु तादृशस्यापि तदिति वैलक्षण्यात्तयोर्भेद इति भावः । **तादात्म्यादेश्चेति** । तादात्म्यं भेदस्य तत्तद्व्यक्तित्वं ध्वंसादेः प्रतियोगितायां नावच्छेदकम् ; मानाभावात्, संयोगादिकमपि नावच्छेदकम् ; संयोगेन घटो नास्तीत्यादौ संयोगाद्यभावभानस्योक्तत्वात् । एवं प्रतियोगिविशेषणमपि नावच्छेदकम् ;

SGDF Sri Gargeshwari Digital Foundation

लिङ्गविधया तज्ज्ञापकत्वमेव वाच्यम्; न तु तज्जनकत्वम्, तच्च न; विपक्षबाधकतर्काभावेन सामानाधिकरण्याभावेन च व्याप्तेरेवासिद्धेः। अत एव तदितरधर्मावच्छिन्नप्रतियोगिताकत्वं तदवच्छिन्नप्रतियोगिताकान्यत्वव्याप्यामित्यपि निरस्तम्। एवं चावृत्तीनां गगनादीनां समनियतानां वान्येषां धर्माणामेक एवात्यन्ताभावः; युगपद्विनष्टानामुत्पन्नानां वा समानदेशानामसति बाधके एक एव ध्वंसः प्रागभावो वा; व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकोऽपि चेदभावः प्रामाणिकः, तदा तस्यैकस्यैव प्रतियोगिताः सर्वैरेव व्यधिकरणैः सर्वैश्च समानाधिकरणैः सबंधैरेवावच्छिद्यन्ताम्, आकाशाभाव एव वा तथास्ताम्; एकेनैवोपपत्तावभावभेदकल्पने मानाभावात्। न चैवमेक एव जगतीतले भवत्वभावः, स एव तत्तदवच्छेदकदेशकालादिभेदेन तत्तद्व्यवहारभेदं जनयिष्यतीति किमधिककल्पनयेति—वाच्यम्; उपपद्यते चेदस्तु। प्रकृते तु न बाधकं किंचित्। अत एव वैशेषिकाणां स्वाभ्युपगतकालपदार्थस्यैव सर्वव्यवहारहेतुत्वोपपत्तौ

प्रतियोगिताविशेषसंबन्धेन मण्यादिमदभावादेः कारणत्वादिसंभवादिति भावः। **सामानाधिकरण्याभावेनेति**। यत्र यत्रावच्छेदकभेदः तत्राभावभेद इत्यत्राभावे व्यभिचारात्, यत्र यत्रैकावच्छेदकभिन्नान्यावच्छेदकत्वं तत्रैकाभावभिन्नापराभावत्वमिति वाच्यम्; तथाच साध्यहेत्वोरसामानाधिकरण्यमिति भावः। **बाधके**—मूलाग्रादिरूपावच्छेदकभेदादिरूपे। **एक एवेति**। अभावांशे प्रतीतेरनुगताकारत्वायेदम्, तदनपेक्षायां तु तत्तदधिकरणेष्वेवाभावत्वं पूर्वोक्तं युक्तम्। **उपपद्यते चेदिति**। रूपत्वाद्यवच्छिन्नप्रतियोगिताकत्वस्यावच्छेदकता बाधा-

SGDF
Sri Gangeshwari Digital Foundation

न पदार्थान्तरसिद्धिरित्यद्वैतवादिनो वदन्ति । तदेवं 'अहमज्ञ' इति ज्ञानस्याभावज्ञानसामग्रीविलक्षणसामग्रीजन्यत्वादभावविलक्षणविषयत्वं सिद्धम् ॥

एवं 'त्वदुक्तमर्थं न जानामी' ति प्रत्यक्षस्यापि । ननु—साक्षात्त्वदुक्तार्थविषयं प्रमाणज्ञानं मयि नास्तीत्येतद्विषयकमुदाहृतज्ञानम् । तच्च न साक्षादर्थविषयम्; प्रमाणज्ञानावच्छेदकतयार्थस्य भानात्, अतो न व्याघात इति चेन्न; साक्षात्त्वदुक्तार्थमवेत्य हि तदभावो ग्राह्यः । तज्ज्ञानं च न साक्षिणा; स्वस्मिंस्तादृक्प्रमाणज्ञानाभावात्, अन्यनिष्ठं तु शब्दादिना ग्राह्यम्। शब्दादिश्च त्वदुक्तार्थं बोधयन्नेव तद्विषयत्वं ज्ञाने बोधयेत् । तथाच प्रथमतस्त्वदुक्तार्थविषयकं साक्षादेव

दा[1]ववश्यं कल्प्या; तथाच किमपराद्धं वाय्वादिमात्रवृत्त्यभावे[2] । नच—तस्यातिरिक्तसंबन्धादिकल्पने गौरवमिति—वाच्यम्; तस्यामपि तस्य तुल्यत्वादिति भावः । **सिद्धिः** तात्त्विकत्वम् । कालस्य तात्त्विकत्वेन सर्वदृश्यसंबन्धित्वेन च पराभ्युपगतस्य (पराभ्युपगत) ज्ञानस्थानीयज्ञेयानां प्रकार[3]रूपतास्वीकारेणोपपत्त्या स्थिरतात्त्विकज्ञेयपदार्थकल्पने मानाभाव इति भावः । **साक्षात्त्वदुक्तार्थविषयमिति** । स्वविषयज्ञानं प्रत्याविशेषणीभूतः त्वदुक्तार्थो विषयितासंबन्धेन यत्र ज्ञाने तदित्यर्थः । **तदभावः** उक्तज्ञानाभावः । **तज्ज्ञानं** उक्तज्ञानस्य ज्ञानं अर्थम् । **त्वदुक्तार्थं बोधयन्निति** । त्वदुक्तार्थज्ञानवानयमित्यादिवाक्यजन्यबोधोऽर्थस्त्वत्त्वदुक्त इत्यवान्तरवाक्यार्थबोधपूर्वको वाच्यः; अन्यथा तस्य विशिष्टवैशिष्ट्यबोधत्वा[4]संभवात् । न च—भावरूपाज्ञानप्रत्यक्षस्येवोक्तज्ञानाभावप्रत्यक्षस्यापि 'विशेष्ये विशेषण'मित्यादिरीत्या वाच्यत्वात्तन्मूलं शाब्दज्ञानमपि

---

[1] वाय्वादा–ग. [2] भावेन–ग. [3] प्रकाश–ग. [4] बोधकत्वा–ग.

SGDF Sri Gargeshwari Digital Foundation

ज्ञानमागतमिति तन्निषेधे न कुतो व्याघातः? अत एव विशेषस्य स्वरूपतो ज्ञानेऽपि विशेषप्रकारकज्ञानाभावो न व्याहत इत्यपास्तम्, करतलामलकज्ञाने स्वविषयव्यावर्तकधर्मविषयत्वं प्रसिद्धमिह निषिध्यत इत्यपि न; त्वदुक्तत्वस्यापि मदुक्ताद्व्यावर्तकत्वेन सामान्यतो व्यावर्तकधर्मविषयत्वस्य निषेद्धुमशक्यत्वात्। नन्ववच्छेदकतया विशेषज्ञाने जातेऽपि न व्याहतिः। तथा हि—न हि विशेषज्ञानाभावस्त्वदुक्तार्थविषयकज्ञानाभावो वात्र प्रतीयते; किंतु त्वदुक्तार्थविशेष्यकविशेषप्रकारकज्ञानाभावः, तत्र च त्वदुक्तार्थविशेष्यकविशेषप्रकारकज्ञानत्वेन प्रतियोगिज्ञानेऽपि तादृक्प्रकारकतद्विशेष्यकज्ञानाभावसंभवः; अस्य ज्ञानस्य ज्ञाने विशेष्ये विशेषप्रकारकत्वप्रकारकत्वात्, यत्रापि त्वदुक्तविशेषं न जानामीत्यभिलापः, तत्राप्येवमेव व्याहत्यभावः कथं-

---

समूहालम्बनप्रत्येकपदार्थोपस्थित्या तथैवास्त्विति—वाच्यम्; अभावप्रत्यक्षस्य तद्रीत्या केनाप्यस्वीकारात्। न च—त्वदुक्तार्थप्रमात्वादिना स्मरणात्तेन रूपेणाभावप्रत्यक्षमिति—वाच्यम्; त्वदुक्तार्थत्वस्याननुभवे तद्विशिष्टप्रमात्वेन पूर्वानुभवायोगात्। अत एव त्वदुक्तार्थस्मृत्या त्वदुक्तार्थप्रमात्वेनानुमानादेरप्यसंभवः; त्वदुक्तार्थे पूर्वाननुभूते तदसंभवात्। तज्जन्मान्तरीयसंस्कारादिकल्पनापेक्षयोक्तप्रत्यक्षस्य भावरूपाज्ञानविषयकत्वस्यैव युक्तत्वादिति भावः। **अत एव**—विशेषप्रकारकज्ञाने ज्ञेये विशेषप्रकारकज्ञानस्यावश्यकत्वादेव। **स्वरूपतो** विशेष्यतया। **अशक्यत्वादिति**। त्वदुक्तान्यव्यावर्तकनिवेशेऽपि त्वदुक्तं नीलघटादिकं न जानामीत्यत्र नीलत्वघटत्वादिरूपव्यावर्तकविषयकत्वेन विरोधात्, तदन्यत्वस्यापि निवेशे नीलघटत्वादिना निश्चयस्थलेऽपि नीलघटादि न जानामीति स्यात्, इष्टापत्तावनुभवविरोधात्, स्वपदार्थाननुगमेन स्वविषयव्यावर्तकधर्माज्ञानकाले प्रतियोग्यप्रसिद्धेश्चाशक्यत्वमिति भावः।

SGDF
Sri Gargeshwari Digital Foundation

चिदुन्नेयः। न च—यत्रोक्तप्रतियोग्यप्रसिद्धिः, तत्र कथमभावप्रतीतिरिति—वाच्यम्; समवेतवाच्यत्वं नास्तीत्यत्रेव विशेष्ये विशेषणाभावविषयत्वेन व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावविषयत्वेन वोपपत्तेरिति—चेन्न; अनुभवविरोधात्, विशेषज्ञानाभावस्य त्वदुक्तार्थज्ञानाभावस्य वा अनभ्युपगमे तद्विषयज्ञानसत्त्वेन तद्व्यवहारापत्तेश्च। न चैवं दृश्यते। स्वतः प्रामाण्यमते तु तत्प्रकारकत्वे तद्विशेष्यकत्वे च गृह्यमाणे तद्वत्त्वग्रहणस्यावश्यकतया तदंशे तत्प्रकारकतद्विशेष्यकत्वस्य तादृशप्रतियोगि-

---

कथंचिदिति। विशेषनिष्ठाज्ञानावच्छिन्न[1]विषयताकज्ञानाभावो विषयः, प्रतियोगिज्ञाने तु विशेषत्वेन विशेषभानमिति भावः। **विशेष्ये विशेषणाभावेति।** त्वदुक्तार्थज्ञाने विशेषप्रकारकत्वस्य विशेषप्रकारकज्ञानादौ त्वदुक्तार्थविषयकत्वादेर्वाऽभावेत्यर्थः। **अनुभवविरोधात्।** त्वदुक्तार्थविशेषविशेषिताज्ञान[2]विरोधित्वेनानुभवस्यापलापापत्तेः। **अनभ्युपगम इति।** त्वदुक्तार्थं न जानामीति धीकाल इत्यादिः। **दृश्यत इति।** तादृशाभावस्याभ्युपगमे तु प्रतियोग्यज्ञानादेव तव नोक्तानुभवः; मम तु निर्विघ्नः स इति शेषः। **तद्वत्त्वग्रहस्येति।** तदंश इत्यग्रेऽन्वयः। त्वदुक्तार्थांशे विशेषप्रकारकग्रहस्येत्यर्थः। तत्प्रकारकतद्विशेष्यकत्वस्य विशेषप्रकारतानिरूपितस्य त्वदुक्तार्थविशेष्यत्वस्य प्रतियोगिज्ञाने उक्तविशेष्यत्ववत्त्वेन ज्ञानस्य ज्ञाने संभवादिति। न च—विद्यमान एव ज्ञाने प्रमात्वस्य साक्षिणा मन्मते ग्रहादविद्यमानज्ञानस्योक्तविशेष्यत्ववत्त्वेन ग्रहे न तदंशे तत्प्रकारक इति—वाच्यम्; अविद्यमानस्याप्युक्तविशेषत्ववत्त्वेनेव प्रमात्वेनापि पूर्वानुभवसत्त्वे स्मृतिसंभवात्, विशेष्यविशेषणयोरुपस्थितिसत्त्वे विशिष्टबुद्धेः

---

[1] निष्ठानवच्छिन्न—ग. [2] विशेषितज्ञान—ग.

SGDF
Sri Gargeshwari Digital Foundation

ज्ञाने संभवात् स्पष्ट एव व्याघातः, भावरूपाज्ञानपक्षे तु सर्वस्यापि साक्षिवेद्यतया न व्याघात इत्युक्तम् । तदेवं 'त्वदुक्तमर्थं न जानामी'ति प्रत्यक्षं भावरूपज्ञानविषयमिति सिद्धम् ॥

एवं 'एतावन्तं कालं न किंचिदवेदिष'मिति परामर्शसिद्धं सौषुप्तं प्रत्यक्षमपि भावरूपाज्ञानविषयमेव । ननु—परामर्शः किमनुमानं, किं वा स्मरणम् । आद्ये ज्ञानाभाव एवानुमीयताम्, किं भावरूपाज्ञानेन ; तथाहि—संप्रतिपन्नोदयास्तमयकालवद्विवादपदयोरप्युदयास्तमययोरन्तरालकालमनुमाय तत्कालमहं ज्ञानाभाववान्, अवस्थाविशेषवत्त्वात्, ज्ञानसामग्रीविरहवत्त्वात्, तुल्ययोगक्षेम आत्मादौ स्मर्यमाणेऽपि तद्वत्तया नियमेनास्मर्यमाणत्वाद्वेति प्रयोगसंभवात्, द्वितीये तु नास्त्युपपत्तिः; संस्कारासंभवात्, विनश्यदेव हि ज्ञानं संस्कारं जनयति ; विना व्यापारं व्यवहितकार्यजननाक्षमत्वात् । अविनश्यता तु

संभवात्, प्रमात्वाग्रहेऽपि तदंशे तत्प्रकारकत्वे बाधकाभावादिति भावः । परतः प्रामाण्यमते क्वचित्प्रामाण्यसंशयस्योपपत्तये प्रथमानुव्यवसायसामग्र्यादेः प्रामाण्यग्रहप्रतिबन्धकत्वकल्पनात्स्वतः प्रामाण्येत्युक्तम्। 'घटं जानामी'त्यत्रेव 'तदुक्तं[1] घटं न जानामी'त्यत्र स्वरूपतो घटत्वं भाति, घटश्च तेन रूपेण विशेषणम्, तथाच तेन रूपेण ज्ञानस्य कारण[2]स्यापेक्षायां त्वदुक्तार्थविशेषं न जानामीत्यत्रापि स्वरूपतो विशेषस्य भानात्स्वरूपतस्तज्ज्ञानस्यापेक्षायां च व्याघातो गूढ इति सूचयति—**स्पष्ट इति** । **तत्कालमहं** तत्कालावच्छिन्नोऽहम् । **तद्वत्तया** ज्ञानवत्तया । **नियमेन** सर्वदा । स्मर्यमाणेऽपीत्यन्तं 'यदि तत्कालमहं ज्ञानवान् स्यां तदा तद्वत्तया स्मर्यमाणः स्या' मित्यादितर्क-

---

[1] त्वदुक्तघटं न जानामीत्यत्रेव त्वदुक्तं—**ग.** [2] तज्ज्ञानकारण—**ग.**

SGDF
Sri Gargeshwari Digital Foundation

तेन स्वयमेव तत्कार्यस्य जनयितुं शक्यत्वात् किमिति संस्कारो जन्येत? न हि संस्कारोऽपि प्रत्यक्षः, येन कार्यान्यथानुपपत्तिमन्तरेणाप्यभ्युपेयते; सौषुप्तं चानाद्यज्ञानोपरक्तं साक्षिचैतन्यरूपं ज्ञानं स्वतो वा उपाधितो वा न विनश्यतीति संस्कारं कथं जनयेत्? तदभावात्कथं स्मर्येत? अस्मर्यमाणं वा कथं प्रमाणत्वेनोदाह्रियेतेति—चेत्, न तावदनुमानं तत्र संभवति; हेतोः पक्षविशेषणस्य चाज्ञानात्। न हि ज्ञानाभावमन्तरेणावस्थायां विशेषो वक्तुं शक्यः। ज्ञानसामग्रीविरहश्च ज्ञानाभावानुमेयत्वेनान्योन्याश्रयग्रस्तः। न चेदानीन्तनेनेन्द्रियप्रसादेन पूर्वकालीनं तदुपरममनुमाय सामग्रीविरहानुमानम्; इन्द्रियप्रसादस्य सुखानुभवहेतुकस्य तदुपरमहेतुकत्वासिद्धेः। निय-

---

ज्ञापनाय, न तु हेतौ प्रविष्टम्। **किमितीति**। स्मृतेः स्मृतित्वादेवानुभवेन स्वयमेव[1] जनयितुमशक्यत्वात् संस्कारः स्मृत्युपधायकतया सार्थकः, ज्ञापनस्य[2] नाशे सति तु स एव संस्कारो लाघवादिति नेदं पुरोक्तं[3] युक्तमिति ध्येयम्। **स्मर्येतेति**। अज्ञानमित्यादिः। **वक्तुं शक्य इति**। नच–प्राज्ञपरिष्वङ्गरूपा सुषुप्तिः श्रुत्यैव बोध्यत इति वाच्यम्; सौषुप्तानुभवसिद्धस्यैव श्रुत्याऽनुवादात्, श्रुत्यप्रतिसन्धानकालेऽपि न किंचिदवेदिषमिति प्रत्ययाच्च। **सुखानुभवेति**। सुषुप्तावपि स्वरूपसुखानुभवोऽस्तीति स एव प्रसादहेतुः। न च—स्वरूपसुखानुभवस्य जागरेऽपि सत्त्वादिन्द्रियोपरमकालीनस्यैव तस्य प्रसादहेतुत्वमिति—वाच्यम्; स्वरूपसुखाकारवृत्तेः प्रसादहेतोः समाध्युत्तरकाले चित्तावैयग्र्यकाले च सत्त्वेऽपि प्रसादस्यापि तदा सत्त्वादुक्तविशेषणादानात्सुखानुभवोत्तरकालीनत्वस्यैव प्रसादत्वेन तत्रेन्द्रियोपरमस्याप्रयो-

---

[1] स्मृतित्वेनानुभवस्य स्वयमेव–ग. [2] ज्ञानस्य–ग. [3] परोक्तं–ग.

SGDF
Sri Gargeshwari Digital Foundation

मेनास्मर्यमाणत्वं च यथाश्रुतं वा सुषुप्तिकालावच्छेदेनेति वा। आद्ये असिद्धिः। द्वितीये तूपेक्षणीयज्ञानाभावो न सिद्ध्येत्,

---

जकत्वात्, तन्मात्रस्य प्रयोजकत्वे तूक्तकाले प्रसादो न स्यात्, मरणकाले च स्यात्। न च—स्वरूपसुखाकारवृत्तावितरवृत्त्यभावस्य हेतुत्वात्सैव तत्रानुमापिकेति—वाच्यम्; तस्या जागरे एकाग्रमनोवृत्तिसत्त्वेऽपि सत्त्वात्। एवं (च) वैषयिकसुखानुभवादेवं[1] प्रसाद इति भ्रान्तिरिति भावः। **सुषुप्तिकालावच्छेदेनेति**। नियमेत्याद्यनुषज्यते, सुषुप्तिकालावच्छिन्नज्ञानत्वेना[2]स्मर्यमाणत्वमित्यर्थः। **असिद्धिरिति**। यद्यपि सुषुप्तिकालावच्छिन्नोऽहं पक्षः, तथापि तस्य ज्ञानवत्त्वेन भ्रान्त्या स्मर्यमाणत्वमस्त्येवेति भावः। **द्वितीयेत्विति** तु शब्दादसिद्धिर्व्यवच्छिद्यते; सुषुप्तिमात्रस्याव्यावर्तकतया पक्षीभूताहमर्थसुषुप्तेरेव निवेश्यतया पक्षस्य तदीयसुषुप्तिकालीनज्ञानवत्त्वेनानुभवितुमशक्यतया उक्तज्ञानवत्त्वेनाहार्यज्ञानस्यानुभवत्वस्वीकारेऽपि तस्याकारणतया च पुरुषान्तरस्यैव तेन रूपेण स्मर्यमाणत्वात्। नचैवं—सुषुप्तिकालीनाहमर्थस्यैव पक्षतया तस्य ज्ञानवत्त्वेनानुभवासंभवादाद्यपक्षेऽपि नासिद्धिरिति—वाच्यम्; सुषुप्तिकालस्य तद्व्यक्तित्वेनैव पक्षे निवेशात्। तथाच सुषुप्तेर्ज्ञानसामान्याभावरूपतया स्वीयज्ञानाभावकालीनाहमर्थो ज्ञानवानिति ज्ञानस्याहार्यत्वेऽपि तद्व्यक्तिमानहमर्थो ज्ञानवानिति धीरनाहार्यैव। हेतावपि तथा निवेशे द्वितीयेऽप्यसिद्धिर्बोध्या। नच—जाग्रत्कालीनेऽहमर्थे ज्ञानाभावासत्त्वाद्व्यभिचारोऽपि कुतो नोक्त इति—वाच्यम्; स्वसुषुप्तिकालीनज्ञानप्रतियोगिकाभावस्य साध्यत्वमिति भावात्। **उपेक्षणीयेति**। यः स्वकीयसुषुप्त्यादिरूपयत्कालीनयद्विषयकज्ञानवत्त्वेन न स्मर्यते, स तत्कालीनतद्विषयकज्ञानप्रतियोगिकाभावस्याश्रयः, यथाऽहं

---

[1] देव–ग. [2] ज्ञानवत्त्वेना–ग.

SGDF Sri Gargeshwari Digital Foundation

तत्रैव व्यभिचारश्च। न च—तर्हि प्रातरनुभूतचत्वरे गजज्ञानाभावज्ञानं कथमिति—वाच्यम्; ज्ञानानुपलब्ध्यैवेत्यत्रेहि। अनुपलब्धिज्ञानं च भावरूपाज्ञानेन लिङ्गेन। तथाहि—पूर्वकालेऽहम्, गजज्ञानाभाववान्, गजाज्ञानवत्त्वात्, यन्नैवं तन्नैवम्, यथा गजज्ञानवानहमिति, एवं सर्वत्राज्ञानस्य ज्ञानाभावव्याप्यत्वेन तदनुमापकत्वम्। न च—सुषुप्तिकाले ज्ञानाभावानुमानार्थं भावरूपाज्ञानमिव रागाभावानुमानार्थं द्वेषोऽपि स्वीकरणीयः, तद्विरोधिपदार्थानुभवं विना तदभावानुमानायोगादिति—वाच्यम्; भावरूपाज्ञानेन ज्ञानाभावेन वा रागाभावानुमानसंभवात्, तस्यापि तद्विरोधित्वात्। अथापरोक्षतो ज्ञातेऽज्ञानाभावात्कथं परोक्षज्ञानाभावानुमानम्? सामग्रीविरहादिनेति गृहाण। न चात्राप्यन्योन्याश्रयः; शब्दादीनां योग्यानां योग्यानुपलब्ध्याभावनिश्चयेन परोक्षज्ञानविरहज्ञानं विनैव सामग्रीविरहनिश्चयात्, सुषुप्तिकाले चेन्द्रियादिघटितसामग्रीविरहस्य फलाभावं विना ज्ञातुमशक्यत्वेनान्योन्याश्रयोक्तेः। न च स्मरणपक्षे संस्कारानुपपत्तिः; अज्ञानस्याज्ञानवृत्तिप्रतिबिम्बितसाक्षिभास्यत्वेन वृत्तिनाशादेव संस्कारोपपत्तेः, अज्ञानवृत्तिप्रतिबिम्बितचैतन्यस्यैव साक्षिपदार्थत्वात्। न च—जागरेऽप्य-

---

प्रातर्घटज्ञानवत्त्वेनास्मृतः प्रातर्घटज्ञानाभाववानिति सामान्यतो व्याप्तिर्वाच्या; अन्यथा दृष्टान्ताभावात्, तत्र चापेक्षणीयज्ञानस्यैव निवेशे उपेक्षणीयज्ञानस्याभावो न सिद्ध्येदित्यर्थः। ज्ञानसामान्यनिवेशेऽप्याह—**तत्रैवेति**। उपेक्षणीयज्ञानघटित इत्यर्थः। उपेक्षणीयज्ञानवत्त्वेनास्मृतेऽपि तादृशाज्ञाना[1]भावस्यासत्त्वाद्व्यभिचार इति भावः। **फलाभाव-**

---

[1] तादृशज्ञाना—ग

SGDF
Sri Gargeshwari Digital Foundation

ज्ञानस्य वृत्तिवेद्यत्वे वृत्त्यभावदशायां संशयाद्यापत्तिरिति—वाच्यम्; अज्ञानविषयाज्ञानाभावेन तदयोगात्, संशयादेस्तत्कारणीभूताज्ञानसमानविषयत्वनियमात्। भावत्वादिना संशये त्विष्टापत्तिरेव; भावत्वादेः साक्षिवेद्यत्वाभावेनाज्ञानविषयत्वात्, अज्ञानस्य स्वरूपेणैव साक्षिवेद्यत्वात्। ननु—तदा ज्ञानाभावोऽपि स्वरूपेणैव भासताम्, सप्रतियोगिकत्वेनाभावज्ञान एव प्रतियोगिज्ञानस्य हेतुत्वात्, अन्यथा 'प्रमेय' मिति ज्ञानेऽप्यभावो न भासेतेति—चेन्न; साक्षिणा तावन्न स्वरूपेणाभावावगाहनम्; तस्य साक्षात्साक्ष्यवेद्यत्वात्। नापि शब्दादिना; तदानीं तेषामभावात्। नाप्यनुपलब्ध्या; तस्याः प्रतियोगिज्ञाननिरपेक्षाया अजनकत्वात्। नच—दृष्टाभावान्तरविलक्षणस्वभाव एवायमभाव इति स्वरूपेण साक्षिवेद्योऽस्त्विति—वाच्यम्; निर्विकल्पकबुद्धिवेद्यत्वे भावत्वस्यैवौचित्यात्, अन्यथा परिभाषामात्रापत्तेः। ननु ज्ञानविरोधित्वादेस्तदाननुभवेन 'नावेदिष' मिति तेनाकारेण कथं परामर्शः? न; द्रष्टुर्ह्यन्तःकरणतादात्म्येनाहमुल्लेखस्येव ज्ञानविरोधित्वादेरपि तदैवानुभूयमानत्वेन तदंशे परामर्शत्वानभ्युपगमात्, सुषुप्तिकालीनस्य

मिति। हेतुमिति शेषः। अजनकत्वादिति। अन्यथा तया नेत्येवाकारकज्ञानस्यापत्तिरिति [1] भावः। तदैवेति। सविकल्पकवृत्तेरहङ्कारजन्यत्वेन ज्ञानविरोधित्वसविषयकत्वादिप्रकारकाविद्यावृत्तिर्न सुषुप्तौ जायते। अत एवोक्तं सिद्धान्तबिन्दौ—'अहङ्काराभावाच्च न विशिष्टवृत्ति'रिति। अज्ञानस्वरूपमात्रांशे स्मृत्यैव स्मृतित्वानुभवोपपत्तौ ज्ञानविरोधित्वाद्यंशे स्मृतितन्मूलवृत्तिकल्पने मानाभावेनान्वयव्यतिरेका-

---

[1] स्याप्यापत्तिरिति–ग.

SGDF
Sri Gargeshwari Digital Foundation

द्रष्टुरेव परामृष्टत्वात् । नन्वज्ञानवृत्तिप्रतिबिम्बितचैतन्यरूपस्याज्ञानानुभवस्य जाग्रत्यपि विद्यमानत्वात्कथमज्ञानस्मरणम्? न हि धारावाहिकेष्वनुभवेषु तुल्यसामग्रीकेषु स्मरणव्यवहारः; तथाच धारावाहिकोऽज्ञानानुभव इति वक्तव्यम्, न तु परामर्श इति, सत्यम्; सुषुप्त्याख्यायास्तामस्या अज्ञानवृत्तेर्नाशेन जाग्रति तद्विशिष्टाज्ञानस्य साक्षिणानुभूयमानत्वाभावेन संस्कारजन्याविद्यावृत्त्यैव सुषुप्तिविशिष्टाज्ञानभानात्परामर्शत्वोपपत्तेः, केवलाज्ञानांशे तु तुल्यसामग्रीकत्वाद्धारावाहिकत्वमेव; अत एव कार्योपाधिविनाशसंस्कृतमज्ञानमात्रमेव प्रलयोपमं सुषुप्तिरित्य-

---

भ्यामहङ्कारस्य सप्रकारकवृत्तिसामान्यहेतुता । वस्तुतोऽहङ्कारस्येव ज्ञानविरोधित्वसविषयकत्वादिरूपाणामज्ञानपरिणामानां सुषुप्तौ संस्कारतापन्नत्वेन साक्षिभास्यत्वायोग्यत्वादेव तदा सप्रकारकवृत्त्यभाव इति नोक्तहेतुतापीति ध्येयम् । **परामृष्टत्वात्** स्मर्तृत्वात् । प्रमां प्रत्येव मनसः परिणामित्वेनाविद्यावृत्तिरूपस्मृतेरविद्यामात्रपरिणामित्वेनाविद्योपहितस्य साक्षिण एव तदाश्रयत्वमिति भावः । **अविद्यावृत्त्यैवेति ।** नच—जागरे बाधाभावादागन्तुकदोषाजन्यत्वाच्च सुषुप्तिः स्मृतिर्वा नाविद्यावृत्तिरिति—वाच्यम्; अविद्यावृत्तिसामान्यस्य जागरे बाध्यत्वाद्यनियमात् । ब्रह्मज्ञानान्याबाध्यासु देहात्मैक्यादिगोचरासु चाविद्यावृत्तिषु व्यभिचारात्, सुषुप्तिपूर्वस्वप्नादेरेवागन्तुकदोषत्वसंभवाच्च । **सुषुप्तिविशिष्टाज्ञानेति** । अज्ञानस्य विशिष्टस्वरूपमात्रेत्यर्थः । **भानात्** विषयीकरणात् । **केवलाज्ञानेति**—विशिष्टस्वरूपान्याज्ञानस्वरूपेत्यर्थः । एकैव निर्विकल्पकवृत्तिर्विशिष्टकेवलाज्ञानस्वरूपद्वयविषयिका विशिष्टांशे स्मृतिः केवलांशे त्वनुभव इति भावः । **विनाशसंस्कृतं**—विनाशरूपसूक्ष्मावस्थायुक्तम् । अज्ञानमात्रं तु न

SGDF
Sri Gargeshwari Digital Foundation

भिप्रेत्य वार्तिककारपादैः सौषुप्ताज्ञानस्मरणमपाकृतम् । तथा चोक्तम्—

'न सुषुप्तिगविज्ञानं नाज्ञासिषमिति स्मृतिः !
कालाद्यव्यवधानत्वान्न ह्यात्मस्थमतीतभाक् ॥
न भूतकालस्पृक्प्रत्यक् न चागामिस्पृगीक्षते ।
स्वार्थदेशः परार्थोऽर्थो विकल्पस्तेन स स्मृतः' ॥

इत्याद्यव्याकृतप्रक्रियायाम् । विवरणकारैस्तु—'अभावप्रत्यया-

वृत्तिः ; सुषुप्तिकालमात्रगताया एकस्या वृत्तेः स्वीकार इति भावः । **सुषुप्तिगेति**—सुषुप्तिकालमात्रगतेत्यर्थः । एकैवाविद्यावृत्तिरविद्याविषयिणी सुषुप्त्यादिकालस्थायिनी[1] न तु सुषुप्तिकालमात्रगता काचन वृत्तिः ; यन्नाशात्स्मरणमित्यर्थः । अथवा प्रलये सुषुप्तौ च न वृत्तिरित्याशयेन प्रलयोपममित्युक्तत्वाद्विज्ञानं जन्यज्ञानं सुषुप्तिगं नेत्यर्थः । **कालाद्यव्यवधानत्वात्** सुषुप्तिजाग्रत्कालयोः संस्कारकालव्यवधानाभावात् । ननु—सौषुप्तवृत्तिनाशाभावेऽपि सुखादाविव विषयनाशाद्विषयावच्छिन्नज्ञाननाशात्स्मृतिरस्तु, तत्राह—**न हीति । आत्मस्थं** अज्ञानम् । **अतीतभाक्** अतीतताभाक् । हेतुमाह—**न भूतेति । प्रत्यक्** अज्ञानोपहितसाक्षी । **तेन** उक्तहेतुना । **विकल्पः** न तु स्मृतिरूपो निर्विकल्पः । सः नावेदिषमिति प्रत्ययो विकल्पतां घटयति, यतस्तस्य प्रत्ययस्य **स्वार्थदेशः** स्वार्थाधिकरणकः **परार्थोऽर्थः** विषयः अज्ञानरूपस्वविषयाधिकरणको ज्ञानविरोधित्वादिरूपः परार्थोऽज्ञानभिन्नार्थो विषय इति यावत् । अथवा विकल्पो भ्रमो यतः स्वार्थज्ञाना[2]दिनिष्ठतया परार्थः स्मृतिविषयतायोग्योऽतीतकालो विषय इत्यर्थः ॥

---

[1] कालावस्थायिनी-**ग** [2] स्वार्थाज्ञाना-**ग.**

SGDF
Sri Gargeshwari Digital Foundation

लम्बना वृत्तिर्निद्रे' ति योगसूत्रानुसारेण तमोगुणात्मकावरणमात्रालम्बना काचिद्वृत्तिः सुषुप्तिरित्यभिप्रेत्य तदुपरक्तचैतन्यस्य तन्नाशेनैव नाशात्तत्कालीनाज्ञानानुभवजनितसंस्कारवशेन 'न

अभावपदं कार्यसामान्यध्वंसरूपसंस्कारोपहितार्थकम्, प्रत्ययपदं च कारणपरम्। प्रतियन्ति लीयन्ते कार्याण्यत्रेति व्युत्पत्तेः; तथाच सर्वकार्यसंस्कारोपहितं यत्तमोगुणरूपं स्वपरिणामिकारणं तद्विषयिका वृत्तिरिति सूत्रपदार्थः। अत एव स्वपितिनिरुक्तोपपादने तमोगुणोद्रेक इतीक्षत्यधिकरणे भामत्यां सांख्यमते उक्तं प्रमाणविपर्ययविकल्पस्मृतिरूपपूर्वसूत्रोक्तवृत्त्यन्तराभावकारणतमोगुणालम्बनेति भामतीव्याख्यानमविरुद्धमित्याशयेनाह — **तमोगुणात्मककारणमात्रालम्बनेति।** स्वप्ने तु नोक्तवृत्तिः, मिथ्यानाडीमनःसंयोगमादाय तत्र निद्राव्यवहारः 'गाढमूढोऽहमास' मिति तमोगुणस्यैव स्मरणात्तद्विषयिकैव सा वृत्तिः। यत्त्वभावपदं प्रमासामान्याभावार्थकम्, प्रत्ययपदं साक्ष्यर्थकम्, तथाच प्रमाभावाकारा साक्ष्याकारा च वृत्तिरित्यर्थ इति,[1] तन्न; तादृशवृत्तेर्जागरेऽपि संभवात्। अथाभावमात्राकारेति वाच्यम्, तदपि न; साक्षिसुखाकारत्वस्यापि तत्र स्वीकारात्। अथाभावांशे सप्रतियोगिकत्वाविषयिकेति वाच्यम्, तदपि न; अभावस्वरूपस्य निर्विकल्पानुपपत्तेः, अन्यथा अभावत्वव्याघातात्। अथ प्रत्ययपदेनाभावगतमिदंत्वादिधर्मं विवक्षित्वेदंत्वादिना प्रमाभावविषयिका वृत्तिर्वाच्या, तदपि न; निर्विकल्पकत्वव्याघातात्। न हि सुषुप्तौ सविकल्पं[2] केनाप्यनुभूयते; तदा सर्वस्य कार्यस्य लयेनाभावतद्धर्मादेः संस्कारतापन्नत्वेन साक्षिवेद्यत्वासंभवात्, अन्यथा जीवेशभेदादेरपि तदानीमनुभवापातात्। अभेदस्वरूपमात्रस्यानादित्वेऽपि सप्रतियोगिकत्वा-

---

[1] वृत्तिरिति–ग.　　[2] सविकल्पकं -ग.

SGDF
Sri Gargeshwari Digital Foundation

किंचिदवेदिष' मिति स्मरणमभ्युपेतमिति वार्तिकविवरणयोरप्यविरोधः । अत एवोक्तं वार्तिककारैरुषस्तिब्राह्मणे—

न चेदनुभवव्याप्तिः सुषुप्तस्याभ्युपेयते ।
नावेदिषं सुषुप्तोऽहमिति धीः किं बलाद्भवेत् ॥

दीनामविद्यापरिणामित्वाङ्गीकारात् सविकल्पवृत्तावहङ्कारस्य हेतुत्वाद्वा दृष्टिसृष्टिपक्षे भेदादेरप्यहङ्कारपरिणामत्वाच्च नोक्तानुभव इति तु प्रकृतेऽपि तुल्यमित्याशयेन मात्रपदमुक्तम् । तमोगुणस्वरूपमात्रगोचरत्वमेव सूत्रार्थतया वक्तुं युक्तमिति भावः ॥

इति धीः अज्ञानांशे स्मृतित्वेनानुभूयमाना धीः । **सुषुप्तेति** । धीरित्यन्वयः । सुषुप्तिस्वरूपसुखयोरित्यर्थः । तेन सुषुप्ते नावेदिषमित्याकारत्वे सविकल्पकत्वेऽपि न क्षतिः । उक्तधियोऽज्ञानांशेऽनुभवत्वं वक्तुं शक्यम्, न तु सुषुप्त्यंशे स्वरूपसुखांशे वा; न हि विक्षेपबाहुल्यकाले जागरे तदनुभवः संभवति । न च—कार्यसामान्यसंस्कारेणोपहिते चैतन्याज्ञाने स्वरूपसुखसुषुप्ती, तत्प्रकाशरूपचैतन्यस्योक्तसंस्कारनाशरूपजाग्रदवस्थायां नाशत्वस्वीकारात्तत एव तयोः स्मृतिरिति वाच्यम्; उक्तसंस्कारस्य तदुभयाविषयकत्वात्तदात्मकजाग्रदवस्थायास्तदुभयविषयकसंस्कारत्वासंभवात् । अथोक्तचैतन्यात्मकत्वस्यापि तस्यां स्वीकारात्तत्संभव इति चेन्न; चैतन्यवृत्तिसाधारणविषयत्वस्याभावादनुमित्यादिवृत्तिनाशरूपसंस्कारसाधारण्याय वृत्तिनिष्ठाकाररूपतदुभयविषयताशालिसंस्कारस्य स्मृतिहेतुत्वस्य क्लृप्तत्वात्तदुभयविषयकवृत्तेरावश्यकत्वात् । किंच चैतन्यस्वरूपस्यैव सुखत्वात् जाग्रदादिकालेऽपि तदनुभवप्रयुक्तनिरुपाधिकप्रेमदर्शनात् सुषुप्त्युत्तरमेव सुखमासमिति स्मरणमित्यत्र बीजाभावः, अतः सुखाकारसौषुप्तवृत्तिरावश्यकी; सैवा-

SGDF
Sri Gargeshwari Digital Foundation

इत्यादि । अभिप्रायस्तु वर्णितः । एवंच साक्ष्यज्ञानसुखाकारास्तिस्रोऽविद्यावृत्तयः, सुषुप्त्याख्यैकैव वा वृत्तिरित्यन्यदेतत् । निर्विकल्पकस्यापि स्मरणजनकत्वम् । अहङ्कारोपरागकालीनत्वाभावेन तत्तानुल्लेख इत्यादि सर्वमुपपादितमस्माभिः सिद्धान्तबिन्दौ । तस्मात्सौषुप्तानुभवोऽपि भावरूपाज्ञानविषय इति सिद्धम् ॥

इत्यद्वैतसिद्धौ अज्ञानप्रत्यक्षत्वोपपत्तिः ॥

ज्ञानाकारा सुषुप्तिः, तत्सूक्ष्मावस्थारूपो नाशश्च तदविषयकोऽपि [1]तत्स्मृतिहेतुः, वृत्तिसामान्यस्य स्वस्वविषयस्मृतिहेतुस्वना श[2]प्रतियोगित्वकल्पनात् । ज्ञातत्वेनैव हि सर्वं स्मर्यते, तादृशवृत्तेस्तद्विषयीभूतवृत्त्यन्तरविषयत्वं वा कल्प्यत इति नानवस्था । तथाचैतादृशसुषुप्तौ स्वरूपसुखे चोक्तानुभवो न चेदभ्युपेयते, तदा नावेदिषमिति धीस्तदुभयविषयिका किंनिबन्धनेत्यनेन तदुभयविषयकत्वानुरोधेन सौषुप्तवृत्तिरावश्यकी । ततश्च तस्यामेवाज्ञानविषयकत्वं स्वीकृत्याज्ञानांशेऽप्यनुभूयमानं स्मृतित्वं सुषुप्तिसुखाकारस्मृतेर्नापलपितुं युक्तमित्युक्तमिति ध्येयम् ॥

वर्णित इति । विवरणस्य योऽभिप्राय उक्तः स एव न चेत्यादिवार्तिकस्यापीत्यर्थः । **जनकत्वमिति** । अदृष्टदशरथत्वादिविशिष्टे शक्तिग्रहाद्यनुरोधेन प्रमृष्टविशेषणिकाया आकाशादिपदजन्यायाश्च स्मृतेः स्वीकारादिति शेषः । **तत्तानुल्लेख इति** । तद्देशकालीनत्वरूपतत्तायाः सुषुप्तौ लयेनाहङ्कारकाल एवानुभवात्तत्कालीनानुभवजन्यस्मृतेरेव तद्विषयकत्वमिति भावः ॥

---

[1] तत्स्मृतिहेतु वृत्तिसामान्यस्य स्वस्वविषय स्मृतिहेतुः; वृत्ति–ग. [2] नाशक–ग.

SGDF
Sri Gargeshwari Digital Foundation

अथाज्ञानवादे अनुमानोपपत्तिः.

अनुमानमपि तत्र विवरणोक्तं प्रमाणम्। 'विवादपदं प्रमाणज्ञानम्, स्वप्रागभावव्यतिरिक्तस्वविषयावरणस्वनिवर्त्यस्वदेशगतवस्त्वन्तरपूर्वकम्, अप्रकाशितार्थप्रकाशकत्वात्, अन्धकारे प्रथमोत्पन्नप्रदीपप्रभाव' दिति। अत्र प्रमाणपदं प्रमाणवृत्तेरेव पक्षत्वेन सुखादिप्रमायां साक्षिचैतन्यरूपायामज्ञानानिवर्तिकायां बाधवारणाय। धर्म्यंशप्रमाणवृत्तेरिदमित्याकाराया अज्ञानानिवर्तिकायाः पक्षबहिर्भावाय विवादपदमिति विशेषणम्। विशेषाकारप्रमाणवृत्तिरिति फलितोऽर्थः। परोक्षप्रमाया अप्यसत्त्वावरणरूपप्रमातृगताज्ञाननिवर्तकत्वान्न तदंशेऽपि बाधः। नन्विदमिति प्रमाणवृत्तेरज्ञानानिवर्तकत्वे अज्ञातज्ञापकत्वरूपप्रमात्वेन व्यवहारो न स्यात्, न; इदमाकारभ्रमसंशयादर्शनेन तद्गोचराज्ञानकल्पने मानाभावेन तत्र सुखादिज्ञानवद्यथार्थत्व-

---

तर्कैः सारस्वतै रत्नैश्चन्द्रिकाचन्द्रभूषणैः।
दुरन्तध्वान्तनाशायाज्ञानाध्यक्षोपपादनम्॥

इति गुरुचन्द्रिकायामज्ञानप्रत्यक्षोपपादनम्॥

अथाज्ञानवादे अनुमानोपपत्तिः.

विशेषाकारप्रमाणेति। इदंत्वान्यस्य प्रमेत्यर्थः। प्रमात्वं चेन्द्रियादिजन्यवृत्तिनिष्ठा जातिः। **असत्त्वावरणेति**। स्वविषयविषयकेत्यादिः। **यथार्थत्वेति**। व्यवहारकालाबाध्यविषयकत्वेत्यर्थः।

SGDF
Sri Gargeshwari Digital Foundation

मात्रेण प्रमात्वव्यवहारोपपत्तेः। यदाहुः—

'धर्म्यंशे सर्वमभ्रान्तं प्रकारे तु विपर्यय' इति।

यदि तु भ्रमसंशयाजनकमपि तदाकारमज्ञानमनुभवबलादास्थीयेत, तर्हि सापि पक्षेऽन्तर्भवतु, प्रमाणवृत्तित्वावच्छेदेनैवाज्ञाननिवर्तकत्वानपायात्, तदा च विवादपदमिति विशेषणमनादेयम्। एतस्मिन् पक्षे भ्रमोपादानत्वयोग्यत्वमविद्यालक्षणं द्रष्टव्यम्; भ्रमोपादानत्वस्य धर्म्यंशज्ञाननिवर्त्याज्ञानेऽव्याप्तेरित्यवधेयम्। धारावाहिकबुद्धीनां च तत्तत्कालावच्छिन्नार्थविषयत्वेनाज्ञातज्ञापकत्वमस्त्येव; कालस्य सर्वप्रमाणवेद्यत्वाभ्युपगमात्। अनात्माकारप्रमाणवृत्तीनां च तत्तदवच्छिन्नचैतन्यविषयत्वेन

धर्म्यंशे—इदंत्वांशे। **प्रकारे** इदंत्वान्यांशे। **भ्रमोपादानत्वस्य**—भ्रमोपधायकत्वस्य। **कालावच्छिन्नेति**। कालविशिष्टेत्यर्थः। न च—तत्तत्क्षणानामतीन्द्रियत्वात् स्थूलकालस्य च प्रथमज्ञानेन गृहीतत्वेन द्वितीयादिज्ञानानां तद्विषयकाज्ञाननिवर्तकत्वासंभव इति—वाच्यम्; स्वोत्पत्तिकालोत्पन्नस्थूलकालस्यैव तत्तज्ज्ञानग्राह्यत्वात्, क्षणानामतीन्द्रियत्वे मानाभावाच्च। न च—परोक्षापरोक्षयोर्घटादिज्ञानयोस्तुल्यविषयकत्वानुभवादपरोक्षे कालो[1] न विषय इति—वाच्यम्; परोक्षस्यापि तद्विषयकत्वस्य परिच्छिन्नत्वहेतूपपादनेऽस्माभिरुपपादितत्वात्। धारास्थले वृत्त्यैक्यस्वीकारे तु नोक्तशङ्कापि; प्रकृतानुमानादेव लाघवसहकृतात्तदैक्यसिद्धिसंभवेन तार्किकादीन्प्रत्यपि प्रकृतानुमानसंभवात्। **सर्वप्रमाणेति**। परिच्छिन्नत्वहेतूपपादने विवेचितमेतत्। **तत्तदवच्छिन्नेति**। ज्ञानसामान्यसामग्र्या एव ज्ञानेषु तत्तदर्थोपहितचिद्रूपसत्ताविषयकत्वे प्रयोजकत्व-

---

[1] अपरोक्षकालो—**ग.**

SGDF
Sri Gargeshwari Digital Foundation

अथाज्ञानवादे अनुमानोपपत्तिः.

अनुमानमपि तत्र विवरणोक्तं प्रमाणम्। 'विवादपदं प्रमाणज्ञानम्, स्वप्रागभावव्यतिरिक्तस्वविषयावरणस्वनिवर्त्यस्वदेशगतवस्त्वन्तरपूर्वकम्, अप्रकाशितार्थप्रकाशकत्वात्, अन्धकारे प्रथमोत्पन्नप्रदीपप्रभाव' दिति। अत्र प्रमाणपदं प्रमाणवृत्तेरेव पक्षत्वेन सुखादिप्रमायां साक्षिचैतन्यरूपायामज्ञानानिवर्तिकायां बाधवारणाय। धर्म्यंशप्रमाणवृत्तेरिदमित्याकाराया अज्ञानानिवर्तिकायाः पक्षबहिर्भावाय विवादपदमिति विशेषणम्। विशेषाकारप्रमाणवृत्तिरिति फलितोऽर्थः। परोक्षप्रमाया अप्यसत्त्वावरणरूपप्रमातृगताज्ञाननिवर्तकत्वान्न तदंशेऽपि बाधः। नन्विदमिति प्रमाणवृत्तेरज्ञानानिवर्तकत्वे अज्ञातज्ञापकत्वरूपप्रमात्वेन व्यवहारो न स्यात्, न; इदमाकारभ्रमसंशयादर्शनेन तद्गोचराज्ञानकल्पने मानाभावेन तत्र सुखादिज्ञानवद्यथार्थत्व-

---

तर्कैः सारस्वतै रत्नैश्चन्द्रिकाचन्द्रभूषणैः।
दुरन्तध्वान्तनाशायाज्ञानाध्यक्षोपपादनम् ॥

इति गुरुचन्द्रिकायामज्ञानप्रत्यक्षोपपादनम् ॥

अथाज्ञानवादे अनुमानोपपत्तिः.

विशेषाकारप्रमाणेति। इदंत्वान्यस्य प्रमेत्यर्थः। प्रमात्वं चेन्द्रियादिजन्यवृत्तिनिष्ठा जातिः। **असत्त्वावरणेति।** स्वविषयविषयकेत्यादिः। **यथार्थत्वेति।** व्यवहारकालाबाध्यविषयकत्वेत्यर्थः।

SGDF
Sri Gargeshwari Digital Foundation

मात्रेण प्रमात्वव्यवहारोपपत्तेः । यदाहुः—

'धर्म्यंशे सर्वमभ्रान्तं प्रकारे तु विपर्यय' इति ।

यदि तु भ्रमसंशयाजनकमपि तदाकारमज्ञानमनुभवबलादास्थीयेत, तर्हि सापि पक्षेऽन्तर्भवतु, प्रमाणवृत्तित्वावच्छेदेनैवाज्ञाननिवर्तकत्वानपायात्, तदा च विवादपदमिति विशेषणमनादेयम् । एतस्मिन् पक्षे भ्रमोपादानत्वयोग्यत्वमविद्यालक्षणं द्रष्टव्यम्; भ्रमोपादानत्वस्य धर्म्यंशज्ञाननिवर्त्याज्ञानेऽव्याप्तेरित्यवधेयम् । धारावाहिकबुद्धीनां च तत्तत्कालावच्छिन्नार्थविषयत्वेनाज्ञातज्ञापकत्वमस्त्येव; कालस्य सर्वप्रमाणवेद्यत्वाभ्युपगमात् । अनात्माकारप्रमाणवृत्तीनां च तत्तदवच्छिन्नचैतन्यविषयत्वेन

धर्म्यंशे—इदंत्वांशे । **प्रकारे** इदंत्वान्यांशे । **भ्रमोपादानत्वस्य**—भ्रमोपधायकत्वस्य । **कालावच्छिन्नेति** । कालविशिष्टेत्यर्थः । न च—तत्तत्क्षणानामतीन्द्रियत्वात् स्थूलकालस्य च प्रथमज्ञानेन गृहीतत्वेन द्वितीयादिज्ञानानां तद्विषयकाज्ञाननिवर्तकत्वासंभव इति—वाच्यम्; स्वोत्पत्तिकालोत्पन्नस्थूलकालस्यैव तत्तज्ज्ञानग्राह्यत्वात्, क्षणानामतीन्द्रियत्वे मानाभावाच्च । न च—परोक्षापरोक्षयोर्घटादिज्ञानयोस्तुल्यविषयकत्वानुभवादपरोक्षे कालो[1] न विषय इति—वाच्यम्; परोक्षस्यापि तद्विषयकत्वस्य परिच्छिन्नत्वहेतूपपादनेऽस्माभिरुपपादितत्वात्। धारास्थले वृत्त्यैक्यस्वीकारे तु नोक्तशङ्कापि; प्रकृतानुमानादेव लाघवसहकृतात्तदैक्यसिद्धिसंभवेन तार्किकादीन्प्रत्यपि प्रकृतानुमानसंभवात्। **सर्वप्रमाणेति**। परिच्छिन्नत्वहेतूपपादने विवेचितमेतत् । **तत्तदवच्छिन्नेति** । ज्ञानसामान्यसामग्र्या एव ज्ञानेषु तत्तदर्थोपहितचिद्रूपसत्ताविषयकत्वे प्रयोजकत्व-

---

1 अपरोक्षकालो—ग.

SGDF
Sri Gargeshwari Digital Foundation

स्वविषयावरणनिवर्तकत्वमस्त्येव ; चित्त्वेनैव प्रकाशप्रसक्तेः, न त्वनवच्छिन्नचित्त्वेन ; गौरवात्, 'एतावन्तं कालं मया न ज्ञातोऽयमिदानीं ज्ञात' इत्यनुभवाच्च । रूपादिहीनस्यापि तत्तदवच्छिन्नचैतन्यस्य प्रत्यक्षादिविषयत्वमुक्तं प्राक् । प्रतिकर्मव्यवस्थामभ्युपगम्य चेदमनुमानम्, न तु दृष्टिसृष्टिपक्षे इति ध्येयम् । साध्ये चाद्यं विशेषणं प्रतियोग्यतिरिक्ता प्रागभावनिवृत्तिरिति मते प्रागभावेनार्थान्तरवारणाय । तदुदीच्यध्वंसादिकमादाय नार्थान्तरप्रसक्तिः, किंतु पूर्ववृत्त्यभावमादायेति वस्तुगतिमनुरुध्य प्राक्पदम् । अवैयर्थ्यं च प्रतियोगिविशेषणत्वेनाखण्डाभावसंपादकतया । एतेन—यतो ज्ञानमज्ञानस्यैव निवर्तकमिति नियमस्तस्मात्स्वनिवर्त्यपदेनैव प्रागभावव्युदासे किमाद्यविशेषणेनेति—निरस्तम्; प्रमात्वेन ज्ञाननिवर्त्यत्वमन्येषां नेत्यत्र तात्पर्यात् । न च स्वविषयावरणपदेनैव तद्व्युदासः; 'अस्ति प्रकाशत'

मित्यादि पूर्वोक्तं बोध्यम्। **चित्त्वेन**—चित्स्वरूपकत्वेन[1] । **गौरवादिति।** अन्यथा सुखाद्यवच्छिन्नचितः प्रकाशाभावे सुखादेः परमतेऽपि साक्षिभास्यता न स्यादित्यपि बोध्यम् । **न ज्ञातः।** अयं घटादिः अज्ञातचिदवच्छेदकत्वाद्घटादावज्ञातत्वमिति भावः । **प्रतियोग्यतिरिक्तेति।** घटात्तत्प्रागभावो नष्ट इत्याद्यनुभवाद्यथा घटजन्यस्तत्प्रागभावनाशः, तथा ज्ञानादज्ञानं नष्टमित्यनुभवाज्ज्ञानजन्योऽज्ञाननाशः। प्रतियोग्येव प्रागभावनाश इति मते तु ज्ञानमेवाज्ञाननिवृत्तिरिति तदनुसार्येव साध्यम्, न तु यथोक्तमिति भावः। **अवैयर्थ्यमिति।** संभवप्राचुर्येणेदम्। साध्ये व्यर्थविशेषणत्वस्यादोषत्वाद्दोषत्वेऽपि प्रागभावत्वस्याखण्डोपाधेः प्रकृते निवेशेनाभावत्वानिवेशात् शरीराजन्यत्वादाविव वैयर्थ्यशङ्काविरहादिति ध्येयम् ।

---

[1] चित्स्वरूपत्वेन—ग.

SGDF
Sri Gangeshwari Digital Foundation

इति व्यवहारविरोधित्वरूपस्यावरणत्वस्य भावाभावसाधारणत्वात्। वृत्तिजनकादृष्टेनार्थान्तरवारणाय तु विशेषणमिदम्। न चावरणपदेनैव तद्व्युदासे स्वविषयेति व्यर्थम्; यददृष्टं स्वविषयज्ञानजनकं विषयान्तरज्ञानप्रतिबन्धकतया तदावारकं तादृशादृष्टपूर्वकत्वेनार्थान्तरवारकत्वात्। न च—जडे अज्ञानस्यानङ्गीकाराच्चितश्चाज्ञानादिसाक्षितया भासमानत्वात्कावरणमिति—वाच्यम्; अज्ञानादिसाक्षितया चितः प्रकाशमानत्वेऽपि 'अस्ति प्रकाशत' इति व्यवहाराभावेन तदंशेऽज्ञानावरणस्यावश्यकत्वात्। वक्ष्यते चैतत्। स्वनिवर्त्येति च विशेषणं वृत्ति-

---

विरोधित्वेति—प्रतिबन्धकत्वेत्यर्थः। चाक्षुषवृत्तिप्रतिबन्धद्वारा तमस इवाज्ञानस्य ज्ञानाभावस्य चोक्तव्यवहारानुत्पादप्रयोजकत्वेन तत्प्रतिबन्धकत्वमिति भावः। इदं स्वविषयावरणेत्येवं रूपम्। अदृष्टस्य चरमफलनाश्यत्वेन स्वात्मकचरमफलजनकस्य स्वनिवर्त्यत्वात्तद्वारणायेदमिति भावः। **वाचकत्वादिति**। नच—तथापि स्वजनकं स्वसमानविषयकज्ञानान्तरप्रतिबन्धकादृष्टमादायार्थान्तरमिति—वाच्यम्; आलोकविषयाप्रसिद्ध्या स्वविषयविषयकोक्त[1]व्यवहारनिवेशासंभवेन स्वप्रयुक्तोक्तव्यवहारप्रतिबन्धकत्वनिवेशात्, ज्ञानान्तरप्रतिबन्धकस्य स्वप्रयुक्तोक्तव्यवहाराप्रतिबन्धकत्वात्। तमस्त्वालोकजन्यस्वनाशाधीनचाक्षुषप्रतिबन्धद्वारा चाक्षुषजन्ये आलोकप्रयुक्तोक्तव्यवहारे प्रतिबन्धकमित्यालोके साध्यावैकल्यम्। अज्ञानमपि स्वनाशद्वारा वृत्तिप्रयुक्तोक्तव्यवहारे साक्षादेव प्रतिबन्धकमिति विवेचयिष्यते। **तदंशे**—जडांशे, तदंशे व्यवहाराभावेन तदंशावच्छेदेन चित्यावरणेऽस्या[2]वश्यकत्वादित्यर्थः। अज्ञानावच्छेदकत्वेन साक्षिभास्यस्य तेन रूपेणैव 'अस्ति भाती'ति व्यवहारो

---

[1] स्वविषयकोक्त–ग. [2] चित्यावरणस्य–ग.

SGDF
Sri Gargeshwari Digital Foundation

प्रतिबन्धकादृष्टेनार्थान्तरवारणाय। न च—चरमसाक्षात्कारोत्पत्ति-प्रतिबन्धकादृष्टस्य तदनिवर्त्यत्वे मिथ्यात्वासिद्धिः, तन्निवर्त्यत्वे तद्व्युदसनमशक्यमिति—वाच्यम्; प्रतिबन्धकादृष्टे विद्यमाने न ज्ञानोत्पत्तिरिति प्रथमं तन्निवृत्तेः कारणात्मना स्थितस्य ज्ञाननिवर्त्यत्वाच्च मिथ्यात्वम्। न चैवमपि स्वनिवर्त्यत्वमव्याहतम्; स्वानिवर्त्यस्वरूपत्वे तात्पर्यात्। अन्धकारेणार्थान्तर-वारणार्थमिदमिति केचित्, तन्न; स्वदेशगतेत्यनेनैव तद्व्युदासात्। यथा च वृत्तिप्रतिबिम्बितचैतन्यस्य विषयावच्छिन्न-

---

न तु केवलघटत्वादिनेति भावः। तात्पर्यादिति। ज्ञानप्रयुक्तो यदवस्थासामान्याभावस्तत्त्वं मिथ्यात्वमित्याद्युक्तम्, प्रकृते तु स्वजन्य-नाशप्रतियोगित्वरूपं स्वनाश्यत्वं प्रविष्टमिति भावः। तद्व्युदासादिति। स्वदेशगतत्वं स्वाश्रयतावच्छेदकान्यदेशानवच्छिन्नाश्रयताकत्वं वाच्यम्; अन्यथा स्वाश्रयगतत्वमात्रेण विषयगताज्ञातत्ववारणस्य वक्ष्यमाण-स्यासंभवात्। स्वाश्रयत्वगतत्वे[1] हि तादात्म्यसंबन्धेन निवेश्ये[2] तादात्म्येनैवालोकतमसोर्वृत्त्यज्ञानयोश्चैकचिति सत्त्वात्। तथाच विषयगतो ज्ञातत्वाभावोऽपि वृत्तितादात्म्ये च[3] विषयचिति तादात्म्येनैव संबद्धः। एवं च तमसो वृत्तितादात्म्यापन्नचित्तादात्म्येऽपि वृत्त्याश्रयतानवच्छे-दकदेशावच्छिन्नत्वेन व्युदासः। न हि तमो वृत्त्यवच्छेदकदेशेनैवाव-च्छिद्यते, मानाभावात्। अज्ञानं तु वृत्तिनाश्यत्वानुरोधात्तथाभूत-स्यैव वृत्तिनाश्यत्वात्। नच—तथाभूतस्तमोऽवयवः संभवतीति—वाच्यम्; तमसः सावयवत्वे मानाभावात्। स्वल्पदेशस्थालोकेन च बहुदेशस्थतमसो नावयवनाशः, किंतु तस्यैव नाशे सति आलोका-संयुक्तदेशे तमोन्तरोत्पत्तिः। दृष्टान्तस्तु स्वन्यूनदेशवृत्तितमोनाशका-

---

[1] गतत्वं–ग. [2] निवेश्यं–ग. [3] वृत्तितादात्म्यवत्यां–ग.

SGDF
Sri Gargeshwari Digital Foundation

चैतन्येन सहैकलोलीभावादज्ञाननिवर्तकत्वं तथोक्तं प्राक्। स्वदेशगतेति च विशेषणं विषयगताज्ञातत्वेनार्थान्तरवारणाय। यद्यप्यविद्याविषयत्वरूपमज्ञातत्वमसिद्धम्, ज्ञातत्वाभावरूपं तु प्रथमविशेषणेनैव परास्तम्; तथापि प्रथमेन प्रागभावव्युदासादत्यन्ताभावव्युदासाय चतुर्थमिति द्रष्टव्यम्। ननु—कथं ज्ञानाश्रयगतत्वमज्ञानस्य? वृत्त्यादिरूपस्य ज्ञानस्याज्ञानाश्रयचिदनाश्रितत्वादिति—चेन्न; अन्तःकरणस्य चिदाश्रितत्वेन तद्वृत्तेस्तत्प्रतिफलितचैतन्यस्य वा ज्ञानस्य चिदाश्रितत्वसंभवात्,

---

लोक इति न साध्यवैकल्यम्। विषयगतोऽज्ञातत्वाभावस्तु वृत्त्यवच्छेदकदेशेनाप्यवच्छिद्यत इति तद्वारणमिति भावः। **तथोक्तमिति।** तथाच विषयचिद्गताज्ञानमपि प्रमाश्रयचिदाश्रितमिति भावः। **असिद्धम्** विषयावृत्ति। अविद्याविषयतावच्छेदकत्वं त्वविद्यासिद्धेः पूर्वमसिद्धत्वेनोद्देश्यसिद्धिकरत्वान्नार्थान्तरसंपादकमित्यपि बोध्यम्। **अत्यन्ताभावेति।** सामयिकात्यन्ताभावस्य प्रतियोगिनाश्यत्वमत इत्यादिः। तेन मतान्तरे तस्य स्वनिवर्त्यदळेनैव वारणेऽपि न क्षतिः। **चिदनाश्रितत्वादिति।** शुद्धस्याज्ञानोपहितस्य वाऽज्ञानाश्रयत्वात्तस्य च वृत्त्यादिरूपज्ञानाश्रयत्वमिति भावः। **चिदाश्रितत्वेन**—अज्ञानोपहितचिदाश्रितत्वेन। **चिदाश्रितत्वेति**—उक्तचिदाश्रितत्वेत्यर्थः। अज्ञानोपहिताचिदेव ज्ञानाज्ञानयोराश्रय इति भावः॥

ननु—शुद्धस्याज्ञानाश्रयत्वे तथापि दोषः, न चाज्ञानपरिणाममनसोऽपि तत्पक्षे शुद्धाश्रितत्वेन तत्परिणामवृत्तेरपि तदाश्रितत्वमिति—वाच्यम्; अज्ञानोपहिताश्रितस्य मनसः शुद्धाश्रितत्वासंभवात्, अन्यथा दृश्यत्वमिथ्यात्वादेरपि शुद्धाश्रितत्वापत्तेः। अत एवाज्ञानस्य स्वोपहिताश्रितत्वपक्षेऽप्यनुपपत्तिः; ज्ञानस्यापि स्वोपहिताश्रितत्वेनाज्ञानोप-

SGDF
Sri Gargeshwari Digital Foundation

किंचिदवच्छिन्नतदाश्रितस्यापि तदाश्रितत्वानपायात्, कर्णशष्कुल्यवच्छिन्नाकाशाश्रितस्य शब्दस्याकाशाश्रितत्ववत् । एवं च भावाभावसाधारणमावरणमिति मतेन साध्यमुपपादितम् । अभावो नावारक इति सिद्धान्ते तु साध्यद्वये तात्पर्यम् ।

हितानाश्रितत्वात्तत्राह—**किंचिदवच्छिन्नतदिति** । अज्ञानोपहिताचित एव वृत्त्युपहितत्वेन स्वोपहिताश्रितमपि ज्ञानमज्ञानोपहिताश्रितमिति द्वितीयपक्षे न दोषः । अज्ञानस्य शुद्धाश्रितत्वपक्षेऽपि शुद्धस्यैवाधिष्ठानत्वेन तत्तदुपाधिसंबन्धात्तदाश्रितत्वं ज्ञानस्याविरुद्धम् । **आकाशाश्रितत्वेति** । तार्किकादिमते शुद्धाकाशभिन्नत्वेनाभ्युपगतस्य कर्णावच्छिन्नाकाशस्य धर्मः शब्दो यथा शुद्धाकाशस्यापि धर्मः ; अन्यथा शुद्धाकाशस्यातीन्द्रियस्य शब्दाश्रयत्वेनानुमानासंभवात्, तथा मन्मतेऽपि उपहितचिति शुद्धस्याधिष्ठानत्वेनानुगमात्तत्प्रतीतौ प्रतीतेश्च 'तमेव भान्तमनुभाति सर्व'मित्यादिश्रुतेरुपहितचिदाश्रयस्यापि तदधिष्ठानाचिदाश्रितत्वम् । दृश्यत्वं तु शुद्धचित्तादात्म्यादिरूपत्वान्न शुद्धनिष्ठम्; अभेदे संबन्धविरहात्, मिथ्यात्वमपि न शुद्धनिष्टम् ; तत्साधकदृश्यत्वादेः शुद्धनिष्ठत्वाभावात्, श्रुत्यादिना शुद्धस्य सत्यत्वप्रमितेश्च । तथाच बाधकं विनोपहिताश्रितस्य शुद्धचिदाश्रितत्वमिति भावः । यथाश्रुतस्वदेशगतत्वानुसारेणेदमुक्तम् । विवक्षितं तु स्वावच्छेदकदेशान्यावच्छिन्नत्वस्वरूपं[1] घटावच्छिन्नपल्लवाज्ञान इवानवच्छिन्नमूलाज्ञानेऽप्यस्त्येव । न हि स्वोपहितचिन्मात्रगताया अपि ब्रह्माकारवृत्तेर्घटाद्यवच्छिन्नत्वं न संभवतीति ध्येयम् । **आवरणं** अस्ति प्रकाशत इति व्यवहारप्रतिबन्धकत्वम् । **नावारकः** नोक्तप्रतिबन्धकः । **सिद्धान्ते** अस्मत्सिद्धान्ते । अवश्याभ्युपेयस्याज्ञानस्यैवोक्तव्यवहारप्रतिबन्धकत्वम्,

---

[1] च्छिन्नत्वरूपं—ग.

SGDF
Sri Gargeshwari Digital Foundation

स्वप्रागभावातिरिक्तस्वनिवर्त्यस्वदेशगतवस्त्वन्तरपूर्वकामित्येकम् ।

न तु ज्ञानाभावस्य ; तद्विषयकाज्ञानत्वापेक्षया तद्विषयकज्ञानाभावत्वस्य गुरुत्वात् , अज्ञानत्वस्याखण्डस्यावरणशक्तिरूपस्यैव निवेशात् ॥

नन्वज्ञानस्यापि[1] प्रतिबन्धकत्वे मानाभावः ; असत्त्वापादकाज्ञानशून्यचिद्रूपस्यास्तित्वस्याज्ञानशून्यचिद्रूपस्य भानस्य च व्यवहारे उक्ताज्ञानस्याज्ञानसामान्यस्य चानुपलब्धेर्हेतुत्वात् , उक्तव्यवहारकाले उक्ताज्ञानसत्त्वे तदनुपलब्ध्यसंभवेन तत एवोक्तव्यवहारानुत्पादेनाज्ञानप्रतिबन्धकत्वकल्पनावैयर्थ्यमिति चेन्न ; यत्र हि प्रतियोगिसत्त्वेऽप्यभावव्यवहारकाले प्रतियोग्यनुपलब्धिः, तत्रैव तस्या हेतुत्वम् ; अज्ञानस्य तु सत्त्वे सुषुप्तिसमाध्यादिकाले यद्यपि तद्वैशिष्ट्यानुपलब्धिः, तथापि तदभावव्यवहारकाले न सेति न तस्या उक्तव्यवहारहेतुत्वम् ; किंतु लाघवादज्ञानस्यैव प्रतिबन्धकत्वम् । न चाज्ञानाभावस्यानुपलब्धत्वत्यागे साक्षिभास्यत्वमेवास्तु, अज्ञानसत्त्वे च तदभावासत्त्वान्नोक्तव्यवहार इति—वाच्यम् ; मन्मतेऽत्यन्ताभावस्य प्रतियोगिसत्त्वेऽपि तद्वति सत्त्वेनाज्ञानकालेऽपि तदभावस्य साक्षिभास्यतापत्तेः अथैवं शुक्तिरूप्याद्यभावव्यवहारेऽपि शुक्तिरूप्यादेः प्रतिबन्धकत्वमप्यास्तामिति चेदास्त एव । तस्मादुक्तास्तित्वभानयोरविद्यावृत्तिरूपे व्यवहारे उक्ताज्ञानप्रतिबन्धकत्वमावश्यकम् , शब्दरूपमात्रे व्यवहारे तत्प्रतिबन्धकत्वे तु तयोः स्फुरणं दुर्वारम् ; यद्यपि मन्मते प्रतिबन्धकाभावः कारणं नोच्यते, तत्कारणत्वेऽप्यज्ञानसत्त्वेऽपि तदभावसत्त्वेनोक्तव्यवहारापत्तिश्च, तथापि प्रतिबन्धकस्य सर्वत्र कारणनिष्ठशक्तिविघटनद्वारा कार्यानुत्पादप्रयोजकत्वात्प्रकृते विषयविधया अस्तित्वादेः स्वाकारवृत्तिकारणत्वात्तन्निष्ठशक्तिविघटकत्वमज्ञानस्येति ध्येयम् ॥

[1] तत्त्वज्ञानस्यापि–ग. [2] वैयर्थ्यं चेति–ग.

SGDF
Sri Gargeshwari Digital Foundation

स्वविषयावरणस्वनिवर्त्यस्वदेशगतवस्त्वन्तरपूर्वकमित्यपरमिति न किंचिदसमञ्जसम् । हेतौ च प्रकाशकत्वं प्रकाशकपदवाच्यत्वम्, अप्रकाशविरोधित्वं वा ज्ञानालोकयोः साधारणम् । यद्यपि प्रकाशकपदवाच्यत्वं नामकरणवशात् कस्मिंश्चित्पुरुषेऽप्यस्ति ;

अपरमिति । साध्यद्वयेऽपि वस्त्वन्तरपदं प्रमामात्रस्य भ्रमपूर्वकत्वसिद्धिमादायार्थान्तरस्य वारणाय स्वनिवर्त्यजन्य[1]भ्रमान्यार्थकम् । यद्यपि द्वितीयसाध्ये स्वदेशगतत्वं न विषयगताज्ञातत्ववारणाय; प्रागभावस्येवात्यन्ताभावस्यापि ज्ञानीयस्य स्वविषयावरणपदेनैव वारणात् । तथापि जीवेशविभागपूर्वकत्वेन ब्रह्मप्रमायां सिद्धसाधनवारणाय तत्, पक्षतावच्छेदकावच्छेदेन साध्यसिद्धेरुद्देश्यत्वेऽपि प्रमामात्रमेकैकं जीवेशविभागं निवर्तयति; तस्यैव क्लृप्तजातीयस्य स्वविषयावरणत्व[2]मप्यास्ताम्, नास्तां चावारकस्य तस्याभावत्वेन सौषुप्तनिर्विकल्पकविषयत्वम्; नावेदिषमित्यस्यानुभवत्वसभंवादित्यर्थान्तरात् । नचैवं–– विषयगताज्ञातत्वस्य सिद्धान्ते आवरणत्वानङ्गीकारेऽपि क्लृप्तस्य तस्यैवोक्तस्वविषयावरणत्वमास्तामिति परेण वक्तुं शक्यत्वात्तदादायार्थान्तरसंभवादेकमेव साध्यं कुतो न कृतमिति — वाच्यम्; परमते हि ज्ञानमात्रमस्तित्वं प्रत्यक्षं च भानं वाच्यम्; तथाच कारणाभावतयोक्तव्यवहारस्यानुत्पादे विषयगताज्ञातत्वस्योक्तप्रयोजकत्वेऽपि कारणगतशक्तिविघटनद्वारोक्तप्रयोजकत्वरूपप्रतिबन्धकत्वस्य निवेशेऽर्थान्तरासंभवः । जीवेशभेदादेस्तु मन्मतरीत्योक्तप्रतिबन्धकत्वमादायार्थान्तरं परेण वक्तुं शक्यते । एकसाध्यवादिनां प्राचां तूक्तद्वारनिवेशस्य विषयाज्ञातत्ववारणमेव प्रयोजनम्, तच्च स्वदेशगतत्वप्रागभावान्यत्वाभ्यामेव सिध्यतीति स व्यर्थ इत्याशय इति ध्येयम् ॥

---

[1] निवृत्त्यजन्य–ग. [2] वरकत्व–ग.

SGDF
Sri Gargeshwari Digital Foundation

तथापि प्रकाशकशब्देन शास्त्रे सर्वदेशकालयोर्वा व्यवह्रियमाणत्वं तद्विवक्षितम्। अथवाऽस्तु साधारणम्। अप्रकाशितार्थगोचरेति विशेषणाद्व्यभिचारव्युदासः। अप्रकाशितत्वं च 'न प्रकाशत इति' व्यवहारगोचरत्वम्, तच्च स्वप्रकाशचैतन्येऽप्यस्तीत्युपपादितम्। एवं निरुक्ताप्रकाशविरोधित्वमपि ज्ञानालोकयोः प्रत्यक्षसिद्धम्। उक्तं च विवरणे—'ज्ञानप्रकाश्यत्वादज्ञानविरोधित्वादन्यदेवालोकप्रकाश्यत्वं तमोविरोधित्वं नामे'ति। अत उभयोरेव साक्षादप्रकाशविरोधित्वसंभवान्नेन्द्रियसन्निकर्षादौ व्यभिचारः। एवं चाप्रकाशितार्थगोचरत्वे सति

प्रकाशशब्देन लक्षणया ज्ञानालोकभिन्नेऽपि व्यवहारादाह— **सर्वदेशकालयोरिति**। सर्वदेशेषु व्यवह्रियमाणत्वं व्यवहारयोग्यत्वम्, प्रकाशपदस्यानादिसङ्केतत्वमिति[1] यावत्। **विशेषणादिति**। अप्रकाशितार्थगोचरत्वं अप्रकाशितार्थे प्रकाशत इति व्यवहारस्य प्रयोजकत्वम्; तच्च अज्ञाननाशद्वारा ज्ञाने, तमोनाशाधीनचाक्षुषद्वारा आलोके च बोध्यम्। तेनालोकस्य विषयरूपगोचराप्रसिद्ध्या न साधनवैकल्यम्। **चैतन्येऽपीति**। न प्रकाशत इति व्यवहारः प्रकाशविरोध्याश्रयविषयकः, तादृशाश्रयत्वं च यद्यपि तमोऽज्ञानयुक्ततयालोकज्ञानयोः, तथापि तदवच्छेदकत्वाद्घटादावपि न प्रकाशत इति व्यवहार इति भावः। **निरुक्तेति**। न प्रकाशत इति व्यवहारगोचररूपेत्यर्थः। तादृशोऽप्रकाशस्तद्विरोधित्वमित्यर्थः। **ज्ञानप्रकाश्यत्वात्** ज्ञानप्रयुक्तनाशवत्त्वात्। **अज्ञानविरोधित्वात्**। अज्ञानस्य नाश्यत्वरूपविरोधित्वघटिताज्ञानप्रयुक्ताज्ञाननाशवत्त्वपर्यवसितादिति यावत्। **तमोविरोधित्वं**—तमसो नाशत्वेन घटितमालोकप्रयुक्ततमोनाशवत्त्वपर्यवसित-

---

[1] सङ्केतवत्त्वमिति-ग.

SGDF
Sri Gargeshwari Digital Foundation

स्वविषयावरणस्वनिवर्त्यस्वदेशगतवस्त्वन्तरपूर्वकमित्यपरामिति न किंचिदसमञ्जसम् । हेतौ च प्रकाशकत्वं प्रकाशकपदवाच्यत्वम् , अप्रकाशविरोधित्वं वा ज्ञानालोकयोः साधारणम् । यद्यपि प्रकाशकपदवाच्यत्वं नामकरणवशात् कस्मिंश्चित्पुरुषेऽप्यस्ति ;

अपरमिति । साध्यद्वयेऽपि वस्त्वन्तरपदं प्रमामात्रस्य भ्रमपूर्वकत्वसिद्धिमादायार्थान्तरस्य वारणाय स्वनिवर्त्यजन्य[1]भ्रमान्यार्थकम् । यद्यपि द्वितीयसाध्ये स्वदेशगतत्वं न विषयगताज्ञातत्ववारणाय ; प्रागभावस्येवात्यन्ताभावस्यापि ज्ञानीयस्य स्वविषयावरणपदेनैव वारणात् । तथापि जीवेशविभागपूर्वकत्वेन ब्रह्मप्रमायां सिद्धसाधनवारणाय तत् , पक्षतावच्छेदकावच्छेदेन साध्यसिद्धेरुद्धेश्यत्वेऽपि प्रमामात्रमेकैकं जीवेशविभागं निवर्तयति ; तस्यैव क्लृप्तजातीयस्य स्वविषयावरणत्व[2]मप्यास्ताम् , नास्तां चावारकस्य तस्याभावत्वेन सौषुप्तनिर्विकल्पकविषयत्वम् ; नावेदिषमित्यस्यानुभवत्वसभंवादित्यर्थान्तरात् । नचैवं—विषयगताज्ञातत्वस्य सिद्धान्ते आवरणत्वानङ्गीकारेऽपि क्लृप्तस्य तस्यैवोक्तस्वविषयावरणत्वमास्तामिति परेण वक्तुं शक्यत्वात्तदादायार्थान्तरसंभवादेकमेव साध्यं कुतो न कृतमिति — वाच्यम् ; परमते हि ज्ञानमात्रमस्तित्वं प्रत्यक्षं च भानं वाच्यम् ; तथाच कारणाभावतयोक्तव्यवहारस्यानुत्पादे विषयगताज्ञातत्वस्योक्तप्रयोजकत्वेऽपि कारणगतशक्तिविघटनद्वारोक्तप्रयोजकत्वरूपप्रतिबन्धकत्वस्य निवेशेऽर्थान्तरासंभवः । जीवेशभेदादेस्तु मन्मतरीत्योक्तप्रतिबन्धकत्वमादायार्थान्तरं परेण वक्तुं शक्यते । एकसाध्यवादिनां प्राचां तूक्तद्वारनिवेशस्य विषयाज्ञातत्ववारणमेव प्रयोजनम् , तच्च स्वदेशगतत्वप्रागभावान्यत्वाभ्यामेव सिध्यतीति स व्यर्थ इत्याशय इति ध्येयम् ॥

---

[1] नित्रृत्त्यजन्य–ग. [2] वरकत्व–ग.

SGDF
Sri Gargeshwari Digital Foundation

तथापि प्रकाशकशब्देन शास्त्रे सर्वदेशकालयोर्वा व्यवह्रियमाणत्वं तद्विवक्षितम्। अथवाऽस्तु साधारणम्। अप्रकाशितार्थगोचरेति विशेषणाद्व्यभिचारव्युदासः। अप्रकाशितत्वं च 'न प्रकाशत इति' व्यवहारगोचरत्वम्, तच्च स्वप्रकाशचैतन्येऽप्यस्तीत्युपपादितम्। एवं निरुक्ताप्रकाशविरोधित्वमपि ज्ञानालोकयोः प्रत्यक्षसिद्धम्। उक्तं च विवरणे—'ज्ञानप्रकाश्यत्वादज्ञानविरोधित्वादन्यदेवालोकप्रकाश्यत्वं तमोविरोधित्वं नामे'ति। अत उभयोरेव साक्षादप्रकाशविरोधित्वसंभवान्नेन्द्रियसन्निकर्षादौ व्यभिचारः। एवं चाप्रकाशितार्थगोचरत्वे सति

प्रकाशशब्देन लक्षणया ज्ञानालोकभिन्नेऽपि व्यवहारादाह— **सर्वदेशकालयोरिति**। सर्वदेशेषु व्यवह्रियमाणत्वं व्यवहारयोग्यत्वम्, प्रकाशपदस्यानादिसङ्केतत्वमिति[1] यावत्। **विशेषणादिति**। अप्रकाशितार्थगोचरत्वं अप्रकाशितार्थे प्रकाशत इति व्यवहारस्य प्रयोजकत्वम्; तच्च अज्ञाननाशद्वारा ज्ञाने, तमोनाशाधीनचाक्षुषद्वारा आलोके च बोध्यम्। तेनालोकस्य विषयरूपगोचराप्रसिद्ध्या न साधनवैकल्यम्। **चैतन्येऽपीति**। न प्रकाशत इति व्यवहारः प्रकाशविरोध्याश्रयविषयकः, तादृशाश्रयत्वं च यद्यपि तमोऽज्ञानयुक्ततयालोकज्ञानयोः, तथापि तदवच्छेदकत्वाद्घटादावपि न प्रकाशत इति व्यवहार इति भावः। **निरुक्तेति**। न प्रकाशत इति व्यवहारगोचररूपेत्यर्थः। तादृशोऽप्रकाशस्ताद्विरोधित्वमित्यर्थः। **ज्ञानप्रकाश्यत्वात्** ज्ञानप्रयुक्तनाशवत्त्वात्। **अज्ञानविरोधित्वात्**। अज्ञानस्य नाश्यत्वरूपविरोधित्वघटिताज्ञानप्रयुक्ताज्ञाननाशवत्त्वपर्यवसितादिति यावत्। **तमोविरोधित्वं**—तमसो नाशत्वेन घटितमालोकप्रयुक्ततमोनाशवत्त्वपर्यवसित-

---

[1] सङ्केतवत्त्वमिति-ग.

SGDF
Sri Gargeshwari Digital Foundation

प्रकाशशब्दवाच्यत्वात् अप्रकाशविरोधिप्रकाशत्वादिति वा हेतुः पर्यवसितः। विपर्ययविषयस्तु नाज्ञातः; विपर्ययान्यकालासत्त्वेन तस्यानिर्वचनीयस्य मानगोचरत्वाभावेन प्रकाशप्राक्कालसत्त्वघटिताप्रकाशितत्वासंभवात्, अत एव स नाप्रकाशविरोधी; स्वविषये अप्रकाशाभावात्, अधिष्ठानाप्रकाशस्तु तस्य जनक एव। स्मरणे च व्यभिचाराभावः स्पष्टः। अनुकूलतर्कश्च 'त्वदुक्तमर्थं न जानामी'ति प्रतीत्यन्यथानुपपत्त्यादिरूपः प्रागुक्त

मिति यावत्। **वाच्यत्वात्** अनादिसङ्केतविषयत्वात्। उक्तगोचरत्वस्याधुनिकप्रकाशपदसङ्केतविषयत्वस्य च सन्निकर्षादौ व्यभिचारित्वेनोक्तवाच्यत्वमेवोपसंहृतम्। **प्रकाशत्वादिति**। यद्यपि विरोधित्वान्त एव हेतुः, तथापि विरोधित्वं नाशकतावच्छेदकरूपम्; तच्च प्रमात्वमालोकत्वं चोक्तावच्छेदकत्वेनानुगतं हेतुः। ज्ञानत्वमालोकत्वं च प्रकाशपदवाच्यतावच्छेदकत्वेनाद्यहेतौ प्रविष्टमिति ज्ञापयितुं प्रकाशत्वादित्युक्तम्। तावता च पक्षीभूतप्रमादृष्टान्तीभूतालोकयोरन्यतरत्वं वा हेतुरित्यपि सूचितम्। सत्यन्तव्यावर्त्यमाह—**विपर्ययेत्यादि**। **नाज्ञातः**—नोक्ताप्रकाशितः। **घटितेति** व्याप्तेत्यर्थः। **अत एवेत्यादि**। तथाच सत्यन्तं द्वितीयहेतौ न देयमिति भावः। **जनक एवेति**। न नाश्य इति शेषः। **स्पष्टः**—द्वितीयहेतौ स्पष्टः। प्रमात्वस्य विरोधितावच्छेदकस्य स्मरणावृत्तित्वात्प्रथमहेतावपि प्रत्यक्षादिगृहीतार्थकशब्दादिवृत्तौ व्यभिचारवारणाय न प्रकाशत इति व्यवहारगोचरस्य नाशं द्वारीकृत्य प्रकाशत इति व्यवहारप्रयोजकत्वस्य सत्यन्तेन वाच्यत्वादव्यभिचारः। विशेष्यदळं तु सन्निकर्षादिवारणायेति[1] बोध्यम्। न चासिद्धिः; न प्रकाशत इति व्यवहारगोचरत्वेन

---

[1] यैवेति-ग.

SGDF
Sri Gargeshwari Digital Foundation

एव। एतेन गोशब्दवाच्यत्वेन पृथिव्या अपि शृङ्गित्वानुमानापातोऽपास्तः; तत्रानुकूलतर्काभावात्। अज्ञानस्य स्वरूपेणाज्ञानाविषयत्वेऽपि तद्भावत्वादिकमज्ञानविषयो भवत्येव; तस्याज्ञानग्राहकसाक्ष्यग्राह्यत्वात्। अन्यथा तत्र विवादो न स्यात्। एवं प्रमायाः स्वविषयावरणभावपूर्वकत्वमपि न प्रमास्वरूपग्राहकसाक्षिग्राह्यम्। तथाच तद्ग्राहिकाया एतस्या अनुमितेः साध्यसाधनोभयाधिकरणत्वान्न कोऽपि दोषः। दृष्टान्ते चान्धकाराव्यवहितोत्पत्तिकत्वं विशेषणम्; तेन न प्रथमपदवैयर्थ्यं

पराभ्युपगतस्य प्रकाशप्रागभावस्य प्रकाशनिवर्त्यत्वेन प्रकाशत इति व्यवहारप्रयोजके तन्नाशे प्रयोजकत्वस्य सत्यन्तपर्यवसितार्थस्य पक्षे सत्त्वात्। न चोक्तनाशो नोक्तव्यवहारप्रयोजकः, किंतु प्रकाश एवेति–वाच्यम्; कालादिविधयोक्तनाशे व्यधिकरणप्रकाशस्यापि प्रयोजकत्वेनासाधारणस्य नाशप्रयोजकत्वस्य लाभायैवाद्यप्रयोजकान्तस्योक्तत्वेन हेतावनिवेशात्। अन्यथा वैयर्थ्यात्। अत एव[1] तमसो द्रव्यत्वानङ्गीकारमते न साध्यसाधनवैकल्यम्; आलोकप्रागभावस्यालोकनिवर्त्यत्वादिसत्त्वात्। अत एव द्वितीयहेतुरपि नासिद्ध इति ध्येयम्॥

तद्ग्राहिकायाः अज्ञाने भावत्वादि प्रमायामुक्तपूर्वकत्वं च गृह्णन्त्याः। **साध्येति**। भावत्वाद्यज्ञाननाशकत्वेत्यादिः[2]। **दोषः** प्रसिद्धि[3]बाधौ। **अन्धकारेत्यादि**। स्वसमानाधिकरणतमःकालवृत्तित्वमित्यर्थः। तेनोत्पत्त्यादेर्व्यर्थत्वेऽपि न क्षतिः। **वैयर्थ्यं** अर्थशून्यत्वम्। अन्धकारेत्यादिकमेव प्रथमपदार्थ इति भावः। उक्तविशेषण-

---

[1] तमो–क. [2] त्वेनेत्यादिः–ग. [3] असिद्धि–ग.

SGDF Sri Gargeshwari Digital Foundation

न वा द्वितीयादिप्रमायां साध्यसाधनवैकल्यम् । विस्तरेण चान्यत्र व्युत्पादितमिदमस्माभिः ॥

व्यावर्त्यमाह—**न वेति । वैकल्यमिति ।** साध्यवैकल्यं नेत्यपि बोध्यम् । साध्यसाधनयोरप्रकाशनाशोपधानं प्रविष्टम् । अन्यथोक्तपक्षतावच्छेदकावच्छेदेन तदसिद्ध्यार्थान्तरापत्तेः । तथाचोक्तविशेषणाभावे दोष इति भावः ॥

आश्रमस्वामिनस्तु—जन्यसविकल्पकाजन्या घटचाक्षुषप्रमा स्वविषयावरणस्वनिवर्त्यवस्त्वन्तरपूर्विकेत्येकम् । स्वविषयावरणत्वं स्वजननायोग्यत्वम्, स्वनिवर्त्यत्वं स्वजन्यनाशप्रतियोगित्वम्, वस्त्वन्तरं स्वभिन्नम् । तच्च स्वकालपूर्वकालवृत्तिस्वमादायार्थान्तरादुक्तम् । इच्छाप्रागभावादिनार्थान्तरात्स्वनिवर्त्येति । प्रतियोग्यन्या प्रागभावस्य निवृत्तिरिति मते इच्छाप्रागभावो न ज्ञाननिवर्त्यः; किंत्विच्छानिवर्त्यः । स्वप्रागभावमादायार्थान्तरात् स्वविषयावरणेति । स्वप्रागभावान्यस्वनिवर्त्यस्वदेशगतवस्त्वन्तरपूर्वकमित्यपरं साध्यम् । स्वसमानाधिकरणप्रागभावान्यार्थकमाद्यमिच्छाभ्रान्तिप्रागभावादिनार्थान्तरस्य वारणाय । आत्मत्वादिनार्थान्तराद्द्वितीयम् । स्वजनकादृष्टादिनार्थान्तराच्तृतीयं स्वसमानाधिकरणयोग्यार्थकम् । अथवा एकमेव साध्यम् । स्वदेशगतत्वं स्वाश्रये वर्तमानत्वम्; तेनोपादानप्रत्यक्षविधया संयोगादेः पक्षीकृतप्रमाजन्यत्वेन संयोगादिप्रागभावस्य स्वनिवर्त्यत्वादर्थान्तरस्य करण[1]मित्याहुः ॥

तत्र [2]यद्यपि यथाश्रुते पटचाक्षुषोत्तरघटचाक्षुषप्रमायां सिद्धसाधनम्; भिन्नविषयकानुमित्यादिसामग्रीकालीनघटचाक्षुषेच्छाजन्यत्वे [3]तस्याः [4]पटविषयकत्वेन पटसविकल्पकाजन्यत्वेन पक्षत्वसंभवात्, तथापि योग्यात्मगुणाव्यवहितोत्तरान्यस्य सविकल्पाजन्यपदेनोक्त-

---

[1] वारण—ग. [2] तत्र—ग. [3] जन्यत्वेन—क ग. [4] पटाविषय—क.

SGDF
Sri Gargeshwari Digital Foundation

नन्वनादित्वे सति भावत्वमभावविलक्षणत्वं वा न निवर्त्यनिष्ठम्; अनादिभावमात्रवृत्तिधर्मत्वात्, अनाद्यभावविलक्षण-

---

त्वान्न दोषः। परमते निर्विकल्पकाव्यवहितोत्तरत्वस्य पक्षे सत्वाद्यौग्येति। सविकल्पकधीसुखादेर्योग्यगुणत्वान्न तेन सिद्धसाधनम्। अत एव स्वप्रागभावपदं स्वप्रागभावार्थकं, स्वविषये संशयादिजनकं स्वविषयावरणं, स्वसत्ताक्षणनियतध्वंसप्रतियोग्येव स्वनिवर्त्यम्। तथाच प्रागभावोऽपि परमते विशेषादर्शनतया संशयादिजनकः। तथाच स्वप्रागभावस्वजनकादृष्टमनःसंयोगतमसां वारणाय क्रमेण स्वप्रागभावेत्यादिचतुष्टयमिति आश्रमोक्तव्याख्यानान्तरपक्षेऽपि घटसंशयपूर्वकत्वमादाय न सिद्धसाधनम्; धर्मिज्ञानविषया घटसंशयस्य घटसंशयान्तरजनकत्वेन विषया[1]वरणत्वेऽपि तत्पूर्वकचाक्षुषस्यापक्षत्वात्। न च—मूलोक्ते आश्रमोक्ते च साध्ये तमोनाशकत्वमुपाधिरिति-—वाच्यम्; आश्रमोक्तसाध्यस्य सविकल्पकाद्युत्तरचाक्षुषे उक्तसंशयोत्तरचाक्षुषे च सत्त्वेन साध्याव्यापकत्वात्। मूलोक्तसाध्यस्यापि सौषुप्तसुखाकाराविद्यावृत्त्यादौ तत्सुखावरकस्वाप्नबुद्ध्यादिनिवर्तके सत्त्वेन तदव्यापकत्वात्। नचोक्तवृत्त्यादेरस्ति भातीति व्यवहाराप्रयोजकत्वेन स्वविषये स्वप्रयुक्तोक्तव्यवहारप्रतिबन्धकत्वरूपस्वविषयावरणत्वस्य स्वनिवर्त्यजन्यभ्रमान्यत्वरूपवस्त्वन्तरत्वस्य च स्वाप्नबुद्ध्यादावभाव इति—वाच्यम्; 'सुखमस्वाप्स'मिति स्मृतिद्वारा सौषुप्तसुखमस्तीत्यादिव्यवहारे उक्तवृत्त्यादेः प्रयोजकत्वात्, स्वाप्नसुखादिबुद्धेर्भ्रमान्यत्वेनोक्तवस्त्वन्तरत्वात् अविद्यावृत्तित्वेन तस्याः स्वावच्छेदकान्यदेशावच्छिन्नत्वरूपं स्वदेशगतत्वमप्युन्नेयम्। अनुकूलतर्केण साध्यव्याप्यतया[2] गृहीतहेतोरव्यापकत्वेनोक्तोपाधेः साध्यव्यापकत्व[3]ग्रहाच्च॥

---

[1] स्वविषया–ग. [2] साध्यव्यापकतया–ग. [3] साध्याव्यापक–ग.

SGDF
Sri Gangeshwari Digital Foundation

मात्रवृत्तित्वाद्वा, आत्मत्ववत्। निवर्त्यत्वं वा, नानादिभावनिष्ठम्, अनाद्यभावविलक्षणनिष्ठं नेति वा, निवर्त्यमात्रवृत्तित्वात्, प्रागभावत्ववत्। अनादित्वं वा, नावरणनिष्ठम्, अनादिमात्रवृत्तित्वात्, प्रागभावत्ववत्। प्रमाणज्ञानं वा, अनाद्यभावान्यानाद्यनिवर्तकम्, ज्ञानत्वात्, भ्रमवदित्यादिना सत्प्रतिपक्षता; कृत्यभावमात्रेणाकृतस्य कृतिवत् पूर्वप्रकाशाभावमात्रेणाप्रकाशितस्य प्रकाशोपपत्तेरप्रयोजकत्वं चेति—चेन्न; अनुकूलतर्काभावेनाप्रयोजकत्वात्; सिद्धान्तिहेतोश्चानुकूलतर्कसद्भावेन साध्यव्याप्यत्वे निश्चिते सत्प्रतिपक्षाप्रयोजकत्वादीनामनवकाशात्। अनादिभावत्वस्य निवर्त्यावृत्तित्वेऽप्यविद्याया भावविलक्षणाया निवर्त्यत्वोपपत्तेराद्यानुमानेनाविरोधश्च। द्वितीये त्वनाश्रितमात्रवृत्तित्वमुपाधिः। तृतीयचतुर्थयोः सकलनिवर्त्यावृत्तित्वमुपाधिः।

अज्ञानस्य भावविलक्षणत्वस्वीकारेऽप्याह—**अभावविलक्षणत्वं वेति। निवर्त्यत्वोपपत्तिरिति।** न चाभावविलक्षणस्य निवर्त्यत्वे सादित्वं प्रयोजकमिति—वाच्यम्; अज्ञानतत्प्रयुक्तान्यतरत्त्वस्यैव ज्ञाननाश्यताप्रयोजकत्वेनोक्तत्वात्। **अनाश्रितमात्रेति।** ध्वंसत्वादौ साध्याव्यापकत्वं[1] नाशङ्क्यम्; प्रागभावध्वंसरूपघटाद्यवृत्तित्वस्याखण्डोपाधिरूपध्वंसत्वेऽभावात्, जन्यत्वे सति भावान्यत्वस्यापि मन्मते निवर्त्यवृत्तित्वाच्च[2]। **सकलनिवर्त्येति।** न चाभावविलक्षणस्य निवर्त्यत्वे सादित्वस्य प्रयोजकत्वादनादिभावत्वेन निश्चिते नाशसामग्रीमत्त्वस्याभावेन नाशसामग्रीमत्त्वे साध्यवति उपाध्यभावेन साध्यव्या[3]पकत्वमिति—वाच्यम्; उक्तप्रयोजकत्वस्य प्रत्युक्तत्वात्। न चोपाध्यभाववत्त्वेन निश्चिते नाशसामग्रीमत्त्वे साध्यसंशयेनोपाधौ साध्यव्यापकत्वं

---

[1] साध्यव्यापकत्वं-क. [2] निवृत्तित्वाच्च-ग. [3] तत्र साध्या-ग.

SGDF
Sri Gargeshwari Digital Foundation

पञ्चमे सकलानाद्यवृत्तित्वमुपाधिः । षष्ठे प्रतियोग्यप्रसिद्ध्या साध्याप्रसिद्धिरिति च दूषणानि । तत्त्वप्रदीपिकोक्तं च—चैत्रप्रमा, चैत्रगतप्रमाप्रागभावातिरिक्तानादिनिवर्तिका, प्रमात्वात्, मैत्रप्रमावत् । विगीतो विभ्रमः, एतज्जनकाबाध्यातिरिक्तोपादानकः, विभ्रमत्वात्, सम्मतवदिति । अत्राद्ये सुखादिज्ञानेषु न बाधः ; अन्तःकरणवृत्तेरेव प्रमापदेनोक्तेः । चैत्रगतत्वं च नानादेर्विशेषणम् ; मैत्रप्रमायाश्चैत्रनिष्ठानादिनिवर्तकत्वाभावेन दृष्टान्ते साध्यवैकल्यापा*ात्, किंतु प्रमातदभावयोरन्यतरस्य ; प्रमाया-

---

न गृहीतुं शक्यम्, साध्ये उपाध्यभाववद्वृत्तित्वरूपव्यभिचारसंशयादिति—वाच्यम्; मां प्रति हि प्रयुक्तस्य त्वदनुमानस्य मन्मते निर्दोषत्वमपेक्ष्यते, तच्च नास्त्येव; मयोक्तसामग्रीमत्त्वेऽनादिभावनिष्ठत्वस्य निश्चितत्वेन ममोक्तसंशयायोगात् । अत एव सकलानाद्यवृत्तित्वोपाधावप्यावरणावृत्तित्वरूपसाध्यव्यापकत्वं मया निश्चितमिति प्रागभावप्रतियोगित्वादौ त्वदीय उक्तसाध्यसंशयोऽप्रयोजक इति भावः । **प्रतियोग्यप्रसिद्ध्येति ।** न चावाभ्यामप्रसिद्धप्रतियोगिकाभावस्वीकारान्न दोष इति—वाच्यम्; न ह्यावाभ्यामप्रसिद्धस्याभावः स्वीक्रियते, परं त्वलीकवादिनं त्वादृशं प्रति मादृशैः प्रयुज्यते । 'अहृदयवाचामहृदयमेवोत्तर'मिति न्यायात् । अत एव विमतम्, न चिदज्ञानकार्यम्, [1]चित्परोक्षायामप्यनिषेध्यत्वेन भासमानत्वादिति त्वदीयानुमाने भावरूपाज्ञानाप्रसिद्धिर्न दोषः; मत्प्रसिद्धत्वमादाय त्वया मां प्रति प्रयोक्तुं शक्यत्वादित्याचार्यैरुक्तम् । अत एव च मतद्वयेऽप्यप्रामाणिकस्य निषेधप्रतियोगित्वाभ्युपगमादित्यादित्वदीयपूर्वपक्षस्य सत्यत्वानुमानखण्डनावसरे आचार्याभ्युपगमोऽप्युक्ताभिप्रायेण । **एतज्जनकाबाध्यातिरिक्तेति ।** एतद्भ्रमजनकं यदबाध्यं तदन्येत्यर्थः । **सम्मतवत्**—पुरुषान्तरीयभ्र-

---

[1] चित्यपरोक्षायामिति स्यात्.

SGDF
Sri Gargeshwari Digital Foundation

श्चात्मगतत्वं प्राग्व्याख्यातम्, साध्ये तु प्रमापदमुपरञ्जकमेव। यदि त्वभावे प्रागिति विशेषणं नास्ति, तदा भावरूपाज्ञानस्यापि स्वाभावाभावत्वेन तद्व्यतिरिक्तानादिनिवर्तकत्वे बाधवारणाय। चैत्रासमवेतत्वं चैत्रान्यसमवेतत्वं च नोपाधिः; चैत्रसुखादौ प्रागभावनिवर्तकतया व्यभिचारेण साध्याव्यापकत्वात्। न च चैत्रप्रमा, चैत्रगतस्याभावातिरिक्तस्यानादेर्निवर्तिका न, प्रमात्वात्, मैत्रप्रमादिवदिति सत्प्रतिपक्षः; प्रतियोगिप्रसिद्ध्यप्रसिद्धिभ्यां व्याहतेः। चैत्रगतप्रमाभावातिरिक्ताभावनिवर्तकत्वं

मवत्। पुरुषान्तररूपोक्ताबाध्योपादानकत्वं परेणपि दृष्टान्ते स्वीक्रियते। जनकान्तानुपादाने तु साध्यवैकल्यमिति भावः। **आत्मगतत्व**माध्यासिकं चैत्राद्यात्म[1]तादात्म्यम्। तथाच मनस इव तदुपहितात्मनोऽपि वृत्त्युपादानत्वात्तत्रापि तत्प्रागभाव इति भावः। **अज्ञानस्यापीति**। प्रतियोगिजनकाभावत्वरूपप्रागभावत्वेऽखण्डोपाधिरूपाभावत्वस्य लाघवेन प्रवेशात्प्राक्पदलभ्यजनकान्तत्यागे तावन्मात्रमज्ञानेऽपीति भावः। **निवर्तकत्वे बाधवारणाय**—निवर्तकत्वबाधस्य वारणाय। **सुखादाविति**। स्वप्रागभावनिवर्तकत्वादिति शेषः। **व्याहतेरिति**। उक्तनिवृत्तिहेतुत्वं क्वचिद्गृहीत्वैव तदभावोऽनुमेयः, अन्यथा विशेषणज्ञानाभावेन साध्यव्याप्त्यग्रहात्, स चोक्तहेतुत्वग्रहश्चैत्रप्रमायामेवेति बाधः। न चोक्तहेतुत्वज्ञाने चैत्रप्रमायां जातेऽपि भ्रमत्वं तत्र पश्चात्कल्प्यत इति वाच्यम्; एतदनुमानेनैव तत्र भ्रमत्वस्य कल्प्यतयाऽन्योन्याश्रयात्। न चासतः प्रतियोगिनो मन्मते ख्यातिसंभवात्तस्याश्च विकल्पत्वेना[2]नुमानबाध[3]कत्वमिति—वाच्यम्; मां प्रति हि त्वदीयोऽनुमानप्रयोगो मदीयप्रतियोगिज्ञानमपेक्षते, तच्च प्रमारूपं बाधकमेव, तस्य च भ्रमत्वमेतदनुमानेनैव त्वया ज्ञापनीयमिति भावः। **चैत्रगतप्रमाभावेति**।

[1] त्मना—क. [2] विकल्पेना—ग. [3] नाबाध—क ग.

SGDF
Sri Gargeshwari Digital Foundation

तु नोपाधिः; चैत्रगतप्रमाभावातिरिक्तस्य स्वजन्यव्यवहारप्रागभावस्य निवर्तकतया पक्षे साधनव्यापकत्वात्। विपक्षबाधकसत्त्वाच्च नाभाससाम्यम्। अत एव द्वितीयानुमानमपि सम्यक्। न च—विगीतो विभ्रमः, एतज्ज्ञानजनकसाध्यातिरिक्तोपादानकः, विभ्रमत्वात्, सम्मतवदिति सत्प्रतिपक्ष इति—वाच्यम्; बाध्यस्य त्वन्मते अजनकत्वात्, साध्याप्रसिद्धेः, ब्रह्माविद्योभयोपादानकत्वेनाविरोधाच्च। नव्यास्तु विमता प्रमा, प्रमाभावातिरिक्तस्यानादेर्निवर्तिका, कार्यत्वात्, घटवत्; भ्रमानु-

---

चैत्रगतप्रमाया अभावेत्यर्थः। **निवर्तकतया**—निवृत्तिरूपव्यवहारजनकतया। यद्यपि प्रतियोग्यन्या प्रागभावस्य निवृत्तिरिति मतेनैवानुमानमिदम्; तथाच व्यवहार एव तत्प्रागभावस्य निवर्तको न तु ज्ञानम्, तथापि ज्ञानस्यापि व्यवहारद्वारा तत्प्रागभावनिवर्तकत्वम्। प्रयोजकत्वमात्रस्यैव साध्यव्यापकतासंभवेन जनकत्वानिवेशे वैयर्थ्यात्, शरीराजन्यत्वोपाधौ शरीरनिवेशवत्। तात्त्विकप्रमात्वस्य हेतुत्वे तूक्तनिवृत्तिजनकत्वमपि साधनव्यापकम्; 'विद्वान्नामरूपाद्विमुक्त' इत्यादिश्रुत्या त्वयापि ब्रह्मप्रमाया घटाद्यभावनिवर्तकत्वेन वाच्यत्वादिति भावः॥

ननु—घटश्चैत्रेच्छा, चैत्रभ्रमो वा, स्वप्रागभावान्यानादिनिवर्तकः, घटत्वादिच्छात्वाद्भ्रमत्वाद्वा, पटवत् मैत्रेच्छावत् मैत्रभ्रमवद्वेत्यपि स्यात्तत्राह—**विपक्षेति**। प्रमापक्षकोक्तानुमान एवेत्यादिः। न जानामीत्याद्यनुभवो न ज्ञानाभावविषयक इत्युक्तम्। रूप्यादेश्च शुक्त्यादिनिष्ठतया प्रतीयमानस्य शुक्त्यादिनिष्ठमेव परिणामि वाच्यम्; तच्च लाघवात् अनादिज्ञानेनाज्ञानं नष्टमित्यनुभवादुपादाननाशं विनोपादेयनाशासंभवाच्च ज्ञाननिवर्त्यमित्यस्मदनुमानमेव सतर्कम्, न तु त्वदनुमानम्; साध्यं विनापि हेतुसंभवादिति भावः। **साध्याप्रसिद्धेः**।

SGDF
Sri Gargeshwari Digital Foundation

त्तरप्रमा, स्वाभावातिरिक्तस्वविरोधिनिवर्तिका, प्रमात्वात्, प्रमोत्तरप्रमावत्; ज्ञानत्वम्, स्वविषयावरणनिवर्तकनिष्ठम्, अप्रकाशितार्थप्रकाशवृत्तित्वात्, आलोकत्ववत्; अनित्यज्ञानम्, अभावत्वानाधिकरणस्वविरोधिसमानाधिकरणम्, प्रयत्नान्यत्वे सति सविषयत्वे सत्यनित्यत्वात्, अनित्येच्छावत्; सा हि तादृग्द्वेषसमानाधिकरणा। न चैतेष्वप्रयोजकत्वशङ्का; विपक्षबाधकतर्कस्योक्तत्वात्। एवमन्यदप्यूहनीयम्। ज्ञानविरोधित्वम्, अनादिभावत्वसमानाधिकरणम्, सकलज्ञानविरोधिवृत्तित्वात्, दृश्यत्ववत्। यद्वा अनाद्यभावविलक्षणत्वम्, ज्ञान-

---

एतद्भ्रमजनकं यद्बाध्यं तदप्रसिद्ध्या तदन्योपादानकत्वस्य साध्यस्याप्रसिद्धेः। बाध्योपादानकं नेति साध्यकरणेऽपि स दोषः साध्यवैकल्यं च। न चैतद्भ्रमजनकं यद्बाध्यान्यत्तदुपादानकत्वं साध्यमिति–वाच्यम्; ब्रह्माविद्योभयेत्याद्युक्तदोषतादवस्थ्यात्, जनकान्तवैयर्थ्याच्च। अबाध्योपादानकत्वे भ्रमस्य बाध्यत्वानुपपत्तिः प्रतिकूलतर्कोऽपि बोध्यः। **अप्रकाशितार्थप्रकाशेति**। प्रमालोकान्यतरेत्यर्थः। नित्यज्ञाने बाधात्–**अनित्येति**। **स्वविरोधीति**। स्वनाश्यत्वस्वप्रतिबध्यत्वान्यतरयुक्तेत्यर्थः। निवृत्तिः प्रवृत्त्यभावो न तु यत्नविशेष इति मते प्रवृत्तौ व्यभिचारात् **प्रयत्नान्यत्वे सतीति**। **तादृग्द्वेषेति**। उक्तविरोधिद्वेषेत्यर्थः। समानविषययोः समानाधिकरणयोरिच्छाद्वेषयोर्मिथः प्रतिबन्धकत्वम्। अन्यथा तयोरेकसत्त्वेऽपरोत्पादापत्तेरिति भावः। **ज्ञानविरोधित्वं**––ज्ञानप्रयुक्तनाशप्रतियोगित्वम्। तेनाज्ञानसिद्धिपूर्वं दृश्यमात्रस्य साक्षाज्ज्ञाननाश्यत्वासिद्धावपि न साध्यवैकल्यम्। परमतेऽप्यदृष्टादीनां ज्ञानप्रयुक्तनाशप्रतियोगित्वमावश्यकमिति भावः। **अनादिभावत्वं**––अभावविलक्षणानादित्वम्॥

SGDF
Sri Gargeshwari Digital Foundation

विरोधिवृत्ति, अनाद्यभावविलक्षणमात्रवृत्तित्वात्, अभिधेयत्ववदिति। एवमभावविलक्षणाज्ञानेऽनुमानान्यूहनीयानि॥

इत्यद्वैतसिद्धावविद्यानुमानोपपत्तिः॥

अथाविद्यावादे श्रुत्युपपत्तिः

एवं श्रुतयश्च। तत्र छान्दोग्ये अष्टमाध्याये—'तद्यथा हिरण्यं निधिनिहितमक्षेत्रज्ञा उपर्युपरि सञ्चरन्तो न विन्देयुरेवमेवेमाः सर्वाः प्रजा अहरहर्गच्छन्त्य एतं ब्रह्मलोकं न विन्दन्त्यनृतेन प्रत्यूढा' इति श्रुतिर्ब्रह्मज्ञानप्रतिबन्धकत्वेनानृतं ब्रुवाणा तादृगज्ञाने प्रमाणम्। न च—ऋतशब्दस्य 'ऋतं पिबन्ता' वित्यत्र सत्कर्मणि प्रयोगदर्शनात् 'ऋतं सत्यं तथा धर्म' इति स्मृतेश्च ऋतशब्दस्य सत्कर्मपरत्वादनृतशब्दस्य दुष्कर्मपरत्वमिति—वाच्यम्; उत्तरत्र 'य आत्मापहतपाप्मा' इत्यादिना आत्मनोऽपहतपाप्मत्वप्रतिपादनेन

तर्कैः सारस्वतै रत्नैश्चन्द्रिकाचन्द्रभूषणैः।
दुरन्तध्वान्तनाशायाज्ञानस्यानुमोदयः॥

॥ इत्यद्वैतसिद्धिव्याख्यायां गुरुचन्द्रिकायां अज्ञानानुमानोपपत्तिः॥

अथाविद्यावादे श्रुत्युपपत्तिः

अनृतेन प्रत्यूढाः—अन्धीभूता अस्फुरद्ब्रह्मस्वरूपकाः। ब्रह्मज्ञानप्रतिबन्धकत्वेन—ब्रह्मस्फुरणाभावव्याप्यत्वेन। अपहतपाप्मत्वेति। पापशून्यस्वभावत्वेत्यर्थः। कादाचित्कपापसत्त्वे तच्छून्यस्वभाव-

SGDF
Sri Gargeshwari Digital Foundation

दुष्कर्मप्रत्यूढत्वविरोधात्, सुषुप्तौ कर्ममात्रनाशे दुष्कर्मणोऽप्यभावात्, कारणात्मनावस्थाने चाज्ञानस्यावश्यकत्वात्, कर्मण आवरणत्वानुपपत्तेश्च । ब्रह्मवेदनप्रतिबन्धकतया ह्यनादिब्रह्मावारकं ज्ञाननिवर्त्यं वाच्यम् । तथाच कर्मैव प्रधानमपि नानृतपदाभिधेयम्; तयोर्ज्ञानानिवर्त्यत्वात् । ज्ञाननिवर्त्यत्वे च 'भूयश्चान्ते विश्वमायानिवृत्ति' रित्यादिश्रुतिर्मानम् । न चात्र

त्वमात्मनोऽनुपपन्नम् । न च—मिथ्याभूतं पापं प्रतिबन्धकमास्तामिति—वाच्यम्; अविद्यां विना तत्परिणामरूपस्य तस्यासंभवादिति भावः । **कारणात्मना** कारणगतसंस्काररूपेण । **अनादीति** । न च -पापानां प्रवाहरूपेणानादित्वात्पापत्वेन प्रतिबन्धकत्वं संभवतीति—वाच्यम्; पापस्य पुण्यस्य मिथ्याज्ञानजन्यसंस्कारस्य वा 'अस्ति भाती' ति व्यवहारे प्रतिबन्धकत्व[1]मित्यत्र विनिगमकाभावादनादिपापादिभिन्नं प्रतिबन्धकत्वेन कल्प्यत इत्यस्यैवोचितत्वात्[2] । न चानृतशब्दस्य पापे मुख्यवृत्तिसंभव एव विनिगमक इति—वाच्यम्; ऋतशब्दस्य सत्यवाचकस्य सत्यब्रह्मप्रापकत्वेन पुण्यं हि गौणार्थो न मुख्यार्थः, तथाच सत्यब्रह्मविरोधित्वेन पुण्यवासनयोरप्यनृतशब्दगौणार्थता संभवत्येव । न चास्तु तथा, श्रुत्यैव तेषां प्रतिबन्धकत्वोक्त्या नानादेरज्ञानस्य प्रतिबन्धकताया युक्त्या कल्पनमिति—वाच्यम्; पापादीनां श्रुत्यैव मिथ्यात्वोक्तेस्तन्निर्वाहार्थमनाद्यज्ञानस्यावश्यकत्वादिति भावः । न चानादि[3] प्रधानमस्तु प्रतिबन्धकम्; पापादिकं तु नैकं प्रतिबन्धकं संभवतीति विनिगमकाभावः । ऋतब्रह्मविरोधिप्रपञ्चभिन्नत्वादनृतपदेन तदेवोच्यतां तत्राह—**तथाचेति** । **विश्वमायेति** । असत्त्वापादकाभानापादकसर्वाज्ञानेत्यर्थः । आदि-

---

[1] व्यवहारप्रतिबन्धकत्व-ग. [2] इत्यस्यौचित्यात्-ग. [3] नन्वनादि-ग.

SGDF
Sri Gurgeshwari Digital Foundation

निवृत्तिस्तरणमात्रम्, 'मायामेतां तरन्ति ते' इति स्मृते-रिति—वाच्यम्; ज्ञानहेतुकतरणस्य निवृत्त्यतिरिक्तस्यासंभवेनोभयोर्नाशमात्रार्थत्वात्। न च—'तम आसी'दित्यस्य सत्त्वप्रतिपादकस्य बाधकं विना पारमार्थिकसत्त्वपरत्वेन कथमावरणस्यानृतत्वमिति—वाच्यम्; 'नासदासीन्नो सदासी'दित्यनेन पारमार्थिकत्वतुच्छत्वयोर्निषेधेन व्यावहारिकसत्त्वपरत्वात्। न चानेन माया प्रतिपाद्यते; मायाशब्दार्थश्च नाज्ञानम्, मायिनो ब्रह्मणोऽज्ञानित्वे सर्वज्ञत्वनिरवद्यत्वादिश्रुतिविरोधादिति—वाच्यम्; उपाधेः प्रतिबिम्बपक्षपातित्वेनेश्वरासार्वज्ञ्याद्यापादनायोगात्, सार्वज्ञ्याद्यैश्वर्यस्य मायानिबन्धनत्वाच्च। न च—'मय ज्ञान' इति धात्वर्थानुसारान्माया कथमज्ञानमिति-वाच्यम्; 'एवमेवैषा माया स्वाव्यातिरिक्तानि परिपूर्णानि क्षेत्राणि दर्शयित्वा 'जीवेशावाभासेन करोति माया चाविद्या च स्वयमेव भवती'ति श्रुत्या मायाविद्ययोरैक्यप्रतिपादनान्माया अज्ञानमेव। 'घट चेष्टाया'मिति धातुजस्यापि घटशब्दस्य

पदात् 'तरति शोकमात्मवि' दित्यादिश्रुतिः, 'ज्ञानेन तु तदज्ञानं येषां नाशितमि'त्यादिस्मृतिश्च मानम्। **नासदासीदिति**। उक्तवाक्यपूर्ववर्तिनेत्यादिः। **प्रतिबिम्बपक्षपातित्वेन** प्रतिबिम्बं प्रत्येवावरकत्वादिना। **ऐक्यप्रतिपादनादिति**। शुद्धसत्त्वमलिनसत्वाभ्यामुपाधिभ्यां मायाविद्ययोर्भेदेन मायागतः प्रतिबिम्बरूप आभास ईशः, अविद्यागतः स जीव इति जीवेशावित्यादिनोक्त्वा, 'माया चाविद्या च स्वयमेवे'त्यनेनैकव्यक्तिरूपत्वप्रतिपादनादित्यर्थः। वस्तु निर्वाच्यम्। विचित्रकार्यपरिणामित्वेन मायापदस्यावरकत्वेनाविद्यापदस्य प्रयोगः, मायायां बिम्बमीशः प्रतिबिम्बं जीवः। तथाचोक्तोपाधिकृतभेदस्याप्य-

SGDF
Sri Gargeshwari Digital Foundation

चेष्टावाचकत्वाभाववदत्रापि ज्ञानवाचकत्वाभावात् । माया प्रज्ञा वयुनमिति ज्ञानपर्याये निघण्टुकारवचनं च ज्ञानाकारपरिणामित्वादज्ञानस्योपपन्नम् । वृत्तिज्ञानस्याज्ञानाभिन्नत्वादज्ञान-

---

नङ्गीकारान्मायाविद्ययोरत्यन्ताभेद इति प्रतिपादनादित्येवार्थः । **परिणामित्वादिति ।** मायापरिणामत्वेन ज्ञाने मायापदप्रयोगः । सुखादेर्मायापरिणामत्वेऽपि वृत्तिज्ञान एव भूरिप्रयोगवशान्निरूढलक्षणेति भावः । वस्तुतः प्रमित्यर्थकस्य माधातोर्मायेति पदं ज्ञानार्थकं 'माच्छाससिसूभ्यो य' इत्यौणादिकसूत्रसिद्धयप्रत्ययान्तम्, 'मय ज्ञान' इति तु पाणिनीयधातुपाठे नास्त्येव ; 'अयवयपयमयचयतयणयगता'वित्यस्यैव धातुपाठे सत्त्वात् । यत्तु—'चिन्तिपूजी'त्यादौ चकारान्मयधातोरङ्प्रत्यय इति—तन्न ; चकाराच्चोलयतेरङ्प्रत्ययेन तुलेति हरदत्तादिभिरुक्तत्वात्तुलाशब्दस्याङ्प्रत्ययान्तत्वेऽपि मायाशब्दस्य तथात्वे मानाभावात्, दीर्घत्वासंभवान्मायापदस्योज्वलदत्तीयादिवृत्तिषु माच्छेत्यादिसूत्रोदाहरणत्वेनोक्त्यनुपपत्तेश्च । तथा च 'मा मान' इति धातुपाठान्मानस्य च परिणामस्येव ज्ञानरूपस्यापि संभवेन योगेन ज्ञानार्थकत्वेऽपि रूढ्याऽज्ञानार्थकं मायापदम् ॥

यत्तूज्वलदत्तादिवृत्तौ माया छद्मेति व्याख्यानं तदस्मदविरुद्धमेव ; दुर्घटकार्यकारित्वस्य रूढ्यर्थगुणस्य छद्मन्यपि संभवात् । अत एव 'माया स्यात्साम्बरीबुद्ध्योर्मायः पीताम्बरे सुरे' इति मेदिन्यप्यविरुद्धा ; साम्बर्या[1] विद्यायामप्युक्तरूढ्यर्थगुणसंभवात् । न च दुर्घटकारित्वमेव रूढ्यर्थोऽस्त्विति—वाच्यम् ; 'ऋतेऽर्थं यत्प्रतीयेते'त्यादिस्मृत्या मृषात्वविशिष्टस्य मायापदशक्यत्वबोधनात् । एवं च दुर्घटकारिणि निरूढलक्षणास्वीकाराद्भूरिप्रयोगः तिलरसमुख्यार्थकस्यापि तैलपदस्य

---

[1] शाम्बर्या—ग.

SGDF
Sri Gargeshwari Digital Foundation

स्यैवानिर्वचनीयविचित्रशक्तियोगान्न विचित्रशक्तिमति माया-शब्दप्रयोगानुपपत्तिः; क्वचिन्मणिमन्त्रादौ तत्प्रयोगस्तूपचारात्। न च—शुक्तिरूप्यादौ मायाशब्दाप्रयोगान्न मृषार्थोऽयमिति—वाच्यम्; वज्रादौ पृथिवीत्वादिव्यवहाराभावेऽपि

---

[1]सर्षपरसे निरूढगौणत्वेन भूरिप्रयोगवत्। वस्तुतोऽन्यथाभावेन ज्ञायमानक्रियाया एव छद्मत्वेन छद्मापि मायापदरूढ्यर्थमिथ्याभूतमेवेति ध्येयम्। **विचित्रशक्तीति**। विचित्रोपादानत्वेत्यर्थः, अनिर्वचनीयविचित्रस्य निमित्तमात्रे मायाविपुरुषादौ तत्प्रयोगाभावात्। **क्वचिदिति**। मन्त्रविशेषादिरूपमायाश्रयत्वेन पुरुषे मायाविपदप्रयोगादित्यादिः। **उपचारात्** मिथ्याभूतार्थनिमित्तत्वात्। **व्यवहाराभावेऽपीति**। व्यञ्जकाभावदशायामिति शेषः। व्यञ्जकदशायां तु वज्रादौ पृथिवीत्वादेरिव रूप्यादावपि मायात्वं व्यवह्रियत एव। अत एव—

'यत्तु दृष्टिपथं प्राप्तं तन्मायैव सुतुच्छकम्'॥

इति साङ्ख्यवाक्येन दृश्यमात्रे मायात्वं व्यवहृतम्। किंच 'कष्टं कर्मे' त्यनुभवेन क्रियामात्रस्य दुःखजनकत्वेऽपि 'इदानीं मे दुःख' मिति सर्वदा न व्यवहारः; प्रकृष्टदुःखकाल एव तद्व्यवहारात्, तथा चमत्कारविशेषाधायकत्वेन प्रकृष्टमायायामेव मायापदप्रयोगः। अतएव—

'माया ह्येषा मया सृष्टा नैवं मां द्रष्टुमर्हसि'॥

इति नारदं प्रति भगवद्वाक्ये दृश्यमानस्य विश्वरूपस्य प्रतिपन्नोपाधौ निषेधत्वे मायात्वं हेतूकृतम्। 'यदचरस्तन्वा वावृधानो बलानीन्द्रप्रब्रुवाणो जनेषु। मायेत्साते यानि युद्धान्याहुर्नाद्य शत्रुं ननु पुरा विवित्से' इत्यस्यामृचि वेद्यशत्रोर्निषेध्यत्वे मायात्वं हेतूकृतम्। तथा

---

[1] सार्षप—**क**.

SGDF
Sri Gangeshwari Digital Foundation

पृथिवीत्ववत् व्यवहाराभावेऽपि मायात्वानपायात्, ऐन्द्रजालिकादौ बहुशो मायाशब्दप्रयोगदर्शनाच्च, मायाया अज्ञानान्यत्वे ज्ञाननिवर्त्यत्वविरोधाच्च। नीहारतमःशब्दावप्यस्मिन्मते अज्ञानस्यावारकत्वाद्युज्येते नान्यमते। अनृतनीहारादि-

---

'भूतानीन्द्रियाणि विराजं देवताः कोशांश्च सृष्ट्वा प्रविश्यामूढो मूढ इव व्यवहरन्नास्ते माययैव तस्मादद्वय एवायमात्मे' ति तापनीये भूतेन्द्रियादीनां मायामयत्वेन तत्प्रविष्टस्याप्यात्मनस्तच्छून्यत्वेनाद्वयस्वभावत्वमुक्तम्। 'मयश्च सम्बरश्चैव[1] महामायाधरावुभौ। पर्जन्यवारुणी माये व्यधत्ता' मिति हारिवंशे पर्जन्यवारुणास्त्राभ्यां मन्त्रविशेषविशिष्टाभ्यां जनिते मिथ्याभूते मायापदं प्रयुक्तम्। भागवतादावपि मिथ्यामारीचस्य 'मायामृगं दयितयेप्सित' मित्यादिना मायात्वमुक्तम्। रामशरवेध्यत्वादिकं तु न सत्यत्वे प्रयोजकम्; यथानुभवमर्थक्रियाकारित्वस्य मिथ्याभूतेऽपि संभवात्, मिथ्यात्वेन त्वदुक्तैन्द्रजालिकादेरर्थक्रियाकारित्वदर्शनात्। ऐन्द्रजालिकादौ मायाशब्दप्रयोगादपि तस्य मिथ्यारूढत्वम्। न च—शक्तिविशेषरूपमायापदमुख्यार्थजन्यधीविषयत्वात्तत्रोपचारात्तत्प्रयोग इति—वाच्यम्; मिथ्यारूपमुख्यार्थजनकत्वेन शक्तिविशेष एवोपचारात्, अन्यथोक्तस्मृत्यादिविरोधादित्याशयेनाह—**ऐन्द्रेति**। **नीहारतमःशब्दाविति**। 'न तं विदाथ य इमा जजान अन्यद्युष्माकमन्तरं बभूव। नीहारेण प्रावृता जल्प्या चासुतृप उक्थशासश्चरन्ती' त्यत्र, 'सुषुप्तिकाले सकले विलीने तमोऽभिभूत' इत्यादौ चेत्यादिः। **युज्येतेति**। **अज्ञान** इत्यादिः। **नान्यमत इति**। अज्ञानस्यैवावारकत्वादिसंभवस्योक्तत्वादिति शेषः। अत एव माधवीयभाष्ये व्याख्यातं 'हे नरास्तं न जानीथ य इमाः प्रजा जजान जनितवान् तत्र हेतुः

---

[1] शम्बरश्चैव–ग

SGDF
Sri Gargeshwari Digital Foundation

शब्दानां दुष्कर्मपरत्वे श्रुत्यन्तरोक्तजीवेशभेदकत्वोपादानत्वादि-विरोधश्च। तस्मात् 'अनृतेन प्रत्यूढाः' 'नीहारेण प्रावृताः' 'तम आसीत्' 'मायां तु प्रकृतिं विद्यात्' 'अजामेकां लोहितशुक्लकृ-

---

युष्माकामन्यदेवान्तरं व्यवधानं बभूव तदुच्यते नीहारसदृशेनाज्ञानेन प्रावृता यूयं जल्प्या 'अहं मनुष्य' इत्यादिजल्पनशीला असून् प्राणान् तर्पयन्ति उक्थं स्तोत्रविशेषादिकं शंसन्ति चरन्ति ऐहिकामुष्मिकभोगमात्रपरा' इति। **दुष्कर्मपरत्वे** आवरकपापपरत्वे। **श्रुत्यन्तरेति**। 'अनीशया शोचति मुह्यमान' इत्यादिश्रुत्युक्तेत्यर्थः। आवरकस्येत्यादिः। मोहप्रयुक्तेनेशाया ईशत्वस्य विरोधिना ईशभेदेन शोचति संसरतीत्युक्तश्रुत्यर्थः। एषा मायेत्याद्युक्तश्रुत्यापि जीवेशभेदकत्वं कार्यमात्रोपादानत्वमावरकादिरूपत्वं च मायाया उक्तम्। **उपादानत्वादीत्यादिना** त्रिगुणात्मकत्वादि ग्राह्यम्। तथाच कर्मण आवरकत्वे तस्यैव मोहत्वाद्भेदकत्वादीति वाच्यम्। न च सादेस्तस्यानादिभेदप्रयोजकत्वं सकलकार्योपादानत्वादिकं वा संभवतीति भावः।

'विभेदजनकेऽज्ञाने नाशमात्यन्तिकं गते।
भवत्यभेदो भेदश्च तस्याज्ञानकृत'

इति विष्णुपुराणादौ स्पष्टमज्ञानस्य भेदकत्वादीति[1] बोध्यम्।

'देवादिभेदमध्यास्ते नास्त्येवावरणो[2] हि सः'

इति विष्णुपुराणे भेदनास्तित्वे आवरकप्रयुक्तत्वस्य हेतूकृतत्वात्तस्य तत्प्रामाणिकमित्यादि बोध्यम्। **तस्मादित्यादि**। नीहारेण जल्प्या असुतृप उक्थशासश्चरन्तीत्यन्वयाद्दृश्यमात्रस्य नीहाररूपावरणप्रयोज्यत्वं 'नासदासीन्नो सदासीत्तम आसी' दित्यादौ सदसद्विलक्षणत्वं प्रोक्तं न पापस्य संभवतीत्यदि बोध्यम्॥

---

[1]भेदकत्वादि–क. ग.　　[2]वरणे–ग.

SGDF
Sri Gargeshwari Digital Foundation

ष्णाम्' 'अविद्यायामन्तरे वर्तमानाः' 'भूयश्चान्ते विश्वमाया-निवृत्ति'रित्याद्याः श्रुतयो वर्णिता अज्ञाने प्रमाणमिति स्थितम् ॥

इत्यद्वैतसिद्धावविद्याप्रतिपादकश्रुत्युपपत्तिः ॥

'तर्कैः सारस्वतै रत्नैश्चन्द्रिकाचन्द्रभूषणैः ।
दुरन्तध्वान्तनाशायाविद्याश्रुत्युपपादनम् ॥

॥ इति गुरुचन्द्रिकायामविद्याप्रतिपादकश्रुत्युपपत्तिः ॥

SGDF
Sri Gargeshwari Digital Foundation

मैसूरु राजकीयप्राच्यकोशागारे परिष्कृत्य देवनागराक्षरैः संमुद्रितानां क्रय्याणां प्रबन्धानां

प्रसिद्धिपत्रिका.

श्रौतसूत्रम्.

		रू.	आ.	पै.
73	(1) आपस्तम्बशुल्बसूत्रं व्याख्यात्रयोपेतम्....	2	12	0

गृह्यसूत्रम्.

41	(2) खादिरगृह्यसूत्रं रुद्रस्कन्दीयसहितम्	1	0	0
55	(3) बोधायनगृह्यसूत्रम् परिशिष्टसहितम्	2	4	0

धर्मसूत्रम्.

50	(4) गौतमधर्मसूत्रं मस्करिव्याख्यासहितम्	3	8	0

धर्मशास्त्रनिबन्धः.

43	(5) स्मृतिचन्द्रिका (प्रथमसंपुटं संस्कारकाण्डः).	1	8	0
44	(6) स्मृतिचन्द्रिका (द्वितीयसंपुटं आह्निककाण्डः).	2	8	0
45	(7) स्मृतिचन्द्रिका (तृतीयसंपुटं व्यवहारकाण्डः).	2	0	0
48	(8) स्मृतिचन्द्रिका (चतुर्थसंपुटं व्यवहारकाण्डः).	3	0	0
52	(9) स्मृतिचन्द्रिका (पञ्चमसंपुटं श्राद्धकाण्डः)	3	4	0
56	(10) स्मृतिचन्द्रिका (षष्ठसंपुटं आशौचकाण्डः).	1	8	0

SGDF
Sri Gargeshwari Digital Foundation

			रू.	आ.	पै.
71	(11)	सरस्वतीविलासः प्रतापरुद्रविरचितः (व्यवहारमात्रम्).	2	8	0

अर्थशास्त्रम्.

64	(12)	अर्थशास्त्रं कौटिलीयम्	3	0	0
65	(13)	अर्थशास्त्रपदसूची संपुटं I	2	8	0
66	(14)	,, संपुटं II	2	8	0
68	(15)	,, संपुटं III	2	0	0

अलङ्कारशास्त्रम्.

51	(16)	अलङ्कारमणिहारः संपुटं I	3	0	0
58	(17)	,, संपुटं II ..	3	8	0
62	(18)	,, संपुटं III	2	8	0
72	(19)	,, संपुटं IV	2	4	0
60	(20)	काव्यप्रकाशः सङ्केताख्यटीकायुतः	3	8	0

वैद्यशास्त्रम्.

71	(21)	आयुर्वेदसूत्रं योगानन्दीयव्याख्योपेतम्	2	0	0

ज्योतिश्शास्त्रम्.

63	(22)	विद्यामाधवीयं विष्णुशर्मविरचित— मुहूर्तदीपिकाख्यव्याख्यायुतम् संपुटं I	2	0	0
67	(23)	,, संपुटं II	2	0	0
70	(24)	,, संपुटं III	1	8	0

अद्वैतवेदान्तः.

75	(25)	अद्वैतसिद्धिः, गुरुचन्द्रिकोपेता संपुटं I	3	12	0
78	(26)	,, संपुटं II			

SGDF
Sri Gargeshwari Digital Foundation

विशिष्टाद्वैतवेदान्तः.

			रू.	आ.	पै.
76	(27)	सर्वार्थसिद्धयाख्यवृत्तियुत तत्त्वमुक्ताकलापः—आनन्ददायिनी—भावप्रकाशा—व्याख्याद्वयोपेतः—संपुटं I.	4	0	0

द्वैतवेदान्तः.

53	(28)	ब्रह्मसूत्रभाष्यं आनन्दतीर्थीयं तत्वप्रकाशिकातात्पर्यचन्द्रिकाप्रकाशैः सहितम्—संपुटं III.	4	0	0
59	(29)	ब्रह्मसूत्रभाष्यं आनन्दतीर्थीयं तत्वप्रकाशिका—तात्पर्यचन्द्रिका—प्रकाशैः सहितम्—संपुटं IV.	3	8	0
74	(30)	तर्कताण्डवं न्यायदीपाख्यव्याख्यायुतम्-संपुटं I.	3	0	0
77	(31)	तर्कताण्डवं न्यायदीपाख्यव्याख्यायुतम्-संपुटं II.	2	0	0

प्रकीर्णकम् .

69	(32)	अभिलषितार्थचिन्तामणिः—संपुटं I. (नानाशास्त्रीयविषयसंग्रहः).	2	0	0

SGDF
Sri Gargeshwari Digital Foundation

ಮೈಸೂರು ಗವರ್ನಮೆಂಟ್ ಓರಿಯಂಟಲ್ ಲೈಬ್ರರಿಯಿಂದ ಪ್ರಕಟಿಸಲ್ಪಟ್ಟು ಮಾರಾಟಕ್ಕೆ ಸಿದ್ಧವಾಗಿರುವ

ಕನ್ನಡಗ್ರಂಥಗಳು.

Pl. No.			ರೂ॥	ಆ.
3	(1)	ಸದಾನಂದಯೋಗಿಯ ಮಹಾಭಾರತ—ಪೌಲೋಮ, ಆಸ್ತೀಕಾದಿ ಪರ್ವಗಳು.	1	8
4	(2)	ಕುಮಾರವ್ಯಾಸನ ಮಹಾಭಾರತ— ಸಂಭವಪರ್ವ	2	0
5	(3)	,, ಜತುಗೃಹಾದಿಪರ್ವ	1	12
6	(4)	,, ಸಭಾಪರ್ವ	1	12
7	(5)	,, ಅರಣ್ಯಪರ್ವ	2	0
8	(6)	,, ವಿರಾಟಪರ್ವ	1	8
12	(7)	,, ಉದ್ಯೋಗಪರ್ವ	1	2
20	(8)	,, ಭೀಷ್ಮಪರ್ವ	1	0
21	(9)	,, ದ್ರೋಣಪರ್ವ	1	12
9	(10)	ಲಿಂಗಣ್ಣನ ಕೆಳದಿನೃಪವಿಜಯ	1	8
10	(11)	ಸೋಮರಾಜನ ಉದ್ಭಟಕಾವ್ಯ	2	0
11	(12)	ರುದ್ರಭಟ್ಟನ ಜಗನ್ನಾಥವಿಜಯ	2	12
13	(13)	ಸೋಮನಾಥನ ಅಕ್ರೂರಚರಿತ್ರೆ	1	0
14	(14)	ನಯಸೇನನ ಧರ್ಮಾಮೃತ—ಸಂ. I	2	4
15	(15)	ಗೋವಿಂದವೈದ್ಯನ ಕಂಠೀರವನರಸರಾಜ ವಿಜಯ.	2	8
16	(16)	ನಯಸೇನನ ಧರ್ಮಾಮೃತ—ಸಂ. II	1	4
17	(17)	ವೀರಭದ್ರನೃಪಾಲನ ವೀರಭದ್ರವಿಜಯ	1	4
18	(18)	ಜನ್ನನ ಅನಂತನಾಥಪುರಾಣ	2	0
19	(19)	ಸಕಲವೈದ್ಯಸಂಹಿತಾಸಾರಾರ್ಣವ ಸಂ. I	1	14

SGDF
Sri Gargeshwari Digital Foundation

ಮೈಸೂರು ವಿಶ್ವವಿದ್ಯಾನಿಲಯದಿಂದ ಪ್ರಕಟಿಸಲ್ಪಟ್ಟು ಮಾರಾಟಕ್ಕೆ
ಸಿದ್ಧವಾಗಿರುವ

ಕನ್ನಡಗ್ರಂಥಗಳು.

			ರೂ.	ಆ.
1.	ಹರಿಶ್ಚಂದ್ರಕಾವ್ಯಸಂಗ್ರಹ	....	0	12
2.	ಕಾದಂಬರೀಸಂಗ್ರಹ	....	0	12
3.	ಪ್ರಭುಲಿಂಗಲೀಲೆಯಸಂಗ್ರಹ	....	0	12
4.	ಸಾಕ್ರಟೀಸನ ಕೊನೆಯ ದಿನಗಳು	ಸಾದಾಬೈಂಡು....	0	12
		ಕ್ಯಾಲಿಕೊ ,, ...	1	0
5.	ಶ್ರೀರಾಮಕೃಷ್ಣ ಪರಮಹಂಸ	ಸಾದಾಬೈಂಡು....	0	12
		ಕ್ಯಾಲಿಕೊ ,, ...	1	4
6.	ರವೀಂದ್ರನಾಥಠಾಕೂರರು	ಸಾದಾಬೈಂಡು....	0	12
		ಕ್ಯಾಲಿಕೊ ,, ...	1	4
7.	ಆರೋಗ್ಯ, ಅದರ ಜ್ಞಾನ ಮತ್ತು ಸಾಧನ.	ಸಾದಾಬೈಂಡು....	0	12
		ಕ್ಯಾಲಿಕೊ ,, ...	1	4
8.	ಪಂಪರಾಮಾಯಣ ಸಂಗ್ರಹ	ಸಾದಾಬೈಂಡು....	0	12
		ಕ್ಯಾಲಿಕೊ ,, ...	1	4
9.	ಹಣಪ್ರಪಂಚ	ಸಾದಾಬೈಂಡು....	0	12
		ಕ್ಯಾಲಿಕೊ ,, ...	1	4
10.	ಕನ್ನಡಕೈಪಿಡಿ ಸಂಪುಟ ೧	ಸಾದಾಬೈಂಡು....	1	4
		ಕ್ಯಾಲಿಕೊ ,, ...	1	12
11.	ಸಂಸ್ಕೃತ ನಾಟಕ	ಸಾದಾಬೈಂಡು....	0	12
		ಕ್ಯಾಲಿಕೊ ,, ...	1	4

ಪುಸ್ತಕ ದೊರೆಯುವ ಸ್ಥಳ:—

ಕ್ಯೂರೇಟರ್,

ಗವರ್ನಮೆಂಟ್ ಓರಿಯಂಟಲ್ ಲೈಬ್ರರಿ

ಮೈಸೂರು.

SGDF
Sri Gargeshwari Digital Foundation

SGDF
Sri Gargeshwari Digital Foundation

SGDF
Sri Gargeshwari Digital Foundation

SGDF
Sri Gargeshwari Digital Foundation